60. 27. F. 6.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 69 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

Contains the 3rd adhyāya complete.

The scribe adds :

"पातञ्जले महाभाष्ये तृतीयाध्यायमञ्जसा ।
दक्षिणामूर्तिनामायं व्यलिखद्विदुषां मुदे ॥
नीलोत्पलदलच्छायमिच्छया कायमाश्रितम् ।
सीतया सहितं धाम निर्मायं कामयेऽनिशम् ॥"

61. 27. F. 7.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 88 Foll. 18 × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Contains the 2nd adhyāya complete.

62. 27. F. 8.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 52 Foll. $18 \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Clumsy writing.

Breaks off in the 8th āhnika of the 1st pāda of the 1st adhyāya.

The last 3 leaves contain a small portion of the 2nd pāda of the 1st adhyāya of the work.

63. 27. F. 35.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 216 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Injured. Illegible writing.

Begins in the 3rd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 3rd adhyāya.

64. 27. N. 8.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 189 Foll. $17\frac{1}{2} \times 1$ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins towards the end of the 2nd pāda of the 3rd adhyāya and breaks off in the 4th pāda of the 5th adhyāya.

65. 27. N. 38.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 183 Foll. 16 × 1 inches. 9 lines in a page. Grantha script. Old. Much injured. Legible writing.

Contains the 1st adhyāya complete.

66. 27. O. 9.

महाभाष्यम् —पतञ्जलिकृतम्

Palm-leaf. 106 Foll. $12\frac{1}{4} \times 1\frac{3}{4}$ inches

14 lines in a page. Grantha script. Old. Good writing.

Contains the 1st pāda of the 1st adhyāya complete.

67. 36. E. 13.

महाभाष्यम् —पतञ्जलिकृतम्

Paper. 159 Foll. 15 × 5¾ inches. 16 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the 1st pāda of the 1st adhyāya only.

The MS. contains also Kaiyaṭa's Pradīpa and Nāgeśa's Uddyota for this portion.

68. 40. E. 28.

महाभाष्यम् —पतञ्जलिकृतम्

Paper. 20 Foll. 12 × 5¾ inches. 16 lines in a page. Telugu script. Old. Good. Good writing.

Contains the 8th adhyāya only which breaks off in the 2nd pāda.

The MS. contains also Kaiyaṭa's Pradīpa for this portion.

69. 8. H. 28.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 288 Foll. 16 × 7 inches. 24 lines in a page. Devanāgarī script. Old. Good. Good writing. Bound in 2 volumes.

A commentary on Patañjali's Mahābhāṣya, by Kaiyaṭa son of Jaiyaṭa and pupil of Maheśvara. He is assigned to the 11th century A. D.

Contains the adhyāyas 1 to 3 only.

The MS. contains also the text of the Mahābhāṣya for this portion.

Beginning :

सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियम् ।
सदसद्रूपतातीतमदृश्यं मायया वृतैः ॥ १ ॥
ज्ञानलोचनसंलक्ष्यं नारायणमजं विभुम् ।
प्रणम्य परमात्मानं सर्वविद्याविधायिनम् ॥ २ ॥
पुरुषाः प्रतिपद्यन्ते देवत्वं यदनुग्रहात् ।
सरस्वतीं च तां नत्वा सर्वविद्याधिदेवताम् ॥ ३ ॥
पदवाक्यप्रमाणानां पारं यातस्य धीमतः ।
गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनम् ॥ ४ ॥
महाभाष्यार्णवावारपारीणं विवृतिप्लवम् ।
यथागमं विधास्येऽहं कैयटो जैयटात्मजः ॥ ५ ॥
भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः ।
छात्राणामपहास्यत्वं यास्यामि पिशुनात्मनाम् ॥६॥
तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङ्गुवत् ॥७॥

महाभाष्यकारो विवरणकारत्वाद्व्याकरणस्य साक्षात्प्रयोजनमाह—अथ शब्दानुशासनमिति । प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद्वक्ष्यन्ते । स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावद्व्याचष्टे—अथेत्ययमिति । इतिशब्दोऽथशब्दस्य स्वरूपेऽवस्थापनाय प्रयुक्तः ।

Colophon :

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।

End :

तुल्यजातीयस्येति । सिज्लुकं विना आतः सिचश्चानन्तरो झिर्न भवतीति सिज्लुगन्तस्याकारान्तस्येह ग्रहणमिति नियमेन सिज्लुगन्तमेव निवर्त्यते ।

उत्तरार्थमिति । अन्यथैकसंज्ञाधिकारादन्यत्र संज्ञासमावेशस्य दृष्टत्वाल्लिडादेशानां सार्वधातुकसंज्ञापि स्यात् । ततस्तन्निमित्तविकरणप्रसङ्गः । आर्धधातुकसंज्ञा चेडाद्यर्था स्यात् । **आर्धे ॥ अनुक्रान्तापेक्षमिति** । अनुक्रान्ता ये प्रत्यया: तिङ्शिद्भिर्जिता: त आर्धधातुकसंज्ञा भवन्ति । न तु अनुक्रंस्यमाना इत्यर्थः । **धातोरिति** । धातोरित्येवं धातुशब्दं समुच्चार्य ये विहिता इत्यर्थः ।

Colophon :

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे तृतीयस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् । पादश्चतुर्थः समाप्तः । अध्यायश्च तृतीयः समाप्तः ॥

70. 8. H. 29.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 189 Foll. 13 × 6 inches. 18 lines in a page. Telugu script. Old. Good. Good writing.

Contains the 3rd and 4th pādas of the 1st adhyāya and the whole of the 3rd adhyāya.

The MS. contains also the text of the Mahābhāṣya for this portion.

71. 8. H. 30.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 134 Foll. 14½ × 7 inches. 19 lines in a page. Telugu and Devanāgarī scripts. Old. Good. Good writing.

Contains the 5th adhyāya complete and the 6th adhyāya incomplete.

The MS. contains also the text of the Mahābhāṣya for this portion.

72. 8. I. 3.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 676 Foll. 10 × 8 inches. 22 lines in a page. Telugu script. Old. Good. Good writing.

Contains the adhyāyas 1 to 8 complete.

End :

एकशेषनिर्देशाद्वेति । षण्मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते । एवमादेशा अपि षडेव । ततश्चैकशेषः । तत्र षण्णां स्थानिनां निर्देशसामर्थ्यात् भिन्नकालौ दीर्घप्लुतौ स्थानिभिर्न गृह्येते । तत्र यथासंख्यं षण्णां विवृतानां स्थाने षडादेशाः संवृता भवन्तीति सिद्धमिष्टम् ।

Colophon :

इत्युपाध्यायजैयटपुत्रकैयटविरचिते व्याकरणमहाभाष्यप्रदीपे अष्टमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् । पादश्च समाप्तोऽध्यायश्च ।

73. 9. D. 7.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 566 Foll. 10½ × 6 inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

Bound in four volumes.

Contains the following portions :

1st adhyāya complete (except the first 2 āhnikas in the 1st pāda) ; 2nd adhyāya complete ; from the 4th pāda of the 6th adhyāya to the end of the 2nd pāda of the 7th adhyāya ; Pādas 2 to 4 of the 8th adhyāya.

The following stanza is found at the end.

श्रुत्वा शास्त्राणि विद्वद्भ्यो यथाप्रज्ञं यथागमम् ।
भाष्यदीपं व्यधत्तेमं कैयटो जैयटात्मजः ॥

74. 10. D. 9.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 805 Foll. 13 × 8 inches. 18 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the following portions :

adhyāya	pāda	āhnikas (when incomplete)
1	1	1—9 (except 3rd āhnika)
,,	3	Complete
5	1 & 2	complete
6	1	1 (incomplete) and 2 to 6 complete
,,	2 to 4	Complete
7	1	1
8	1 to 4	Complete

The MS. Contains also the text of the Mahābhāṣya and Nāgeśa's Uddyota for these portions.

75. 10. D. 22.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 389 Foll. 11½ × 4¾ inches. 10 lines in a page. Devanāgarī script. Old. Good. Clear writing.

Contains the adhyāyas 2 and 3 complete.

Date of copying—śaka 1713. Virodhikṛt year.

The MS. contains also the text of the Mahābhāṣya for this portion.

76. 24. A. 3.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 134 Foll. 14½ × 1½ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Legible writing.

Breaks off in the 1st āhnika of the 2nd pāda of the 1st adhyāya.

77. 24. A. 27.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 19 Foll. 18 × 2 inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

Contains the 1st pāda incomplete of the 7th adhyāya.

The MS. contains also the text of the Mahābhāṣya for this portion.

78. 24. B. 23.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 87 Foll. 18½ × 1¾ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Legible writing.

Breaks off in the 2nd pāda of the 1st adhyāya.

79. 24. C. 23.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 102 Foll. 10½ × 2½ inches. 11 lines in a page. Grantha script. Old. Slightly injured. Legible writing.

Contains the pādas 1 to 3 in the 3rd adhyāya.

Foll. 103 to 110. contain a small portion of the 3rd adhyāya of the Mahābhāṣya.

80. 26. L. 7.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 34 Foll. 18 × 1¼ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the 1st pāda complete and the 2nd pāda incomplete of the 3rd adhyāya.

81. 27. D. 8.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 29 Foll. 15½ × 1⅛ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the first two āhnikas of the 1st pāda of the 1st adhyāya.

The following stanza is found at the end of the 1st āhnika :

"कठिनं कैयटभावं कामरिपुर्वेत्ति कामजनको वा ।
अथ वा कञ्जभवो वा कञ्जानगरस्थनारणभट्टो वा ॥"

The MS. Contains also the text of the Mahābhāṣya for this portion.

82. 27. D. 12.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 45 Foll. 19 × 1½ inches. 7 lines in a page. Telugu script. Old. Much injured. Clumsy writing.

Contains the āhnikas 1 to 3 of the 1st pāda of the 2nd adhyāya.

83. 27. D. 13.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 34 Foll. 18 × 1¼ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the 3rd pāda of the 1st adhyāya.

84. 27. D. 14.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 193 Foll. 15½ × 2½ inches. 17 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the middle of the 1st pāda of the 4th adhyāya and ends in the 8th adhyāya.

The scribe adds :

"श्रीमज्जैयटपुत्रकैयटकृतं भाष्यप्रदीपं महा-
ग्रन्थं लेखितवान् पयोधितनयावासस्य दासाग्रणीः ।
आत्रेयान्वयभूषणस्य वरदाचार्यस्य पुत्रः स्वयं
श्रीरामः प्रियकारणाय विदुषां मोदाय सच्चेतसाम् ॥"

85. 27. D. 15.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 139 Foll. 18½ × 1½ inches. 10 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Breaks off in the 2nd āhnika of the 4th pāda of the 1st adhyāya.

86. 27. D. 17.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Palm-leaf. 76 Foll. 14½ × 1¼ inches.

7 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

Leaves bearing Nos. 3, 12 to 14 and 49 are missing.

Breaks off in the 2nd āhnika of the 1st pāda of the 1st adhyāya.

87. 36. E. 13.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 159 Foll. 15×5¾ inches. 16 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the 1st pāda of the 1st adhyāya complete.

The MS. Contains also the text of the Mahābhāṣya and Nāgeśa's Uddyota for this portion written in each page.

88. 40. E. 28.

महाभाष्यव्याख्या प्रदीपः—कैयटकृतः

Paper. 20 Foll. 12 × 5¾ inches. 16 lines in a page. Telugu script. Old. Good. Good writing.

Contains the 8th adhyāya only which breaks off in the 2nd pāda.

89. 10. D. 9.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Paper. 805 Foll. 13 × 8 inches. 18 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a commentary on Kaiyaṭa's Pradīpa which itself is a commentary on Patañjali's Mahābhāṣya. The author Nāgeśa alias Nāgojibhaṭṭa was the son of Satī and Śivabhaṭṭa with the surname "Kāla". His patron was one Rāmavarman King of Śṛṅgaberapura. Nāgeśa was the expounder of the new school of thought in Pāṇini's grammar. He was the pupil of Haridīkṣita grandson of Bhaṭṭojidīkṣita. Nāgeśa is assigned to the later part of the 17th century A.D.

The MS. contains the following portions :

adhyāya	pāda	āhnikas (when incomplete)
1	1	1 to 9 (except the 3rd āhnika)
,,	3	complete
5	1 and 2	complete
6	1	1 (incomplete), 2 to 6 complete
,,	2 to 4	complete
7	1	1
8	1 to 4	complete

The MS. contains also the Mahābhāṣya and Pradīpa corresponding to the portions mentioned above.

Beginning :

नत्वा साम्बशिवं देवीं वागधिष्ठानिकां गुरून् ।
पाणिन्यादिमुनीन् वन्द्यान् पितरौ च सतीशिवौ ॥
नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गबेरपुराधीशाद्रामतो लब्धजीविकः ॥
नाविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।
भाष्यप्रदीपव्याख्यानं कुर्वेऽहं तु यथामति ॥

भाष्यं व्याचिकीर्षुः शिष्टाचारप्राप्तं मङ्गलं शिष्यशिक्षायै निबध्नाति—सर्वेति । क्त्वान्तानां पञ्चम-

श्लोकोत्तरार्धेनान्वयः । सर्वाकारत्वं सर्वोपादानकारणत्वान्मृदादिवत् । कार्यातिरिक्तदृश्यस्वरूपाभावान्निराकारत्वम् । कर्तृत्वाद्विश्वाध्यक्षत्वम्, 'स ऐक्षत' इति श्रुतेः । अतीन्द्रियत्वं विगतेन्द्रियत्वेन, 'पश्यत्यचक्षुः' इत्यादिश्रुतेः । सर्वप्रत्यक्षीकरणं तु स्वरूपचैतन्येनैव । इन्द्रियाविषयत्वेन वातीन्द्रियत्वम् । सदसद्रूपता प्रपञ्चधर्मः । एतच्च स्त्रियामिति सूत्रे वक्ष्यते । तामतीतं तद्रहितमित्यर्थः । एवं च सदेवेति भावः । नन्वीदृशमस्माभिः कुतो न गृह्यत इत्यत आह—अदृश्यमित्यादि । मायया वृतैरित्यस्य कृत्यमाह—ज्ञानेति ।

Colophon :

इति शिवभट्टसुतसतीगर्भसंभवनागोजिभट्टेन कृते भाष्यप्रदीपोद्द्योते प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।

End :

अनेन व्याकरणाध्ययनप्रवचनाभ्यां सकलपुरुषार्थसिद्धिं दर्शयति । अन्ते मङ्गलाचरणं च कृतं भवति । एवं सूत्रकारेणापि विष्णुवाचकाकारस्य द्विरुच्चारणात् विष्णुस्मरणरूपं मङ्गलमाचरितम् । किं च 'अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी . . रूपा भवति' इति श्रुतेरकारस्य सर्वशब्दप्रकृतित्वात् अ इति ब्रह्मेति शब्दब्रह्मरूपत्वश्रवणाच्च महामङ्गलार्थता । वार्तिककृतापि भगवतः पाणिनेः सिद्धमिति सिद्धशब्दोच्चारणेन कृतं मङ्गलम् । भगवत्पतञ्जलिनापि एकशेषनिर्देशोऽयम् अ अ इत्यन्ते वदता कृतं मङ्गलम । एवं च तदध्यायिनां प्रवक्तॄणां च सकलपुमर्थसिद्धिर्दर्शिता । यथोक्तम्—

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥"

इति सर्वेष्टसिद्धिः ॥

भाष्याब्धेः सप्रदीपस्य भगवत्कृपया मया ।
यथामति कृता व्याख्या प्रीयतां भगवांस्तया ॥
गङ्गा शिवश्च शेषश्च रक्षन्त्वेनां तु सर्वशः ।
सतां हृदयपद्मेषु प्रसिद्धिं प्रापयन्तु च ॥

Colophon :

इति कालोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टविरचिते भाष्यपदीपोद्द्योतेऽष्टमाध्यायस्य चतुर्थपादे प्रथममाह्निकम् । ग्रन्थश्च समाप्तः ॥

90. 9. E. 87.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Paper. 26 Foll. 10 × 4½ inches. 10 lines in a page. Devanāgarī script. Old Good. Clear writing.

2 Leaves bearing the Nos. 6 and 7 are missing.

Contains the Paspaśāhnika incomplete.

91. 9. H. 80.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Paper. 8 Foll. 12½ × 4¾ inches. 19 lines in a page. Telugu script. Old. Good. Good writing.

A fragment containing portions of the 6th and 7th āhnikas of the 1st pāda of the 1st adhyāya.

92. 24. A. 18.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 259 Foll. 13½ × 2 inches. 11 lines in a page. Malayālam and grantha scripts. Old. Good. Good writing.

Begins in the 3rd āhnika of the 1st pāda of the 1st adhyāya and goes on up to the end of the 4th pāda of the 2nd

adhyāya; but wants 12 Sūtras in the middle, *viz.* 1—1—56 to 1—1—67.

93. 27. D. 16.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 112 Foll. 18½ × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Breaks off in the 3rd āhnika of the 1st pāda of the 1st adhyāya.

94. 27. D. 18.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 57 Foll. 13¼ × 1 inches. 8 lines in a page. Telugu script. Old. Injured. Clumsy writing.

Breaks off in the 4th āhnika of the 1st pāda of the 1st adhyāya.

95. 27. D. 22.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 131 Foll. 14½ × 2 inches. 14 lines in a page. Grantha and Malayālam scripts. Old. Slightly injured. Good writing.

Begins in the 3rd āhnika of the 1st pāda and runs up to the end of the 2nd pāda of the 1st adhyāya.

The following stanza is found in Fol. 102 at the end of the 1st pāda.

"हरिदीक्षितपादाब्जसेवनावाप्तबुद्धिना ।
भट्टनागेशविदुषा कृतोऽयं संग्रहो मुदा ॥"

96. 27. D. 26.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 189 Foll. 14½ × 1 inches 4 lines in a page. Grantha script. Old. Injured. Good writing.

Contains for the Sūtras from 1—1—62 to 1—3—10.

97. 27. O. 10.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 62 Foll. 12½ × 1¾ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first 4 āhnikas in the 1st pāda of the 1st adhyāya.

98. 30. F. 17.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Palm-leaf. 242 Foll. 13¾ × 1½ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Contains the adhyāyas 2 and 3 complete and 4 incomplete breaking off in the 1st pāda.

99. 36. E. 13.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Paper. 159 foll. 15 × 5¾ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the 1st pāda of the 1st adhyaya wanting the last leaf.

The MS. Contains also the text of the Mahābhāṣya and the Pradīpa for this portion.

100. 40. A. 104.

महाभाष्यप्रदीपव्याख्या उद्द्योतः—नागेशकृतः

Paper. 44 Foll. 12 × 4¾ inches. 13 lines in a page. Telugu script. Old. Good. Legible writing.

Contains the 4th pāda of the 1st adhyāya only.

101. 27. D. 23.

महाभाष्यप्रदीपव्याख्या उद्द्योतनम्—अन्नंभट्टकृतम्

Palm-leaf. 229 Foll. 17 × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This also is a commentary on Kaiyaṭa's Mahābhāṣyapradīpa by Annambhaṭṭa, the author of the Tarkasaṅgraha. Annambhaṭṭa was the son of Tirumalācārya of Rāghava-somayāji family. He is also the author of Rāṇakojjivanī in Mīmāṁsā, Ālokasiddhāñjana and Dīdhitivyākhyā in Nyāya and Brahmasūtravṛtti Mitākṣarā in Vedānta.

Contains the 1st adhyāya (wanting the āhnikas 2 to 6 in the 1st pāda) and the 1st pāda of the 8th adhyāya incomplete.

Beginning :

शिवयोः शाश्वतैकत्वं तनोतु शुभसन्ततिम् ।
निदर्शयितुमद्वैतं भजतामिव संगतम् ॥
श्रीशेषवीरेश्वरपण्डितेन्द्रं शेषायितं शेषवचोविशेषे ।
सर्वेषु तन्त्रेषु च कर्तृतुल्यं वन्दे महाभाष्यगुरुं ममाप्यम् ॥
महाभाष्यप्रदीपस्य कृत्स्नस्योद्द्योतनं मया ।
क्रियते पदवाक्यार्थतात्पर्यस्य विवेचनात् ॥

सर्वाकारमिति । सर्वस्वरूपं, सर्वोपादानमिति यावत् ; प्रपञ्चस्योपादानव्यतिरिक्ताबाधितरूपाभावात् । अनाकारं वास्तवाकारान्तररहितम् । विश्वाध्यक्षं विश्वमध्यक्षं यस्य, विश्वसाक्षिणमिति यावत् । अनाकारत्वादतीन्द्रियम् । सत् पृथिव्यादि त्रयम् । असत् वाय्वाकाशौ । पञ्च-भूतविलक्षणम् । निष्प्रपञ्चस्वरूपमिति यावत् । सर्वाकारं विश्वाध्यक्षमित्यभिन्ननिमित्तोपादानत्वं तटस्थ-लक्षणमुक्तम् । तेन सत्यज्ञानानन्दादिस्वरूपलक्षणं सूचितम् । तादृशस्वरूपस्यावृतत्वादिदानीं न भासत इत्याह—अदृश्यमिति । तद्ज्ञानहेतुमाह—ज्ञानेति । तत्त्व-मस्यादिवाक्यजन्याखण्डसच्चिदानन्दब्रह्माकारवृत्तिर्ज्ञानं , तदेव लोचनम् ।

Colophon :

इतिश्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजि-कुलावतंसश्रीमत्तिरुमलाचार्यवर्यसूनोरन्नंभट्टस्य कृतौ महा-भाष्यप्रदीपोद्द्योतने प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

End :

तिङिचो । वक्ष्यमाणाभिप्रायमाह—या क्रियेति । अनुपदमेवैतत् विवरिष्यते । अव्याप्तिरिति ।

. . . . . .

कर्मधारयपक्षे तु नाव्याप्तिरित्याह— यदा त्विति । क्रिया-रूपार्थे प्रत्येव गतिसंज्ञा, न शब्दं प्रतीत्यर्थः । तर्हि गतिशब्दोपस्थितस्यार्थस्य कथमुदात्तवतीति विशेषणम् ? अर्थस्य परत्वासंभवात् कथं वा तस्मिन् गतेर्निघातः ? अत आह—तत्रार्थ इति । तथापि कथं प्रत्ययोदात्तत्व-निघातत्वसंभवः ? क्रियाप्रतिपादकत्वाभा . . .

102. 27. D. 24.

महाभाष्यप्रदीपव्याख्या उद्द्योतनम्—अन्नंभट्टकृतम्

Palm-leaf. 120 Foll. 18 × 1½ inches.

6 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains the pādas 1 and 2 in the 3rd adhyāya.

103. 27. D. 25.

महाभाष्यप्रदीपव्याख्या उद्द्योतनम् — अन्नंभट्टकृतम्

Palm-leaf. 177 Foll. 16 × 1 inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the 2nd adhyāya complete.

104. 40. A. 103.

महाभाष्यप्रदीपव्याख्या उद्द्योतनम् — अन्नंभट्टकृतम्

Paper. 215 Foll. 12 × 6 inches. 12 lines in a page. Telugu script. Old. Good. Good writing.

Contains the pādas 1 to 3 in the 1st adhyāya and the pāda 1 in the 2nd adhyāya.

105. 54. A. 19.

महाभाष्यप्रदीपव्याख्या उद्द्योतनम् — अन्नंभट्टकृतम्

Paper. 2542 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 11 volumes.

The following are the number of pages in each vol. and the portions contained therein.

Vol.	Pages	Portions
I.	1 to 544	1 to 5 āhnikas in the 1st pāda of the 1st adhyāya.
II.	545 to 1042	6 to 9 āhnikas in the 1st pāda of the 1st adhyāya.
III.	1043 to 1436	2nd & 3rd pādas of the 1st adhyāya.
IV.	1437 to 1748	4th pāda of the 1st adhyāya.
V.	1749 to 2326	2nd adhyāya complete.
VI.	2327 to 2838	3rd adhyāya complete.
VII.	2839 to 3233	4th adhyāya complete.
VIII.	3234 to 3522	5th adhyāya (1st pāda complete, 2nd pāda incomplete).
IX.	3523 to 4034	From the 2nd āhnika of the 1st pāda up to the end of the 4th pāda of the 6th adhyāya (wanting portions in the 4th pāda).
X.	4035 to 4616	7th adhyāya (wanting 1 leaf in the beginning).
XI.	4617 to 5084	8th adhyāya complete.

End of the 11th Vol.:

ननु आदेशस्य भाव्यमानत्वेन सवर्णग्राहकत्वाभावेऽपि स्थानिनो ग्राहकत्वात् दीर्घप्लुतयोरपि सर्वत्र

ह्रस्वादेशप्रसङ्गः तपरत्वाभावे निवारयितुं न शक्यते, अत आह—तत्र षण्णामिति । जातिपक्षे स्थानिन्येकशेषाभावेऽपि आन्तरतम्यादेव षण्णामादेशानां षट् स्थानिनो व्यवस्थया भविष्यन्तीति स्थान्येकशेषो भिन्नकालनिवृत्यर्थ एवेति भावः ॥

Colophon :

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ श्रीमन्महाभाष्यप्रदीपोद्द्योतने अष्टमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् ॥ पादश्च समाप्तोऽध्यायश्च ॥

The scribe of the original palm-leaf MS.

"मुक्कामलान्वयाज्जातो लक्ष्मीपतिबुधः स्फुटम् ।
प्रदीपोद्द्योतनं सम्यग् लिलेख विदुषां मुदे ॥"

106. 24. A. 13.

महाभाष्यप्रदीपप्रकाशः—प्रवर्तकोपाध्यायकृतः

Palm-leaf. 158 Foll. $13\frac{3}{4} \times 2$ inches. 11 lines in a page. Grantha script. Old. Injured. Legible writing.

Another commentary on Kaiyaṭa's Mahābhāṣyapradīpa by Pravartakopādhyāya.

Contains 1 to 9 āhnikas in the 1st pāda of the 1st adhyāya.

Fol. 75 is left blank with a small gap in the 5th āhnika.

Beginning :

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टदेवताप्रणामपुरःसरं विशिष्टकर्तृकं कर्तव्यं प्रतिजानीते—सर्वाकारमित्यादिना। परमात्मादीन्प्रणम्य कैयटनामाहं विवृतिपूर्वं विधास्य इति संबन्धः। परमश्चासावात्मा चेति परमात्मा। आत्मशब्देन पराग्व्यावृत्तं प्रत्यक्चैतन्यमुच्यते, परमशब्देनानाद्यविद्यातत्कार्यासंसृष्टमानन्दैकरसं तत्त्वंपदलक्ष्यं ब्रह्मोच्यते। तत्त्वंपदलक्ष्यं प्रत्यगानन्दैकरसं परं ब्रह्म परमात्मेत्यर्थः। . . . . . संबन्धात्सर्वोपादानत्वेन सर्वाकारमित्यर्थः। परमात्मनः प्रपञ्चसंबन्धस्यानाद्यनिर्वचनीयाविद्याकृतत्वाच्चिदेकरसत्वान्निराकारो निष्प्रपञ्च इत्यर्थः। निमित्तकारणमपि स एवेत्याह—विश्वाध्यक्षमिति। आकाशादेः प्रपञ्चस्याधिष्ठाता निमित्तं कारणमिति यावत्। 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति। तस्य शास्त्रैकसमधिगम्यत्वाभिप्रायेण मानान्तरागोचरत्वमाह—अतीन्द्रियमिति।

Colophon :

इति प्रवर्तकोपाध्यायभाष्यप्रदीपप्रकाशे द्वितीयमाह्निकम् ॥

End :

आदिग्रहणसामर्थ्यान्मध्यमापेक्षया न भविष्यतीत्याशङ्क्याह—आदिग्रहणमिति। अजाकृतिः . . . . . शिष्टजातेराश्रयणात् हलाकृतिव्यावृत्त्याज्झलात्मकप्रातिपदिके असिद्धिमाशङ्क्य व्याचष्टे—उभयरूपत्व इति। . . . . . अभिप्रायं दर्शयति—भाष्यकार इति। व्यवस्थितविभाषया नित्यं भवत इत्यर्थः।

Colophon :

इति प्रवर्तकोपाध्यायविरचिते भाष्य . . . . . नवममाह्निकम् ॥

107. 27. D. 9.

महाभाष्यप्रदीपस्फूर्तिः—सर्वेश्वरकृता

Palm-leaf. 35 Foll. 15 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

This also is a commentary on Kaiyaṭa's Mahābhāṣyapradīpa by Sarveśvara. The author was the son of Veṅkaṭayajvan and was cherished by Ādenna, of Rāvinūtula family and the son of Bhavānī and Keśava.

Contains the āhnikas 2 and 3 of the 4th pāda of the 6th adhyāya.

Beginning :

भक्षीष्ट अभर्ष्ट इति न स्यात् । भृक्षीष्ट अभृष्ट इत्यादि स्यात् , लिङ्सिचावात्मनेपदेष्विति कित्त्वात् । तथाच भृज्जेर्णौ अबभर्जत् इति न स्यात् । . . . . . अतो लोपः । उपदेश इति वर्तते । तच्चार्धधातुकेन संबध्यते । आर्धधातुकोपदेशकाले यदकारान्तमङ्गं तस्य लोपः स्यात् । चिकीर्षिता, चिकीर्षितुम् ।

Colophon :

इति श्रीनन्दनन्दनचरणारविन्दद्वन्द्वमकरन्दबिन्दुसंदोहास्वादनसानन्दतुन्दिलेन्दिन्दिरायमाणान्तःकरणेन सहस्रकन्यागोदानसुप्रसादितगोपालकृष्णान्तःकरणेन भवानीपतिकेशवार्यसुकृतपरिपाकेन राविनूतुलकुलतिलकेन आदेन्नभूसुरशिरोमणिना परिपालितस्य षड्दर्शनकुलावतंसश्रीवेङ्कटातिरात्रासोर्यामयाजितनूभवस्य श्रीसर्वेश्वरसाग्निचित्यातिरात्रसर्वतोमुखयाजिनः कृतौ भाष्यप्रदीपस्फूर्तौ षष्ठस्याध्यायस्य चतुर्थपादे द्वितीयमाह्निकम् ॥

End :

तथाच पञ्चमे छन्दसीवनिपाविति वार्तिकव्याख्यानावसरे कैयटः—मघवा बहुलमित्येतन्न कर्तव्यं भवति । श्वन्नुक्षन्निति निपातनात् मघशब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धेरिति । अत एव न कैयटस्य पूर्वापरग्रन्थविरोधः । अर्वन्शब्दस्य तु वार्तिकभाष्यकाराद्यनुक्तत्वाल्लोके प्रयोगोऽप्रामाणिकः । एवंच नान्ततान्तयोः सर्वत्र प्रयोगे प्राप्ते व्यवस्थार्थमर्वणस्त्रसाविति सूत्रं तृज्वत्क्रोष्टुरिति त्रिसूत्रीवदिति मनोरमा चिन्त्या ।

Colophon :

इति श्रीनन्दनन्दनचरणारविन्दद्वन्द्वमकरन्दबिन्दुसंदोहास्वादनसानन्दतुन्दिलेन्दिन्दिरायमाणान्तःकरणेन सहस्रकन्यागोदानसुप्रसादितगोपालकृष्णान्तःकरणेन भवानीपतिकेशवार्यसुकृतपरिपाकेन राविनूतुलकुलतिलकेनाश्रितचिन्तामणिना आदेन्नभूसूरशिखामणिना परिपालितस्य षड्दर्शनकुलावतंसवेङ्कटातिरात्रासोर्यामयाजितनूभवस्य श्रीसर्वेश्वरसाग्निचित्यातिरात्रयाजिनः कृतौ भाष्यप्रदीपस्फूर्तौ षष्ठाध्यायस्य चतुर्थपादे तृतीयमाह्निकम् ॥

108. 27. D. 10.

महाभाष्यप्रदीपस्फूर्तिः—सर्वेश्वरकृता

Palm-leaf. 81 Foll. 18½ × 1½ inches. 9 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the pādas 1 to 3 of the 7th adhyāya (wanting a leaf in the beginning of the 1st pāda) with an incomplete colophon of the 3rd pāda.

Beginning :

संबन्धस्यारङ्गत्वादङ्गस्य निमित्तं यौ युवौ तयोरनाकौ । अङ्गस्य निमित्तं युवौ प्रत्ययावेवेति तस्माद्युत इत्यत्र न दोष इति चेत् , एवमपि अहंशुभयोर्युस् अहंयुरित्यादावतिप्रसङ्गात् । न च सित्करणं सिति चेति पदत्वे सति हलि मोऽनुस्वार इत्यनुस्वारार्थमिति हलादित्वाभावप्रसङ्गादादेशो नेति वाच्यम् , अवग्रहार्थं तदापत्तेः । ऊर्णाया युस् ऊर्णायुरित्यत्र दोषाच्च ॥

Colophon :

इति सप्तमाध्यायस्य प्रथमपादे स्फूर्तौ प्रथममाह्निकम् ॥

End :

अङो नाञ्स्त्रियाम् । आङिति टासंज्ञा प्राचाम् । घेरुत्तरस्य टा इत्यस्य ना स्यात् अस्त्रियाम् । हरिणा, वारिणा । अस्त्रियां किम्? मत्या । ननु आङो ना पुंसीत्येवास्तु । न चैवं वारिणा त्रपुणा इति न सिध्येदिति वाच्यम्, इकोऽचीति नुमापि सिद्धेः । न चैवमपि अमुना ब्राह्मणकुलेनेति न स्यात्, मुभावस्यासिद्धत्वेनेगन्तत्वाभावात् नुमोऽप्राप्तेरिति वाच्यम् । न मुन इति मुभावस्य सिद्धत्वेन नुमः संभवात् । न च तेन नादेशे मुभावसिद्धत्वमुच्यते, न तु नुमीति वाच्यम् । न इत्यनेन नकारादौ कर्तव्ये मुभावस्य सिद्धत्वविधानादिति चेदुच्यते । यदि नकारमात्रे मुभावस्य सिद्धत्वं स्यात् अमुष्मै ब्राह्मणकुलायेत्यत्र स्मायादेशो न स्यात् । मुभावसिद्धत्वेन नुमेव स्यात् । तस्मान्नाभाव एव तेन मुभावस्य सिद्धत्वकथनेन अमुना ब्राह्मणकुलेनेति न सिध्येदिति अस्त्रियां नाभावो विधेयः । ततश्च तस्मिन् नुभावस्य सिद्धत्वात् अमुना कुलेनेति सिध्यति । संग्रहः—

आङो ना पुंसि किं नोक्तं नुमा सिध्यति वारिणा ।
नकारे मुत्वसिद्ध्यर्थं तत्रामुष्मै न सिध्यति ॥

Colophon :

इति श्रीनन्दनन्दनचरणारविन्दद्वन्द्वमकरन्दबिन्दुसंदोह . . . . . .

109. 27. D. 11.

महाभाष्यप्रदीपस्फूर्तिः—सर्वेश्वरकृता

Palm-leaf. 160 Foll. 17½ × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains pādas 1 to 3 in the 7th adhyāya (wanting a small portion in the beginning and the last portion of the last colophon).

This MS. seems to be a copy of the MS. described under last No.

110. 39. G. 17.

महाभाष्यव्याख्या प्रदीपिका—भर्तृहरिकृता

Paper. 437 Foll. 6½ × 8 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a photographic copy available in the Govt. Oriental MSS. Library, Madras.

A commentary on Patañjali's Mahābhāṣya by Bhartṛhari the famous author of the Vākyapadīya. This commentary is quoted by Kaiyaṭa in the beginning of his Pradīpa.

Beginning :

पनार्थं वैदिकानां पृथगुपादानम् । प्राधान्यस्यापि हि सामान्येऽप्यन्तर्भूतस्य पृथगुपदेशो दृश्यते—ब्राह्मणा आयाताः, वसिष्ठोऽप्यायात इति । प्रथमं लौकिकानामित्येवमुक्ते लौकिकशब्दसामान्यमपि विशेषः प्रतिपद्येत भाषाशब्दानामेवेदमनुशासनं न वैदिकानाम्, यस्मात् ते हि नियतसंनिवेशाः प्रतिनियतप्रातिशाख्याः दृष्टानुविधित्वात् तेष्विति । अत उभयोरुपादानम्—वैदिकानां लौकिकानां चेति । ननु चैव ना . . . त्मकत्वे सति नानेनानुशासनं वैदिकानामिति ये सन्ति प्रातिशाख्यलक्षणे पुरुषाः प्रमादादशक्तेर्वापभाषन्ते यत

इदमनुशासनम्। तथा तैत्तिरीयाः कृतमग्निशब्द-मुच्चारयन्ति।

Colophon:

इति भर्तृहरिटीकायां प्रथमस्याध्यायस्य प्रथम-माह्निकम्।

End:

अनेकाल्शित्सर्वस्य। नैतदस्ति शित्करणादेव सर्वा-देशो भविष्यतीति। अनेकाल्त्वादित्यर्थः। ननु च शकारस्य श्रवणं प्राप्नोति। नैष दोषः। एवं..व वाहिका-न्यार्थो लोप इति। तत्र शकारस्येदं प्रयोजनम्... निवर्तयितव्य इति। समुदाये च...न..कार्य ... उपात्तो निवर्तिष्यते। इदं तर्हि अष्टाभ्य औशिति पूर्वत्राल्लोऽन्त्यस्येति दर्शितम्। इदानीम् आदेः परस्येति ज्ञप्तिः प्रदर्श्यते इत्येवमर्थं चोपादानम्। अथवोदाहरणसंभवः प्रतिपाद्यते। विरा..अन्यः कारस्य प्रयोजनमिति सर्वादेशार्थं न भविष्यति। तस्यायं स्थाने भवतीति .....

इयं संबन्धषष्ठी। नपुंसकादिति च विहितविशेषणम्।

111. 40. C. 41.

महाभाष्यव्याख्या सिद्धान्तरत्नप्रकाशः—शिवरामेन्द्रसरस्वतीकृतः

Paper. 66 Foll. 11 × 4 inches. 11 lines in the page. Devanāgarī script. Old. Fair. Good writing.

A commentary on the Mahābhāṣya of Patañjali by S'ivarāmendrasarasvatī pupil of Hariharendra. The commentary is called Siddhāntaratnaprakāśa.

Begins in the course of the 1st āhnika of the 1st pāda of the 2nd adhyāya and breaks off in the 3rd āhnika of the 3rd pāda of the 2nd adhyāya.

Beginning: .....न्यसाम्यात् किं? दृढे अन्यदपि बाध्यतामित्युक्तम्। उक्तं च योगवासिष्ठे-ऽपि—युक्तियुक्तमुपादेयं वचनं बालकादपि। अन्य-त्तृणमिव त्याज्यमप्युक्तं पद्मयोनिना॥ इति॥ प्रकृतमनु सरामः। तत्स्थैश्च गुणैरिति। तस्मिन् द्रव्ये तिष्ठन्तीति तत्स्था ये गुणाः तद्वाचकैरित्यर्थः। तेन नीलो घटः शुक्लो घट इत्यादौ द्रव्याभिन्ने विशेषणे वर्तमाननील-रूपादिवाचकनैल्यादिशब्दानां निरासः। रूपवर्णगन्ध-घोषादयश्च शब्दाः कदापि गुणविशिष्टद्रव्यवाचका न भवन्तीति तत्स्था एव ये गुणाः तद्वाचका भवन्तीति तैः समासो भवति। एतेन तच्छब्देन संनिधानात् गुणा एव परामृश्यन्ते। तेनायमर्थः। स्वात्मनि ये गुणा अवस्थिताः तैः सह समासः। न च स्वात्म-न्यवस्थानं गुणानां संभवति, भेदनिबन्धनत्वात् मुख्याधाराधेयभावस्य।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगव-त्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीविरचिते महा-भाष्यसिद्धान्तरत्नप्रकाशे द्वितीयस्याध्यायस्य द्वितीयपादे प्रथममाह्निकम्॥

रुजार्थानाम्॥ चौरं संतापयतीति। एतेनात्र कृदन्तमेव प्रत्युदाहरणमिति वदन्तः प्रत्युक्ताः, कर्मण्येवात्र षष्ठ्या विधीयमानत्वेन तिङन्तघटितप्रत्यु-दाहरणेऽपि बाधकाभावात्। भाववचना एवेति। धातु-मात्रस्य भाववाचकता भूवादिसूत्रे निदर्शिता। भाव-कर्तृकादिति। ल्यब्लोपे कर्मणी .....

112. 10. D. 16.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Paper. 230 Foll. $11\frac{1}{2}$ × $5\frac{1}{4}$ inches. 10

lines in page. Devanāgarī script. Old. Good. Good writing.

This is a treatise on Pāṇini's grammar by Bhaṭṭojidīkṣita explaining the Sūtras of Aṣṭādhyāyī embodying the views of Patañjali, Kaiyaṭa etc. This work closely follows the Mahābhāṣya in the division of āhnikas of each pāda. The author is identical with that of the Siddhāntakaumudi.

Contains 1 to 9 āhnikas in the 1st pāda of the 1st adhyāya.

Beginning :

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥
नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम् ।
श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान्बुधान् ॥
नत्वा लक्ष्मीधरं तातं सुमनोबृन्दवन्दितम् ।
फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥
परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते ।
तमशेषमनायासादितो गृह्णीत सज्जनाः ॥
समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम् ।
भट्टोजिभट्टो जनुषः साफल्यं लब्धुमीहते ॥

प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत्—अथ शब्दानुशासनमिति । अथशब्दः प्रारम्भस्य द्योतकः, न तु वाचकः, निपातत्वात् उपसर्गवत् । न च तेऽपि वाचका एवेति वाच्यम्, उपास्यते गुरुः, अनुभूयते सुखमित्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात् । ननूक्तयुक्त्यास्तूपसर्गाणां द्योतकता ; निपातानन्तरं तु वाचकमेवेति चेन्न । साक्षात्क्रियते, नमस्क्रियते, अलंक्रियते, ऊरीक्रियते इत्यादौ कर्मणि लकारेण कर्मभूतस्य गुर्वादेरभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्य वाच्यत्वात् । उपसर्गत्वापेक्षया निपातत्वस्याधिकवृत्तितयातदवच्छेदेनैव द्योतकताकल्पनाच्च; सामान्ये प्रमाणानां पक्षपातात् ॥

Colophon :

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।

End :

वहिकश्च वहीकश्च विपाशायां पिशाचकौ ।
तयोरपत्यं वाहीका नैषा सृष्टिः प्रजापतेः ॥इति॥

एतच्च विवेचनं वाहीकग्रामेभ्यश्चेत्यादावुपयोक्ष्यत इति सर्वं सुस्थम् ॥

Colophon :

इति श्रीविद्वन्मकुटरत्नस्य लक्ष्मीधरसूरेः सूनुना भट्टोजिभट्टेन कृते शब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमपादे नवममाह्निकम् ॥ पादश्चायं समाप्तः । ग्रन्थसंख्या सहस्रसपादसप्त—७२९० ।

113. 9. E. 61.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Paper. 46 Foll. 11 × 4 inches. 10 lines in a page. Telugu script. Old Slightly injured. Good writing.

Contains the 1st āhnika complete and the 2nd āhnika incomplete in the 1st pāda of the 1st adhyāya.

114. 10. E. 18.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Paper. 33 Foll. 11 × 5½ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the 1st āhnika only of the 1st pāda of the 1st adhyāya.

115. 20. J. 16.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 220 Foll. 15½ × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the 1st adhyāya complete.

116. 20. J. 30.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 136 Foll. 15 × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains the āhnikas 1 to 9 in the 1st pāda of the 1st adhyāya. The following additional stanza is written in the beginning:

"वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥"

117. 20. J. 31.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 131 Foll. 16½ × 1½ inches. 5 lines in a page. Telugu script. Old. Injured. Illegible writing.

Wants the beginning in the 5th āhnika and breaks off in the 7th āhnika of the 1st pāda of the 1st adhyāya.

118. 20. K. 1.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 120 Foll. 16½ × 1¼ inches. 9 lines in a page. Telugu script. Old. Injured. Illegible writing.

Begins in the 2nd āhnika and breaks off in the 5th āhnika (wanting the end of the 3rd and the beginning of the 4th) of the 1st pāda of the 1st adhyāya.

119. 20. K. 2.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 106 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains from 4-1-45 to the end of the 4th adhyāya.

End:

शिवशमरिष्टस्य करे । करोतीति करः । पचाद्यच् । कृद्योगलक्षणा कर्मणि षष्ठीह समर्थविभक्तिः । शिवं करोतीति शिवतातिः । योभिशन्तातिर्भवथो ददाशुष अथो अरिष्टतातये । भाषायां शिवतातिप्रभृतीनां प्रयोगश्चिन्त्यः । भावे च । . . शिवस्य भावः शिवतातिः, शंतातिः, अरिष्टतातिः । यतोऽधिकारः समाप्तः ।

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणस्य विद्वन्मकुटरत्नस्य लक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन कृते शब्दकौस्तुभे चतुर्थाध्यायस्य चतुर्थे पादे प्रथममाह्निकम् । पादश्च समाप्तोऽध्यायश्च ।

120. 20. K. 3.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 105 Foll. 17 × 1½ inches. 8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Breaks off in the 72nd Sūtra of the 9th āhnika of the 1st pāda of the 1st adhyāya.

121. 20. K. 4.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 39 Foll. 18½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the 2nd pāda of the 1st adhyāya breaking off in the 3rd āhnika.

122. 20. K. 5.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf, 115 Foll. 15½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the beginning in the 2nd āhnika and breaks off in the 7th āhnika of the 1st pāda of the 1st adhyāya.

123. 20. K. 24.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 86 Foll. 17½ × 1½ inches. 7 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Begins in the 2nd āhnika and breaks off in the 5th āhnika of the 1st pāda of the 1st adhyāya.

124. 20. K. 52.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 164 Foll. 18 × 1½ inches. 7 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Contains the pādas 2 to 4 of the 1st adhyāya.

The scribe adds :

व्ययनामसंवत्सरश्रावणबहुल २४ बुधवासरे शैवकुलाब्धौ जातेन चन्द्रसदृशेन नरसिंहभट्टपौत्रेण विश्वपतिपुत्रेण लक्ष्मीपतिशास्त्रिणा स्वहस्तेन लिखितः ।

125. 20. L. 2.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 56 Foll. 18 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Clumsy writing.

Wants the beginning in the 8th āhnika and ends in the 9th āhnika of the 1st pāda of the 1st adhyāya.

126. 24. B. 16.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 86 Foll. 19¼ × 2¾ inches. 10 lines in a page. Grantha script. Old. Good. Good writing.

Contains the 4th adhyāya complete.

The scribe adds :

"प्रीतये बालरामस्य गङ्गाधरसुधीमणिः ।
अध्यायस्य चतुर्थस्य व्यलेखीच्छब्दकौस्तुभम् ॥"

Four extra leaves added at the end of the MS. contain some loose stanzas from the Sundarakāṇḍa of the Vālmīki Rāmāyaṇa.

127. 24. B. 26.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 229 Foll. 13½ × 2¼ inches. 13 lines in a page. Grantha script. Old. Good. Good writing.

Contains the pādas 1 and 2 of the 1st adhyāya.

The scribe adds at the end of the 1st pāda :

"रामनाथपुरे तिष्ठद्रामनाम्ना मया शुभम् ।
कौस्तुभे प्रथमेऽध्याये लिखितं पादमादिमम् ॥
श्रीबालरामविदुषः पुस्तके शब्दकौस्तुभे ।
अध्याये प्रथमे पादो लिखितः प्रथमः स्फुटम् ॥"

128. 26. N. 28.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 77 Foll. $12\frac{1}{8} \times 1\frac{3}{4}$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the āhnikas 7 and 8 complete and 9 incomplete in the 1st pāda of the 1st adhyāya.

129. 26. O. 1.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 148 Foll. $14 \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains the āhnikas 1 to 6 in the 1st pāda of the 1st adhyāya.

130. 26. O. 9.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 94 Foll. $12\frac{1}{8} \times 1\frac{3}{4}$ inches. 14 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains the āhnikas 1 to 6 in the 1st pāda of the 1st adhyāya.

131. 28. G. 19.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm leaf. 45 Foll. $19 \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Contains from 2-3-65 to the end of the 2nd adhyāya.

132. 40. C. 17.

शब्दकौस्तुभः—भट्टोजिदीक्षितकृतः

Paper. 87 Foll. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 4th adhyāya complete.

133. 10. D. 16.

शब्दकौस्तुभटीका भावप्रदीपः—कृष्णमिश्रकृता

Paper. 137 Foll. $11\frac{1}{2} \times 5\frac{1}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

The Foll. bear the Nos. 231 to 367.

A commentary on Bhaṭṭojidīkṣita's S'abdakaustubha by Kṛṣṇamiśra with surname Bhaṭṭācārya of Lakṣmaṇapura, son of Rāmasevaka and grandson of Devīdatta.

Contains the āhnikas 1 to 9 (wanting the ends of the 4 and 8) of the 1st pāda of the 1st adhyāya.

Beginning :

विघ्नविघाताय मङ्गलमाचरति—विश्वेशमिति । विश्वेशशब्दस्य लोकपालादावपि दर्शनादाह—सच्चिदानन्दमिति । सदित्यनेन नित्यतोक्ता । सत्त्वं चानृतविरोधित्वेनावितथत्वम् । अभावस्याधिकरणात्मकतया ब्रह्मणो निर्धर्मकत्वसिद्धिः । चिदित्यनेन ज्ञानरूपता ।

तथाच श्रुतिः—नित्यं विज्ञानमानन्दं ब्रह्मेति; सत्यं ज्ञानमनन्तं ब्रह्मेति च। अनन्तत्वं च देशतः कालतश्चापरिच्छिन्नत्वम्। सच्चिदानन्दमित्यनेनाखण्डैकरसस्य ब्रह्मणो मुख्यत्वं दर्शितम्। सगुणोपासनं तु चित्तैकाग्र्यद्वारा निष्कलसाक्षात्कारे कारणम्। तार्किकास्तु—नित्यौ ज्ञानानन्दौ यस्येत्यर्थमाहुः। नन्वेतत्सत्त्वे मानाभाव इत्यत आह—योऽखिलमिति। एतैरेव तदनुमानमिति भावः। चरीकर्ति-विवर्तरूपतयाविर्भावयति। ननु तस्य किं सृष्ट्यादिकरणेनेत्यत आह—लीलयेति। लीलैव प्रयोजनमित्यर्थः। तथाच व्याससूत्रम्—लोकवत्तु लीलाकैवल्यमिति। वस्तुतस्तु इत्थमवतारणीयम्—ननु अद्वितीयस्य ब्रह्मणो निर्गुणत्वात्कथं कर्तृत्वादीत्यत आह—लीलयेति। मायापरपर्यायाया लीलायाः कर्तृत्वात् तदधिष्ठानस्य ब्रह्मणोऽपि कर्तृत्वारोप इति भावः। संप्रदायशुद्धिसूचनाय पाणिन्यादीन्नमस्करोति—नमस्कृत्येति। भर्तृहरिर्मुख्यो येषां, मुखमिव मुख्यं प्रधानम्; शाखादित्वाद्यः। बुधानित्यनेन सिद्धान्तस्थापनक्षमत्वं सूचितम्। गुरूणामपि देवतारूपतयैवानुसंधेयत्वात् देवतानत्यनन्तरं प्रकृतेष्टसिद्धये गुरूनपि नमस्करोति—नत्वेति। सुमनसो विद्वांसो देवाश्चेति श्लेषः। देवगणवन्दितं हरिं प्रणम्यैव हि क्षीराब्धेरपि कौस्तुभ उद्धृतः। परिभाव्येति। तदुक्तीः परिभाव्येति मूलस्य प्राचामुक्तीस्तिरस्कृत्येति व्याख्यानं त्वत्रत्यप्रयोगविरुद्धमिति बोध्यम्। समर्प्येति; यत्करोषि यदश्नासीति भगवदुक्तेः। प्रेक्षावदिति; प्रेक्षा सदसद्विवेचनी बुद्धिः, बुद्धिमतां च नाफले प्रवृत्तिर्भवति। व्याकरणस्य विषयमिति—व्याकरणजन्यज्ञानविषयमित्यर्थः। ज्ञानेच्छादीनामेव सविषयकत्वात् विषये कथिते प्रयोजनमिति कैयटोक्तं चिन्त्यमित्याहुः। भाष्यते सूत्रार्थोऽनेनेति भाष्यम्।

सूत्रस्थं पदमादाय वाक्यैः सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

शब्दानुशासनमितीति। एवंच तज्जिज्ञासुरधिकारीति सूचितम्।

Colophon :

इति श्रीभट्टाचार्यकृष्णमिश्रकृते भावप्रदीपे प्रथममाह्निकम्।

End :

अभ्युपगमादिति। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् इत्यञं बाधित्वा वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः, शाकलिका इति तदुक्तेः।

अयोध्यादक्षिणे कोणे दशगव्यूतिसंमितः।
ग्रामोऽस्ति लक्ष्मणपुरं वसंस्तत्राकरोदिमाम्॥

Colophon :

इति श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवाचार्यकृष्णमिश्रकृते कौस्तुभव्याख्याने भावप्रदीपे नवममाह्निकम्॥

134. 9. D. 17.

शब्दकौस्तुभटीका भावप्रदीपः—कृष्णमिश्रकृतः

Bound in 3 Volumes.

Vol. 1.

Paper. 8 Foll. 10 × 5 inches. 18 lines in a page Telugu script. Old. Good. Good writing.

Contains the 2nd āhnika of the 1st pāda of the 1st adhyāya.

Vols. 2 and 3.

Paper. 129 Foll. 9½ × 4¾ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contain the āhnikas 3, 4, 7, 8 and 9 in the 1st Pāda of the 1st adhyāya.

135. 9. D. 18.

शब्दकौस्तुभटीका भावप्रदीपः—कृष्णमिश्रकृतः

Paper. 12 Foll. 9½ × 6 inches. 16 lines in a page. Telugu script. Old. Good. Good writing.

Contains the 1st āhnika of the 1st pāda of the 1st adhyāya. The fly leaf gives the name Durbalī to this commentary; but it is the same as Bhāvapradīpa by Kṛṣṇamiśra described above.

136. 54. A. 50.

शब्दकौस्तुभटीका भावप्रदीपः—कृष्णमिश्रकृतः

Paper. 276 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the MS. described in No. last but one; hence this contains the same portions as mentioned in that No.

137. 11. B. 36.

शब्दकौस्तुभटीका—विषमी

Paper. 17 Foll. 10¼ × 3 inches. 8 lines in a page. Devanāgarī script. Old. Good. Good writing.

A gloss on the S'abdakaustubha of Bhaṭṭojidīkṣita. The author's name is not given in the MS. The work is the same as that described under R. No. 1316 of the Triennial Catalogue of Sanskrit MSS. in the Madras Govt. Oriental MSS. Library.

Breaks off in the 4th āhnika of the 1st Pāda of the 1st adhyāya.

Beginning:

विषयमिति। विषये कथिते तत्प्रतिपत्तिरूपप्रयोजनमप्युक्तप्रायम्। प्रयोजनमाहेति कैयटोक्तं चिन्त्यम्, बिषयाकथनेन न्यूनत्वात्। द्योतक इति। इदं न साध्यम्, अनर्थकनिपातानामपि दर्शनात्। किंतु वाचकत्वाभावः। तदाह—न त्विति। प्रकृते च शब्दानुशासनपदस्य लक्षणा, प्रादिसमभिव्याहारे जिधातोः प्रकृष्टजयादाविव। केवलाप्रयोगस्तु प्रादिवदेषामपि। एतेन वाचकपदसमभिव्याहाराभावादथशब्दस्य न द्योतकतेति परास्तम्। यद्वा शब्दानुशासनमित्युक्ते वाक्यार्थसमाप्तये क्रियाध्याहार आवश्यकः। तत्रानियतक्रियाध्याहारे प्रसक्ते अथशब्देन क्रियान्तरं व्यवच्छिद्य प्रारम्भरूपैवात्र क्रिया विवक्ष्यते। इदमेव चाथशब्दस्य द्योतकत्वं नामेति। सामान्येति। व्याप्यधर्मोपस्थितौ व्यापकधर्मोपस्थितेरावश्यकत्वादिति भावः।

Colophon:

इति कौस्तुभविषमव्याख्यायां प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥

End:

अङ्सदृशेति। प्रतिपदोक्तपरिभाषाबलाच्चाङ्सदृशेत्यर्थः। श्रूयमाणेति। प्रकृते च श्रूयमाणात्वाभावान्न लोप इति भावः। ज्ञापकेनेति। यत्र अजित्येकत्वविवक्षयैकाच्त्वे लब्धे एकग्रहणस्य प्रयोजनं यथा एकाच उपदेशे इत्यत्र वधादेशव्या.

A commentary on the S'abdakaus'tubha called विषमपदी by Nāges'a has been mentioned in the Catalogus Catalogorum, (Vide page 632.) It is not certain whether the commentary under description is the same or different.

138. 8. K. 3.

शाब्दिकचिन्तामणिः—गोपालकृष्णशास्त्रिकृतः

Paper. 1836 Foll. $8\frac{1}{4} \times 4\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī and Grantha scripts. Old. Good. Good writing.

Bound in 7 Volumes; Vols. 1 to 5 are written in Devanāgarī and Vols. 6 and 7 in Grantha.

This is a commentary on the Aṣṭādhyāyī of Pāṇini by Gopālakṛṣṇaśāstrin son of Vaidyanāthasūri of Sri-Vatsagotra and pupil of Rāmabhadrādhvarin. He was patronized by Vijayaraghunāthabhūpāla of Tanjore. His work extends only up to the end of the 1st Sūtra of the 3rd pāda of the 1st adhyāya viz. भूवादयो धातवः। Then his son and pupil Anantanārāyaṇaśāstrin coutinued the work up to the end of the 1st Āhnika of the 4th pāda of the 1st adhyāya viz. विप्रतिषेधे परं कार्यम्. Anantanārāyaṇa says that he also was patronized by Vijayaraghunāthabhūpala of Tanjore and completed also his father's other works—namely Siddhāntakaumdīvyākhyā Lalitā, Rāmāyaṇavyākhyā Vidvanmanoharā. He further states that his father's intention was to write the commentary up to the Sūtra समर्थः पदविधिः. 2-1-1.

Vols. 1 to 5 contain from the 2nd āhnika of the 1st pāda to the 1st āhnika of the 2nd pāda of the 1st adhyāya.

Vols. 6 and 7 contain the 1st āhnika of the 1st pāda, pādas 2, (except the 1st āhnika), 3 and the 1st āhnika of 4 of the 1st adhyāya.

Beginning of the work in the 6th Vol.:

वन्दे सर्वेश्वरं सर्वशक्तिं सर्वार्थदायिनम्।
सर्वज्ञं ज्ञानवपुषं विष्णुं सर्वार्थसिद्धये ॥
पाणिन्यादिमुनीन्द्राणां समष्टिं लोकविश्रुतम्।
श्रीरामचन्द्रमखिनं वन्दे वाग्वृद्धये गुरुम् ॥
प्रणम्य परमात्मानं पाणिन्यादीन् गुरूनपि।
चिन्तामणिं शाब्दिकानां कलये विदुषां मुदे ॥
विद्वत्प्रियेण विजयरघुनाथमहीभृता।
पोषितः सर्वसत्कारैः पूर्णभक्तिप्रचोदितैः ॥
गोपालकृष्णशर्माहमिष्टसर्वार्थदायिनीम्।
गुरुभक्तिं पुरस्कृत्य ग्रन्थान् कर्तुं समुत्सहे ॥

अथ यत् सप्रयोजनं तदेव प्रेक्षावदुपादेयम्। व्याकरणं तु न तथेति नारम्भणीयम्। अविहितत्वाच्च न विश्वजिन्न्यायेन कल्पनं स्यात्। उच्यते—प्रयोजनाभावेऽप्यवश्याध्येयं व्याकरणम्, ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यागमात्। कार्यते प्रवर्त्यते पुरुषोऽनेनेति कारणं प्रयोजनम। निष्कारणः दृष्टप्रयोजनानपेक्षः नित्य इति यावत्। ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति योऽयं धर्मः साङ्गवेदाध्ययनतदर्थज्ञानरूपः स सन्ध्योपासनादिवदवश्यं कर्तव्य इत्यर्थः। आगमः खल्वपीति भाष्यादियं श्रुतिरिति हरदत्तादयः।

Colophon:

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीमद्रामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य श्रीगोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम्।

End in the 7th Vol., page 3074.

तदेवं पूर्वोक्तरीत्या भूवादिशब्दयोरेकशेषाश्रयणात् भूश्च वाश्च भूवाविति पक्षाश्रयणाद्वा क्रियावाचिनो गणपठिताश्च ये भूप्रभृतयः शब्दास्तेषामेव धातुसंज्ञेति सूत्रार्थलाभात् सर्वेष्टसिद्धेः सूत्रमिदमनवद्यम्।

Gopālakṛṣṇa's work ends here.

Beginning of the supplement by his son and pupil Anantanārāyaṇa, page 3074

प्रत्यूहव्यूहनिर्भेदप्रकटीकृतविक्रमः ।
प्रसन्नवदनो देवः प्रयच्छतु मदीप्सितम् ॥
महादेवीमहासेनमहागणपतिश्रितः ।
महाप्रभुर्महादेवो महार्थं मे प्रयच्छतु ॥
श्रीभूमिशोभिततनुः श्रीवत्साङ्कितवत्सकः ।
श्रिताभीष्टप्रदोऽस्मभ्यं श्रियो विष्णुः प्रयच्छतु ॥
शारदाम्बुजपीठापि शारदा वाग्विवर्धनी ।
शारदास्मन्मुखाम्भोजे शारदं वरुषं वसेत् (?) ॥
श्रीमद्गोपालकृष्णाख्यमहागुरुपदाम्बुजम् ।
नामंनामं पुत्रतात्यै कुर्वे तत्कृतिपूरणम् ॥
पित्रारब्धस्य पूर्त्या तदृणात् पुत्रो विमुच्यते ॥
त्राणं च पुण्यलोकाप्तिप्रतिबन्धकपातकात् ।
आरब्धस्यान्तगमनाभावमूलात् प्रचक्षते ॥
बृहदारण्यकेऽध्याये तृतीयेऽन्ते समीरितम् ।
स यद्यनेनेति वाक्यमत्र मानं विमृश्यताम् ॥
तथाच भगवत्पादानुसारि श्रुतिवार्तिकम् ।
नाकारि कार्यं यत् पित्रा स्वाशक्त्यादिप्रमादतः ।
तत्पूरणात् पितृऋणात् पुत्र इत्यभिधीयते ॥
इत्यादि तेनात्र यते प्रत्यवायापनुत्तये ।
सिद्धान्तकौमुदीव्याख्या ललिता तत्कृतिर्यथा ॥
पूर्णा रामायणव्याख्या तथा विद्वन्मनोहरा ।
एवं चिन्तामणिरपि तदृशांशेन पूरिता ।
भाष्यकैयटवृत्त्यादिग्रन्थजातं पृथक् पृथक् ।
ये बुधा द्रष्टुमलसास्तेषां चिन्तामणिः कृतः ॥
धान्यग्यर्थि(?)विजयरघुनाथमहीभूजा ।
तन्नामतत्तद्राजस्य नियोगाभ्युच्चयो मम ॥
श्रीमद्गोपालकृष्णीयचिन्तामणिधरा नराः ।
सर्वोत्तमाः प्रकाशन्ते कौस्तुभाद्यनपेक्षिणः ॥
समर्थसूत्रपर्यन्तो ग्रन्थोऽयं तैः प्रतिश्रुतः ।
तत्परिश्रवणं मां हि प्रवर्तयति कान्तवत् ॥
श्रीमद्गोपालकृष्णार्यस्मृतयः कामधेनवः ।
यावत्सकलजीवातुभूता अद्भुतदा अपि ॥
सू—उपदेशेऽजनुनासिक इत् ।

अत्रानुक्रियमाणरूपविकाराभावाय भसंज्ञाश्रयेण कुत्वमकृत्वा पदसंज्ञाश्रयं जश्त्वमेव कृतमित्याश्रयणात् अजनुनासिक इति निर्देशोपपत्तिः । छन्दोवत्सूत्राणि भवन्ति । उभयसंज्ञान्यपि छन्दांसि दृश्यन्त इति हि भाष्यम् ।

Colophon found on page 3239.

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितम - तिकौशलस्य श्रीगोपालकृष्णशास्त्रिणः कृतौ तन्महागुरुकश्रीमदनन्तवेंकटेश्वराग्रजश्रीमदनन्तनारायणशास्त्रि - परिपूरिते शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य तृतीयपादे प्रथममाह्निकम् ।

End of the supplement by Anantanārāyaṇa :

अत्र वार्तिकम्—लोपयणयवायावेकादेशेभ्यो लुक् बलीयानिति वक्तव्यम् । एतच्चान्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधत इति प्रत्ययोत्तरपदयोश्चेत्यत्र ज्ञापनात् सिद्धम् ।

Colophon :

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरीन्द्रगुरुचरणश्लाघितमतिकौशलस्य श्रीमद्गोपालकृष्णशास्त्रिणः कृतौ तन्महागुरुकानन्तवेंकटेश्वराग्रजश्रीमदनन्तनारायणशास्त्रिपरि - पूरिते शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् ॥

आकडाराह्निकस्यान्तगमनेन महेश्वरः ।
प्रीयतां गुरुरूपो मे सच्चिदानन्दलक्षणः ॥

139. 26. L. 6.

शाब्दिकचिन्तामणिः—गोपालकृष्णशास्त्रिकृतः

Palm leaf. 44 Foll. 19 × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 3rd āhnika only in the 1st pāda of the 1st adhyāya.

140. 9. H. 34.

सिद्धान्तसुधानिधिः—विश्वेश्वरकृतः

Paper. 280 Foll. 12 × 5¾. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a commentary on the Aṣṭādhyāyī of Paninī. The author herein embodies the views of Patañjali, Vāmana, Haradatta, Mādhava etc. The author is Viśveśvara pupil of Lakṣmīdhara.

Contains pādas 2 to 4 in the 1st adhyāya and the whole of the 3rd adhyāya only.

Beginning :

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ गाङित्यादेशग्रहणम्, ङकारस्यानन्यार्थत्वादिति द्वितीये वक्ष्यामः । तस्मात्कुटादिभ्यश्च परे ञ्णिद्भिन्नाः प्रत्यायाः ङिद्वत्स्युः । अत्र कुटादित्वं कुटोच्चारणोत्तरमुच्चारितत्वम् । तच्च कुटादिष्वेव । तथापि तद्गुणबहुव्रीहिणा कुटत्वेन रूपेण कुटस्यापि बोधः । न चोभयसाधारणेनैकज्ञानविषयत्वादिना रूपेण कुटस्य तदादीनां च बोधोऽस्त्विति वाच्यम् । अतद्गुणसंविज्ञानत्वे बहुव्रीहिघटकपदार्थव्यावृत्तरूपेणैव बोधस्य वाच्यत्वात् तत्साधारणार्थमत्रापि तथा कल्पनात्, उभयत्रापि अन्यपदार्थस्यैकरूपेण प्रतीतेः ; वर्तिपदार्थस्योपलक्षणत्वविशेषणत्वाभ्यामेव बहुव्रीहिद्वैविध्यात् ।

Colophon :

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् । पादोऽध्यायश्चायं समाप्तः ।

सद्विद्वत्पदवाक्यमाननिगमाकूपारपारंगत-
श्रीलक्ष्मीधरलब्धबोधजनुषा विश्वेश्वरेणोदिते ।
श्रीसिद्धान्तसुधानिधौ सुधिषणैरध्यायमध्यायतं
ध्यायं ध्यायमिहाभिधेयमधुना शोधाय धीर्धीयताम् ॥

End :

लिङाशिषि । आशिषि यो लिङ् तदादेशस्तिङ् एतत्संज्ञः । भूयात् । छन्दस्युभयथा ॥ संज्ञाद्वयं स्यात् । वर्धन्तु त्वा सुष्टु तपः । आर्धधातुकत्वाण्णिलोपः । विश्नुण्विरे । सार्वधातुकत्वात् श्नुश्नुभावौ । हुश्नुवोः सार्वधातुक इति यण् ॥

Colophon :

इति श्रीसिद्धान्तसुधानिधौ तृतीयस्य चतुर्थे पादे प्रथममाह्निकम् । पादोऽध्यायश्चायं समाप्तः ॥

141. 19. H. 5.

सूत्रप्रकाशः—अप्पादीक्षितकृतः

Palm leaf. 155 Foll. 16 × 1¾ inches. 14 lines in a page. Grantha script. Old. Injured. Illegible writing.

This is a commentary on Pāṇini's Aṣṭādhyāyī by Appādīkṣita, the eighth descendant of famous Appayadīkṣita. The genealogy of the author is mentioned in the colophon at the end of the first Pariccheda. The famous Appayadīkṣita

had a grandson (son's son) called Simhappaya. Veṅkaṭasubrahmaṇya was great grand-son (son's grand-son) of Simhappaya. Veṅkaṭasubrahmaṇya's son was Dharmarāja Veṅkaṭeśvaradīkṣita. Our author Appādīkṣita was the son of Viśālākṣī and Dharmarāja Veṅkaṭeśvaradīkṣita. The genealogical table may be drawn thus :

(1) Appayadīkṣita, the famous.

Grand-son of 1 ———Simhappaya (2)
|
Great grandson of 2 —Veṅkaṭasubrahmaṇya (3)
|
son of 3 ———Dharmarāja Veṅkaṭeśvaradīkṣita (4)
|
son of 4 ———Appādīkṣita (our author) his mother was Viśālākṣī.

The author states that Gopālakṛṣṇaśāstrin—probably the author of the śābdikacintāmaṇī—was his teacher on Vyākaraṇa and Viśveśvaradīkṣita on Nyāya and Mīmāṁsā,

The colophons variously read the name of the work, *viz.*, सूत्रप्रकाश, पाणिनिसूत्रप्रकाश, वैयाकरणतत्त्वप्रकाश and पातञ्जलसूत्रप्रकाश. But many of these colophons read सूत्रप्रकाश. The work is divided into 4 Pariccheda. The first Pariccheda ends in the 2nd adhyāya. The end of the 2nd Pariccheda is not specified in the MS. The 3rd Pariccheda ends in the 8th adhyāya. The fourth Pariccheda begins in the Prakriyāpariccheda.

Beginning :

नत्वा साम्बसदाशिवं वमुक्त्वा वा . . . . . ।
आरच्यते पत . . . सितसूत्रप्रकाश . . . . ॥

. . . . . .
. . . . . .

अइउण् + हल् । इति माहेश्वराणि सूत्राणि । एतान्याश्रित्यैव इदं शास्त्रं व्याक्रियते । अनुस्वारविसर्ग + शर्षु च पाठः कर्तव्यः । एतेनैषां तत्तत्प्रत्याहारेषु ग्रहणम् । वृद्धिरादैच् ॥ आकार ऐकार औकारश्च वृद्धिसंज्ञः स्यात् । पपाच । अभैत्सीत् । यौति ॥ अदेङ् गुणः ॥ अकार एकार ओकारश्च गुणसंज्ञः स्यात् । पचन्ति । कृष्णर्धिः । रमेशः । गङ्गोदकम् ॥ इको गुणवृद्धी ॥ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते । कर्ता । चेता । मोदते । कारकः । अकार्षीत् । अचैषीत् । अस्तौषीत् । मेद्यति । मार्ष्टि । गुणवृद्धिशब्दाभ्यामिति किम्? द्यौः ॥ न धातुलोप आर्धधातुके ॥ धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः । लोलुवः । पोपुवः । मरीमृजः ॥ क्ङिति च ॥ कित्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । चितम् । स्तुतम् । भिन्नम् । चिनुमः । इग्लक्षण इति किम्? कामयते ।

Colophon :

इति सूत्रप्रकाशे प्रथमस्याध्यायस्य प्रथमः पादः ॥

Colophon of the 1st Pariccheda :

इति सूत्रप्रकाशे द्वितीयस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ॥

इति श्रीमद्भारद्वाजकुलजलधिश्रीकण्ठमतप्रतिष्ठापनाचार्यश्रीकण्ठावतारश्रीमदप्पयदीक्षितवंश्यस्य तत्पौत्रश्रीमत्सिंहप्पयदीक्षितनप्तृभूतश्रीवेङ्कटसुब्रह्मण्यदीक्षित - पौत्रस्य श्रीधर्मराजवेङ्कटेश्वरदीक्षितपुत्रस्य विशालाक्षी-

गर्भसंभवस्य श्रीमदप्पादीक्षितस्य श्रीमन्महादेवानुग्रहपात्रस्य श्रीगोपालकृष्णाभिधविद्वन्मकुटाधीतपातञ्जलमहातन्त्रस्य श्रीविश्वेश्वरसाग्निचित्यातिरात्रयाजिनो लब्धवाक्यप्रमाणतात्पर्यस्य कृतौ पाणिनिसूत्रप्रकाशे संज्ञासमासकारकविभक्त्यादिविधानं नाम प्रथमः परिच्छेदः ।

Colophon of the 8th adhyāya apparently the 3rd Pariccheda ;

इति सूत्रप्रकाशे अष्टमस्य चतुर्थः पादः । प्रकाशश्च संपूर्णः ।

संपूर्णस्य प्रकाशस्य स्फुरत्ता हि स्वभावतः ।
विद्याविनयसंपन्ने सा विशेषात्प्रसीदति ॥
अप्पादीक्षितरचिता वृत्तिः सूत्रस्य पाणिनीयस्य ।
बालानां सुखदात्री भूयादेषा बुधेषु कृततोषा ॥

इति श्रीमद्भारद्वाजकुलजलधि+श्रीमदप्पयदीक्षितानां साक्षादष्टमेनाप्पादीक्षितेन दीक्षितानां कृपावीक्षितेन निर्मिते पाणिनिसूत्रप्रकाशे अष्टमस्याध्यायस्य चतुर्थः पादः संपूर्णः ।

Immediatly after this colophon the fourth Pariccheda begins thus : अथ प्रक्रियापरिच्छेदश्चतुर्थः सिद्धान्तकौतुद्यनुसारेणाभिधीयते । सुधी उपास्य इति स्थिते ।

End :

उरुं विवारयिषति वारिरयिषति । वारयियिषयि । बाढं सिसाधयिषतीत्यादि रूपत्रयम् । षत्वं तु नास्तीत्युक्तम् । यङः सन्, ण्यन्तात्सन्, बोभूयिषयिषति । यङ् णिच् सन् ततो णिच्, बोभूययिषयति इत्यादि । इति प्रत्ययमाला ॥

Colophon :

इति प्रक्रियापरिच्छेदः संपूर्णः ।
एवं परिच्छेदचतुष्टयेन संज्ञादिभिः प्रत्ययमालया च ।
आङ्गादिभिः प्रक्रियया युतेन . . . रूपः ॥

इति श्रीअप्पादीक्षितविरचितः पातञ्जलसूत्रप्रकाशः संपूर्णः ।

इति सूत्रप्रकाशोऽयं कृतो बालसुखाप्तये ।
प्रीयतां तेन भगवानम्बिकारमणः शिवः ॥
अष्टाध्यायीपाठो ह्यनुवृत्तिस्तत्र तत्र सूत्रेषु ।
अर्थोदाहरणादिः प्रकरणसर्वस्वमन्यदपि किंचित् ॥
वार्तिकविशेषबोधः संगृह्य प्रक्रियाकथनम् ।
संत्यज्य धातुपाठं सर्वमिहास्माभिराख्यातम् ॥

142. 41. A. 75

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

The Uttarārdha deals with तिङन्त, कृदन्त, and वैदिकप्रक्रिया. But herein the Uṇādi is very briefly dealt with and Svaraprakriyā is completely omitted.

The MS. is almost complete breaking off in the Vaidikaprakriyā of the Uttarārdha.

Beginning :

End :

उच्चैःकृत्य, उच्चैःकृत्वा, उच्चैःकारं वा अप्रियं ब्रूते । नीचैःकृत्य, नीचैःकृत्वा, नीचैःकारं वा प्रियं ब्रूते इत्यादयः कृतो ज्ञेयाः । दिङ्मात्रमिदमुक्तम् ।

Colophon :

इति कृदन्तप्रक्रिया ।

143. 20. C. 57.

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

Palm-leaf. 60 Foll. 16 × 1 inches. 8 lines in a page. Telugu script. Old. Injured. Illegible writing.

Contains the Pūrvārdha (without the beginning) and a small portion of the Uttarārdha.

144. 28. H. 49.

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

Palm-leaf. 65 Foll. 16½ × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the Samāsaprakaraṇa of the Pūrvārdha.

145. 30. J. 30.

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

Palm-leaf. 37 Foll. 15½ × 1 inches. 8 lines in a page. Telugu script. Old. Much injured. Good writing.

Breaks off in the Kārakaprakaraṇa of the Pūrvārdha and contains the first 4 leaves of the Uttarārdha.

146. 41. A. 74.

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

Paper. 86 Foll. 10¼ × 5¼ inches. 12 lines in page. Devanāgarī script. Old. Injured. Good writing.

The colophon herein says that Kṛṣṇācārya the father of Rāmacandrācārya was the pupil of Gopāla.

Contains the Uttarārdha complete.

End of the Uttarārdha.

आनन्त्यात् सर्वशः शब्दा न शक्यन्तेऽनुशासितुम् ।
बालव्युत्पत्तयेऽस्माभिः संक्षिप्योक्ता यथामति ॥
प्रक्रियाकौमुदी सेयं रामचन्द्रप्रकाशिता ।
असद्वचस्तमो वध्यात् सच्चकोरप्रिया चिरम् ॥
जयति सुभगमूर्तिर्मुग्धहासावलोक-
प्रशमितजनतापो विट्ठलः स्वात्मदीपः ।
सचकितमिव लक्ष्मीः सेवते यत्पदाब्जं
ललिततरकराभ्यां साधु संवाहयन्ती ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यसकलसदागमाचार्यश्रीगोपालगुरुपूज्यपादशिष्यकृष्णाचार्यसुतश्रीरामचन्द्राचार्यविरचिता प्रक्रियाकौमुदी समाप्ता ॥

The scribe adds :

शके बाणरसेष्विन्दु (१९६९) मितेऽब्दे चैत्रभानुके ।
इषे पूर्णतिथावर्के पुत्रवत्पत्तने सुधीः ॥
गणेशो विट्ठलसुतः प्रक्रियाकौमुदीं शुभाम् ।
दशपुत्रोपनामेमां कौमुदीं समलीलिखत् ॥

147. 41. B. 28.

प्रक्रियाकौमुदी—रामचन्द्राचार्यकृता

Paper. 98 Foll. 10½ × 5 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the Pūrvārdha complete.

148. 10. H. 1.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Paper. 480 Foll. 9 × 7 inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 Volumes.

A Commentary on the Prakriyākaumudī of Rāmacandrācārya. The author Viṭṭhala was the son of Nṛsiṁha and Grandson of Rāmacandrācārya, the author of the Prakriyākaumudī. The author's mother was Māṇikkāmbā. He salutes one Rāgavendrasarasvatī, teacher in all the 14 branches of the learning and one Jagannāthāśrama who also is said to be an ascetic and expert in Vedānta philosophy. (Vide the stanza :

" जगन्नाथाश्रमं वन्दे यतिं वेदान्तकोविदम् ।
पदवाक्यप्रमाणज्ञं स्वधर्मनिरतं सदा ॥ "

Page 798. Prakriyākaumudī, Bombay Sanskrit Series, No. 82, part 2.)

Form the Kālaṇirnayadīpikāvivaraṇa it is known that Viṭṭhala's father Nṛsiṁha was a pupil of Kṛṣṇācārya, son of Nṛsiṁhācārya, who was elder brother of Rāmacandrācārya the author of the Prakriyākaumudī.

From the concluding verses of the Kālanirṇayadīpikāvivaraṇa of Nṛsiṁhācārya and of the Prasāda of Viṭṭhalācārya the following genealogy is known :

1. Avimuktācārya.
2. Anantācārya (pupil of Rāmasvāmi or Raghupati).
3. Nṛsiṁhācārya.
4. Kṛṣṇācārya (he had many brothers of whom Gopālācārya was the eldest).
   - 5. Nṛsiṁhācārya
     - 7. Kṛṣṇācārya.
   - 6. Rāmacandrācārya or Rāmācārya (the author of Prakriyākaumudī and pupil of Gopālācārya).
     - 8. Nṛsiṁhācārya (the author of Kālanirṇayadīpikāvivaraṇa and pupil of Kṛṣṇācārya, No. 7)
       - 9. Viṭṭhalācārya (the author of Prasāda and pupil of Rāghavendrasarasvatī and Jagannāthaśrama).

Breaks off in the Taddhitaprakaraṇa of the Pūrvārdha.

Beginning :

श्रीमद्विट्ठलमेकमव्ययमजं शब्दात्मकं ब्रह्म यः
स्वेच्छातो जगदुद्भवस्थितिलये हेतुः स्वमायागुणैः ।
यच्छ्वासः श्रुतिसंततिव्यवहृतिस्तं पुण्डरीकाश्रमे
भक्तानुग्रहहेतुतः स्थितमहं वन्दे मुदे संविदे ॥१॥
श्रीशंभुं पाणिनिं श्रीवररुचिमथ वाक्संस्कृतौ दीक्षितं श्रीशेषं तद्भाष्यहार्दप्रकटनपटुगीःपण्डितान्भर्तृमुख्यान् ।
वृत्तिन्यासादिकर्तॄन् स्वमतपरमतख्यापकान्भोजदुर्गक्षीरस्वामिप्रमुख्यान्प्रगुणमतिभजे तन्मतिज्ञप्तिहेतोः ॥
किं शेषः पाणिनिर्वा वररुचिरथवा सर्वविद्याप्रणेता
शंभुर्भूमावभूद्भूसुरकुलतिलको ह्यन्ध्रदेशेऽप्यवंशे ।

ऋग्वेदी सर्वशास्त्रप्रकटनपटुगीः कृष्णजो रामचन्द्रो-
नन्ताचार्यप्रपौत्रो दिशतु कृतिमतिं मे स कौण्डिन्यगोत्रः॥
वन्दे तं यतिबृन्दवन्दितपदं श्रीराघवेन्द्रादिय
नामाभाति सरस्वतीपरपदं वादीन्द्रविद्रावकम्।
यो विद्याः समदाच्चतुर्दश मुदा श्रेशेषभाष्यादिकाः
शिष्येभ्यो मयि यत्कृपास्ति सततं सच्छास्त्रसंवित्तये॥
लोकेऽस्मिन्यदुपक्रमं वरिवृतीत्यौदार्यलोकज्ञता
विद्वत्तोपकृतिः क्षमा सुजनता वेदोक्तधर्मादरः।
आचार्यं कृतकालनिर्णयमहाग्रन्थार्थसंदीपिका-
दीपं तं नरसिंहमात्मजनकं वन्दे विदां संततम्॥५॥
गम्भीरार्थां मितोक्त्या कलितसकलसच्छब्दरत्नाकरां श्री-
शेषोक्तन्यायगर्भां स्वपरमतयुतां **प्रक्रियाकौमुदीं** ताम्।
व्याकुर्वन् बुद्धिहीनो यदपि तदपि तत्पुत्रजो **रामचन्द्रा**-
चार्योक्तेः पाठरक्षाकरणगुणतया सज्जनैर्नोपहास्यः॥
तथाच पण्डितंमन्यैः प्रक्षिप्तैर्मलिनीकृता।
प्रक्रियाकौमुदी तस्याः **प्रसादः** क्रियते मया॥ ७॥
स्पष्टत्वात्समुपेक्षितानि कतिचिद्ग्रन्थात्कलत्पत्वतो
रामाचार्यवरैरमूनि विशदं व्याख्यामि सूत्राण्यहम्।
ग्रन्थेऽस्मिन्स्वरसाधनं कतिपयानौणादिकांश्च ब्रुवे
स्थाने तांश्च गणान्यथामति तथा न्यायान्पदैःसूचितान्॥
टीकेयं विपुलेति येन विदुषा संक्षिप्यते तस्य नो
लाभः किंतु समीहिताः पुनरमी सर्वे विशेषा हताः।
येनास्माभिरनेकसूरिरचितग्रन्थार्थमालोड्य त-
त्सारं मूलगतं विशेषविदुषां प्रीत्यै प्रकाशीकृतम्॥

तत्र तावत् **प्रक्रियाकौमुदीं** चिकीर्षवः श्रीरामचन्द्रा-
चार्यास्तत्समाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय
विशिष्टदेवताप्रणामलक्षणं शिष्यशिक्षार्थं मनस्युपनिबध्न-
न्तो विषयप्रयोजनाधिकारिसंबन्धांश्च सूचयन्तः प्रति-
जानते—**श्रीमद्विट्ठलमित्यादिना**।

Colophon:

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम्।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे **प्रक्रियाकौमुदीय**-
व्याख्यानेऽस्मिन् **प्रसादे** निरगमदमलः संधिसंज्ञाप्रसङ्गः॥

End:

राजाचार्याभ्यां नित्यं भोगोत्तराभ्यामेव प्राक्क्रीतीयः
प्रत्यय इष्यते। राजभोगीणः। आचार्यादणत्वं च।
आचार्यभोगीनः।

Colophon:

इति प्राक्क्रीतीयाः।

Kṛṣṇācārya No. 4 in the above table is also known to have lived in the Court of King Rāma and written a Vṛtti on Grammar.

149. 28. H. 50.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 91 Foll. 16¼ × 1¼ inches. 10 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains up to the end of the Strīpratyayaprakaraṇa in the Pūrvārdha.

150. 28. H. 51.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 138 Foll. 14 × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the तत्पुरुषसमासप्रकरण of the Pūrvārdha.

The following stanza is found in the beginning:

सर्वज्ञं सकलगुणैरुपास्यमानं
विश्वेशं विमलधिया विभावयन्तम्।
संसारे पतितजनान् पवित्रयन्तं
वन्दे तं हरिहरभारतीयतीन्द्रम्॥

151. 28. H. 52.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 266 Foll. 17½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the Pūrvārdha complete.

End :

अन्यत्रापि द्वन्द्वमित्येतदिष्यते । तदर्थं योगविभागः क्रियते । द्वन्द्वं युद्धं, द्वयोर्द्वयोर्युद्धमित्यर्थः । द्वन्द्वानि सहते । चार्थे द्वन्द्वः । इति द्विरुक्तिप्रक्रिया ॥

भाष्यवृत्तिहरिग्रन्थतद्व्याख्यामर्मवेदिनः ।
कौतुकाक्रान्तमनसः प्रमोदयतु मत्कृतम् ॥
श्रीरामचन्द्राचार्योक्तेः स्पष्टार्थत्वाद्विचित्रता ।
नामर्मज्ञैः प्रयोज्योऽर्थः स्फटिकाकारगो यथा ॥
पदे वाक्ये प्रमाणे च तत्त्वज्ञं ज्ञातृसंमतम् ।
रामचन्द्राचार्यसूरेरन्यं नोपलभामहे ॥
येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तानुमता च वैष्णवमहासिद्धान्तसंदीपिका ।
कालज्ञानविधौ व्यधायि विबुधानन्दि प्रबन्धत्रयं
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥
श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यवर्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणप्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन्प्रसादेसुविशदमगमत्तत्सुबन्तंसमाप्तिम् ॥

Colophon :

सुबन्तप्रसादः संपूर्णः ।

152. 28. I. 14.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 142 Foll. 17½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Much injured.

Contains the Uttarārdha only up to लकारार्थप्रक्रिया which is almost complete.

Beginning :

श्रीविट्ठलं सुरवरं प्रणमामि देवं
कारुण्यसिन्धुमखिलानतदत्तबुद्धिम् ।
ईषत्सहासमुखपङ्कजमात्मभास-
मुत्फुल्ललोचनविलोकननाशिताघम् ॥
तिङन्तकाण्डस्य हि केऽपि पारं
नाज्ञासिषुः शुद्धधियोऽपि सन्तः ।
तं प्रक्रियाकौमुदमंशमज्ञो
व्याख्यन्नहं स्यामुपहास्य एव ॥
प्रक्षेपकालुष्यनिरासहेतोः
प्रसादमस्या विदधे यथावत् ।
इति प्रतिज्ञातमतः करिष्ये
व्याख्यां स्वतः सज्जनतोषदात्रीम् ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इत्यभिप्रेत्य तिङन्तमभिधातुमिच्छन् ग्रन्थकृत् ग्रन्थमध्ये मङ्गलाचरणं करोति—**प्रकृतिरिति** । सा वैयाकरणाभिमता आद्या प्रकृतिः, प्रत्ययमवधिं कृत्वा यः पूर्वमुपादीयते शब्दः सा प्रकृतिः, प्रकर्षेण नियमेनास्मात् प्रत्ययः क्रियत इति वा प्रकृतिः, इत्यादिर्जयति उत्कर्षेण वर्तते ।

End :

सक्तून्पिबेति । पा पाने । पाघ्रा इति पिबादेशः । अतो हेरिति हेर्लुक् । भुङ्क्ष्वेति । भुजेः श्नमि अल्लोपे कृते चोः कुः . . .

153. 30. J. 30.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 24 Foll. 15½ × 1⅛ inches.

8 lines in a page. Telugu script. Old. Much injured. Good writing.

Begins in the last portion of the Tatpuruṣasamāsa and goes on up to the end of the Samāsaprakaraṇa in the Pūrvārdha.

The fly leaf gives the following name of the former owner of the MS :

Vāvilola Veṅkatas'iva S'āstri.

154. 30. K. 5.

प्रक्रियाकौमुदीव्याख्या प्रसादः—विट्ठलकृतः

Palm-leaf. 258 Foll. 14 × $\frac{3}{4}$ inches. 5 lines in a page. Telugu script. Old. Much injured. Illegible and clumsy writing.

Contains from the S'abdādhikāra (wanting the beginning) to the end of the Apatyādhikāra.

155. 41. B. 30.

प्रक्रियाकौमुदीव्याख्या प्रकाशः—कृष्णकृतः

Paper. 102 foll. $10\frac{1}{4}$ × $4\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This is a commentary on Rāmacandrācārya's Prakriyākaumudī by S'eṣa Kṛṣṇa son of S'eṣa Narasiṁhasūri. The name of the commentary *viz* Gūḍhārthabhāvavivṛti seems to be appropriate from the last stanza of each prakaraṇa. But Jagannāthapaṇḍita and others mention this commentary by the name of Prakriyāprakāsa or simply Prakās'a probably by the reason that the word Prakās'a is found associated with the names of various Prakaraṇas *viz.* संज्ञाप्रकाश etc. The commentary is said to have been written for the benefit of one Kalyāṇa at the request of his father Vīravara. In the introduction of the commentary which extends to 46 stanzas, the author gives the following pedigree of his patron Vīravara :

In the land of Udumbarahara spread out between the Ganges and the Yamunā, there is a village called Patrapuñja. Rūpadhara, a brāhmaṇa by caste, was its chief. His son was Nārāyaṇa. Nārāyaṇa had a son called Gaṅgādāsa. Gaṅgādāsa had by his wife Anabhā, a son named Vīravara. Kalyāṇa was Vīravara's son. Kalyāṇa was taught in Vyākaraṇa by S'eṣa Kṛṣṇa, the author of the commentary under description. This S'eṣa Kṛṣṇa has also written the Prākṛṭacandrikā and Kaṁsavadha (Vide, I. O. Library Catalogue, page 267, Vol I and Kavyamālā No. 6 respectively). He is also said to be the author of Padacandrikā, Sphoṭatattvanirūpaṇa, Pārijātaharaṇacampū, Murārivijaya, Yaṁlugantas'iromaṇi, Kriyāgopanakāvya, Dharmas'lokacaturdas'ī, Satyabhāmāpariṇaya, Uṣāharaṇacampū, Satyabhāmāvilāsa and Sūdrācaras'īromaṇi, (Vide the introduction of S'lokacaturdas'ī, Sarasvati Bhavana Texts No. 22). S'eṣa Kṛṣṇa's son was Vīres'vara whose pupil was Jagannātha paṇḍita. If we rely upon the introduction of the S'lokacaturdas'i referred to above it must be admitted that our author S'eṣa Kṛṣṇa was patronized by the prince Narottama of Kāsi, and Govardhanadhārin, son of Toḍaramalla, a minister of Emperor Akbar.

He is assigned to the 16th Century A. D. He should not be confounded with his name-sake *i.e.*, another Kṛṣṇa, nephew of Rāmacandra of the 14th century A. D.

Breaks off in the S'abdādhikāra of the Pūrvārdha.

Beginning :

अलिकुलमण्डितगण्डं प्रत्यूहव्यूहतिमिरमार्तण्डम् ।
सिन्दूरारुणशुण्डं देवं वेतण्डतुण्डमवलम्बे ॥ १ ॥
बृन्दारण्यमहीषु वंशनिनदामन्दामृतास्वादना-
न्निःस्पन्दानि दुधुक्षयेव सुरभीबृन्दानि संनादयन् ।
मन्दारद्रुमवीथिकासु विहरन्वन्दारुबृन्दारक-
द्वन्द्वस्तुत्यभिनन्दितोऽस्तु जगदानन्दाय नन्दात्मजः॥
शैवालश्रेणिशोभां दधति हरजटावल्लयो हन्त यस्या-
स्तद्वासोल्लासवल्गद्वरशफरतुलां यत्र धत्ते कलावान् ।
उन्मीलद्भोगिभोगावलिसुभगसिताम्भोजसंभाविताम्भा
गङ्गानङ्गारिसङ्गा मम महति विधौ मङ्गलान्यातनोतु॥
स्फटिकोपलगौरमिन्दुलेखा
तिलकं लोचनपेयमम्बिकायाः ।
विपदो विनिहन्तु मे विशाला
निजभालानलदीप्तमाद्यमोजः ॥ ४ ॥
कलितकमलपुस्तन्यस्तहस्ताग्रमुद्रा
दिशतु लिखनशुद्धिं शारदा सारदा नः ।
प्रतिवदनसरोजं या कवीनां नवीनां
वितरति मधुधारां माधुरीणां धुरीणाम् ॥ ५ ॥
भास्वद्भूमीवलयतिलके धर्मकर्मप्रसूता-
वार्यावर्ते सुचरितकृताचार्यके विश्ववन्द्ये ।
अन्तर्वेदिर्जयति यमुनाजह्नुजाव्याजभाजो-
र्बाह्वोर्मध्ये हरिगिरिशयोः स्पष्टलक्ष्मेव वक्षः ॥ ६ ॥
तत्रोदुम्बरहार इत्यभिधया जागर्ति नीवृद्वरः
स्वर्लोकप्रतिबिम्बमम्बरचरैः साशङ्कमालोकितः ।
यस्मिन्नलिपतकल्पशाखिविभवाः शाखाशतोद्भासिताः
सेव्यन्ते तरवोऽथ वेदगुरवः प्रत्याशयातैर्द्विजैः ॥७॥
ब्रह्मावर्तं नाम तत्रास्ति तीर्थं
सार्थं पुण्यं पूर्वपुण्यैरगण्यैः ।
यत्संसेव्य प्राप वल्मीकजन्मा
सन्मानार्हां काव्यावाचां समृद्धिम् ॥ ८ ॥
आस्ते तस्मिन्नमरनगरीगर्वसर्वस्वहारी
हारीभूतामलसुरसरित्पत्रपुञ्जाभिधानः ।
ग्रामः स्वःस्त्रीजनविनिमयीभूतरामाभिरामः
कामक्रीडाभवनमवनौ कश्चिदाश्चर्यरूपः ॥ ९ ॥
यत्केलीभवनोदरेऽम्बरमणिस्पर्धासुबद्धादरा
रत्नानां प्रकरा निशास्वपि दिनाद्वैतं समातन्वते ।
लज्जालोलदृशां विलासवलभीवातायनप्रस्थितै-
र्दृग्भङ्गिभ्रमरीभरव्यतिकरैरद्यापि नीलं नभः ॥ १० ॥
साग्नयोऽपि किल शीतलशीला
विश्रुता अपि बहुश्रुतवन्तः ।
पण्डिता अपि जडाः परिवादे
श्रोत्रिया इह सदा निवसन्ति ॥ ११ ॥
सद्धर्मकर्मपरिकर्मणमर्मविज्ञा
विज्ञातवेदविषया विषयानपेक्षाः ।
साक्षादिवात्र विधयो निधयो गुणानां
जातु द्विजा न हि निजाद्विचलन्ति मार्गात् ॥ १२ ॥
तत्र ब्राह्मणमण्डलेऽतिविपुले सत्कर्मभिर्निर्मले
वाल्मीकिप्रतिवेशवासवशतो विज्ञातसर्वागमे ।
आसीद्भूपधरः परः स्मरहरः सच्छ्रोत्रियाणां वरः
शौर्यौदार्यविवेकधैर्यनिलयो भूपालभूषामणिः ॥१३॥
शिवः कपाली मघवापि गोत्रभि-
च्चन्द्रः कलङ्की तपनो विकर्तनः ।
शेषोऽपि चाशीविषवंशसंभव-
स्तत्केन लोकेऽयमिहोपमीयताम् ॥ १४ ॥
प्रत्यर्थिक्षितिपालबालवनितासीमन्तसिन्दूरिका-
लुण्टाकः प्रकटप्रतापतपनप्रोद्भासिताशामुखः ।

त्रैलोक्यान्तरकर्मनिर्मितपरिप्राप्तप्रतिष्ठस्ततः
संभूतः कलिकालकल्मषपरीहाराय नारायणः ॥१५॥
यः सिंहासनमास्थितोऽपि सहजं पद्मासनं सेवते
यो मालाः परिवर्तयत्यविरतं शाला विशालाः श्रिताः।
योगं यः श्रयति क्षितिक्षिदुचिताचारे नियोगं चर-
न्वैदेहं जनकं व्यजेष्ट न परं लोकानशेषानपि ॥१६॥
तस्मादाविरभूत्प्रभूतविभवो गाङ्गेयमेयोर्जितो
गङ्गादास इति प्रसिद्धमहिमा गङ्गां समाराध्य यः।
स्वामाख्यामकृतार्थयज्जगदलंचक्रेऽन्यचक्रेश्वरा-
नक्लेशादजयज्जयैकनिलयः शक्रेऽप्यवज्ञापरः ॥१७॥
हरिहरपदपद्मद्वन्द्वनिर्द्वन्द्वभक्तिः
स्फुरदुरुदुरितौघोल्लाघजङ्घालकीर्तिः।
प्रतिदिवसवितीर्णस्वर्णसंप्रीणितार्थि-
व्रजविहितशुभाशीः शीलिताशेषकामः ॥ १८ ॥
नानाजन्मशतार्जितेन तपसा गङ्गाधरारार्धनै-
र्यः श्रीमाननभाभिधानसुभगे पातिव्रते ज्योतिषि।
लेभे वीरवरं सुतं द्विजवरं प्रह्लादभीष्मार्जुन-
प्राया भागवता न यं तुलयितुं ब्रह्मर्षयो वा क्षमाः॥
तद्वंशे भूवतंसे समजनि रजनीजानिलज्जानिदान-
स्फूर्जद्दानावदानप्रथितपृथुयशोधोरणीधौतविश्वः।
सर्वोर्वीशक्रचक्राक्रमनमितशिरःकोटिकोटीरकोटि-
प्रोद्यद्रत्नरोचिःपरिचरितलसत्पादपङ्केरुहश्रीः॥
कामो वामदृशां निमिर्नयजुषां कालानलो विद्विषां
स्वःशाखी विदुषां गुरुर्गुणवतां पार्थो धनुर्धारिणाम्।
लीलावासगृहं कलाकुलभुवां कर्णः सुवर्णार्थिनां
श्रीमान्वीरवरः क्षितीश्वरवरो वर्वर्ति सर्वोपरि॥२१॥
यस्य प्रौढतरः प्रतापतरणिः प्रत्यर्थिपृथ्वीभृतां
कीर्तिं सर्वगुणाश्रयामुदवहत्संयोजितां वेधसा।
लाजा मेरुहिरण्यरेतसि हुताः क्ष्मामण्डलस्थण्डिले
यस्मादुत्पतिताः स्फुरन्ति परितस्तारामिषाद्भूरिशः॥
सर्पी सा यत्कृपाणी गुरुभुजभुजगासङ्गतः सङ्गरादौ
सद्यः कृत्तारिकण्ठच्युतरुधिररजोयोगमभ्यावहन्ती।
दृप्यद्दानाम्बुपूरोत्करकरटिघटागण्डशैलेषु लग्ना
सूते सद्यः किलाण्डान्यतिविमलगलद्भूरिमुक्ताच्छलेन॥
गङ्गादासात्मजन्मक्षितिरमणमणेः कीर्तिगङ्गानुषङ्गाः
श्वेतन्ते स्फीतफेनस्तबकसमरुचो हारिदश्वाः किलाश्वाः।
द्राग्वीक्ष्यामून्बिडौजाः पृथुपुलकभरः पार्थमाशङ्कमानो
विष्वग्बाष्पायमाणान्यनुवहति मुदा लोचनानां शतानि॥
यद्वाणीं वाणिनीनामधरमधुरसद्रोहिणीं रोहिणेयः
श्रुत्वा हालावहेलां रचयति सुचिरं सन्मदाकूणिताक्षम्।
किंच द्राक्षासदृक्षाक्षररसनकरस्रस्तरुद्राक्षमालः
सोत्कण्ठं नीलकण्ठोऽप्यनुपठति शिरस्ताण्डवाडम्बरेण॥
मौलौ मन्दारदामभ्रमदलिपटलीकाकलीं श्रोणिबिम्बे
कूजत्काञ्चीकलापं चरणकमलयोर्मञ्जु मञ्जीरशिञ्जाम्।
उत्सङ्गे कीरगीतं स्तनभुवि मसृणं वल्लकीपञ्चमं वा
यत्काव्ये दत्तकर्णा शिव शिव मनुते भारती भारमेव॥
इन्दुं निन्दति चन्दनं न सहते विद्वेष्टि पङ्केरुहं
हारं भारमवैति नैव कुरुते कर्पूरपूरे मनः।
स्वर्गङ्गामवगाहते हिमगिरिं गाढं समालम्बते
यत्कीर्तिर्विरहातुरेव न मनागेकत्र विश्राम्यति॥ २७ ॥
माद्यद्वेतण्डगण्डस्थलबहलगलद्दानवारिप्रवाहैः
वैरिस्त्रीबाष्पवर्षैः प्रतिदिनविहितैर्विप्रदानोदकैश्च।
सिक्तापातालमूलं किमपि वसुमती यस्य नित्यं प्रसूते
भूरि स्वर्गापवर्गप्रभृतिफलभृतः कीर्तिलक्ष्मीप्ररोहान्॥
बालार्कोदरसोदराङ्घ्रिकिरणस्पृष्टारिसीमन्तिनी-
सीमन्तेषु समर्थयन्नविरतं सिन्दूरपूरश्रियम्।
सर्वाशाः परिपूरयन्निजयशःकर्पूरपूरैश्चिरं
श्रीमान् वीरवरो जगत्यनुपमश्रीः केन वा वर्ण्यताम्॥
सोऽयं काव्यकलाविलासभवनं श्रीपारसीकेश्वर-
प्राणानामधिदैवतं गुरुगुणश्रेणीमणीरोहणः।

विद्यानां निकषोपलः कुलगृहं केलीकुरङ्गीदृशां
शश्वत्पण्डितमण्डलीपरिवृतो विद्याविनोदं व्यधात् ॥
तस्यास्ति सर्वजनलोचनलोभनीय-
सौन्दर्यसारसविलासनिवासभूमिः ।
विद्याविनोदपरिमोदितभूरिसूरिः
कल्याण इत्यभिधया तनयो नयज्ञः ॥ ३१ ॥
यस्यापाङ्गतरङ्गिते सुरगवी वक्त्रे च वाक्चातुरी
कण्ठे चापि सरस्वती हृदि हरेर्भक्तिश्च शक्तिर्भुजे ।
आस्ते पाणितले सदा वितरणश्रीः पादपद्मे नृप-
श्रेणीमौलिमणिप्रभा बत कथं स्त्रैणः कुमारोऽप्यसौ ॥
सर्वविद्याविदोऽप्यस्य कल्याणगुणशालिनः ।
अभिन्यविशतातीव तीक्ष्णा व्याकरणे मतिः ॥ ३३ ॥
रसालंकारसारापि वाणी व्याकरणोज्झिता ।
श्वित्रोपहतगात्रेव न रञ्जयति सज्जनान् ॥ ३४ ॥
कल्याणस्य तनूद्भवस्य नृपतिः कल्याणमूर्तेस्ततः
कल्याणीं मतिमाकलय्य विषमग्रन्थार्थसंवित्तये ।
कृष्णं शेषनृसिंहसूरितनयं श्रीप्रक्रियाकौमुदी-
टीकां कर्तुमसौ विशेषविदुषां प्रीत्यै समाजिज्ञपत् ॥३५॥
अस्फुटभावा प्रस्फुटदोषाभिहितापसिद्धान्ता ।
असमर्थकपदबन्धा नैषापरथा विभावयत्यर्थम् ॥ ३६ ॥
तस्माद्वीरवरान्महीशमुकुटालंकारचूडामणेः
प्राप्याज्ञां सुचिरं विभाव्य च हृदि ज्योतिर्नृसिंहाभिधम् ।
संतोषाय विशिष्य भाष्यविदुषां बोधाय दुर्मेधसां
व्याख्याम्याकरसाक्षिकं सुविशदं तां प्रक्रियाकौमुदीम् ॥
केचित्पूर्वनिबद्धसिद्धवचनोपन्यासदक्षाः परे
पौर्वापर्यविरोधबोधविधुरा दृष्टाक्षरग्राहिणः ।
किं तैर्वक्तृभिरत्र यः स्वविभवैरुद्दूष्य पूर्वं परा-
नुक्तं वक्ति परिच्छिनत्ति विषमं व्याख्यात्यसौ दुर्लभः ॥
प्राचां सूचितसूचितार्थगहने वाचां प्रपञ्चेऽद्य न-
श्चेतश्चञ्चलताविमोहविधुरं चिन्तां चिरं चुम्बति ।
कामं किंतु निरस्तविस्तरमिह प्रस्तुत्य मूलं शिशु-
त्रासान्यासि मया मितं हितमिहानुक्तं विविक्तं च यत् ॥
दुस्तर्ककर्कशधियां विदुषां मितोक्त्या
निःशेषदोषपरिशोषमृते न तोषः ।
हन्ताभिनन्दति न मन्दमतिर्बहूक्तौ
तत्केन वाणि करवाणि जनानुवृत्तिम् ॥ ४० ॥
कतिचिदुद्धतनिर्भरमत्सराः
कतिचिदात्मवचःस्तुतिशालिनः ।
अहह केऽपि निरक्षरकुक्षय-
स्तदिह संप्रति कं प्रति मे श्रमः ॥ ४१ ॥
अबुधा मुधा बत सुधासरसीसरसीभवद्वचनवीचिचये ।
मयि साधुसाधनपरे भवतां भवताच्चिराय खलता खलता ॥
मात्सर्यमुत्सार्य तथापि चार्यै-
राचार्यहार्दं सुजनैर्विचार्य ।
फणिप्रयुक्ता भणितीर्विचिन्त्य
चिरं मदुक्तिः परिभावनीया ॥ ४३ ॥
भाष्यादिषु न्यायसिद्धमर्थमाश्रित्य सिद्धवत् ।
व्याख्यास्ये कौमुदीन्यायाननुसंदध्वमाकरात् ॥ ४४ ॥
वह्नौ सुवर्णमिव यत्परिशोध्य शब्दा-
लंकारनामनि मया निहितं निबन्धे ।
उद्धृत्य सारमिदमीयमिहोपबद्धं
सिद्धान्तशुद्धिविबुभुत्सुजनानुरोधात् ॥ ४५ ॥
हेवाकिभावादिह चेदहंयुर्दोषं मृषा पश्यति निस्तुषेऽपि ।
किं तत्र कुर्मो मृदुलं दुकूलं चेन्मूषको दूषयति द्विषाणः ॥

विघ्नविघाताय कृतं मङ्गलमादौ निबध्नन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते—श्रीमदिति । वयं प्रक्रियाकौमुदीं कुर्म इत्यन्वयः । कुर्म इति संबन्धात् वयमिति कर्ता लभ्यते, अस्मद्युत्तम इत्युक्तेः । अस्मदो द्वयोश्चेत्येकत्वेऽपि बहुवचनम् । वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यत्यपि लट् । न तु वर्तमाने;

शास्त्रैकदेशसंबन्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥

इति । विचारांशं विहाय साधुत्वप्रक्रियामात्रप्रतिपादनादस्य तदेकदेशत्वम् । कार्यान्तरं बालप्रबोधनम् । शब्दशास्त्रस्य साधुशब्द एव विषयः । प्रयोगार्हसाधुशब्दज्ञानं च प्रयोजनम् । तत्कामोऽधिकारी । ग्रन्थविषययोः प्रतिपाद्यप्रतिपादकभावः संबन्ध । ग्रन्थसाधुशब्दज्ञानयोः साध्यसाधनभावः । विषयप्रयोजनयोर्विषयविषयिभावश्चेति संबन्धचतुष्टयम् । तदेव प्रकरणस्याप्यनुबन्धचतुष्टयम् । अवान्तरप्रयोजनं तु बालप्रबोधनम् । बालश्चावान्तराधिकारीत्यनुबन्धचतुष्टयसद्भावादारम्भः प्रकरणस्य प्रतिपादितः । संप्रति ग्रन्थमारभमाणः परमेश्वरेण पाणिनये उपदिष्टानि वर्णक्रमप्रदर्शकानि चतुर्दशसूत्राण्याह—अइउणिति ।

Colophon :

इति माधवसरस्वतीविरचितायां प्रक्रियाकौमुदीदीपिकायां सुधायां संज्ञाप्रकरणम् ।

Colophon at the end of अजन्तनपुंसकलिङ्ग, (Page 166) :

श्रीविद्येन्द्रवनाख्यस्य गुरोः पादावनुस्मरन् ।
अकरोन्माधवयतिरजन्तप्रक्रियासुधाम् ॥

Colophon at the end of स्त्रीप्रत्यय—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविद्येन्द्रवनशिष्यश्रीमाधवसरस्वतीविरचितायां प्रक्रियासुधायां स्त्रीप्रत्ययव्याख्या समाप्ता ।

End :

अत्रेति । परस्परमित्यत्र इतरेतरमिति द्वितीयान्तस्य द्विर्वचने कृते समासवद्भावेन सुब्लुक् । समासस्वरोऽन्तोदात्तत्वम् आम्रेडितस्वरापवादः । समासत्वादेव प्रातिपदिकत्वात् द्वितीयैकवचनादि । स्त्रीनपुंसकयोरिति । स्त्रीनपुंसकयोर्यत् सर्वनाम कर्मव्यतीहारे वर्तते तस्योत्तरपदस्य या विभक्तिस्तस्याः स्थाने अम्भावो वक्तव्य इत्यर्थः । अन्योन्यं परस्परमिति । द्विर्वचनं विभक्तेरम् भावः । पूर्वपदस्य सुः । पक्षे अन्योन्यमित्यादीति । स्त्रियां समासवद्भावात् सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति ङीपो निवृत्तिः ॥ इति द्विरुक्तिप्रक्रिया ॥

Colophon :

इति प्रक्रियाव्याख्यानसंग्रहे सुबन्तः समाप्तः ॥
इति प्रक्रियासुधायां पूर्वार्धं समाप्तम् ।

158. 21. Q. 3.

प्रक्रियासर्वस्वम्—नारायणभट्टकृतम्

Palm-leaf. 209 foll. 19 × 3 inches. 12 lines in a page. Malayālam script. Old. Good. Good writing.

This is a recast of Pānini's Aṣṭādhyāyī arranging and explaining the sūtras so as to suit the requirements of beginners in the formation of words. The author Nārāyaṇabhaṭṭa is the same as the author of Nārāyaṇīyam, a poem in praise of Lord Srī-Kṛṣṇa worshipped at Guruvāyūr in Malabar Dt. His patron was the King Devanārāyaṇa of Ambalapuzha in Travancore State. His preceptor was Acyuta. He was the son of Brahmadatta. He is assigned to the later part of the 16th Century and the earlier part of the 17th century A. D.

The work is divided into 20 Khaṇḍas, namely : (1) संज्ञा (2) परिभाषा (3) सन्धि (4) कृत् (5) तद्धित (6) समास (7) स्त्रीप्रत्यय (8) सुबर्थ (9) सुब्विधि, (10) आत्मनेपद, (11) तिङ्,

(12) लार्थ, (13) सनन्त, (14) यङन्त (15) यङ्लुगन्त, (16) सुब्धातु, (17) न्याय, (18) धातु, (19) उणादि and (20) वैदिक.

Contains Khaṇḍas 1 to 19.

Beginning :

रासविलासविलोलं स्मरत मुरारेर्मनोरमं रूपम् ।
प्रकृतिषु यत्प्रत्ययवत्प्रत्येकं गोपिकासु संमिलितम् ॥
तिष्ठत्येवानिलोऽपि प्रचरति गिरिरप्याज्ञया यस्य राज्ये
शत्रोः सर्वाभिसारे सति रचयति यस्तस्य सर्वापहारम् ।
सोऽयं निःशेषशास्त्रश्रुतिनिवहकलानाटकेष्वद्वितीयो
भाति श्रीदेवनारायणधरणिपतिर्मग्नचेता मुकुन्दे ॥
यो बृन्दावनवासिनो नियमिनः साक्षात्कृताधोक्षजाद्
दुष्प्रापं खलु नारदाद् ध्रुव इव प्रापोपदेशं परम् ।
यस्यापास्तसमस्तवस्तुकुतुकं कृष्णावलोकोत्सव-
क्रीडाकौतुकि मानसं विजयते सोऽयं महात्मा नृपः ॥
सोऽथ कदाचन राजा स्वगुणैराकृष्य संनिधिं नीतम् ।
श्रीमातृदत्तसूनुं नारायणसंज्ञमशिष्टदवनिसुरम् ॥
वृत्तौ चारु न रूपसिद्धिकथना रूपावतारे पुनः
कौमुद्यादिषु चात्र सूत्रमखिलं नास्त्येव तस्मात्त्वया ।
रूपानीतिसमस्तसूत्रसहितं स्पष्टं मितं प्रक्रिया-
सर्वस्वाभिहितं निबन्धनमिदं कार्यं मदुक्ताध्वना ॥
इह संज्ञा परिभाषा संधिः कृत्तद्धिताः समासाश्च ।
स्त्रीप्रत्ययः सुबर्थाः सुपां विधिश्चात्मनेपदविभागाः ॥
तिङपि च लार्थविशेषाः सनन्तयङ्यङ्लुकश्च सुब्धातुः ।
न्यायो धातुरुणादिश्छान्दसमिति सन्तु विंशतिः खण्डाः ॥
इतीरितो भूपतिना पुनः पुनः
क्षणे क्षणे शिक्षितरीतिकौशलः ।
असाध्यवस्तुन्यपि संप्रवृत्तवान्
महार्णवे पोत इवानिलाश्रयात् ॥
अयमच्युतगुरुकृपया पाणिनिकात्यायनादिकारुण्यात् ।
यत्नः फलप्रसूः स्यात्कृतरागरसोऽद्य शब्दमार्गजुषाम् ॥

इहादौ प्रत्याहारोक्त्यै तत्सूत्राण्युच्यन्ते—

अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति ।

इहागमादेशधातुगणपाठप्रत्ययप्रत्याहारसूत्राण्युपदेशाः । 'उपदेशेऽजनुनासिक इत्' इत्यधिकारे हलन्त्यम् ।

End :

वने रक्षन् ॥ संवृणोति वर्णान्तिरं व्याप्नोति वा वलक्षो धवलः । लाक्षाद्राक्षामिक्षादयः ॥ लान्त्येनाम् । द्रवति मधु अस्मात् द्राक्षा । आमिक्षो हविर्भेदः । आद्युक्तः पीयूक्षा वृक्षः । इति भोजोक्ताः ॥

नान्तं प्रापदुणादिशास्त्रमियता शब्दाननुक्तानतो
धातुप्रत्ययरूपतः प्रविभजेत्कार्यात्किदादीन्वदेत् ।
रूढाः साधव एव ते च शकटापत्यादिभिर्धातुजाः
सर्वेऽपीत्युदितं ततोऽपि बहुलमित्यूचे स्वयं पाणिनिः ॥
उणादिवृत्तित्रितयं दण्डनाथकृतिं तथा ।
दृष्ट्वैतत्कृतमस्माभिर्देवनारायणाज्ञया ॥

Colophon :

इति श्रीमत्केरलभूवलयभूषणदेवनारायणधरणिपति-करुणाशरणेन नारायणचरणपरायणेन नारायणकविना विरचिते प्रक्रियासर्वस्वे उणादिखण्डः समाप्तः ।

The scribe adds—

कौलम् ९०९ मतु तुलामासम् १०२ बुधनाच्च तिरुवोणवुं पूर्वपक्षत्तु अष्टमियुं कुम्भराशियुं कूडियसमये एऴुत्तीर्नु.

159. 24. C. 1.

प्रक्रियासर्वस्वम् —नारायणभट्टकृतम्

Palm-leaf. 138 Foll. 11¾ × 2 inches.

12 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Breaks off in the Tadditaprakaraṇa.

160. 24. C. 3.

प्रक्रियासर्वस्वम्—नारायणभट्टकृतम्

Palm-leaf. 78 Foll. 19 × 2½ inches. 14 lines in a page. Malayālam script. Old. Injured. Good writing.

Begins in the course of the Tadditaprakaraṇa and breaks off in the Lakārārthaprakaraṇa.

161. 35. C. 5.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 105 Foll. 10 × 5½. 15 lines in a page. Devanagari script. Old. Good. Clear writing.

An abridgement of Bhaṭṭojidīkṣita's Siddhāntakaumudī by Varadarāja, who is said to have been the pupil of Bhaṭṭojidīkṣita. He is assigned to the 17th Century, A.D.

The work is composed in the following order.

(1) संज्ञाप्रकरणम्, (2) संधिप्रकरणम्, (3) शब्दाधिकारः (4) अव्ययप्रकरणम्, (5) तिङन्तप्रक्रिया, (6) कृदन्तप्रक्रिया, (7) कारकम्, (8) समासः (9) तद्धिताः (10) स्त्रीपत्ययाः (11) वैदिकप्रक्रिया (12) स्वरप्रक्रिया.

Complete in above-mentioned 12 Sections.

Beginning :

नत्वा वरदराजः श्रीगुरून् भट्टोंदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट्। लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति माहेश्वराणि प्रत्याहारसूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ।

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

हलन्त्यम् । उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।

End :

पुंसः कर्मणि ॥ ब्राह्मणादित्वात् ष्यञ् । सुते दधिष्वनश्वनः ॥ चयतेरसुन् ॥ चायेरन्ते ह्रस्वश्चेति चकारादसुनो लुडागमः । लिति ॥ प्रत्ययात्पूर्वमुदात्तं स्यात् ॥ चिकीर्षकः । अत्र ईकारस्योदात्तता । इत्यादिप्रयोगमनुसृत्यान्वाख्यातव्यम् ।

Colophon :

इति स्वरप्रक्रिया ।
एषा वरदराजेन बालानामुपकारिका ।
अकारि पाणिनीयानां मध्यसिद्धन्तकौमुदी ॥
कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी ।
तस्याः संख्या तु विज्ञेया खबाणकरवह्निभिः ॥

इति श्रीचविकण्टिवरदराजभट्टकृता मध्यसिद्धान्तकौमुदी समाप्ता ।

The scribe adds—

संवत् १८२१ वर्षे श्रावणबहुलपञ्चमीदिने अयं मोहनलिखितम् ।

162. 10. E. 19.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 102 Foll. $9\frac{1}{2} \times 4$ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Breaks off in the Kṛdantaprakaraṇa.

163. 10. E. 23.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 25 Foll. $11\frac{3}{4} \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Kāraka, Strīpratyaya, Vaidika and Svara prakaraṇas.

Date of copying: S'aka 1746. Tāraṇa year. Saṁ. 1880.

164. 11. B. 44.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 67 Foll. $8 \times 3\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Tiṅantaprakaraṇa only.

Date of copying—S'aka. 1692. Khara year.

Name of the scribe—Sitārāma.

165. 11. C. 24.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 191 Foll. $9\frac{3}{4} \times 4\frac{1}{4}$ inches. 8 lines in a page. Devanāgarī script. Old. Injured. Clear writing.

Breaks off in the Samāsaprakaraṇa.

166. 11. D. 143.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 19 Foll. $9\frac{1}{2} \times 4$ inches. 9 lines in a page. Devanāgari script. Old. Good. Good writing.

Wants the beginning in the Kṛtprakaraṇa and breaks off in the Kārakaprakaraṇa.

167. 35. B. 2.

मध्यसिद्धान्तकौमुदी—वरदराजकृता

Paper. 40 Foll. $11\frac{1}{4} \times 5\frac{3}{4}$ inches. 14 lines in a page. Devanāgarī script. Old. Good. Illegible writing.

Contains the Tiṅantaprakaraṇa.

Date of copying: Saṁ. 1888. S'aka 1754.

168. 22. Q. 19.

रूपावतारः—धर्मकीर्तिकृतः

Palm-leaf. 247 Foll. $15\frac{1}{8} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Foll. 187*b* and 188*a* are left blank.

Wooden boards are added to both sides.

This is a work on Panini's grammar by Dharmakīrti. The Sūtras of the Aṣṭādhyāyī are dealt with in different order so as to give facilities for beginners The MS. contains the 2nd part or the Uttarārdha of the work dealing with the roots. Hence the part is designated as Dhātupratyayapaddhati and Tiṅantas'iromaṇi in this MS. However the MSS. available in the Madras Govt. Oriental MSS. Library and the Tanjore Palace Library designate it as

Dhātupratyayapañcikā and Tiṅantaśiromaṇi (Vide D. Nos. 1334 to 1336 of the Madras Des. Catalogue and 5819 of the Tanjore Des. Catalogue). Prof. M. Rangacharya in his printed edition of the work, suggests that the author may be placed somewhere between the 9th and 13th Centuries A.D.

Beginning :

प्रणम्य शिरसा देवीं बालानां हितकारिणीम् ।
यथासारं प्रवक्ष्यामि धातुप्रत्ययपद्धतिम् ॥

तत्र धातुषु प्रत्ययेषु च किमर्थमनुबन्ध उच्यत इत्याशङ्क्याह—धातूनामकारादयः सर्वेऽनुबन्धाः कार्यार्थाः । आत्मनेपदिनामकारः अनुदात्तङित आत्मनेपदम् इत्यात्मनेपदार्थः । परस्मैपदिनामकार उच्चारणार्थः । उभयपदिनां ञकारः स्वरितञितः कर्त्रभिप्राये क्रियाफले इति विशेषणार्थः । आकार आदितश्चेति विशेषणार्थः । इकारः इदितो नुम् धातोरिति विशेषणार्थः । ईकारः श्विदितो निष्ठायामिति विशेषणार्थः । ऊकारः स्वरतिसूतिसूयतिधूञूदितो वेति विशेषणार्थः । ऋकारो नाग्लोपिशास्वृदितामिति विशेषणार्थः । ऌकारः पुषादिद्युताद्यृल्दितः परस्मैपदेषु इति विशेषणार्थः । एकारो हृम्यन्तक्षणश्वसजागृणिश्व्येदितामिति विशेषणार्थः । ओकारः ओदितश्चेति विशेषणार्थः । ओहागिति ककारश्च हश्च व्रीहिकालयोरिति विशेषणार्थः ।

End :

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥

शकादिषूपपदेषु अस्त्यर्थेषु च धातुमात्रात् तुमुन् प्रत्ययो भवति । अक्रियार्थोपपदार्थोऽयमारम्भः । शक्नोति भोक्तुम् । धृष्णाति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । लभते भोक्तुम् । प्रक्रमते भोक्तुम् । उत्सहते भोक्तुम् । अर्हति भोक्तुम् । अस्त्यर्थेषु अस्ति भोक्तुम् । विद्यते भोक्तुम् ॥ पर्याप्तवचनेष्वलमर्थेषु ॥ पर्याप्तिरन्यूनता । पर्याप्तिवचनेष्वलमर्थेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । पर्याप्तवचनेष्विति किम् । अलं कृत्वा । अलं भुक्त्वा इत्यादयः सर्वत्रावगन्तव्याः ॥

Colophon :

इति तिङन्तशिरोमणौ कृदन्तोऽष्टमः परिच्छेदः । परिसमाप्तश्चायं तिङन्तशिरोमणिः ।

The fly-leaf 1 contains the following stanzas :

श्रीमान् महागणपतिः श्रियमातनोतु
निर्विघ्नमाकलयतामनिशं प्रसादम् ।
मच्चित्तवारिरुहि साकमुमापतिभ्या-
मानन्दपूर्णहृदयश्च निषीदतात्सः ॥
महागणेशः सघृणः प्रसन्नो महाप्रदो मर्दितविघ्नसङ्घः ।
ससोमसोमामरसिन्धुमौलिः सदा हृदम्भोरुहि मे निषद्यात् ॥
अष्टादशभुजां देवीमनेकाभरणोज्ज्वलाम् ।
प्रतिगर्भस्थितां दुर्गां परसंहारिणीं भजे ॥
जीर्णपादुकदानेन ब्राह्मणाय महात्मने ।
अश्वरत्नं मम प्राप्तं यन्नष्टं तन्न दीयते ॥
या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥
साम्बा पुनातु भवभूतिपवित्रिताङ्गा
गङ्गाजलं च हृदयं च कुचौ च पादौ ।
वक्त्रं च वीक्ष्य मदनेन विदह्यमाना
हारे हरे हिमकरे मकरे करे च ॥

The fly-leaves 2 and 3 give the contents of the work as given below :

तिङन्तशिरोमणिस्थदशलकारविकरणप्रत्ययादीनां ज्ञापकपत्रिकाविवेकः—

लट्परिच्छेदारम्भः, लङ्परिच्छेदः, लिट्परिच्छेदः, आशिषि लिङ्परिच्छेदः, भावे लकारः, कर्मणि लकारः, लिट्परिच्छेदः, लुङ्परिच्छेदः, लोट्परिच्छेदः, लुङ्परिच्छेदः, लृट्परिच्छेदः, लङ्परिच्छेदः, लेट्परिच्छेदः, भावकर्मणोर्लिङादिविचारः, भावकर्मणोर्लुङ्, भावकर्मणोर्लट्, सनादिप्रत्ययारम्भः, यङ्परिच्छेदः, यङ्लुगन्तविचारः, णिजन्तपरिच्छेदः, सनन्ताण्णिजन्तविचारः, लुङ्प्रभृतिलकारार्थः, कृत्प्रत्ययारम्भः, लटि लकारे शब्विकरणम्, लटि-लुग्विकरणम्, लटि श्लुविकरणम्, लटि श्यन्विकरणम्, लटि श्नुविकरणम्, लटि शविकरणम्, लटि श्नम्विकरणम्, लटि उविकरणम्, लटि श्नाविकरणम, लटि चुरादिणिज्विकरणम्। विकरणम् (१०)। लङि लकारे शब्विकरणम्, लङि लुग्विकरणम्, लङि श्लुविकरणम्, लङि श्यन्विकरणम्, शविकरणं च, लङि श्नुम्विकरणम्, लङि उविकरणम्, लङि श्नाविकरणम्, लङि चुरादिणिज्विकरणम्, लोड्लकारे शब्विकरणम्, लोड्लकारे लुग्विकरणम्, लोड्लकारे श्लुविकरणम्, लोड्लकारे श्यन्विकरणम्, लोड्लकारे श्नुविकरणम्, लोड्लकारे शविकरणम्, श्नम्विकरणं च, लोड्लकारे उविकरणम्, चुरादिश्च। लिङ्लकारे शब्विकरणम्, लिङ्लकारे लुग्विकरणम्, लिङ्लकारे श्लुविकरणम्, लिङ्लकारे श्यन्विकरणम्, लिङ्लकारे श्नुविकरणम्, लिङ्लकारे शविकरणम्, लिङ्लकारे श्नम्विकरणम्, लिङ्लकारे उविकरणम्, लिङ्लकारे श्नाविकरणं चुरादिश्च। आशिषि लिङि शब्विकरणम्, अनिट्कारिकाः, तासामर्थश्च। आशिषिलिङि लुग्विकरणम्, आशिषिलिङि श्नुविकरणम्, आशिषिलिङि श्यन्विकरणम्, आशिषिलिङि श्नम् विकरणम्, आशिषिलिङि चुरादिश्च। उणादि प्रत्ययारम्भाः, क्त्वाप्रत्ययारम्भः, ल्यप्प्रत्ययारम्भः, खमुञ्णमुलादिप्रत्ययारम्भः, तुमुन्प्रत्ययारम्भः, तिङन्तशिरोमणिरीत्या धातुमाला।

तिङन्तशिरोमणिस्थदशलकाराणां ज्ञापकपत्रिकाविवेकः संपूर्णः।

The Last Leaf contains the following stanzas:

"शारदा वरदा माता शारदाब्जलसन्मुखा।
सादरा वदनाम्भोजे सीदतां मामके सदा॥
साधरणाख्यके वर्षे भानौ कटकसंस्थिते।
शुक्लपक्षे च सप्तम्यां भौमवारे शुभे दिने॥
श्रीवत्सगोत्रजातेन वेङ्कटेशेन धीमता।
प्रत्यङ्गिराकटाक्षाप्तविद्येन लिखितः स्वयम्॥
तिङन्तकाण्डविशदस्तिङन्ताख्यशिरोमणिः।
शब्दशास्त्राम्बुधेर्जातस्तिङन्ताख्यलसन्मणिः॥"

169. 9. I. 20.

रूपावतारव्याख्या प्रक्रियाकल्पवल्लरी— नृसिंहकृता

Paper. 157 Foll. 8 × 6 inches. 16 lines in a page. Devanāgarī script. Old. Good. Good writing.

A commentary on Dharmakīrti's Rūpāvatāra by Nṛsiṁha son of Annadātṛsūri of Kaleya family, who is said proficient in all the six darśanas. The commentary is called Prakriyākalpavallarī.

Wants the beginning in the Taddhita and breaks off in the Kṛtprakaraṇa.

Beginning:

अपत्यमिति। षष्ठस्य तु वाक्येनापि अभिधानं प्राप्नोति। न हि तत्पितृवचनः प्रत्ययान्तोऽस्ति येन विगृह्येत। तदेवमुत्पादयितैवापत्येन युज्यत इति पक्षे

सूत्रस्य विध्यर्थत्वनियमार्थत्वपक्षयोरुभयोरपि दोषसत्त्वात् सर्वे अपत्येन युज्यन्त इत्ययमेव पक्ष आश्रीयते। तत्र च नियमार्थत्वमेव। एतत्सर्वमभिप्रेत्याह—गोत्रप्रत्ययान्तादेवेति। एवकारव्यावर्त्यमाह—न परमप्रकृत्यवान्तरयुवभ्य इति। असति ह्यस्मिन्नियमे प्रयोगभेदेन तेभ्योऽपि स्यात्। अत्र च गोत्राद्यूनीत्येकं वाक्यम्। अस्त्रियामित्यपरं वाक्यम्। तत्र पूर्वं वाक्यं व्याख्यातम्। द्वितीयस्य तु वाक्यस्यायमर्थः। चतुर्थादेः जीवद्वंश्यस्य या युवसंज्ञा विहिता सा स्त्रियामपत्ये न भवतीति। तेन गोत्रसंज्ञया बाधकाभावेन प्रवृत्तौ गोत्रप्रत्ययेनैवाभिधानं भवति। यथा गार्गीति। यदा तु प्राचां ष्फ तद्धितः इति ष्फप्रत्ययः तदा गार्ग्यायणीति भवति ॥

Colophon on page 62 :

इति षड्दर्शिनीपारावारपारीणश्रीमन्महोपाध्यायकलेयान्नदातृसूरिसूनुनृसिंहविद्वद्विरचितायां रूपावतारव्याख्यायां प्रक्रियाकल्पवल्लरीसमाख्यायां तद्धितावतारनिरूपणम्।

End :

रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनम्। ग्रहेः विध्यर्थमेव। स्वपिप्रच्छ्योः सनर्थमेव, न किदर्थम्; तत्किरत्वस्य पूर्वमेव सिद्धत्वात्। सिद्धे अन्तरङ्गत्वादिति.

170. 11. B. 43.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Paper. 81 Foll. 8 × 3¾ inches. 9 lines in a page. Devānagarī script. Old. Good. Good writing.

This is still briefer abridgement than the Madhyasiddhāntakaumudī on Bhaṭṭoji's Siddhāntakaumudī by Varadarāja pupil of Bhaṭṭojidīkṣita. The last 2 sections namely Vaidika and Svaraprakriyās are omitted in this work.

Complete 1 to 10 sections as given in the मध्यसिद्धान्तकौमुदी described in No 161.

Beginning :

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥

अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठतचटतव्। कपय्। शषसर्। हल्। इति सूत्राण्यणादिसंज्ञार्थानि। हकारादिष्वकार उच्चारणार्थः। लण्मध्ये त्वित्संज्ञकः ॥ हलन्त्यम्। हलिति सूत्रेऽन्त्यमित्स्यात् ॥ हलन्त्यम्। उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्। सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र।

End :

नृनरयोर्वृद्धिश्च ॥ नारी ॥ यूनस्तिः। युवन्शब्दात् स्त्रियां तिः स्यात्। युवतिः।

Colophon :

इति स्त्रीप्रत्ययाः ॥

शास्त्रान्तरे प्रविष्टानां बालानामुपकारिका।
कृता वरदराजेन लघुसिद्धान्तकौमुदी ॥

इति श्रीपदवाक्यप्रमाणपारावारीणश्रीभट्टोजिदीक्षितशिष्यवरदराजकृतलघुसिद्धान्तकौमुदी समाप्ता ॥

The scribe adds :

शुक्लसंवत्सरे लिखितम्।

171. 8. H. 21.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Paper. 41 Foll. 12 × 7¼ inches. 30 lines

in a page. Telugu script. Old. Good. Illegible writing.

Wants the beginning in the Sandhi-prakaraṇa and ends in the Taddhita-prakaraṇa.

172. 20. C. 71.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Palm-leaf. 44 Foll. 15¾ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Tiṅantaprakaraṇa.

The first stanza नत्वा सरस्वतीं etc. is omitted here.

173. 20. C. 74.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Palm-leaf. 31 Foll. 17½ × 2 inches. 12 lines in a page. Telugu script. Old. Injured. Illegible writing.

Wooden boards are added to both sides.

Complete.

The following additional stanzas are found in the beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

The Colophon reads thus :

इति श्रीविद्वन्मकुटरत्नस्य लक्ष्मीधरसूनोः भट्टोजिदीक्षितस्य शिष्येण पुटिकण्टि-वरदराजभट्टेन कृता लघुसिद्धान्तकौमुदी समाप्ता ।

The scribe adds :

शुक्लवत्सरोर्जासितपक्षे ।

174. 26. C. 25.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Palm-leaf. 142 Foll. 13 × ¾ inches. 4 lines in a page. Grantha script. Old. Injured. Good writing.

Contains up to the end of the Samāsa-prakaraṇa.

The fly-leaf gives the following stanza from the Haridinatilaka of S'rī Vedānta-desika :

आतिष्ठेताभियुक्तः स्मृतिषु विधिबलाच्छ्राद्धमन्यन्निषिद्धं
प्राक्सामान्यापवादादृतुगतिनियतिः संततिस्थापनार्था ।
एकैकाल्यन्तवृत्त्या त्विह तु नृषु चतुर्भुक्तिवर्जं त्विहोक्तं
श्रेयःसिद्धयै स्वतः श्रीहरिदिनतिलकं वेङ्कटेशेन पुंसाम् ॥

13 blank leaves are added at the end of the MS.

175. 26. E. 24.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Palm-leaf. 24 Foll. 18 × 1½ inches. 7 lines in a page, Grantha script. Old. Injured. Good writing.

Wants the beginning in the Tiṅanta-prakaraṇa and breaks off in the Samāsa-prakaraṇa.

The-fly leaf attached at the end of the MS. gives the names of certain gurus of Sri Vaiṣṇavas as given below :

திருவேங்கடராமாநுஜஜீயர், சடகோப ராமாநுஜஜீயர், ஏகசாடிபராங்குசராமாநுஜ ஜீயர், வேதாந்தராமாநுஜஜீயர், அப்பன்ராமா நுஜஜீயர், திருவேங்கடராமாநுஜஜீயர், அயோத்யாராமாநுஜஜீயர், நம்பிள்ளைஜீயர், தொண்டரடிப்பொடிராமாநுஜஜீயர், சுத்த ஸத்வம் ராமாநுஜஜீயர், பெரியபெருமாள் ஜீயர், திருவேங்கடராமாநுஜஜீயர், அழகிய மணவாளஜீயர், அநந்தாழ்வார், யதீந்த்ர ப்ரவணஜீயர், திருநாராயணபுரம்ஜீயர், பக்தி ஸாரராமாநுஜஜீயர், அப்பன் ராமாநுஜஜீயர், அண்ணன் ராமாநுஜஜீயர், எம்பெருமானர் ஜீயர், ஸ்ரீநிவாஸராமாநுஜஜீயர், ஸாலக்ராம ஜீயர், எம்பெருமானுர்ஜீயர், சுத்தஸத்வம் ராமாநுஜஜீயர், அப்பன் பாரங்குசராமாநுஜ ஜீயர், சிறியராமாநுஜஜீயர்.

176. 29. D. 11.

लघुसिद्धान्तकौमुदी—वरदराजकृता

Palm-leaf. 46 Foll. 17 × 1½ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

The fly-leaf found in the beginning contains a few lines from the स्वादिसन्धि of the Siddhāntakaumudī.

177. 20. I. 1.

शब्दकौमुदीव्याख्या—वैद्यनाथदीक्षितकृता

Palm-leaf. 81 Foll. 15½ × 2 inches. 16 lines in a page. Grantha script. Old. Good Clear writing.

A commentary on S'okkanāthamakhin's S'abdakaumudī by Vaidyanāthadīkṣita son of Ratnagiridīkṣita. This Vaidyanāthadikṣita is the same as the author of the Paribhāṣārthasaṅgraha wherein he mentions Rāmabhadradīkṣita as his maternal uncle. Again Rāmabhadradīkṣita mentions S'okkanāthamakhin as his preceptor in his Paribhāṣāvṛttivyākhyā and as his father-in-law in the jānakīpariṇaya. S'okkanāthamakhin in his Dhāturatnāvali speaks of himself as the son of Nārāyaṇadīkṣita who bore the titles ' Moving Bhāṣya ' and ' Dvādas'āhayājin.' Vide Tanjore Dest. No. 5697.

Wants the beginning in the S'abdādhikāra and ends in stripratyaya.

Beginning :

. . . . पूर्वादीनां गणसूत्रसमानानुपूर्वीकाणि जसि विकल्पेन सर्वनामसंज्ञाविधिसूत्राणि पठति—पूर्वपरावरेति । पूर्वादिसप्त व्यवस्थायां गम्यमानायां विषये जसि परे विकल्पेन सर्वनामसंज्ञानि भवन्तीति सूत्राक्षरार्थः । तत्र फलितमाह—एषामित्यादि । गणपाठादित्यादिना इयं प्राप्तविभाषेति दर्शयति । एवं विशिष्टानामेव गणे पाठात् । एवमुत्तरत्रापि द्रष्टव्यम् । व्यवस्थास्वरूपमाह—स्वाभिधेयेति । अपेक्ष्यत इत्यपेक्षा, कर्मणि घञ् । स्वेषां पूर्वादिशब्दानां योऽभिधेयोऽर्थः दिग्देशकालादिः तेनापेक्ष्यमाणस्यावधेर्यो नियमः स इत्यर्थो भवति । पूर्व इत्युक्ते कस्मात्पूर्व इति पूर्वशब्दस्य नियमेनावध्याकाङ्क्षास्ति । स चावधिराकाङ्क्षापूरणाय क्वचित् प्रयुज्यते । यथा ग्रामात् पूर्वस्मिन्नुत्तरस्मिन् ग्रामादिति । क्वचित्तु प्रसिद्धत्वादप्रयोगः । यथा अस्त्युत्तरस्यां दिशीति कुमारसंभवे । दिशः सपत्नीभव दक्षिणस्या इति रघुवंशे च । न च संज्ञात्वादत्र

निषेधः स्यादिति वाच्यम्। आधुनिकसंकेतस्यैव पर्युदासात्, दिक्षु चानादिव्यवहारात्। अत्र चार्थे अस्तातिप्रकरणे कैयटादिव्याख्यातृवचनमेव प्रमाणम्।

End:

यूनः॥ अनुपसर्जनादित्येव। अतियूनीति ङीबेव। तद्धितसंज्ञ इति। तद्धिता इति पूर्वमधिकारसूत्रमधिकृतमिति भावः। अयमधिकारः टापः प्राङ् न कृतः। यस्येति चेत्यत्र ईतीत्यस्य औङः श्यामिति वार्तिकस्य प्राचां ष्फ तद्धित इति तद्धितग्रहणस्य चाकर्तव्यत्वेन लाघवेऽपि पट्वीत्यत्रोर्गुणापत्तेः। यद्यपि तद्धितसंज्ञायाः तिप्रत्यये प्रयोजनं नास्ति तथापि उत्तरार्थमधिकारः। तदेतदाह—लिङ्गविशिष्टपरिभाषयेति। युवतिरिति। प्रत्यये स्वादिष्विति पदत्वान्नकारलोपः। शत्रन्तादिति। पत्यै यौति मिश्रीकरोति इति यु मिश्रण इति धातोर्लटः शतरि उगित्वात् प्रत्ययेदि कारादिति ङीषि वा युवतीकरनिर्मितमिति प्रयोग इति भावः। त्यन्तान्ङीषिति पठ्यते। तत्र यूनः स्त्रीप्रत्ययान्तादि-त्यर्थः। स्त्रीत्वानेकद्योतकस्य प्रयोगानुसारेणाङ्गीकारादिति भावः। इदं तु ध्येयम्। शत्रन्तात् समूहार्थेऽञि भस्याढ इति पुंवद्भावे यौतमिति भवति। त्यन्तात्तु यौनमिति पुंवद्भावेन युवन्शब्देऽनिति प्रकृतिभावात् नटिलोपः। न च भिक्षादिषु युवतिशब्दपाठस्य पुंवद्भावार्थत्वं वृत्तिकृतोक्तमिति वाच्यम्। भाष्ये प्रत्याख्यानेन तत्फलस्यायुक्तत्वादिति सिद्धम्।

Colophon:

इति श्रीमद्वन्नगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिणः कृतिषु शब्दकौमुदीव्याख्याने स्त्रीप्रत्ययः समाप्तः। हरिः ओम्॥

स्वादिसूत्रेण ङ्यप् प्रातिपदिकादनियमेन सुपः प्रसङ्गेन नियमार्थमिदं प्रकरणमारभ्यते। प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमेति। नन्विदं सूत्रं व्यर्थं, स्वादिवाक्येन कर्मणि द्वितीयेत्यादीनां च एकवाक्यत्वे स्वादिसूत्रेणैव प्रथमाया भिन्नवाक्यतया अवश्यं विधेयतया द्वितीयाद्यविषये प्रथमासिद्धेः। न च स्वादिसूत्रेण .....॥

178. 11. E. 39.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 344 Foll. 10½ × 5¼ inches. 13 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

The leaves are arranged into three groups each group containing separate pagination. The first group has 180 leaves, the second 103 and the third 61.

The well known work on Pāṇini's grammar explaining the Sutras of the Aṣṭadhyāyi with illustrations. The Sūtras are herein dealt with after recasting so as to suit the context and to facilitate the readers in the formation of words. The author Bhaṭṭojidīkṣita was the son of Lakṣmīdhara and the brother of Raṅgojibhaṭṭa whose son was Koṇḍubhaṭṭa, the author of the Vaiyākaraṇabhūṣaṇa and Sāra thereof. It is said that Bhaṭṭoji was the pupil of S'eṣa Kṛṣṇa the author of the Prakriyāprakāsa, a commentary on the Prakriyākaumudī. He is assigned to the 17th Century A.D.

Contains up to the end of Kṛtprakaraṇa.

Beginning:

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥

अइउण्। ऋऌक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्।

खफछठथचटतव्। कपय्। शषसर्। हल्। इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इतः। लण्सूत्रे अकारश्च। हकारादिष्वकार उच्चारणार्थः। हलन्त्यम्। हलिति सूत्रे अन्त्यमित्स्यात्।

End:

अन्वच्यानुलोम्ये। अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने। अन्वग्भूयास्ते। अन्वग्भूत्वा। अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्त इत्यर्थः। आनुलोम्ये किम्? अन्वग्भूत्वा तिष्ठति, पृष्ठतो भूत्वेत्यर्थः।

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम्।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः॥

Colophon:

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम्॥

संवत् १८९८ आषाढादि ९९ शके १७ प्रवर्तमाने पौषशुद्ध १२ भानुवासरे लिखितम्। दलपतिरामेण आत्मराम आत्मपठनार्थं परोपकारार्थम्।

The front page of the first leaf contains a few passages from Uṇādi portion of the work and the following stanzas:

"अतिथिविबुधमैत्री राजसेवाग्निहोत्रं
ग्रहगणरणरोगालोकवार्तेन्द्रियाणि।
अहेरिव धनाद्भीतो मिष्टान्नाद्दूरलादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥
आलस्यं मन्दबुद्धिश्च दुःखितो व्याधिपीडितः।
निद्रालुः कामुकश्चैव षडेते शास्त्रघातकाः॥"

179. 8. H. 15.

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता

Paper. 150 Foll. $12\frac{1}{2} \times 7\frac{1}{4}$ inches. 22 lines in a page. Grantha scripts. Old. Good writing.

Breaks off in the Taddhitaprakaraṇa.

At the beginning the following stanzas are written.

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥
योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥
वार्णी पाणिनिमाचार्यं काल्यायनमुनिं तथा।
Foll. Nos. 113 and 133 are missing.

This is another commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The author Jñānendrasarasvatī was the pupil of Vāmanendrasvāmin. The commentary is called Tattvabodhinī and closely follows the Prauḍhamanoramā of Bhaṭṭojidīkṣita. This commentary is believed to have been written only up to the end of Kṛtprakaraṇa, omitting the Vaidika and Svaraprakaraṇas. Jayakṛṣṇa son of Raghunāthabhaṭṭa and grandson of Govardhanabhaṭṭa of the Mauni family completed the work commenting on the Vaidika and Svaraprakaraṇas and designated his commentary Subodhinī. Jñānendrasarasvatī and Jayakṛṣṇa are assigned to the 18th century A.D.

Breaks off in the beginning of the Samāsaprakaraṇa in the Pūrvārdha.

Beginning:

नत्वा विश्वेश्वरं साम्बं कृत्वा च गुरुवन्दनम्।
सिद्धान्तकौमुदीव्याख्या क्रियते तत्त्वबोधिनी ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना। त्रयोऽवयवा यस्य तत् त्रयम्। संख्याया अवयवे तयप्। द्वित्रिभ्यां तयस्यायज्वेत्ययच्। मन्तारो वेदशास्त्रतत्त्वावगन्तारो मुनयः। मनेरुच्चेत्यौणादिकसूत्रेण मनेरत उकारः, मनेः पर इन्प्रत्ययश्च। गुणस्तु नेह भवति, किदित्यनुवर्तनात् तपरकरणाद्वा। तेषां पाणिनिकात्यायनपतञ्जलीनां त्रयम्।

End:

सुप इति प्रत्याहारस्य ग्रहणम्, पञ्चम्याः स्तोकादिभ्य इत्याद्यलुक्समासविधानात् ज्ञापकात्। निर्देशादिति। अन्यथा हि प्रथमा.

283. 19. I. 54.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 200 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the S'abdādhikāra and goes on up to the end of Pūrvārdha.

End:

अन्यत्रापीति। द्वन्द्वं युद्धं प्रवर्तते। इह वीप्सायां द्विर्वचनम्। द्वयोर्द्वयोर्युद्धमित्यर्थः। द्वन्द्वं सहते। शीतमुष्णमेकं द्वन्द्वम्। सुखदुःखे चापरम्। क्षुत्तृष्णे चापरम्। इह स्वार्थे द्विर्वचम्। एकवद्भावादि पूर्ववत्। बहुत्वं त्वेकशेषवशात्।

सिद्धान्तकौमुदीव्याख्या या कृता तत्त्वबोधिनी ।
समाप्तं तत्र पूर्वार्धं तेन तुष्यतु शंकरः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यवामनेन्द्रस्वामिचरणारविन्दसेवकज्ञानेन्द्रसरस्वतीकृतौ सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां पूर्वार्धं समाप्तम् ।

Date of copying :

क्रोधिसंवत्सरे मासि मीने शस्तार्कवासरे ।
सिद्धान्तकोमुदीव्याख्या लिखिता तत्त्वबोधिनी ॥

284. 10. D. 7.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Paper. 224 Foll. 13 × 7 inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged into 5 groups and in each group they are given a separate pagination as given below :

1st Group Foll.		1—75 (Foll. 53 and 54 missing)
2nd	,,	1—16
3rd	,,	1—82
4th	,,	1—29
5th	,,	1—24

Contains upto the end of Lakārārthaprakiryā ; but wants the end of the Taddhitaprakaraṇa.

End :

भ्रम एवेति ; पुरुषांशे वचनांशे च । लोडंशे तु प्रमैवेति भावः । एवमुक्तोदाहरणेषु हिस्वान्तेषु तिङन्तत्वं यथायथं परस्मैपदात्मनेपदान्तत्वं च सिद्धम् । पुरुषवचनसंज्ञे तु विधानसामर्थ्यात् हिस्वयोर्न स्त इत्युक्तमिति सर्वेष्टसिद्धिः ।

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवामनेन्द्रस्वामिचरणारविन्दसेवकज्ञानेन्द्रसरस्वतीकृतौ सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्याख्यायां तिङन्तप्रकरणं समाप्तम् ॥

Date of copying. Groups 1 to 4 S'aka 1708. Parābhava year. 5th—Saṁ 1880. Jaya year.

The following stanza is found at the end of the 4th group.

"तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥
भग्नपृष्ठकटिग्रीवं स्तब्धदृष्टिरधोमुखम् ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥"

Name of the scribe : Bhīmaśarmā.

Name of the former owner—Gaṅgādhara son of Paṭavardhana Kṛṣṇa.

285. 9. E. 59.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Paper. 47 Foll. 11½ × 3¾ inches. 12 lines in a page. Telugu script. Old. Good. Clear writing.

Contains the Taddhitaprakaraṇa only complete.

286. 9. E. 93.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Paper. 45 Foll. 11½ × 4¼ inches. 11

lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Kṛtprakaraṇa without the beginning and end.

287. 9. G. 23.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Paper. 61 Foll. 12 × 4½ inches. 17 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the Taddhitaprakaraṇa and Dviruktiprakaraṇa in the Pūrvārdha.

The last page contains the following stanzas :

ख्यातः शङ्को भगाङ्को विधुरपि मलिनो माधवो नन्दजातो
वेश्यापुत्रो वसिष्ठो लवणजलनिधिः पाण्डवो जारजातः।
व्यासो मत्स्योदरीजो रतिपतिरतनुः सर्वभक्षो हुताशो
रुद्रः प्रेतास्थिधारी त्रिभुवनविषये कस्य दोषो न वास्ति॥
मान्धाता स महीपतिः कृतयुगालंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति॥
ये पद्माद्रिपयःसमुद्रनिलया हंसोक्षताक्ष्यर्क्षध्वजा
हेमाविद्रुमनीलनीरदनिभाः वाक्कुलचक्रायुधाः।
लोकोत्पत्तिविपत्तिगुप्तितरवः सावित्र्युमाश्रीश्वरा-
स्ते ब्रह्मेशहरविष्णवो विदधतां वः कीर्तिदीप्तिश्रियः॥

288. 10. D. 15.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Paper. 336. Foll. 10 × 5½ inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants the beginning in the S'abdādhikāra and breaks off in the Dviruktiprakriyā.

289. 10. E. 17.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Paper. 122 Foll. 10¾ × 5 inches. 10 lines in a page. Devanāgarī script. Old. Good. Legible writing.

Contains the Uttarārdha breaking off in the णिजन्तप्रकरण.

290. 19. F. 13.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 129 Foll. 14½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the Taddhitaprakaraṇa only without the beginning.

291. 19. F. 40.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 18 Foll. 15 × 1½ inches. 11 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains the Strīpratyaya only.

292. 20. K. 42.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 119 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Bamboo-boards are added to both sides.

The readings are slightly different from those contained in the printed edition and the other MSS. described here.

Wants the beginning and end in the Taddhitaprakaraṇa.

293. 21. G. 13.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 73 Foll. 14½ × 1⅛ inches. 6 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the Samāsaprakaraṇa incomplete.

294. 21. G. 15.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 175 Foll. 16 × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Begins in the Samāsaprakaraṇa and goes on up to the end of Pūrvārdha.

Eight extra leaves are added at the end and they contain a small portion of Taddhitaprakaraṇa of this work copied again.

295. 21. G. 16.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 118 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains up to the end of Avyayaprakaraṇa.

Two extra leaves are added at the end. The first leaf contains a portion of the Vyuppattivāda of Gadādhara dealing with संबोधनविभक्त्यर्थनिर्णय. The second leaf contains a few lines of Siddhāntakaumudī in हलन्तपुंलिङ्गप्रकरण.

296. 21. G. 17.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf 135 Foll. 16¾ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains Tiṅantakāṇḍa in the Uttarārdha.

297. 21. G. 20.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 88 Foll. 17 × 1½ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in the Sandhiprakaraṇa and goes on up to the end of Kārakaprakaraṇa.

298. 21. G. 21.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 156 Foll. 15× 1½ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Wooden and bamboo boards are added to the beginning and end of the MS. respectively.

Contains the Kṛtprakaraṇa up to the end of Uṇādiprakaraṇa.

299. 21. G. 22.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 62 Foll. 14¼ × 2 inches. 16 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Tiṅantaprakaraṇa without the beginning and end.

Date of copying: 25th day of the Āni month of the year S'ubhakṛt.

Name of the scribe: S'rinivāsa.

300. 21. G. 24.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 85 Foll. 12½× 1⅛ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains from तुदादि to लकारार्थप्रक्रिया in Uttarārdha.

Name of the scribe: Padmanābhuḍu.

301. 21. G. 25.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 40 Foll. 17¾ × 1¼ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Breaks off in the Sandhiprakaraṇa.

302. 22. L. 31.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 55 Foll. 16¼ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains the Sandhiprakaraṇa complete.

303. 22. M. 49.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 66 Foll. 9 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Kārakaprakaraṇa only incomplete.

304. 23. D. 6.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 81 Foll. 17 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the Tiṅantaprakaraṇa up to the end of Curādi.

The former owner of the MS: Arasāṇipālai Kandāḍai Rāmānujāchārya.

305. 23. D. 18.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 125 Foll. 16 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Uttarārdha up to the end of Lakārārthaprakriyā.

The former owner of the MS: Hastigirināṭha.

306. 23. D. 31.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 130 Foll. 17 × 1⅞ inches. 6 lines in a page. Grantha script. Old. Injured. Clear writing.

Wants the beginning in the S'abdādhikāra and breaks off in the Srtīpratyaya.

307. 24. A. 28.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 146 Foll. 11½ × 1 inches. 11 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Contains up to the end of Avyayaprakaraṇa in Pūrvārdha.

Former owner of the MS: Balarāmas'āstri.

308. 25. C. 16.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 87 Foll. 17½ × 1½ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wants one leaf in the beginning of Taddhitaprakaraṇa and goes on up to the end of Pūrvārdha.

Two extra leaves are added in the beginning. The first leaf contains a few lines of Anumānakhaṇḍa in the Siddhāntamuktāvali of Vis'vanātha. The second leaf reads a few conjugational forms of the root भू–भवति, भवतः, भवन्ति etc.

309. 25. D. 36.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 36 Foll. 12½ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Breaks off in the Sandhiprakaraṇa.

Name of the scribe. Nārāyāṇa.

Former owner of the MS.—Veṅkaṭakṛṣṇa.

310. 25. I. 35.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 19 Foll. 16½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains a fragment of the Strīpratyaya-prakaraṇa.

311. 26. K. 25.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 98 Foll. 17 × 1½ inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

Fol. 94b is left blank.

Wants the beginning in Apatyādhikāra and goes on up to the end of Pūrvārdha.

312. 26. N. 22.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 162 Foll. 15¼ × 1¼ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains up to the end of Strīpratyaya in Pūrvārdha.

The fly leaf in the beginning contains the following :

"केदारगौलम्—

वेणुगानलोलुनिगा
वेगन्नुलगावनु वेणु०
अलिवेणुलेल्लादृष्टि
जुट्टिवेयुचुनुण्डग वेणु०
विकसितपङ्कजवदनुनि
विविधगतुलनाटका
ओकरिकोकरुकरमुलनिडि
ओरगनुलजूडगा
शुकरवमुलुघनतरुणुलुरी
सोगसुगानुबाडगा
सकलसुरुलुत्यागराज
सुखुनिवेडगावलनु वेणु०

(*b*) अभिव्यक्तपदार्थो ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥"

313. 29. A. 34.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 21 Foll. 16 × 1 inches. 10 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains a fragment of the Sandhiprakaraṇa.

Former owner of the MS.—Cakravarti Kavitārkikasiṁha Srīnivāsācāryalu.

314. 29. B. 9.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 70 Foll. 15½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the Samāsaprakaraṇa only complete.

315. 29. G. 16.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्र-सरस्वतीकृता

Palm-leaf. 13 Foll. 17 × 1½ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wants the beginning in Kārakaprakaraṇa and breaks off in the Samāsaprakaraṇa.

316. 29. M. 28.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 187 Foll. 17½ × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Uttarārdha breaking off in Uṇādiprakaraṇa.

317. 30. E. 21.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 39 Foll. 14½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Avyaya and Strīpratyayaprakaraṇas in Pūrvārdha.

Former owner of the MS.: Rāghava.

318. 33. H. 14.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 102 Foll. 22½ × 1 inches. 7 lines in a page. Grantha script. Old Injured. Good writing.

Begins in the Sabdādhikāra and breaks off in the Kārakaprakaraṇa.

319. 33. H. 15.

सिद्धान्तकौमुदीव्याख्या तत्त्वबोधिनी—ज्ञानेन्द्रसरस्वतीकृता

Palm-leaf. 106 Foll. 19 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Wants the beginning in Kārakaprakaraṇa and goes on up to the end of Pūrvādha.

The scribe adds:

"क्रोधनकर्कटशितिदलरविततिथिशनिदिवसरेवतीऋक्षे ।
श्रीराघवार्यतनयो देशिकदासो व्यलीलिखत्तदिदम् ॥"

320. 19. G. 41.

सिद्धान्तकौमुदीव्याख्या सुबोधिनी—जयकृष्णकृता

Palm-leaf. 69. Foll. 14½ × 1⅜ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

A commentary on Bhaṭṭojidīkṣita's Siddhāntakaumudī for the Vaidika and Svara prakaraṇas by Jayakṛṣṇabhaṭṭa son of Raghunāthabhaṭṭa and grandson of Govardhanabhaṭṭa of the Mauni family. From the introductory verses given below it is known that Raghunāthabhaṭṭa had four sons *viz.*, 1. Mahādeva, 2. Rāmakṛṣṇa, 3. Jayakṛṣṇa (our author) and 4. S'rīkṛṣṇa. The reading श्रीकृष्णाप्राप्तसूद्भवः found in verse 5 is read wrongly in the printed editions of the work. The Nirnayasāgar Press edition reads this as श्रीकृष्णायास्तु सूद्भवः This reading not only ignores the correct meaning; but also misleads the

readers to err in believing that Jayakṛṣṇa's mother was S'rīkṛṣṇā and that Mauni S'rīkṛṣṇa was not his younger brother as the latter mentions Jānakī as his mother in his works. The Telugu edition of the work reads this as श्रीकृष्णात्प्राप्तसूद्भवः. This also is not the correct reading as Jayakṛṣṇa was the son of Raghunātha and not of S'rīkṛṣṇa. Again a paper MS. described under No. 180 of the Des. Cat. of the Bhandarkar Oriental Research Institute, Poona, reads this as श्रीकृष्णाग्रासभूद्भवः This reading has no any sensible meaning at all. In the last intance the letter ष in Devanāgarī script might have been wrongly read as स. This sort of mistakes is very common in MSS. In conclusion the correct reading is श्रीकृष्णाग्राप्तसूद्भवः which means श्रीकृष्णस्याग्रे आप्तः सूद्भवः येन सः। This S'rikṛṣṇa the fourth son of Raghunātha and younger brother of Jayakṛṣṇabhaṭṭa is identical with Mauni S'rīkṛṣṇabhaṭṭa the author of Tarkacandrikā, Sphoṭacandrikā etc., wherein he speaks of himself as the son of Jānakī and Raghunātha and grandson of Govardhanabhaṭṭa of the Mauni family.

Contains the Vaidika and Svaraprakaraṇa complete.

Beginning :

सिन्दूरेण विराजितं त्रिनयनं दिक्संख्यदोर्भिर्युतं
भक्तानुग्रहकारकं प्रमदयाश्लिष्टं सदानन्दनम् ।
अष्टाविंशतिवर्णकैश्च सततं यं चिन्तयन्ते जना-
स्तं देवं गणपं स्मरामि सततं चन्द्रार्कचूडं विभुम् ॥
यस्तर्कादिसमस्ततन्त्रकमलव्रातप्रसादेष्विव
प्रत्यक्षप्रतिमः परः किरणवान्नन्वर्थगोवर्धनः ।
माद्यत्पण्डितमण्डलोद्भटरटद्वादीन्द्रबृन्दाग्रणीः
श्रीरामाङ्घ्रिनिषेवकः समजनि श्रीमौनिगोवर्धनः ॥
रघुनाथपादारविन्दसेवावशतस्तस्य बभूव नन्दनः ।
रघुनाथ इतीड्यमानगम्यो रघुनाथाङ्घ्रिनिषेवकः सुधीः ॥
वभूवुस्तस्य चत्वारस्तनयाः सुनयाः बुधाः ।
महादेवाभिधः शिष्टो महाभाष्यानुभाषकः ॥
रामकृष्णो द्वितीयोऽसौ रामकृष्णाङ्घ्रिसेवकः ।
तृतीयो जयकृष्णोऽस्मि श्रीकृष्णाग्राप्तसूद्भवः ॥
श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः ।
नत्वा मुनित्रयं हृद्यां टीकां कुर्वे सुबोधिनीम् ॥
सुशब्दव्रातश्रीकुमुदवनविद्योतनकरी
सदा सद्व्युत्पत्तिप्रसरणपरानन्दनकरी ।
कुशब्दध्वान्तस्य प्रसभमभिविध्वंसनकरी
कृतिर्भूयादेषा बुधजनमनःप्राङ्गणचरी ॥

इयता प्रबन्धेन लौकिकेषु शब्देष्वन्वाख्यातेष्वपि वैदिकान्वाख्यानमवशिष्यते। न चेदमप्रयोजनम्। रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति वदता भाष्यकारेण वेदरक्षाया व्याकरणारम्भप्रयोजनत्वेन मुख्यतया विधानात्। ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति वेदार्थज्ञानोपायतया वेदाङ्गत्वेनैव व्याकरणाध्ययनविधानाच्च ।

End :

स्वरितत्वमिति। स्वरितो वानुदात्त इत्यनेन। ऋत्विगिति। ऋतावुपपदे यजेः क्विन् ऋत्विगित्यनेन । वचिस्वपीति संप्रसारणम्। नव्विषयस्येति । इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्त इति सूत्रार्थः ॥

Colophon :

इति श्रीमन्मौनिकुलतिलकायमानश्रीगोवर्धनभट्टात्मजरघुनाथाङ्गजेन जयकृष्णेन कृतायां सिद्धान्तकौमुदीव्याख्यायां सुबोधिन्यां स्वरवैदिकप्रकरणं समाप्तम् ॥

The scribe adds :

कल्याणं वितनोतु कोकपटलीचेतःप्रमोदाकर-
स्थेमाङ्कूरसुधारसोक्षणनिजप्रादुर्भवैः स्वैः करैः ।
प्रातः पङ्कजकोरकस्य दलनं कृत्वा दलानां क्रमा-
दह्नामेष पतिस्ततः स्ववशयन्नम्भोजिनीनां श्रियम् ॥

321. 9. G. 18.

सिद्धान्तकौमुदीव्याख्या सुबोधिनी—जयकृष्णकृता

Paper. 16 Foll. $11\frac{3}{4} \times 5\frac{1}{2}$ inches. 20 lines in a page. Telugu script. Old. Injured. Illegible writing.

Contains the स्वरप्रकरण only incomplete.

322. 20. K. 25.

सिद्धान्तकौमुदीव्याख्या बृहच्छब्देन्दुशेखरः—नागेशकृतः

Palm-leaf. 79 Foll. $17\frac{1}{2} \times 1$ inches. 6 lines in a page. Telugu script. Old. Injured. Legible writing.

This is a commentary on Bhaṭṭojidīkṣita's Siddhāntakaumudī by Nāgeśa *alias* Nāgoji son of Satī and Śivabhaṭṭa. Nāgeśa was the pupil of Haridīkṣita the author of Laghuśabdaratna. Like Haridīkṣita, Nāgeśa also represents the new school of grammarians. Nāgeśa is also the author of following works on grammar :—Laghuśabdenduśekhara, an abridgement of this work; Mahābhāṣyapradīpavyākhyā Uddyota; Paribhāṣenduśekhara; Laghumañjūṣā and Paramalaghumañjūṣā.

Breaks off in the Paribhāṣāprakaraṇa.

Beginning :

नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
शिवभट्टसुतो धीमानुपाध्यायोपनामकः ॥
याचकानां कल्पतरो रिपुकक्षहुताशनात् ।
शृङ्गिबेरपुराधीशरामतो लब्धजीविकः ॥
नत्वा फणीशमीशानं कौमुद्यर्थप्रकाशकम् ।
मनोरमोमार्धदेहं तन्वे शब्देन्दुशेखरम् ॥

समाप्तिग्रन्थप्रचारादिप्रतिबन्धकविघ्नविघाताय समुचितऋषित्रयनमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति—मुनित्रयमिति । कारकविभक्तेर्बलीयस्त्वात् द्वितीया । परिभाव्येति । तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् प्राचामुक्तीस्तिरस्कृत्येत्यर्थः । मुनित्रयोक्तीर्विचार्येत्यर्थो वा । न चात्र पक्षे परीभावस्तिरस्क्रियेति कोशविरोधः, कोशस्य नामलिङ्गानुशासनत्वात् धातोस्तिरस्क्रियामात्रार्थाबोधकत्वात् ।

End :

यथा अयजे इन्द्रमित्यादौ अन्तरङ्गेण गुणेन सवर्णदीर्घः समानाश्रये चरितार्थयोर्यण्गुणयोरपवादोऽपि बाध्यत इति बोध्यम् ।

Name of the scribe and former owner of the MS.

" श्रीमन्नृसिंहविदुषां पुत्रेण गुरूमूर्तिना ।
प्रथमाध्यायसंज्ञानां प्रकरणं च समाप्यते ।
गुरूमूर्तीतिनाम्नोऽस्य पुस्तकं शेखरान्वितम् ॥ "

323. 8. H. 17.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः—नागेशकृतः

Paper. 487 Foll. $11\frac{1}{4} \times 9$ inches. 18

lines in a page. Telugu script. Old. Injured. Legible writing.

Bound in three volumes.

This is an abridgement of the work described under last number by Nāgesa himself. This is an important work on grammar being vastly read by students and attracting many authors to write commentaries on it.

Contains from the Saṁjñāprakaraṇa to the end of the Svaraprakaraṇa.

Beginning of the Pūrvārdha :

पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः ।
शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गबेरपुराधीशाद्रामतो लब्धजीविकः ॥
नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम् ।
मनोरमोमार्धदेहं लघुशब्देन्दुशेखरम् ॥

ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमाय समुचितऋषित्रयनमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति —मुनित्रयमिति । कारकविभक्तेर्बलवत्त्वात् द्वितीया । परिभाव्येति; तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् प्राचामुक्तीस्तिरस्कृत्येत्यर्थः । मुनित्रयोक्तीर्विचार्येत्यर्थो वा । परीभावस्तिरस्क्रियेति कोशात् तिरस्कारार्थकस्य धातोर्विचारार्थकत्वेऽपि न बाधकम्; धातूनामनेकार्थत्वात् । अत एव परौ भुवोऽवज्ञाने इति संगच्छते । एतेन स्वग्रन्थस्य प्राचीनग्रन्थैरगतार्थता समूलत्वं च ध्वनितम् ।

End of the Pūrvārdha :

अयं योगविभागो भाष्ये न दृश्यते । द्वन्द्वं युद्धानीत्यत्र मर्यादावचनेन सिद्धम् । एषा हि युद्धमर्यादा । शीतोष्णादिष्वभिव्यक्त्या सह चरितत्वं शब्दप्रयोगे बोध्यम् । चार्थे द्वन्द्व इति तु संज्ञाशब्दोऽव्युत्पन्नः, अवयवार्थाभावादिति तदाशयः । विस्तरस्तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः ।

शब्देन्दुशेखरे स्वल्पे पूर्वमर्धमपूपुरम् ।
प्रीयतां तेन भगवान् शिवया सहितः शिवः ॥
भूषितः फणिभाष्योक्त्या लघुः शब्देन्दुशेखरः ।
सतां हृत्कमलेष्वास्तां यावत्फणिफणे धरा ॥

Colophon :

इति शिवभट्टसुतसतीगर्भजनागोजिभट्टकृते लघुशब्देन्दुशेखरे पूर्वार्धं समाप्तम् ।

Beginning of the Uttarārdha :

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते इति भाष्योक्तेर्विघ्नविघाताद्यर्थं ग्रन्थमध्ये कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति—श्रौत्रार्हन्तीति । श्रौत्रं श्रोत्रियत्वम्, वेदाध्ययनकर्तृत्वम् । आर्हन्ती योग्यता, तद्विहितकर्मानुष्ठातृत्वम् । ताभ्यां वित्तैः प्रसिद्धैरित्यर्थः । गुण्यैः प्रशस्तगुणवद्भिः । अहर्दिवम् अहन्यहनि । विजयतेतरामिति । वीति भिन्नं पदम् । तिङश्चेति तरप्याम् । तिङन्तोत्तरपदस्तु समासश्छन्दस्येव ।

End of the Uttarārdha :

अनार्षान्तादित्यस्योदाहरणं रत्नघातममिति । रत्नघातमम् । तेनैवैकाक्षरीकृतादित्यस्योदाहरणम् । अलला भवन्तीरित्यलला भवन्तीः । अलला इति शब्दानुकरणमिति तद्भाष्यकृत इति सर्वेष्टसिद्धिः ।

शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका ।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया ॥
शब्देन्दुशेखरः सोऽयं फणिभाष्योक्तिभूषितः ।
सतां हृत्कमलेष्वास्तां यावच्चन्द्रदिवाकरौ ॥

Colophon:

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भज नागेशभट्टरचिते लघुशब्देन्दुशेखराख्ये सिद्धान्तकौमुदी-व्याख्याने उत्तरार्धं समाप्तम् ॥

The scribe adds:

"दस्यवो मयि कृपालुतयैत-
त्पुस्तकं विलिखितं बहुयत्नात् ।
कर्म मा कुरुत तन्मुषिधातो-
र्वो नमोऽस्तु शिरसा बहुकृत्वः ॥
बिन्दुदुर्लिपिविसर्गवीचिकाश्रृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥"

Date of Copying:

"युवनामसंवत्सरं भाद्रपदशुद्धद्वितीया ।"

Name of the scribe: Paluvayi Rangayya; copied for the use of Bahusrutam Venkaṭarāmasāstrulu.

324. 9. G. 14.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 162 Foll. 12 × 4½ inches. 18 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Breaks off in the Apatyādhikāra of the Taddhitaprakaraṇa.

325. 9. G. 16.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 120 Foll. 12 × 4½ inches. 18 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the Uttarārdha complete.

Date of Copying:

"क्षयवर्षे आश्वयुजे चतुर्थ्यां गुरुवासरे ।
निशायां पूर्वपक्षे च उत्तरार्धं समालिखम् ॥"

Name of the scribe:

"कैवोपनामकनरसिंहभट्टनसूविश्वपतिपौत्रलक्ष्मी-पतिपुत्रनरसिंहेन लिखितम् ।"

326. 9. G. 21.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 31 Foll. 12½ × 5½ inches. 20 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Contains the Svaraprakaraṇa only.

Date of Copying: S'aka 1653.

"विरोधिवत्सरे मासे कार्तिके शुक्लपक्षके ।
दशम्यां भार्गवे ग्रन्थो वेंकटेन समापितः ॥"

327. 10. B. 26.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 257 Foll. 12 × 4½ inches. 10 lines in a page. Devanāgarī script. Old Good. Good writing.

Wants beginning in the Saṁjñāprakaraṇa and breaks off in the Samāsāśrayavidhi; then contains 2 leaves relating to the Taddhita and 36 leaves to the Svaraprakaraṇa.

328. 10. C. 22.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 165 Foll. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. 12. lines in a page. Devanāgarī script. Old. Good. Good writing.

Begins in the Halantapumliṅgaprakaraṇa and breaks off in the Taddhitaprakaraṇa.

329. 10. C. 25.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 131 Foll. $11\frac{1}{2} \times 4\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged into three groups. The first group contains a portion of the Taddhitaprakaraṇa; the second a portion of the Kṛdantaprakaraṇa and the third the whole of the Svaraprakaraṇa. Each group has the leaves with separate pagination.

330. 10. E. 25.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Paper. 111 Foll. $11\frac{1}{2} \times 4\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old Good. Good writing.

The leaves are arranged into three groups with separate pagination.

The first group contains a portion of the S'abdādhikāra and Avyayaḥ; the second a portion of the Kārakaprakaraṇa and the third a portion of the Samāsaprakaraṇa.

331. 20. K. 12.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 22 Foll. $16\frac{1}{2} \times 1$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Strīpratyaya only.

Date of copying and the name of the scribe.

"वर्षे व्यये दिनकरे हरिमासयुक्ते
षष्ठीतिथौ गिरिशभे दिवसेशवारे ।
हस्त्यद्रिनाथगुरुवर्यकुलोद्भवेन
शब्देन्दुशेखरमलिख्यत सन्मुदेऽदः ॥
श्रीचण्डमारुतगुरुवंशाम्बुधिसुधानिधेः ।
श्रीमद्वेंकटरङ्गार्यगुरोः पुत्रोऽलिखत्त्विदम् ॥"

The former owner of the MS.: Alasūr Hastigiri Muḍumbai Caṇḍamārutam Tiruveṅkaṭācārya.

332. 20. K. 13.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 112 Foll. $11\frac{1}{2} \times 1\frac{3}{4}$ inches. 15 lines in a page. Grantha and Malayālam scripts. Old. Slightly injured. Good writing.

Contains the Uttarārdha complete.

3 extra leaves attached at the end contain a few passages from the Siddhāntaratnākara of Rāmakṛṣṇabhaṭṭa beginning

with the Sūtra दित्यदित्यादित्य etc., in the Taddhitaprakaraṇa.

333. 20. K. 14.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 128 Foll. 17 × 1¼ inches. 8 lines in a page. Telugu script. Old. injured. Good writing.

Contains the Uttarārdha up to the end of Svaraprakaraṇa.

Leaves Nos. 38 to 93 are missing and consequently the portion of the अदादि to नामधातुप्रक्रिया is wanting.

334. 20. K. 22.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 77 Foll. 14½ × 1 inches. 8 lines in a page. Telugu script. Old. injured. Good writing.

Contains the Vaidika and Svara prakaraṇas.

335. 20. K. 26.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 46 Foll. 7 × 2 inches. 16 lines in a page. Grantha script. Old. Good. Good writing.

Contains the Kārakaprakaraṇa only.

336. 25. K. 25.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 27 Foll. 17 × 1¼ inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the Saṁjñā and Paribhāṣā prakaraṇas.

337. 25. M. 7.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 149 Foll. 11 × 2 inches. 16 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Breaks off in the Kārakaprakaraṇa.

4 extra leaves added at the end contain the verses 24 to 41 of the 2nd Sarga of the Sisupālavadha with the commentary of Mallināṭha.

338. 25. N. 3.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः— नागेशकृतः

Palm-leaf. 60 Foll. 12½ × 1¼ inches. 12 lines in a page. Grantha script. Old Much injured. Good writing.

Wooden boards are added to both sides.

Breaks off in the Svādisandhiprakaraṇa.

The fly leaf contains the following passages being the footnotes on the work :

"यत्तु शब्देन्दुशेखरे हलन्त्यसूत्रे— अत्र पदद्वयं समासेऽन्त्यशब्दस्य पूर्वनिपातापत्तेः, कर्मधारययोग्यपदानां

समासाभावस्य सूत्रकारशैलीसिद्धत्वाच्चेत्युक्तम्; तद्व्याख्यातृभिः जातेरस्त्रीविषयादयोपधादिति ज्ञापकादित्युक्तम्। अत्र विचारयामः—शेखरकृतस्तात्पर्यं न सर्वत्र। यदि सर्वत्रेष्टं स्यात्तर्हि निपात एकाजनाङ् इति सूत्रे अपृक्तसूत्रे च कर्मधारयाभावेन प्रेदमित्यत्र प्रगृह्यसंज्ञय प्लुतप्रगृह्या अचि नित्यम् इति प्रकृतिभावः स्यात्। किं च निस् दुसादीनां प्रकृतिभावे रुत्वं च न स्यात्। तस्मात्तत्र सूत्रे कर्मधारय एव युक्तः। अत्र च ज्ञापकं व्याहरति मृग इति निर्देशः। अत्र कर्मधारयेऽपि न क्षतिः। न च कर्मधारयसमासे अन्त्यशब्दस्य अल्पाच्तरमित्यस्यापवादभूतत्वेन अजाद्यदन्तमिति सूत्रेण पूर्वनिपातापत्तिः स्यादिति वाच्यम्। इको गुणवृद्धी, समुद्राभ्राद् घः इत्यादिनिर्देशेन पूर्वनिपातस्यानित्यत्वज्ञापनात्। जातेरिति सूत्रं तु सौत्रत्वाद्बोध्यम्। लक्ष्ये लक्षणेति न्यायः क्वचित्संज्ञाविषये न प्रवर्तते। संज्ञाशास्त्राणां कार्यार्थत्वात् पुनः प्रवृत्तौ कार्यमेव बीजमिति अणोऽप्रगृह्यस्येति सूत्रे शब्देन्दुशेखरे अङ्गीकृतम्॥

पातञ्जले महाभाष्य इत्यत्र पातञ्जलपदेनैव पतञ्जलिप्रोक्तार्थस्य सिद्धत्वात् महाभाष्यग्रहणं किमर्थमुच्यते। शंकरादिभाष्याणामग्रहणं यथा स्यात्तदर्थं महाभाष्यग्रहणम्। महाभाष्य इत्युक्तेऽपि शांकरभाष्यस्य ग्रहणं न स्यात्; रूढियोगमपहरतीति न्यायेन व्याकरणभाष्यस्यैव रूढत्वात् कथमन्यस्य ग्रहणमिति चेन्न। यद्यस्यैव ग्रहणं स्यात्तर्हि पातञ्जल इत्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव, तस्मादत्र यौगिक एव। महांश्चासौ भाष्यश्च महाभाष्यः; पूज्य इत्यर्थः। पतञ्जलिप्रोक्ते चान्यस्मिंश्चायमस्तीत्यर्थः॥

339. 29. L. 36.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः—नागेशकृतः

Palm-leaf. 41 Foll. 15½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Vaidikaprakaraṇa, complete and Svaraprakaraṇa incomplete.

340. 34. G. 3.

सिद्धान्तकौमुदीव्याख्या लघुशब्देन्दुशेखरः—नागेशकृतः

Palm-leaf. 311 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the S'abdādhikāra and goes on up to the end of Pūrvārdha.

341. 9. H. 90.

लघुशब्देन्दुशेखरटीका ज्योत्स्ना—उदयंकरकृता

Paper. 22 Foll. 12 × 4 inches. 17 lines in a page. Telugu script. Old. Good. Illigible writing.

This is a running commentary on Nāges'a's Laghus'abdendus'ekhara by Udāyaṅkara. Dr. Aufrecht writes the following in his catalogus catalogorum (1891) about the author: "Udayakarapāṭhaka or Udayaṅkarapāthaka, more generally known as Nānāpāṭhaka, a Nāgara Brāhmaṇa, taught at Benares about 50 years ago". If he is correct, the author must have belonged to the middle of the 19th century A.D. He refers to one Sivarāmapaṇḍita as another commentator on the work.

Breaks off in the beginning of Sabdādhikāra.

Beginning :

वाग्देवीं मानसे कृत्वा गङ्गामाध्याय मङ्गलाम् ।
शब्देन्दुशेखरज्योत्स्नामातनोत्युदयंकरः ॥

पातञ्जल ॅइति । अत्र महाभाष्य इत्येतावदुक्तौ शारीरकसूत्रभाष्यादावतिव्याप्तिः । अतः पातञ्जल इति । पातञ्जल इत्युक्तावपि पातञ्जलसूत्राणां भाष्ये वेदव्यासकृतेऽतिव्याप्तिः । अतो महत्पदम् । कृतभूरिपरिश्रम इति भूरिपदोपदानं तन्त्रान्तरीयपरिश्रमासद्भावाभावसूचनार्थम् । सतीं दीव्यति पातिव्रत्येन जिगीषतीति सतीदेवी । कर्मण्यण् । यथाश्रुते तु पुंवद्भावप्रसङ्गः । न च संज्ञात्वान्निषेधः, कर्मधारये तत्प्राप्तिसत्त्वात् । अरिकक्षहुताशनादिति । अरिषु कक्षत्वारोपमूलको राज्ञि हुताशनत्वारोप इति परंपरितरूपकमलंकारः ।

End :

तत्किमेकैकस्य वर्णस्यार्थप्रतीतिजनकत्वम् ? समुदायस्य वा ? नाद्यः, द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । द्वितीयेऽपि उत्पद्यमानानां समुदायाभिव्यज्यमानानां वा । अत्रापि आद्ये क्रमेणोत्पत्तिः ? युगपद्वा ? नाद्यः, आशुविनाशिनामुत्पन्नध्वस्तत्वेन समुदायाभावात् । नान्त्यः, युगपदनेक . . . . ।

342. 10. D. 20.

लघुशब्देन्दुशेखरटीका ज्योत्स्ना—उदयंकरकृता

Paper. 38 Foll. $10\frac{1}{2} \times 4\frac{3}{4}$ inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants the beginning in the S'abdādhikāra and breaks off in the Strīpratyaya.

Beginning :

सुड्विधावन्तवत्त्वातिदेशस्य प्रयोजनाभावेऽपि तुल्यन्यायात् स्याडादिविधौ अन्तवद्भावस्यैव वक्तव्यतया तत्राबन्तत्वातिदेशस्यास्ति प्रयोजनमिति शङ्कते—न चैवमिति । उत्तरापदस्य गुणवाचकत्वादिति । उत्तरात्वप्रकारकज्ञानविशेष्यस्य लक्षणावृत्त्या बोधकत्वादित्यर्थः । पूर्वापदे तु न तथा, तच्छब्दसामानाधिकरण्येन विधेयबोधकत्वात् 'न विधौ परः शब्दार्थः' इति न्यायेन तत्र लक्षणाया अयोगात् ।

End :

सूत्ररीत्येष्टस्येति । चिन्त्यमेतत् ; अनृचि चरितार्थस्य पादोऽन्यतरस्यामिति ङीपः ङीबभावपक्षे चरितार्थेन टाबृचीत्यनेन परत्वाद्बाधनात् । ऋचि ङीबन्तप्रयोगस्य सूत्रमते खपुष्पकल्पत्वात् तदेकवाक्यतासंपादनार्थमृचि पादन्तस्यानभिधानमिति भाष्याशयस्यावश्यं वक्तव्यत्वात् । एवं सूत्रकृता टाबृचीत्यारम्भात् पादशब्दसमानार्थपदशब्दानङ्गीकारात् । तदङ्गीकर्तृभाष्यकृन्मते हि पदेत्यनृचि टाप् प्राप्नोति । अनभिधानादेव वारणीया । टाबृङीपोरपवाद इति प्राचां ग्रन्थे अपवादशब्दो बाधकपर इति न कस्याप्यसंगतिरित्याहुः । अन उपधालोपिनोऽन्यतरस्याम् ।

The scribe adds :

"लिखितोऽयं ग्रन्थो यज्ञेश्वरेण स्वावलोकनार्थम् ।"

343. 11. B. 29.

लघुशब्देन्दुशेखरटीका ज्योत्स्ना—उदयंकरकृता

Paper. 82 Foll. $9\frac{1}{2} \times 4$ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants the beginning in the Sandhiprakaraṇa and breaks off in the S'abdādhikāra.

344. 23. D. 1.

लघुशब्देन्दुशेखरटीका ज्योत्स्ना—उदयंकरकृता

Palm-leaf. 43 Foll. 14 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the S'abdādhikāra.

345. 29. A. 34.

लघुशब्देन्दुशेखरटीका ज्योत्स्ना—उदयंकरकृता

Palm-leaf. 13 Foll. 14 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the Saṁjñāprakaraṇa incomplete.

346. 11. B. 10.

लघुशब्देन्दुशेखरव्याख्या—मन्नुदेवकृता

Paper. 64 Foll. 10½ × 4½ inches. 12 lines in a page. Devanāgarī script. Old Good. Good writing.

This also is a brief commentary on Nāges'a's Laghus'abdendus'ekhara by Mannudeva also spelt as Manyudeva. He was the son of Durgā and S'ambhu and younger brother of Kṛṣṇadeva. He speaks of himself as a pupil of Pāyuguṇḍa Bālakṛṣṇa. This Balakṛṣṇa is said to be the son of Pāyuguṇḍa Vaidyanātha, the direct disciple of Nāges'a (Vide p. 51 of the Introduction to the Miṭākṣarā, No. 204 of the Chowkhamba Sanskrit Series.) According to Aufrecht's Catalogus Catalogorum, the author Mannudeva was also called Gopāladeva (See Gopāladeva p. 162, Vol 1.) The author criticizes Udayaṅkara's commentary described in previous numbers. Therefore, he must be later than Udayaṅkara who belonged to the middle of the 19th century A.D. as said before.

Contains up to the end of Svarasandhiprakaraṇa.

Beginning :

नमस्कृत्य गणाधीशं प्रत्यूहव्यूहनाशकम् ।
तातं शंभुं प्रसूं दुर्गां कृष्णदेवं तथाग्रजम् ॥
शास्त्रप्रवर्तकाचार्यान् पाणिनिप्रभृतीन् मुनीन् ।
बालकृष्णाभिधं पायगुण्डोपाख्यं परं गुरुम् ।
दोषा ये पण्डितंमन्यैर्दत्ताः शब्देन्दुशेखरे ।
तान् समुद्धर्तुमेवात्र मन्नुदेवेन चिन्त्यते ॥

पातञ्जले महाभाष्य इति । पातञ्जले योगसूत्रादौ महाभाष्ये चेत्यर्थः । गामश्वमितिवत् विनापि चं समुच्चय इति गुरुचरणाः । महाभाष्यशब्दस्य पाणिनिसूत्रभाष्ये योगरूढत्वमिति तेषामाशयः । यत्त्वत्र —महाभाष्य इत्येतावदुक्ते शारीरकसूत्रभाष्यादावतिव्याप्तिः । अतः पातञ्जल इति । पातञ्जले भाष्ये इत्युक्तावपि पातञ्जलसूत्राणां भाष्ये वेदव्यासकृते अतिव्याप्तिः । अतो महत्पदोपादानमिति; तच्चिन्त्यम् । वेदव्यासकृते पातञ्जलसूत्रभाष्येऽतिव्याप्तिवारणाय दत्तेन महत्पदेनैव शारीरकसूत्रभाष्यादावप्यतिव्याप्तिवारणेन पातञ्जल इति विशेषणवैयर्थ्यानुद्धारात् । संभवतीति न्यायेन वैयधिकरण्यान्वयाभावेन पातञ्जले भाष्ये इत्युक्त्यापि वेदव्यासकृते भाष्येऽतिव्याप्त्यभावेन महत्पदवैयर्थ्याच्च । न च गुरुचरणोक्तौ पातञ्जल इत्यनेनैव महाभाष्यस्यापि क्रोडीकारसंभवे महाभाष्य इति व्यर्थमिति वाच्यम्, व्याकरणे तस्य प्राधान्यसूचनार्थं तदुपादानात् ।

End :

केचिदिति । तत्पदसूचितारुचिबीजं तु—एवमपि "आलुच् तदसहने' इत्यादौ कुत्वश्चुत्वयोरभावाय

सौत्रत्वादेरेवावश्यकत्वेन तेनैव वार्तिकादिप्रयोगाणामप्युपपत्तौ एवमुक्तेरसाधारणफलाभाव इति। अच्सन्धिरित्यादौ तु प्रत्याहारान्तरसंदेहापत्तेः "हलोऽनन्तराः" इति सूत्रोक्तरीत्या संज्ञात्वभङ्गापत्तेश्च न कुत्वश्चुत्वे इति बोध्यम् ॥

Colophon :

इति स्वरसंधिः ।

347. 9. H. 90.

लघुशब्देन्दुशेखरटीका—शंकरभट्टकृता

Paper. 27 Foll. 12 × 4 inches. 16 lines in a page. Telugu script. Old. Good. Illegible writing.

This is another running Commentary on Nāgesa's Laghusabdendusekhara. The MS. does not contain the author's name. However the MS. available in the Madras Govt. MSS. Library helps in attributing the authorship to Śaṅkarabhatta. (Vide R. No. 357 of the Triennial Catalogue of Sanskrit MSS. in the Madras Govt. MSS. Library.) The MS. R No. 357 referred to above reads the following colophon : इति शंकरभट्टकृते शेखरव्याख्याने संज्ञाप्रकरणम्. Both the commentaries—now under description and described under R No. 357 said above—are one and the same: The commentary is also available in print up to the end of Paribhāṣāprakaraṇa.

Contains up to the end of Paribhāṣāprakaraṇa and two lines in the beginning of the Sandhiprakaraṇa.

Beginning :

पातञ्जल इति। समुच्चयार्थकचकारमध्याहृत्य पातञ्जलनाम्नि योगशास्त्रे महाभाष्ये चेति व्याख्येयम्। सामानाधिकरण्येनान्वये तु महाभाष्यपदेनैवेतरभाष्यव्यावृत्त्या पातञ्जलपदप्रयोगवैयर्थ्यम्। न हीतरभाष्येषु महाभाष्यमिति व्यवहरन्त्यभियुक्ताः। पातञ्जलाख्ययोगशास्त्रपरिश्रमस्य प्रकृतोपयोगस्तु "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति तच्छास्त्रसंमतपदार्थनिरूपणस्यैतद्ग्रन्थे करिष्यमाणस्य स्वकीयाध्ययनभावनामूलकत्वप्रदर्शनमिति बोध्यम्। सतीदेव्या इति। संज्ञाशब्दस्यापि योगार्थमादाय भाषितपुंस्कत्वात् कर्मधारये प्रतिप्रसवसत्त्वेन संज्ञात्वनिमित्तकनिषेधाप्रवृत्तेश्च सतीशब्दस्य पुंवद्भावः प्राप्तोऽपि पतिव्रतावाचिसतीशब्दे उपपदे विजिगीषार्थकदिवुधातोः कर्मण्यणि रूपमङ्गीकृत्य सामानाधिकरण्याभावात् पुंवद्भावो न भवतीति परिकल्प्य पतिव्रतामपि या जेतुमिच्छति तस्या गर्भज इत्यर्थ इति केचित्। संज्ञास्वरूपभङ्गभिया पुंवद्भावो न कृत इत्यन्ये। रामत इति। "अपादाने चाहीयरोः" इति तसिः।

End :

यद्यपि शकारोच्चारणसामर्थ्येनेयमाशङ्का परिहर्तुं शक्यते, तथापि एतादृशाशङ्कोत्थानमपि मा भूदित्येतावन्मात्रेण शित्पदस्य ज्ञापिते तस्मिंश्चारितार्थ्यमुपपाद्यमिति बोध्यम्।

Colophon :

इति परिभाषाप्रकरणम्।

ननु शब्दानां नित्यत्वेन तत्र यकारादेः स्वत एव सत्त्वेन तदुद्दिश्य साधुत्वस्यैव नित्यतापक्षे वक्तव्यतया यण् साधुर्भवतीति वक्तव्ये यण् स्यादिति.

348. 10. D. 19.

लघुशब्देन्दुशेखरव्याख्या चन्द्रकला—भैरवमिश्रकृता

Paper. 56 Foll. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is an exhaustive and very useful commentary on Nāges'a's Laghus'abdendus'ekhara by Bhairavamis'ra son of Bhavadevamis'ra of Agastya family. The author writes the following verses at the end of the Pūrvārdha as found in the printed book.

"शब्देन्दुशेखरव्याख्या तद्धितान्तस्य या कृता।
सा वै शम्भुतिथौ वर्षे खाष्टभूतीन्दुसंमिते॥
आश्विनस्यासिते पक्षे भैरवेण समापिता।
अस्ति दौलतरायाख्यो राजराजोऽपरः कृती॥
तल्लब्धजीविकेनैषावन्तिकायाः प्रभुर्महान्।
यस्य प्रतापसिंहेन निरस्ताः शत्रुवारणाः॥"

Again at the end of the Uttarārdha he writes:

"शश्यष्टसिद्धिचन्द्राख्ये मन्मथे शुभवत्सरे।
माघे मास्यसिते पक्षे मूले कामतिथौ शुभा॥
पूर्णा वारे दिनमणेरियं चन्द्रकलाभिधा।
शब्देन्दुशेखरव्याख्या भैरवेण यथामति॥"

From the above-mentioned verses it is clear that Bhairavamis'ra wrote the commentary on the Pūrvārdha of the Laghus'abdendus'ekhara in Sam. 1880=1823 A.D. and the Uttarārdha in Sam. 1881=1824 A.D. and that one Daulataraya, Chief of Avantī was his patron. M. M. Pandit Vāsudeva Abhayankara S'āstri of Poona assigns Bhairavamis'ra to 1780 A.D. (Vide page 531 of his edition of the Sarvadars'anasaṅgraha.) It is not known how he arrived to this conclusion while the above-mentioned records show clearly that the author wrote his work in 1823. and 1824 A.D. Bhairavamis'ra has also written commentaries on the Paribhāṣendus'ekhara of Nāges'a, on the S'abdaratna of Haridīkṣita and on the Vaiyākaraṇabhūṣanasāra of Koṇḍubhaṭṭa.

Contains the Kārakaprakaraṇa only.

Beginning:

अथ स्त्रीप्रत्ययानां प्रातिपदिकप्रकृतिकत्वात्स्वादीनामपि तथात्वात्तेषामपि निरूपणमावश्यकमिति प्रसङ्गसंगत्या तदर्थान् निरूपयति—स्वौजसमौडिति। प्रथमाया न कारकविभक्तित्वमिति वादिमतं दूषयितुमुपक्रमते—इदमपीति। क्रियायोगश्च न साक्षात्कारकत्वे प्रयोजकः। किंतु साक्षात्परंपरासाधारणः। साक्षाद्यथा कर्मादीनाम्। परंपरया यथा अधिकरणकारकस्य। एवं प्रथमान्तस्यापि। सा च क्रिया यत्र क्रियावाचकं पदं प्रयुज्यते तत्र चैत्रः पचतीत्यादौ तदर्थभूतैव। यत्र तु न प्रयुज्यते घटः पट इत्यादौ तत्रापि अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीति न्यायेन गम्यमानास्तिक्रियायामेवान्वयः। स च प्रत्ययार्थकर्तृकर्मादिदारा।

End:

सर्वेष्टसिद्धिरिति। सर्वेषामिष्टानां निघातवारणकर्मप्रवचनीयसंज्ञासाफल्योदात्तश्रवणरूपाणामित्यर्थः। मङ्गलान्तानीति भाष्योक्तेः मङ्गलस्यावश्यकत्वाभिप्रायेणात्र सिद्धिशब्दोपादानम्। मूलेऽपि "अधिरीश्वरे" इति सूत्रात् ईश्वर इति विभाषा कृञीति सूत्रे अनुवर्तते। अतस्तज्ज्ञानेनेश्वरस्मरणरूपं मङ्गलं सर्वेषां भवत्वि-

त्यभिप्रायेणान्तेऽस्य सूत्रस्योपन्यास इति शिवम् ॥ इति सप्तमीविवरणम् ।

Colophon :

इति श्रीदनन्तकल्याणसद्गुणनिधानाखिलपण्डित-सार्वभौमभूमण्डलप्रसारिविमलतरानवद्यसद्यशःपार्वणपीयूषभान्वगस्त्यकुलवंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकृतायां चन्द्रकलायां कारकान्तशब्देन्दुशेखरव्याख्यानं समाप्तम् ॥

The scribe adds :

रसखाङ्काब्जमिते(१९०६)मास इषे शुक्लपक्ष-
पञ्चभ्याम् ।
यज्ञेश्वरेण लिखिता मिश्रकृता कारकव्याख्या ॥

349. 11. B. 28.

लघुशब्देन्दुशेखरव्याख्या चन्द्रकला—भैरवमिश्रकृता

Paper. 48 Foll. 9 × 4 inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Kārakaprakaraṇa only.

350. 10. I. 34.

लघुशब्देन्दुशेखरव्याख्या भावबोधिनी—सेतुमाधवाचार्यकृता

Paper. 571 Foll. 8 × 6 inches. 14 lines in a page. Devanagari script. New. Good. Good writing.

This also is an exhaustive and useful commentary on Nāgeśa's Laghuśabdenduśekhara by Setumādhavācārya with surname Nadītīram. He was the pupil of M. M. Subbarāyācārya. The author Setumādhavācārya was the Principal of Sanskrit College, Trivadi, Tanjore Dt. some 50 years ago.

Contains up to the end of स्त्रीप्रत्ययप्रकरण.

Beginning :

नृसिंहचरणौ नत्वा स्मृत्वा मुनित्रयोऽखिलम् ।
शब्देन्दुशेखरव्याख्या लिख्यते भावबोधिनी ॥

स्वस्य पाण्डित्यं स्वग्रन्थे शिवसादृश्यं स्वकुलशुद्धिं च दर्शयन् विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—पातञ्जल इत्यादिना । अत्र चशब्दमध्यहृत्य पातञ्जलनाम्नि योगशास्त्रे महाभाष्ये चेति व्याख्येयम्; सामानाधिकरण्ये तु महाभाष्यपदेनैवेतरभाष्यव्यावृत्या तद्वैयर्थ्यात् । न च योगेनेतरभाष्यग्रहणम्, रुढेर्बलीयस्त्वात् । न हीतरभाष्यं महाभाष्यमिति व्यवहरन्त्यभियुक्ताः । न च तस्य प्रकृतानुपयोगः, शब्दज्ञानानुपातीत्यादिना तच्छास्त्रसंमतपदार्थनिरूपणस्यैतद्ग्रन्थे करिष्यमाणतया तज्ज्ञत्वस्यापि वक्तव्यत्वात् । केचित्तु पातं जले महाभाष्ये अकृत इति छित्वा जले महाभाष्ये पातं मज्जनं भूरिपरिश्रमः सन् यः अकृत स नागेश इति योजयन्ति । कृतेति सापेक्षत्वेऽपि गमकत्वात्समासः । तत्त्वं च विग्रहवाक्यबोधसजातीयबोधप्रयोजकत्वमित्यन्यत्र विस्तरः ।

End :

तदनित्यत्वेति । लिङ्गविशिष्टपरिभाषानित्यत्वेत्यर्थः । तत्फलं तु सखीमतिक्रान्तोऽतिसखिरित्यत्र न टच् । केचिदिति । घटघटीग्रहणात् तदनित्यत्वं सिद्धमित्यरुचिरिति ॥

Colophon :

इति श्रीशब्देन्दुशेखरव्याख्यायायां भावबोधिन्यां स्त्रीप्रत्ययप्रकरणम् ॥

351. 9. D. 6.

लघुशब्देन्दुशेखरटिप्पणम्

Paper. 15 Foll. $9\frac{3}{4} \times 5$ inches. 12 lines in a page. Telugu script. Old. Good. Illegible writing.

This is an anonymous commentary on Nāgesa's Laghusabdendusekhara.

Contains the Saṁjñāprakaraṇa incomplete.

Beginning :

पातञ्जल इत्यनेनैव महाभाष्यस्यापि लाभे तदुपादानं ब्राह्मणवसिष्ठन्यायेन। ननु गोबलीवर्दन्यायेनेति यत्रोच्यते प्राचीनैस्तत्र ब्राह्मणवसिष्ठन्यायेनेति वक्तुर्नवीनस्य क आशय इति चेत्; शृणु—त्यदादीनि सर्वैर्नित्यमिति सूत्रे भाष्ये अयमपि योगः शक्योऽवक्तुमित्यादिना प्रत्याख्याय, इदं तर्हि प्रयोजनम् सामान्यविशेषवाचिनोर्द्वन्द्वाभावात् सिद्धम्। सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम्। यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते शूद्राभीरं गोबलीवर्दं तृणोलपमिति न सिध्यति। नैष दोषः। इह तावच्छूद्राभीरमिति आभीरा जात्यन्तराणीति न दोष इत्युक्त्वा गोबलीवर्दमित्यत्रापि गोशब्दबलीवर्दशब्दयोः स्त्रीत्वसमानाधिकरणगोत्वपुंस्त्वसमानाधिकरणगोत्वयोः प्रवृत्तिनिमित्तयोर्द्वयोर्भेद उक्तः। एवं च सामान्यविशेषभावानापन्नत्वात् द्वन्द्वोपपत्तिरिति तदाशय इति गोबलीवर्दन्यायेनेति प्राचीनप्रवादो भाष्यविरुद्ध इति।

End :

अत एवेत्यस्य शास्त्रासिद्धत्वासाधकैतादृशार्थानङ्गीकारादेवेत्यर्थः। अत एव शब्दरत्ने कार्यासिद्धत्वे एतस्य वैयर्थ्यमापादितम्।

352. 11. B. 35.

लघुशब्देन्दुशेखरटीका

Paper. 11 Foll. $10\frac{1}{2} \times 2\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

An anonymous commentary on Nāgesa's Laghusabdendusekhara.

Contains a small portion in the Uttarārdha.

Beginning :

सीतारामं नमस्कृत्य गणेशं च सरस्वतीम्।
शब्देन्दुशेखरव्याख्या द्वितीयार्धे विरच्यते॥

विघ्नविघातायेत्यर्थमिति। आदिपदेन तद्द्वारकसमाप्तिग्रन्थप्रचारसंग्रहः। तद्विहितेति। वेदविहितेत्यर्थः। सर्वनाम्नामित्यत्रोत्सर्गपदस्वारस्येन क्वचिदप्रधानस्यापि परामर्शसत्त्वादिति भावः। वीत्येतस्य जायत इत्यनेन सामसे प्रातिपदिकत्वोत्तरप् इति प्रकारनिरासं सूचयन्नाह —वीति भिन्नं पदमित्यादि। निरासे बीजमाह—तिङन्तोत्तरेति। लिङ्गसर्वनामनपुंसकत्वसद्भावेन विजयत इत्यत्र ह्रस्वत्वापत्तिरिति तत्प्रकारनिरासबीजं तु न युक्तम। नपुंसके यत्तस्यैवेति सिद्धे प्रादिपदिकग्रहणं सत्त्वप्रधानप्रातिपदिकस्यैव ह्रस्वत्वं यथा स्यादित्येवमर्थमित्यर्थस्य भाष्ये स्पष्टमुक्तेः प्रकृते तदप्रसक्तेरिति बोध्यम्।

End :

धारूपा इतीति। रेफस्त्वाकारागमः, न दा इत्यस्येति। ननु अवयवावयवः समुदायावयवो भवतीति वचनेन समुदायावयवत्वमक्षतमिति चेन्न, आशयानवबोधात्। तथा हि— अयं हि न्यायो यत्रावयवावयवोऽवयविनि दृष्टस्तत्र प्रवर्तते; न तु सर्वत्र। अत एव पठिता विद्या इत्यादौ इटष्टित्त्वमादाय ङीप् न। अवयवस्य

इकारस्यावयवो यष्टकारस्तस्यावयविनि समुदायेऽदर्शनात्; अनुबन्धविनिर्मुक्तस्यैवोपस्थितेः। एधेतेत्यादौ सुटः सकारस्यावयविनि समुदाये दृष्टतया तत्र लोपो भवत्येव। एवं हि निवेशे ट्युट्युलोष्टित्वमपि चरितार्थम्। अन्यथा तुटष्टित्वमादायैव प्रातस्तनीत्यादौ ङीप्सिद्धेः ट्युट्युलोष्टित्वं व्यर्थमेव स्यादिति सुधीभिराकलनीयम्।

353. 24. B. 4.

सिद्धान्तकौमुदीव्याख्या विलासः—लक्ष्मीनृसिंहकृतः

Palm-leaf. 171 Foll. 18 × 1¾ inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

This is a commentary on Bhaṭṭoji-dīkṣita's Siddhāntakaumudī. The commentary is called Vilāsa. The manuscript is a fragment and does not contain any colophon supplying the names of the author and the commentary. However, on comparison of a portion of this commentary with the corresponding portion of the commentary described under D. No. 1448 of the Des. Cat. of the Govt. Oriental MSS. Library, Madras, both the commentaries are found identical and the author is known to be Lakṣmīnṛsiṁha, son of Koṇḍubhaṭṭamahopādhyāya of the Mahīdara family and pupil of Nārāyaṇendra. Again on further comparison with the commentary described under D. No. 1446 of the Des. Cat. of the same Library and with that described under No. 562 of the Des. Cat. of the Curator's office, Trivandrum, the name of the commentary is known as Vilāsa. From the colophon and the introductory stanzas of the commentary as quoted in the above-mentioned Catalogues it is also known that the author Lakṣmīnṛsiṁha was the son of Rāmāmbā and pupil of Rāmabhadra who is extold as an incarnation of the famous Patañjali. This Rāmabhadra may be probably same as the famous Rāmabhadradīkṣita. It is also known from the above-mentioned references that Rāmāmbā was the author's mother. This author Lakṣmīnṛsimha is identical with the authors of Tarakadīpikā and Ābhoga, the commentary on Amalānanda's Kalpataru.

It is an accepted fact that Koṇḍubhaṭṭa, the author of Vaiyākaraṇabhūṣaṇa and Sāra thereof, was the nephew of Bhaṭṭoji-dīkṣita. If our author's father Koṇḍubhaṭṭa is taken identical with Bhaṭṭoji's nephew, as stated in No. 6271 and 7090 of the Tanjore. Des. catalogue, the work may be assigned to the 17th Century A.D. But evidences for such identification are needed.

The leaves bearing numbers 47—49 52—55 and 57—61 are missing.

Contains from the S'abdādhikāra to the Samāsās'rayavidhi (incomplete).

Beginning:

उपजीव्यसंधिनिरूपणानन्तरं शब्दान्निरूपयितुकामः शिष्यबुद्धिसौकर्यायादौ सुबन्तान्निरूपयितुमाह—अर्थवदिति। प्रत्ययं प्रत्ययान्तं चेति। प्रत्यय इति प्रत्ययग्रहणेन तदन्तस्य ग्रहणे प्रत्ययान्तस्येव व्यपदेशिवद्भावेन प्रत्ययस्यापि ग्रहणमिति भावः। न च

संज्ञाविधित्वान्न तदन्तग्रहणम्, सुप्तिङन्तं पदमित्यन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनादिति वाच्यम्; अप्रत्यय इति प्रतिषेधविधिरिति कैयटादौ स्थितत्वात्। एवं च वर्जयित्वेति फलितार्थकथनमिति बोध्यम्। अर्थवदिति नपुंसकत्वानुगुणं विशेष्यमाह—शब्दस्वरूपमिति। वनं धनमित्यादौ वन् धन् इत्यंशस्य प्रातिपदिकत्वे ततः परस्य सोरेकवचनमुत्सर्गतः करिष्यत इति भाष्यकारवचनप्राप्तस्य हल्ङ्यादिलोपे सति न लोपो मा भूदित्यर्थवदित्युक्तम्। वृत्रमहन् काण्डे कुण्डे इत्यादौ नलोपहस्वादिव्युदासार्थमधातुरित्यादिकमिति बोध्यम्। कृत्तद्धितान्ता इति। इहानुवृत्तस्यार्थवत्पदस्य प्राशस्त्येनार्थवत्परत्वात् कृत्तद्धितान्तयोरेव च पर्यवसिताभिधेयत्वेन तथात्वादर्थवत्पदम ..... ग्रहणमिति भावः।

End:

तदाह—क्विबन्तेष्विति। उपानदिति। उप नह्यत इति विग्रहे संपदादित्वात्कर्मणि क्विपि नहो धः इति धत्वे दीर्घे च रूपम्। नीवृदादौ कर्तरि क्विप् निवर्तत इति नीवृत्। प्रवर्षतीति प्रावृट्। मर्माणि विध्यतीति विग्रहे व्यधेः ग्रहिज्येत्यादिना संप्रसारणे मर्मावित्। नितरां रोचत इति नीरुक्। तस्यैवोदाहरणान्तरं केषुचित्कोशेषु दृश्यते अभीरुगिति। अभितो रोचत इत्यर्थः। ऋतिं सहत इति विग्रहे पूर्वपदादिति षत्वे ऋतीषट्। परितनोतीति परीतत्। गमः क्वावित्यत्र गमादीनामिति वचनात्तनोतेरप्यनुनासिकलोपे तुकि रूपम्। गतिकारकयोरेवेति। दीर्घ इत्यर्थः। पटुरुगिति। पटवी रुग्यस्येति बहुव्रीहिः। रुक् च कान्तिः। वनगिर्योरिति। आदिशब्दस्य प्रत्येक संबन्धः, वनगिर्योरित्यनेन यथा.

354. 9. E. 60.

सिद्धान्तकौमुदीव्याख्या सुमनोरमा—तिरुमलयज्वकृता

Paper. 119 Foll. $11\frac{3}{4} \times 4$ inches. 14 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a commentary on the Siddhānta-Kaumudī of Bhaṭṭojidīkṣita. The commentary is called Sumanoramā. The author Tirumalayajvan was the son of Veṅkaṭayajvan belonging to the family known as Ṣaḍdarśana. The title Ṣaḍdarśana of the family is said to have sprung from a guru called Upendra-Sarasvatī. The author Tirumalayajvan had two brothers namely Sarveśvarayajvan and Abbaṇṇayajvan of whom the former was his preceptor. This Sarveśvarayajvan is identical with the author of Mahābhāṣyapradīpasphūrti (described under No. 107 herein before) as our author quotes herein the work under the auhorship of his preceptor (Vide—अधिकं त्वस्मद्गुरुकृतभाष्यप्रदीपस्फूर्तौ द्रष्टव्यम्.)

Contains the Uttarārdha up to the end of Curādiprakaraṇa.

Beginning:

यद्वक्त्राभिमुखं मखेषु मखिभिर्मन्त्रानुपूर्वं हवि-
र्दत्तं दैत्यवराग्निपाय्य विबुधाः सर्वे सदा भुञ्जते।
यद्ध्यानात्प्रभवन्ति निर्मलधियः के वा महापातका
..... तमग्निपुरुषं वन्दामहे मानसे ॥
वन्दे देव्याः सरस्वत्या वन्दनीये पदाम्बुजे।
यद्वन्दनेन मन्दोऽपि विन्देद् गुरुसमानताम् ॥
यो वेदगर्भमतनोद्विधिमात्मसृष्टं
यः पञ्चवर्षमकरोद्ध्रुवमाप्तवाचम्।

सोऽयं समस्तजगतां सुहृदन्तरात्मा
वाचः प्रसारयतु मे बुधसंमतार्थाः ॥
अष्टाध्यायीं दर्शयन्तीव साक्षा-
द्व्याख्यामुद्रा राजते यस्य हस्ते ।
भूयो भूयस्तारकान् शोषयन्ती
साक्षादीक्षे दक्षिणामूर्तिदेवम् ॥
वृद्धोपेन्द्रयतीन्द्रसान्द्रकरुणासंवृद्धषड्दर्शन-
श्रीषड्दर्शनवेङ्कटाध्वरिलसद्भाब्धिचन्दोदयम् ।
सौजन्यार्चितसर्वलोकविनुतप्रख्यातकीर्तिश्रियं
श्रीसर्वेश्वरसर्वतोमुखगुरुं सर्वेश्वरांशं भजे ॥
श्रीषड्दर्शनवेङ्कटाध्वरिसुतः षड्दर्शिनीवल्लभ-
श्रीसर्वेश्वरसर्वतोमुखगुरोर्विद्यानिधेः सोदरः ।
विख्याताब्जनपौण्डरीकसहजः **सिद्धान्तकौमुद्यनु-**
व्याख्यामातनुते सुधीस्तिरुमलः श्रीद्वादशाहाध्वरी ॥

स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—श्रौत्रेति । श्रोत्रियस्य भावः श्रौत्रम् । हायनान्तयुवादिभ्योऽण् इति सूत्रे पठितात् श्रोत्रियस्य यलोपश्चेति वार्तिकात् अण्यलोपौ । यस्येति चेति इकारलोपः । अर्हतो भावः आर्हन्ती । वर्णदृढादिभ्यः ष्यञ्च इत्यत्र अर्हतो नुम् चेति वार्तिकात् ष्यञ्नुमौ । षित्वात् ङीषि हलस्तद्धितस्येति यलोपः । ताभ्यां वित्ताः श्रौत्रार्हन्तीचणाः । तेन वित्त इति सूत्रेण चणप्प्रत्ययः ॥

End :

पुच्छादिष्विति । सूत्रप्रत्याख्याने आत्मनेपदं न स्यादित्यत आह—णिजन्तादिति । बहुलवचनात् । बहुलमेतन्निनतदर्शनमित्यत्र । ग्रन्थान्ते धातुपाठान्ते ।

Colophon :

इति चुरादिणिज्विकरणः ॥

355. 25. C. 25.

सिद्धान्तकौमुदीव्याख्या सुमनोरमा—तिरुमल-यज्वकृता

Palm-leaf. 81 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

The stanza which is given below says that the author's father Veṅkateśa was the son of Sarasvatīmakhin of the Ṣaḍdarśana family.

Wants beginning in the Strīpratyaya and breaks off in the Samāsaprakaraṇa.

As the first three leaves are much broken the beginning is given from the 4th leaf.

Beginning :

अयज्ञसंयोगार्थमारम्भः । पूर्वेण सहितः सपूर्व इति । समासे विद्यमानपूर्वस्येत्यभिप्रेत्याह । . . . विशेषणाल्लभ्यते । गृहस्य पतिरिति विग्रहः । अत्र पतिशब्दः स्वामिपर्यायः । अनुपसर्जनाधिकारात् दृढपत्नीत्यादौ न . . नित्यं सपत्न्यादिष्वेतदर्थम् । अन्यथा विकल्पाप्राप्त्या तदपवादस्य तत्सूत्रस्यायोगादित्यर्थः । बहुव्रीहावपीत्युपलक्षणम् । पति . . . संयोगाभावादित्यर्थः । उपमानादिति । अग्निसाक्षिकपाणिग्रहणसाधर्म्यादिति भावः । आचारेति । पत्नीवाचरतीत्यर्थे.

Colophon :

वृद्धोपेन्द्रसरस्वतीगुरुकृपासंवृद्धषड्दर्शनी-
वंशाब्धीन्दुसरस्वतीमखिसुतश्रीवेंकटेज्यावतः ।
सूनोस्तिर्मलयज्ववर्यविदुषः सिद्धान्तकौमुद्यनु-
व्याख्यायां सुमनोरमाभिधकृतौ स्त्रीप्रत्यया व्याकृताः ॥

End :

दिवो द्यावा । दिव्शब्दस्य द्यावादेश इत्यर्थः । . . .

कस्येत्यत आह—दिव इत्येवेति। ननु दिवसादेशे अकारो व्यर्थः, प्रयोगे अश्रवणादित्यत आह—आदेश इति। अकाराभावे पदान्तत्वात् . . . यादेशाविति चेत्यत आह—छन्दसीति। नन्वकारोच्चारणस्य रुत्वबाधनार्थत्वे दिवस्पृथिव्योरित्यत्र पदकाराः कथं विसर्गं कुर्वन्तीत्यत आह.

356. 9. G. 38.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 109 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

This also is a commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The commentary is called Siddhāntaratnākara. The author Rāmakṛṣṇabhaṭṭa was the son of Tirumalabhaṭṭa and grandson of Veṅkaṭādribhaṭṭa. It is interesting to note that the names of Rāmakṛṣṇa's father and grandfather *viz.*, Tirumala and Veṅkaṭa coincide with those of the author of Sumanoramā (vide the last number) and his father. But as the surnames—Bhaṭṭa in one side and Yajvan in other side—are different, we could not venture to identify them.

Beginning :

विश्वेशं सच्चिदानन्दं लक्ष्मीकान्तमजं विभुम्।
प्रणम्याथ मुनीन्नत्वा पाणिन्यादींस्तथा गुरुम्॥
वेदशास्त्रार्थनिष्णातं तातं तिरुमलाभिधम्।
शेषाशेषार्थसिद्धान्तकौमुदीमतिगह्वराम्॥
व्याचिख्यासुर्विधास्येऽहं रामकृष्णो यथगमम्।
वैयाकरणसिद्धान्तरत्नाकरमिमं सुधीः॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिमभीप्सुर्मङ्गलं मुख्यगुरुनमस्काररूपमातन्वानः शिष्यशिक्षार्थं ग्रन्थत उपनिबध्नाति—मुनित्रयमिति। त्रयोऽवयवा यस्येत्यर्थे संख्याया अवयवे तयबिति तयपि द्वित्रिभ्यां तयस्यायज्वेत्ययजादेशे षष्ठीसमासः। कृधातूपस्थाप्यक्रियानिरूपितकर्मत्वात् कर्मणि द्वितीया। न च नमःस्वस्तीत्यादिना नमःशब्दयोगे चतुर्थी शङ्क्या, उपपदविभक्तेः कारकविभक्तिर्बलीयसीति कारकविभक्तेर्न्याय्यत्वात्। न च कर्तृकर्मणोरिति षष्ठी स्यादिति वाच्यम्, न लोकेति निषेधात्। नमस्कुर्मो नृसिंहायेत्यादौ तु तादर्थ्यरूपसंबन्धविवक्षया चतुर्थी। यद्वा क्रियार्थोपपदस्य कर्मणि स्थानिन इति चतुर्थी, नृसिंहमनुकूलयितुं नमस्कुर्म इत्यर्थावगमात्। नमस्कृत्येति। क्त्वान्तेन गतिसमासे समासेऽनञ्पूर्वे इति क्त्वो ल्यप्। साक्षात्प्रभृतित्वात् गतिसंज्ञायां नमस्पुरसोर्गत्योरिति सः। परिभाव्य विचार्य। परौ भुवोऽवज्ञाने इति लिङ्गात् परिपूर्वस्य भवतेर्विचारेऽपि प्रवृत्तेः।

Colophon :

इति रामकृष्णभट्टकर्तृके सिद्धान्तरत्नाकरे सञ्ज्ञाप्रकरणम्।

End :

प्रधीरिति। प्रध्यायतीति विग्रहे ध्यायतेः संप्रसारणं चेति क्विप्संप्रसारणपूर्वत्वे हल इति दीर्घत्वम्। नदीकार्यं त्वस्य नास्ति, नित्यस्त्रीत्वाभावात्। उन्यावितिं। नायं धात्ववयवसंयोग इति यण् भवत्येवेति भावः। इवर्णान्तधातुनाङ्गविशेषणात् हरीनित्यादौ न यण्। न चेयङुवङोर्विषय एवापवादभूतस्य यणः प्रवृत्त्या .

357. 9. G. 39.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः— रामकृष्णभट्टकृतः

Paper. 93 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

As the work is quoted in the Laghu-śabdenduśekhara, the author must be earlier than Nāgeśa.

Contains the Uttarārdha incomplete.

Beginning :

यं संपूज्य बुधाः सिद्धिमिन्द्राद्याः प्राप्नुवन् स्विकाम् ।
द्वैमातुरः स नः पायाद्विघ्नध्वान्तविभावसुः ॥
त्रायतां प्रकृतिः सा मामनेकानेकशक्तिका ।
व्यनक्ति शब्दरूपाणि सांनिध्यात्प्रत्ययस्य या ॥
अथोत्तरार्धं तनुते यथागमं
फणीन्द्रभाष्यादि विभाव्य यत्नतः ।
अमत्सराणां सुधियां विपश्चितां
मनो नरीनर्ति तु यत्र संततम् ॥

विघ्नविघाताय मध्ये शिष्टाचारप्राप्तं वस्तुनिर्देशरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थत उपनिबध्नाति—श्रौत्रेति । "मङ्गलादीनि मङ्गलमध्यानि" इत्यादि वृद्धिभूवादि-सूत्रस्थं भाष्यमेवास्य मूलं बोध्यम् ।

End :

एवं चाकारश्रवणफलकादन्तत्वलिङ्गकलिपतवचन-प्राप्तोऽसावल्लोपविकल्प इति तदर्थः फलित इति किमत्र व्याहतम्? अत एव निर्मूलं चेत्यशुद्धम्, महता प्रबन्धेन मूलस्य प्रतिपादितत्वात् । प्रत्युत णिञ्विकल्प एव निर्मूलः, युक्तिशाकटायनवोपदेवाद्यनेकग्रन्थविरोधात् । णिञ्विकल्पवादिनो भवतोऽप्येषैव गतिरित्यवधेयम् ।

प्राचां ग्रन्थस्य निष्कर्षो मयाकारि यथामति ।
यथागमं च कृतिनः क्षमन्तां दूषयन्तु वा ॥

तदेवं वोपदेवकृष्णपण्डिताद्यनेकग्रन्थसिद्धलक्ष्याणामू-नापयत्यादीनामेव साधुता । न तूनति, अङ्कति औननदित्यादीनाम्, भाष्यकैयटाद्यनेकग्रन्थ.

358. 9. G. 41.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः— रामकृष्णभट्टकृतः

Paper. 94 Foll. 12 × 6 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Contains the Kṛtprakarana complete.

Beginning :

त्रायतां प्रकृतिः सा मामनेकानेकशक्तिका ।
व्यनक्ति शब्दरूपाणि सांनिध्यात् प्रत्ययस्य या ॥
यं विद्वान् सर्वविज्ञाता यमविद्वान्न सर्ववित् ।
तं चिन्तये सदात्मानं . . . सुखाप्तये ॥
गोपीपीनकुचद्वन्द्वसङ्गादानन्दसुन्दर ।
यं त्वादर्शयसे श्रीश व्याचष्टे सुकृतीकृतः ॥

अर्थप्रत्यायनाय प्रयुज्यमानवाक्यानुशासनं तद्घटित-पदानुशासनपूर्वकमिति सुप्तिङन्तं पदमित्यारब्धम् । तत्क्रमानुरोधेन तदुभयं निरूप्य सुपां त्वादीनां च प्रकृतित्वेनापेक्षितान् कृदन्तान् वक्तुमारभते—धातो-रिति । प्राक् लादेशाद्धात्वधिकारः, न त्वा तृतीयपरि-समाप्तेरित्याह । अन्यथा एधते इत्यादौ विकरणैर्व्यव-धानात् टेरेत्वं न स्यात् । एशः शित्त्वं सर्वादेशार्थं कर्तव्यं स्यात् ।

End :

अन्वग्भूत्वेति । इहान्वक्शब्दो देशविशेषपरः, नानुकल्पपर इति न णमुल् । किं तु क्त्वैव । नापि वैकल्पिक उपपदसमस इति सिद्धम् ।

युक्तिप्राचुर्ययुक्तेऽस्मिन् श्रीमद्रत्नाकरेऽतुलें ।
कृत्प्रक्रिया पूर्तिमगाद्वेंकटेशस्य तुष्टये ॥

Colophon :

इति श्रीमद्वेंकटभट्टपादात्मजतिर्मलभट्टपादतनूजरामकृष्णभट्टकर्तृके वैयाकरणसिद्धान्तरत्नाकरे कृदन्तप्रक्रिया ।

विद्वानभूद्वेंकटभट्टपाद-
स्तदात्मजात्तिर्मलभट्टपादात् ।
श्रीरामकृष्णो जनिमान् विनीत:
फणीन्द्रभाष्यार्णवभावनार्थी ॥
गौरीशसक्तो जनुष: फलार्थी सिद्धान्तरत्नाकरमर्थगूढम् ।
अदीपयं तद्वरत्नपुष्पै: संपूजये शंकरपादपद्मम् ॥
श्रीरामकृष्णेन मया समुद्धृत:
पातञ्जलाद्भाष्यमहोदधे: सताम् ।
सिद्धान्तरत्नाकर इत्ययं मुदा
तोतुष्यतां शंभुरत: सहोमया ॥
ब्रह्म प्रकाशितं येन शाब्दं सच्चित्सुखात्मकम् ।
सर्वज्ञ: सुमहातेजा: स मे सेव्य: पतञ्जलि: ॥

The former owner of the MS.—Nṛsiṁhasomayājin son of Ahobalādhvarin.

359. 10. E. 71.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकर:—
रामकृष्णभट्टकृत:

Paper. 811 Foll. 9 × 4 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants 31 leaves in the beginning and 23 leaves (746—768) in the middle.

Begins in the course of Paribhāṣāprakaraṇa and ends in the Lakārārthaprakriyā in the Uttarārtha.

Beginning :

ऋभुक्षणमिन्द्रमित्याद्यर्थत्वेन तस्याप्यावश्यकत्वात् । 'वा षपूर्वस्य निगमे' इति वेद उपधादीर्घस्य वैकल्पिकत्वात् । तस्मादुक्तदूषणानां का गतिरित्याशङ्क्याह—गुणवृद्धिशब्दाभ्यामिति । पूर्वसूत्राभ्यां गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनस्तदुपादानं पूर्वसूत्राभ्यां तयोरनुवृत्तिमिहैव वा तदावृत्तिं सूचयति । तेन गुणवृद्धिशब्दोच्चारणेन यत्र तयोर्विधानं तत्रैवेयं परिभाषोपतिष्ठते इति कैयट: ।

केचित्तु—इह गुणवृद्धिग्रहणं न कर्तव्यं, पूर्वसूत्रद्वयं संपूर्णमिहानुवर्त्य वृद्धिरिति यत्रादैचो गुण इति यत्रादेङो भाव्यते तत्रैवेयमुपतिष्ठत इति व्याख्याने बाधकाभावादित्याहु: ।

End :

अन्यथा सक्तून्पिब धाना: खादेत्यभ्यवहरतीत्यत्र मूलोदाहरणे द्वित्वापत्ते: । लोडभावं प्रक्रम्याभ्यवहरतीत्यनुप्रयोगस्य हिस्वान्तयोर्विहितस्यासंगतत्वाच्च । एतेन लोडभावं प्रक्रम्य 'भ्राष्टमटति खदूरमटति स्थाल्यपिधानमटतीत्येवायमटति' इति वृत्तिकृदुक्तानुप्रयोगोऽपि परास्त: । कालकारकसंख्यानां लटैव स्पष्टीकृतत्वाच्चेति दिक् । भ्रम एवेति । पुरुषांशे वचनांशे च काव्यव्याख्यातृणामिति भाव: । एवं च पुरीमवस्कन्देत्यादौ पुरुषवचनसंज्ञयोरभावेऽपि तिङन्तत्वं परस्मैपदात्मनेपदान्तत्वं च यथाशास्त्रं सिद्धम् ॥

युक्तिप्राचुर्ययुक्ते श्रीतैङे रत्नाकरेऽतुले ।
अपुस्फुरं लकारार्थान् वेंकटेशस्य तुष्टये ॥

Colophon :

इति श्रीमद्वेंकटाद्रिभट्टपादात्मजतिरुमलभट्टपादतनूजरामकृष्णभट्टकर्तृके वैयाकरणसिद्धान्तरत्नाकरे लकारार्थप्रक्रिया ॥

360. 20. I. 16

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकर:—
रामकृष्णभट्टकृत:

Palm-leaf. 33 Foll. 17 × 2 inches. 10

lines in a page. Telugu script. Old. Injured. Clear writing.

Wants beginning in the S'abdādhikāra and breaks off in the Strīpratyayaprakaraṇa.

361. 22. I. 16.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Palm-leaf. 91 Foll. 15 × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Contains the Kārakaprakaraṇa complete and Samāsaprakaraṇa incomplete.

362. 40. C. 33.

सिद्धान्तकौमुदीव्याख्या सिद्धान्तरत्नाकरः—रामकृष्णभट्टकृतः

Paper. 36 Foll. 8¾ × 3½ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Legible writing.

Incomplete.

Contains a fragment of the Samāsaprakaraṇa.

363. 19. L. 5.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 42 Foll. 17 × 1¼ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

This is an exhaustive and very useful commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The commentary is called Bālamanoramā, perhaps to distinguish it from the Prauḍhamanoramā of Bhaṭṭojidīkṣita. The author Vāsudevadīkṣita was the son of Annapūrṇāmbā and Mahādevadīkṣita. He was the pupil of Viśveśvaradīkṣita, his elder brother. He is said to have acted as a priest or *adhvaryu* in the sacrifices performed by Ānandarāyamakhin, the famous minister of the King Sāhaji (1684 to 1710 A.D.), Sarfoji (1711 to 1727 A.D.) and Tukkoji (1728 to 1735) of Tanjore. The author, therefore, can well be assigned to the first part of the 18th Century A.D. Among the other works written by him, mention may be made to the Kutūhalavṛtti, an exhaustive commentary on the Pūrvamīmāṁsāsūtras, and Mahāgnisarvasva, a commentary on the Bhodhāyanaśrautasūtras.

Breaks off in the Sandhiprakaraṇa.

स जयति दिव्यनटेशो नृत्यति योऽसौ चिदम्बरसभायाम् ।
पाणिन्याद्या मुनयो यस्य च दयया मनोरथानभजन् ॥
अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किं चास्तु पतञ्जलये भ्रात्रे विश्वेश्वराय गुरवे च ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति वृद्धिसूत्रस्थभाष्यादिस्मृतिसिद्धकर्तव्यताकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् प्राचीनग्रन्थैरगतार्थतां विषयप्रयोजनसंबन्धाधिकारिणश्च सूचयन् चिकीर्षितं प्रतिजानीते—मुनित्रयमिति श्लोकेन । इयं वैयाकरणसिद्धान्तकौमुदी विरच्यत इत्यन्वयः ।

End:

वस्तुतस्तु जातिपूर्वादित्यस्य तत्रानुवृत्तेः गौरादित्वात् ङीष् इति युक्तम्। पुत्रघातसाहसस्य स्त्रीष्वेव संभवात् स्त्रीलिङ्गमेवोदाहृतम्। पुत्रहतीति। द्वित्वाभावे . . .

364. 30. E. 8.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 67 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the Taddhitaprakaraṇa and goes on up to the end of the Pūrvārdha.

Beginning:

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते। वृद्धि आय लाभ शुल्क उपदा—एषां द्वन्द्वात्प्रथमाबहुवचनम्। ननु दीयत इति कथमेकवचनमित्यत आह—वृद्धिर्दीयत इत्यादिक्रमेणेति। एवं च तदस्मिन् वृद्धिर्दीयते, तदस्मिन् आयो दीयते, तदस्मिन् शुल्को दीयते, तदस्मिन्नुपदा दीयत इत्यर्थेषु प्रथमान्ताद्यथाविहितं ठञादयः स्युरित्यर्थः।

End:

अत्र द्वन्द्वं न्यञ्चीति वीप्सायां द्वित्वम्। अन्यत्र स्वार्थे बोध्यम्। अन्यत्रापि। द्वन्द्वानि सहत इत्यादावित्यर्थः। शीतमुष्णं च एकं द्वन्द्वम्। सुखं दुःखं चापरम्। क्षुत्तृष्णा चान्यदित्यादि। इह स्वार्थे द्वन्द्वः। अम्भावादि पूर्ववत्। चार्थे द्वन्द्वनिपातनादन्यत्रापीति सिद्धम्।

Colophon;

इति द्विरुक्तिप्रक्रिया।

इति वासुदेवदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पूर्वार्धं समाप्तम्।

An extra leaf-added at the end contains a letter written in Tamil as following.

. . . . . அப்படியிருந்தால் அதை அவருக்கு ஒடனே சொல்லிவிடவேண்டியது. தேவரீரும் அக்கரையாய் சொல்லி அனுப்பிச்சபடியினாலே அத்தனை தூரம் அவரை தைரியமாய் அனுப்பிவித்தேன். வேணும் விஞ்ஞாபனம். அர்த்தோதயத்துக்கு மகாராஜா அகண்டகாவேரிக்கு வரது ஒண்ணு. மகாராஜாவுக்காக சக்கரபாணிசுவாமிக்கு அர்ச்சனை பண்ணி தெரியப்படுத்தின கடுதாசிக்கு பதில்.

365. 21. G. 14.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 55 Foll. 15¾ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains a fragment of the Bhvādi.

366. 25. I. 3.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 123 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the S'abdādhikāra and breaks off in the Avyayaprakaraṇa.

367. 30. G. 29.

सिद्धान्तकौमुदीव्याख्या बालमनोरमा—वासुदेवदीक्षितकृता

Palm-leaf. 71 Foll. 17×1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Strīpratyaya almost complete.

4 extra leaves are added at the end. Leaves 1 and 2 give the name of the former owner of the MS.—Cakravarti Srīnivāsācārya and they contain nothing else. Leaf 3*a* contains a few lines of the Strīpratyayaprakaraṇa of the Siddhānta. kaumudī. Leaves 3*b* to 4*b* contain a few stanzas selected from the Kalividambana and Sabhārañjanaśataka of Nīlakaṇṭhadīkṣita.

368. 9. K. 13.

सिद्धान्तकौमुदीव्याख्या सुखबोधिनी—नीलकण्ठवाजपेयिकृता

Paper. 1935 Foll. 8×6¼ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 8 volumes.

This is another commentary called Sukhabodhinī on the Siddhāntakaumudī. The author Nīlakaṇṭhavājapeyin was the son of Kāmākṣī and Varadeśvarayajvan and grandson of Rāmacandrādhvarin of Ātreyagotra. It is said that the author's father Varadeśvarayajvan learnt Śāstras from Appayadīkṣita's son and died at Benares as an ascetic. Nīlakaṇṭha had an elder brother called Sundareśvarayajvan who wrote the Pāṇinipradīpa and some other works. Jñānendrasarasvatī, the author of Tattvabodhinī (Siddhāntakaumudīvyākhyā) and one Veṅkaṭeśvara were preceptors of Nīlakaṇṭha. Among the authors and works quoted herein the following may be mentioned.—Bhāṣyatattvaviveka, Viśveśvaravijaya, Tattvbodhinīgūḍhārthadīpikā, Laghuśabdakaustubha (all these four were written by him); Śabdakaumudī by Śokkanātha, Śābdikarakṣā by Dvādaśāhayājin, Vedāntabhūṣaṇa by Kaivalyendra (See No. 7575 Tanjore Des. Cat.)., Dhātucandrodaya, Prakriyāprasāda by Viṭṭhala, Siddhāntaratnākara by Rāmakṛṣṇabhaṭṭa, Vaiyākaraṇamatonmajjanī by Bhaṭṭojidīkṣita, Durghaṭavṛtti; Pañcikā, Sarvasva, Līlāvatī (all the three on gr.) Vidyāsāgara, Cakrapāṇi, Haridīkṣita, Pravartakopādhyāya, Śrībhadra, Ratnakośa, Pradīpavivaraṇa by Rāmacandrasarasvatī.

The work is divided into four Pariccheḍas. The first Pariccheda ends in the Pūrvārdha, the second in the Tiṅantaprakaraṇa, the third in Kṛdantaprakaraṇa, and the fourth in the Svaraprakaraṇa.

Contains up to the end of Kṛtprakaraṇa, except the Taddhita and Dvirukti prakaraṇas.

Beginning:

विश्वेश्वरीं विशालाक्षीं गणेशं षण्मुखं गुरुम् ।
मुनित्रयं नन्दिकेशं भारतीं नौमि सिद्धये ॥
पदवाक्यप्रमाणानां पारगं विबुधोत्तमम् ।

रामचन्द्रमखीन्द्राख्यपितामहमहं भजे ॥
आत्रेयाब्धिकलानिधिः कविबुधालंकारचूडामणि-
स्तातः श्रीवरदेश्वरो मखिवरो योऽयष्ट सर्वक्रतून् ।
अध्येष्टाप्पयदीक्षितार्यतनयात् तन्त्राणि काश्यां पुनः
षड्वर्गानपि यो व्यजेष्ट शिवतां यः प्राप नः सोऽवतात्
श्रीवाजपेयिना नीलकण्ठेन विदुषां मुदे ।
सिद्धान्तकौमुदीव्याख्या क्रियते सुखबोधिनी ॥
अस्मद्गुरुकृतां व्याख्यां बह्वर्थां तत्त्वबोधिनीम् ।
विभाव्य तत्रानुक्तं च व्याख्यास्येऽहं यथामति ॥
महायासेन यल्लभ्यं तदनायासतो बुधाः ।
गृह्णन्तु सुखबोधिन्या पाण्डित्याय विमत्सराः ॥
तन्त्रे पाणिनिकर्तृके दृढतरं सत्संप्रदायाच्चिरं
भक्त्याधीत्य निबन्धजातमखिलं शेषीयभाष्यं पुनः ।
टीकाभिः परिभाव्य सारमखिलं ये जानते पण्डिता-
स्तेष्वेकोऽपि विलोकयेन्मम कृतिं धन्यो मदीयः श्रमः ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नेन परिसमाप्तये 'मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति' इति महाभाष्योक्तविशेषफलावाप्तये च प्रकृतशास्त्रनिर्मातृत्वेनाभ्यर्हितानां सूत्रवार्तिकभाष्यकाराणां पाणिनिकात्यायनपतञ्जलीनां मुनीश्वराणां नमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् विषयप्रयोजनादीनि च ध्वनयन्नात्मनो निगूढार्थतत्त्वज्ञत्वं च ज्ञापयन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । शास्त्राविरुद्धसूक्ष्मयुक्तिभिः पुनः पुनरनुचिन्तनं मननम् । तच्छीला मुनयः । 'मन अवबोधने' इति तानादिकात् 'मन ज्ञाने' इति दैवादिकाद्वा 'मनोरुच्चोपधायाः' इत्युणादिसूत्रेण इन्प्रत्ययः, उपधाया उत्वं च । किदित्यधिकारादिन्प्रत्ययश्च कित् । 'आर्धधातुकं शेषः' इति इन्प्रत्ययस्यार्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इति प्राप्तो गुणः 'क्ङिति च' इति प्रतिषेधान्न भवति ।

End :

यत्तु 'विष्णुरात्मा भगवतो भवस्यामिततेजसः' इति कर्णपर्वणि भारतवचनं, तद्विष्णोः शिवभक्तशिरोमणित्वेन तदन्तर्यामित्वादिति न काप्यनुपपत्तिरिति । तस्मात् ब्रह्म जगत्कारणं ध्येयं चेत्यवगच्छद्भिः तत् ब्रह्म किंदेवतारूपमिति जिज्ञासुभिरत्याश्रमिभिः कृतो विचारः 'ब्रह्मवादिनो वदन्ति किं कारणम् कुतस्तस्य जाता वर्तन्ते केन क्व च सम्प्रतिष्ठा अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्' इति विप्रतिपत्तिं कृत्वा तदुत्तरं कालस्वभावनियतिमहाभूताद्यप्रधानपुरुषमेलिनोऽन्तःकारणतत्त्वस्य यादृच्छिकत्वस्य चाकारणकत्वस्य सुवचतया ब्रह्मणो जनककारणत्वं कथमिति शङ्कां निराकर्तुमग्रिममन्त्रः । कालस्वभावो नियतयदृच्छाभूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां तत्वाभावात् आत्माप्यनीशः सुखदुःखहेतोरिति । अनेन कालादिनिरासोत्तरं स्वतो निर्णेतुं शक्तानामत्याश्रमिणां देवीप्रसादात्तदवगति . . . . . मन्त्रेण ते ध्यानयोगानुग . . . स्वगुणे निरूढार्थमित्यन्तेन प्रतिपाद्य ततो यः कारणानि निखिलानि तानि कालात्ममुक्तान्यधितिष्ठत्येक इति मन्त्रेण तमपश्यन्निति क्रीडया अनुषङ्गवशात् परदेवताप्रसादात्तदर्थलाभ इति प्रतिपादनान्निरुपपदं ब्रह्म साम्बशिव एव । अत एव 'अथातो ब्रह्मजिज्ञासा' इत्यत्र शिव एव ब्रह्मादिजनको जिज्ञास्यत्वेनाद्ये ब्रह्मसूत्रे प्रतिज्ञातः । तथा चायं सूत्रार्थः—अथ साधनसम्पत्त्यनन्तरम्, अतः अकारवाच्याद्विष्णोर्यत्परं ब्रह्म, तस्य जिज्ञासेति । तस्य च लक्षणमुत्तरसूत्रेण—जन्माद्यस्य यत इति । अस्य विष्णोः यतः जन्मादि तद्ब्रह्मेति वेदितव्यमिति । ततश्च तद्ब्रह्म शास्तृ अस्य योनित्वात् कारणत्वादित्यादि प्रामाणिका व्याचख्युः । अतश्च सर्वोत्तमो मुमुक्षुभिर्ध्येयः शिवः साम्ब इति युक्तं तद-

र्पणम्। तत्प्रीतिश्च पुरुषार्थहेतुरिति सर्वेष्टसिद्धिः। विस्तरस्तु अस्मत्कृतविश्वेश्वरविजयग्रन्थेऽनुसन्धेय इति संक्षेपः।

श्रीवाजपेयिना नीलकण्ठेन कृतयानया।
व्याख्यया सुखबोधिन्या विश्वेशः प्रीयतां मुदा॥

इति श्रीमदात्रेयान्वयरत्नाकराभ्युदितश्रीकलानिधिपदवाक्यप्रमाणपारावारपारीणस्य श्रीरामचन्द्राध्वरिवरसूरेः पौत्रेण सर्वतन्त्रस्वतन्त्रस्य श्रीवरदेश्वरयज्वशर्मणः पुत्रेण पाणिनिप्रदीपाद्यनेकप्रबन्धनिर्माणधुरीणस्य सुन्दरेश्वरयज्वशर्मणोऽनुजेन श्रीकामाक्षीगर्भाभ्युदितेन ज्ञानेन्द्रभगवत्पादपूज्यशिष्येण श्रीवेङ्कटेश्वरपादारविन्दपरिचर्यालब्धविद्यावैशद्येन श्रीनीलकण्ठवाजपेयिना विरचितायां सिद्धान्तकौमुदीव्याख्यावां सुखबोधिन्याख्यायां कृदन्तनिरूपणं नाम तृतीयः परिच्छेदः।

श्रीकृष्णार्पणमस्तु।

The Scribe of the original MS. of which the present MS. is a transcript, adds the following stanza and the date of copying.

Vol. IV ending in the Samāsāsrayavidhi

"अविरलकृतवर्णभ्रेषणं पुस्तकेऽस्मिन्
रचितमनवधानाल्लेखिनीदूषणं वा।
अनुचितमथवा यद्वक्रतो वर्णराजेः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥"

கர வுரு ஆடிமீ 27வ கிருஷ்ணபக்ஷம் திருதீயையும் ஸோமவாரமும் பூரட்டாதி நக்ஷத்திரத்து நாள் நீலகண்டவாஜபேயதீக்ஷிதருடைய ஸமாஸகிரந்தம் எழுதி நிறைந்தது. இது எழுதினது வெங்கடாசலம் ஸ்வஹஸ்த லிகிதம். ग्रन्थसंख्या. 3500.

Vol. VI ending in the Tiṅantakāṇḍa:

अविरलकृतवर्णभ्रेषणं etc.

ப்லவங்கவுரு ஆனிமீ 15வ புதன் கிழமை ப்ரதமையும் புனர்வஸு நக்ஷத்திரத்தின் நாள் திருந்தம் நீலகண்டவாஜபேயி தீக்ஷிதர் பண்ணின கிரந்தம் கோமல் கஸ்தூரி அய்யன் குமாரன் ஸ்வஹஸ்த லிகிதமாக எழுதி முடிந்தது.

369. 19. G. 28.

सिद्धान्तकौमुदीव्याख्या सुखबोधिनी—नीलकण्ठकृता

Palm-leaf. 101 Foll. $14\frac{3}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Good. Clear writing.

Begins in the Unādi and breaks off in the Svaraprakriyā.

उणादिसूत्रधातूनां तदुदाहरणेषु च।
अनुक्तार्थकशब्दानां व्याख्यानं क्रियतेऽधुना॥

उणादयो बहुलमिति सूत्रे उणादिपदस्य प्रविष्टत्वात्तज्जिज्ञासायामवश्यं वक्तव्यत्वेन तं निरूपयितुं शिष्यावधानाय प्रतिजानीते—अथेति। उणादिसूत्रारम्भे मङ्गलं कर्तुमुचितमित्यथशब्दप्रयोग इति भावः। उण् आदिर्येषां प्रत्ययानामिति तदुणसंविज्ञानो बहुव्रीहिः॥ कृ॥ डुकृञ्, कृ हिंसायामिति चेति केचित्। अनभिधानादर्थाननुगमाच्च नायमित्यन्ये। वा गतिगन्धनयोः, पा पाने, पा रक्षणे, जि जये, जि अभिभवे, इत्युज्ज्वलदत्तः; डुमिञ् प्रक्षेपणे, स्वाद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ, एभ्य उण्प्रत्ययः स्यात्। करोतेरेवेति ध्वनयति—करोतीत्यादि। कारुरिति सिद्धम्।

End:

ननु प्रतिपदोक्तत्वात् यदादिभिः साहचर्याच्च निपातस्यैव यच्छब्दस्य ग्रहणं स्यादिति चेत्, सत्यम्;

एतदेव ज्ञापयति-अस्मिन्नेव प्रकरणे नेदमुभयं व्यवस्थापकमिति। तेन यावद्यथाभ्यामित्यत्र यत्तदेतेभ्यः परिमाणे वतुबिति व्युत्पादितस्यापि लाक्षणिकस्यानिपातस्यापि ग्रहणं भवति। यावत्स्तोतृभ्योऽरदो गृणाना इति। अरद इति अट्स्वरेणाद्युदात्तः। युक्तग्रहणं किम्? अन्वाचिते मा भूत्। यावत् क च ते मनो दक्षं दधस उत्तरम्। इह यत्रेत्यस्योत्तरमित्यनेन साक्षात्संबन्धः। दध धारणे। अनुदात्तेत् ॥ नह प्र ॥ नहशब्दो निपातसमाहारो निषेधे वर्तते। नह भोक्ष्यस इति। अदुपदेशात्परत्वात् से इत्यस्य निघातः। स्यस्तु प्रत्ययस्वरेण।

370. 21. Q. 15.

सिद्धान्तकौमुदीव्याख्या— मितवादिनी

Palm-leaf. 120 Foll. $7\frac{1}{4}\times1\frac{1}{4}$ inches. 8 lines in page. Malayālam script. Old. Good. Good writing.

This is a gloss on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. As indicated by the title Mitavādinī, the commentary is very brief. The author says that he writes commentary on such portions as left unexplained in Prauḍhamanoramā. The author's name is not mentioned in the work. He worships the God Pallikoṇḍa enshrined at Nallore.

Breaks off in the beginning of the S'abdādhikāra.

Beginning :

नल्लूरुस्वामिनं नत्वा पल्लिकोण्डाख्यमच्युतम्।
सिद्धान्तकौमुदीव्याख्यां करोमि मितवादिनीम् ॥
सिद्धान्तकौमुदीव्याख्या प्रसिद्धास्ति मनोरमा।
तत्र यद्व्याकृतं मूलं तन्नात्र प्रतिपाद्यते ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना। त्रयोऽवयवा यस्य त्रयम्। संख्याया अवयवे तयबिति अवयववृत्तेः संख्यावाचिनस्त्रिशब्दादवयविन्यर्थे तयप्। अवयवी त्वत्र समुदाय एव। द्वित्रिभ्यामिति तयपोऽयच्। मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः। अत्र मनेरुच्चेत्युणादिसूत्रेण मनेरत उकारः, मनेः पर इन्प्रत्ययश्च। तेषां पाणिनिकात्यायनपतञ्जलीनां त्रयं मुनित्रयम्। अत्र समुदायस्यातिरिक्तत्वेऽपि तद्घटकत्वेन मुनीनां प्रत्यभिज्ञानात् मुनित्रयनमस्कारस्य दुरितनिवर्तकत्वमस्त्येव। ननु स्वयंभुवे नमस्कृत्येतिवत् मुनित्रयमित्यत्रापि नमःस्वस्तीत्यादिना चतुर्थी स्यात्। मैवम्, उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वचनात् नमस्कारोति देवानितिवत् द्वितीयाया एव युक्तत्वात्।

End :

अत्राहुः—प्रयोगनियमार्थमिदम्। पर एव प्रत्ययो न केवल इति। अन्यथा प्रत्ययार्थमात्रविवक्षायां किमस्य द्वयसमित्याद्यपि प्रयुज्येत। यदि तु प्रकृतिविशेषोद्देशेनैव प्रत्ययस्य विधानात् केवलो न प्रयोक्ष्यत इति ब्रूषे, तथापि प्रकृत्यर्थमात्रविवक्षायां केवलं प्रकृतिः प्रयोज्येतैव। अतः प्रत्ययः परो भवत्येवेति नियमार्थमिदम्। अपदत्वनिष्पत्तेश्चायं नियमः। तदेतदुच्यते न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति। अपदं न प्रयुञ्जीतेति वा। अपरिनिष्ठितं न प्रयुञ्जीतेति तस्यार्थ इति।

371. 19. G. 26.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 54 Foll. $16\frac{3}{4}\times1\frac{1}{8}$ inches.

7 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

A commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita by Kṛṣṇaśāstrin of Saṅkepalli family, pupil of Vināyakaguru. The commentary is called Sudhākara. The author herein criticizes the Śabdenduśekhara of Nāgeśa.

Breaks off in the स्वादिसन्धि.

Beginning:

श्रीमौनिविनायकगुरुचरणारविन्दाभ्यां नमः ।

वन्दे वाञ्छितलाभाय वृषवीश्वरवाहनौ ।
नगेशकेशतनयाजानी नागेशवन्दितौ ॥ १ ॥
यो दृष्ट्वा परतन्त्रजातमखिलं ह्यल्पप्रसादं मुनिः
सर्वेषामुपकारकं सुकृतिनां तन्त्रं चिकीर्षुर्दृढम् ।
भक्त्याविष्कृतचन्द्रशेखरकरोद्भासीडयढक्काश्रुत-
श्रौतज्ञापितमूलकं तदकरोत्तस्मै नमस्तीर्थिने ॥ २ ॥
सूत्रानुक्तैर्दुरुक्तैः कबलितविषयान् सर्वतो भावयित्वा
चर्चामूलाविलोलप्रकटितसुवचःपङ्कजैराप्यतेव ।
तीर्थं दाक्षीसुतोत्थं जनहृदयमलध्वंसि येनात्तवाचा
तस्मिन्गाढावसक्ता मम वसतु नतिर्मेवमेशेऽखिलज्ञे?॥
दाक्षीपुत्रप्रणीतान् बहुतरविषयान् साध्वसाधुप्रतर्कान्
योगान् दोषप्रचारस्थगितनिजहृदो वाक्यकृद्यांश्चकार ।
तान् सर्वान् गूढभावान्निजमतिमणिनोद्दीपयन् ग्रस्तदोषान्
कुर्वन्नज्ञानबन्धं दलयति नितरां योऽहिराट् तं नमामि ॥
भक्ताज्ञानतमोभेत्ता भाव्यः पाण्डित्यभास्करः ।
यत्कृपालेशमात्रेण तस्यै वाण्यै नमोऽस्तु मे ॥ ५ ॥
यद्यपीयं दुरूहोक्तिर्दीक्षितार्यकृतिः स्वतः ।
तथापि स्यान्मौनिपादसेवनात्सूहसूक्तिका ॥ ६ ॥
यत्पादाम्बुजसेवाप्तसन्मतिः सूरिसम्मतः ।
तान् श्रीविनायकगुरून् वन्दे वागीश्वरोपमान् ॥७॥
संकेपल्यन्वयाम्बोधिविधुश्रीकृष्णशास्त्रिणा ।
सिद्धान्तकौमुदीमोदः क्रियतेऽयं सुधाकरः ॥ ८ ॥

विघ्नविघातायाचरितस्य मङ्गलस्य शिष्टाचारपरंपरागततां सूचयन् शिष्यशिक्षायै तदुपनिबध्नाति—मुनित्रयमिति । मुनीनां त्रयं मुनित्रयमिति विग्रहे षष्ठ्यन्तस्य प्रधानसमुदायान्वयेन सामर्थ्यसत्त्वात् षष्ठीति समासः । मुनिसंबन्धिनं त्र्यवयवकं समुदायमिति बोधादन्येषां साक्षात्तत्संबन्धिनमुपादायाश्रयत्वासंभवेन न तत्संबन्धिनां घटादीनां त्रयाणां समुदायस्य ग्रहणशङ्केति भावः ।

End:

स्वार्थगतसंख्याभिधायित्वरूपः संबन्धः षष्ठ्यर्थः । एतत्तदर्थगतसंख्याभिधायी यः सुस्तस्येत्यर्थः । एतत्तदोरनन्तर इत्यर्थस्तु न पदस्वरसलभ्यः, अध्याहारप्रयुक्तगौरवप्रसङ्गात् । एवं हि पञ्चमीमेवोच्चारयेत् । तेन परमैष ददाति परमस ददातीति सिद्धम् । अर्थद्वारकसंबन्धाश्रयणे चानञ्समास इति लिङ्गम् । न चास्योपसर्जनत्वात्तत्रै . . . . . .।

372. 19. G. 31.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 180 Foll. 17 × 1 inches. 7 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

The last 4 leaves are broken.

Begins in the Course of Śabdādhikāra and breaks off in the Samāsāśrayavidhi.

Beginning:

. . . . . येणापादादाविल्यस्याप्यसंबन्ध इत्याशयात् । अत्राग्ने इत्यस्याविद्यमानवद्भावप्रतिषेधादामन्त्रितस्य चेत्याद्युदात्तनिघातसिद्धिः फलं बोध्यम् । विभा-

षितं वक्ष्यामिति। अन्यथा नामन्त्रिते इति पूर्वसूत्रस्य चास्य च विषयविभागो न स्यादिति तद्भावः। विशेषवचन इत्यस्यार्थमाह—विशेषणे इति।

End :

किञ्किन्धेति। किं किं दधातीति विग्रहे आतोऽनुपसर्ग इति कः। पूर्वमकारस्य लोपः। उत्तरवर्णस्य सुट् षत्वं च निपात्यते। . . . . समासे परशब्दस्य पूर्वनिपाते च परःशतानीत्यप्युदाहरणम्। तद्बृहतोः। गणसूत्रमिदम्। एवं त्रायस्वेत्यपि।

373. 19. G. 32.

सिद्धान्तकौमुदीव्याख्या सुधाकरः—कृष्णशास्त्रिकृतः

Palm-leaf. 135 Foll. 17 × $\frac{7}{8}$ inches. 4 lines in a page. Telugu script. Old. Injured. Legible writing.

Wooden boards are added to both sides.

Contains the Vaidika and Svara prakaraṇas.

Beginning :

अथ वेदमात्रगोचरप्रयोगप्रक्रियामष्टाध्यायीक्रमेणारभते। यद्यपि स्वरप्रक्रियाया लोकवेदोभयविषयकत्वादितः पूर्वमेव निरूपणमुचितं, तथापि वैदिकप्रयोगवत् लौकिकप्रयोगेषु स्वरविशेषादर्शनेन तस्या अपि वैदिकप्रक्रियासादृश्यं बोधयितुमित उत्तरं तन्निरूपितमिति बोध्यम्। यद्यपि षष्ठीयुक्त इत्यत्र वेति योगविभागात्तत्र तत्र बहुलग्रहणे छन्दसि दृष्टानुविधानमात्रसत्त्वाच्च तत्सकलं सिद्धम्।

End :

तेनाग्राविष्णू इत्यादाववग्रहेऽप्यनु . . . पदविभागे . . न . . सादायुः। अग्निमीले इत्यादौ तिङतिङ इति निघातश्च सिध्यति। संहिताधिकारस्थं तु यणादिकं स्वरितप्रचयादिकं च नेत्यवसेयम्। इत्थमन्यत्रापि मुनित्रयवचांसि तत्प्रातिशाख्यानि तद्व्याख्यातॄगिरो निरुक्तादिग्रन्थांश्च पर्यालोच्य निष्कर्ष उन्नेयः। तदाह—यथाशास्त्रमिति सर्वेष्टसिद्धिः।

सुधाकरे सुधीस्वान्तकुमुदोल्लासकारिणि।
परार्धं पूरितं तेन प्रीयतां सशिवः शिवः॥

Colophon :

इति श्रीप्रतोदिवैयाकरणकण्ठीरवसंकेपल्ल्युपनामककृष्णशास्त्रिविरचितायां सुधाकराख्यायां सिद्धान्तकौमुदीव्याख्यायामुत्तरार्धं परिपूर्णतामगमत्॥

374. 10. D. 21.

सिद्धान्तकौमुदीटिप्पणम्—पङ्क्तिप्रकाशः

Paper. 15 foll. 11$\frac{1}{2}$ × 4$\frac{1}{4}$. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This also is a brief commentary on the Siddhāntakaumudī of Bhaṭṭojidīkṣita. The names of the commentary and its author are not found in the portion of the commentary contained in this MS. But in the margins of leaves the words Paṅktiprakāśa and Tārakānanda are written. From this it may be presumed that the commentary is called Paṅktiprakāśa and its author was Tārakānanda.

Breaks off in the Visargasandhiprakaraṇa.

Beginning :

परान्नित्यं बलवत्। यथा तुदतीति। अत्र तुदधातोर्लटि तिबादेशे च पुगन्तलघूपधस्य चेत्यनेन गुणः प्राप्तः। तुदादिभ्यः श इत्यनेन शप्रत्ययोऽपि प्राप्तः। विप्रतिषेधे परं कार्यमित्यनेन परत्वाद्गुणादेशः प्राप्तः।

नित्यस्य च परापेक्षया बलवत्त्वेन परमपि गुणादेशं बाधित्वा नित्यत्वाच्छ एव भवति। अन्यथा तोदतीत्यापत्तेः। नित्यस्य बलवत्त्वे बीजं च अक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावस्यैवाभावकल्पनं न्याय्यमिति। पूर्वापेक्षया परस्य बलवत्त्वे बीजं तु विप्रतिषेधे परं कार्यमिति स्पष्टतरम्। अत एव तत्र तत्रादरेण नोदाहार्यते।

End:

अतः कृकमीति सूत्रस्थकंसग्रहणज्ञापितप्रकृतिप्रत्ययविभागशून्याव्युत्पत्तिपक्षे प्रत्ययभिन्नरूपस्य विसर्गस्याक्षतत्वात् पर्युदासासंभवेन षत्वप्राप्तौ संपुंकानामिति वार्तिके पुंग्रहणम्। तथा सति वार्तिकस्थपुंग्रहणेनैव व्युत्पत्तिपक्षप्राप्त×क×पयोरव्युत्पत्तिपक्षप्राप्तषत्वस्य च बाधेन सकारे पुंस्कोकिल इत्यादिप्रयोगाणां सिद्धिर्भवति, नान्यथेत्याशयं मनसि निधायाह—व्युत्पत्तीत्यादिना। एतेन प्रत्ययभिन्नस्येति विसर्गस्य सामानाधिकरण्यान्वये प्रत्ययसंबन्धिसकारसत्त्वेन पक्षद्वयेऽपि प्रत्ययभिन्नरूपविसर्गस्याक्षतत्वेन षत्वप्राप्ताविति वाच्यत्वापत्त्या ×क×पयोः प्राप्तावित्यसंगतमित्यपास्तम्। वैयधिकरण्येन व्याचक्षाणानां प्राचां मतेनेदमिति मनोरमाग्रन्थस्तु पातेर्डुम्सुनिति व्युत्पत्त्यनुसारेण नेयः। एतद्व्युत्पत्त्या टिलोपार्थडित्वसामर्थ्याद्याश्रयणं पूर्वोक्तव्युत्पत्त्या तु नेति विवेक्तव्यम्। षत्वप्राप्तावित्यत्र षत्वस्यापत्त्येत्यर्थो बोध्यः। इदमप्यनुनासिकपक्षे बोध्यम्। अनुस्वारपक्षे तद्व्यवधानाभावात् सर्वथापि षत्वाप्राप्त्या कुप्वोरित्यस्यैव प्रवृत्तेरित्यलं बहुना।

375. 36. D. 8.

कौमुदीसारसंग्रहः—वेदान्ताचार्यकृतः

Paper. 98 foll. $8\frac{1}{4} \times 7\frac{1}{4}$. 14 lines in a page. Grantha script. New. Good. Good writing.

A summary of the Siddhāntakaumudī of Bhaṭṭojidīkṣita by one Vedāntācārya.

Contains the following Paricchedas:

(१) अक्षरस्वरूपनिरूपणम् (२) सन्धिनिरूपणम् (३) शब्दनिरूपणम् (४) वृत्तिनिरूपणम् (५) कृदन्तनिरूपणम्। (incomplete.)

Beginning:

अज्ञनाद्रि जनानन्दसंजने रञ्जयच्चिरम्।
चिन्मयं तन्मनोवर्ति तन्महो मन्महेतराम्॥
विधाय विष्णोर्विनतिं वेदान्तार्यविपश्चिता।
क्रियते बालबोधाय कौमुदीसारसंग्रहः॥

इह खलु निखिलपुराषार्थसाधनसंपिपादयिषाकबलितमानसानां जनानां शास्त्रज्ञानमन्तरा सिषाधयिषितफलसिद्ध्यभावात्, तत्र च—

धर्मार्थकाममोक्षाणामवश्यं ग्राह्यताजुषाम्।
चतुर्णां पुरुषार्थानां सिद्धिं संपादयेन्नरः॥

इति विवेकचिन्तामणिदर्शितन्यायेन चतुर्विधपुरुषार्थसिद्धिसंपादनस्य तुल्यत्वेऽपि, तत्रैव—

ऐहलौकिकमादौ स्यादथ स्यात् पारलौकिकम्।
शर्म सर्वप्रयत्नेन तस्मात्तत्साधयेद्बुधः॥

इत्युक्तप्रकारेण पूर्वमैहिकफलसंपादनस्य कर्तव्यत्वात्

अर्थशास्त्रपरिज्ञानादैहलौकिकभोगभाक्।
आमुष्मिकानुभोगी स्यान्मोक्षशास्त्रपरीक्षणात्॥

इत्यैहिकफलभोगस्यार्थशास्त्रज्ञानसाध्यत्वात् धर्मकामयोरप्यर्थसाध्यत्वेन तच्छास्त्रयोरप्यर्थशास्त्रपुरःसरत्वात् सर्वस्यार्थशास्त्रस्य पदज्ञानपूर्वकत्वात् श्लोके वाक्ये वा मिलिततया प्रयुक्तस्य तस्य पदस्य च संधिज्ञानमन्तराविभाज्यत्वात् * * * * *

* * * * कौमुदीसार-संग्रहनामकस्तादृशग्रन्थेः प्रतिपाद्यते । तत्र च सर्वस्याप्यक्षरज्ञानपूर्वकत्वादादौ तावदक्षरस्वरूपं निरूप्यते ।

Colophon :

इति कौमुदीसारसंग्रहे अक्षरस्वरूपनिरूपणं नाम प्रथमः परिच्छेदः ॥

End :

भूतकालेऽप्यनद्यतनत्वे पारोक्ष्ये च गम्ये लिट्प्रयुज्यते । भूतकाले . . . . . त्वमात्रे गम्ये लङ् । केवलभूतकाले लुङिति विवेकः । अनद्यतनत्वं तु अतीताया रात्रेः पश्चार्धेन आगामिन्या रात्रेः पूर्वार्धेन च . . . .

376. 22. G. 23.

उणादिसूत्राणि

Palm-leaf. 5 foll. $18\frac{3}{4} \times 1\frac{3}{8}$ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

As regards the nāmans or nouns in Sanskrit there are two different views among the grammarians. S'ākaṭāyana holds that all nouns have their derivations from roots, while Pāṇini opines that they are not derived, but have been used in the same form. The present work represents the former view and formulates rules of derivation. Though Pāṇini is not in favour of this view he seems not opposed to it as he has accorded his sanction to it in rule 3-3-1. As for the authorship of the work, Nāges'a on the traditional ground holds that these sūtras were not written by Pāṇini but were gleaned from certain ancient works by S'ākaṭāyana and others and given the present shape by certain responsible author so that the work may be considered as one of the supplements to the Aṣṭādhyāyī. Vimalasarasvatī, the author of Rūpamālā and Durgasiṁha, the author of Uṇādisūtravṛtti attribute the authorship to Vararuci *alias* Kātyāyana. Goldstücker and other modern scholars follow this view. S'vetavanavāsin, another commentator on Uṇādisūtras holds that these sūtras were written by Kātyāyana and others.

The work is divided into five pādas or chapters and hence is called Pañcapādī in order to distinguish it from Das'apādī, another recension of the work containing ten pādas. S'rīnivāsadīkṣita in his Svarasiddhāntacandrikā states that sixteen sūtras of the work deal with svaras or accents.

Complete in five pādas.

Beginning :

कृवापाजिमिस्वदिसाध्यशूभ्य उण् । आतो युच् । छन्दसीणः । दृसनिजनिचरिचटिभ्यो ञुण् । किंजरयोः श्रिणः । त्रो रश्च लः । कृके वचः कश्च । भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः । अणश्च । धान्ये नित् ।

End :

व्याङि घ्रातेश्च जातौ । हन्तेरच् घुर च । क्षमेरुपधालोपश्च । तरतेर्ड्डिः । ग्रहेरनिः । प्रथेरमच् । चरेश्च । मङ्गेरलच् ।

Colophon :

इत्युणादिषु पञ्चमः पादः ।

377. 22. G. 53.

उणादिसूत्राणि

Palm-leaf. 6 Foll. $17 \times 1\frac{3}{8}$ inches. 6 lines in a page. Telugu script. Old.

Injured. Good writing.

Complete in 5 pādas.

378. 23. I. 2.

उणादिसूत्राणि

Palm-leaf. 2 Foll. $16\frac{1}{8} \times 1\frac{1}{8}$ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

Contains the 1st pāda only.

379. 28. J. 47.

उणादिसूत्राणि

Palm-leaf. 9 Foll. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete in 5 pādas.

380. 39. I. 4(*a*)

उणादिसूत्राणि—श्वेतवनवासिकृतवृत्ति-सहितानि

Paper. 189 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Legible writing.

Uṇādisūtras described in previous numbers are followed by a commentary written by S'vetavanavāsin son of Āryabhaṭṭa of Gārgyagōtra. The author is said to have lived in a village near Indugrāma. His forefathers are said to have lived in a village called Utterameru.

Complete in 5 pādas.

Beginning :

प्रणम्य भाष्यकाराय तन्मतस्पर्शशोधिताम् ।
व्याख्यामुणादिसूत्रस्य करिष्यामि यथामति ॥
कृपावाजिमिस्वदिसाध्यशूभ्य उण् ॥

डुकृञ् करणे, पा पाने, लुग्विकरणालुग्विकरणयोर-लुग्विकरणस्यैवेति परिभाषया पिबतेरेव ग्रहणम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणमिति कृपा इत्यस्याग्रहणम् । वा गतिगन्धनयोः, जि जये, जि अभिभवे, उभयोरपि ग्रहणम् । डुमिञ् प्रक्षेपणे, स्वद आस्वादने, राध साध संसिद्धौ, अशू व्याप्तौ, एतेभ्यो धातुभ्य उण् प्रत्ययो भवति । णकारो वृद्ध्यर्थः युगर्थश्च । उणादिप्रत्ययान्ताः संज्ञाशब्दाः । तेन तेषामत्र स्वरूपसंवेदनस्वरवर्णानुपूर्वीमात्रफलमन्वाख्यानम् । अत एवाचार्यः पाणिनिः प्रतिपदविधिमनादृत्य लक्षणमेतत्सर्वं संग्राह्यं पठति उणादयो बहुलमिति । बहुलमुणादयो द्रष्टव्याः । येयं शाकटायनादिभिः पञ्चपादी रचिता तत्राप्येते न परिसमाप्ताः, संज्ञाया नानारूपत्वात् । तेनात्र ये अपठिताश्च प्रत्ययादिसंज्ञामपि ते बहुलं लभन्ते ।

End :

मङ्गेरलच् ॥ मगिर्गत्यर्थः । नुम् । तस्मान्मङ्गेरलच्प्रत्ययः । मङ्गतीति मङ्गलं कल्याणम् । . . . . . सूत्रेणैव मङ्गलमिति रूपस्य गम्यमानत्वात् शास्त्रपरिसमाप्तिसमये मङ्गल . . . म् ।

Colophon :

इतीन्दुग्रामसमीपवर्त्यग्रहारवास्तव्येन उत्तरमेर्वभिजनेन धर्मशास्त्रपारगार्यभट्टसूनुना गार्ग्येण श्वेतवनवासिनाम्ना विरचितायामुणादिवृत्तौ पञ्चमः पादः । समाप्तेयं पञ्चपादी ।

The last 3 leaves contain 14 sūtras explaining the origin of the Sanskrit alphabets अ, इ etc. and a gloss also is

written on these sūtras. It is not clear whether the gloss is Svetavanavāsin's or not.

The MS. is said to have been copied from a paper MS. belonging to the Palace Library, Trivandrum.

381. 39. I. 4(*b*)

उणादिसूत्राणि—श्वेतवनवासिकृतवृत्ति-सहितानि

Paper. 167 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Complete in 5 pādas.

The MS. was copied from a paper MS. belonging to the Madras Govt. Oriental MSS. Library.

382. 38. I. 6.

उणादिसूत्राणि—दुर्गसिंहकृतवृत्तिसहितानि

Paper. 119 Foll. 8 × 6 inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

The Sūtras are slightly different from those of Pañcapādī described above. The work is divided into 6 pādas.

Complete in 6 padas.

Beginning :

नमस्कृत्य गिरं भूरिशब्दसंतानकारणम् ।
उणादयोऽभिधास्यन्ते बालव्युत्पत्तिहेतवे ॥
कृवापाजिमिस्वदिसाध्यशूदृसनिजनिचरिचटिभ्य उण् ॥

एभ्यो धातुभ्यः (उण् प्रत्य) यो भवति । उणादयोऽपि भूतेऽपि । भूते काले । अपिशब्दाद्वर्तमाने भविष्यति च । ताभ्यामन्यत्रोणादयः । ताभ्यां संप्रदानापादानाभ्यामन्यस्मिन् कारके कर्तरि कर्मादौ यथाभिधानं प्रत्ययः पर इति परिभाषायामुणादयो भवन्ति । णकार युगाद्यर्थः । डुकृञ् करणे । करोतीति कारुः शिल्पी । वा गतिगन्धनयोः । वातीति वायुः समीरः । धेट् पापाने । पिबतीति पायुः अपानम् । जि जये । जयतीति जायुः औषधम् । डुमिञ् प्रक्षेपणे । मिनोतीति मायुः पित्तम् । गोपूर्वस्यान्यार्थं गां वाचं मिनोतीति गोमायुः सृगालः । स्वद स्वादने । स्वदत्ते स्वादु मधुरम् । राध साध संसिद्धौ । साध्यतीति साधुः कुशलः । अशूङ् व्याप्तौ । अश्नुते इत्याशुः शीघ्रम् । दृ विदारणे । दृणातीति दारुः काष्ठम् । सनु दाने । सनोतीति सानुः प्रस्थं शृङ्गम्, पर्वतैकदेशः । जन जनने । जायत इति जानुः अष्ठीवान् । चरिर्गत्यर्थः । चरतीति चारुः शोभनम् । चट स्फुट भेदे । चटतीति चाटुः पटुः वादी ।

End :

सावमेरिन् दीर्घश्च ॥ सावुपपदे अमेर्धातोरिन् प्रत्ययो भवति दीर्घश्च । अमु गतौ सुपूर्वः । शोभनममति स्वामी प्रभुः । इन्हनपूषेत्यादिना सौ दीर्घः ।

शब्दानामानन्त्याद्व्युत्पत्तिर्नैव दृश्यते येषाम् ।
तेषां विज्ञैः कार्या मान्यैर्धातुतः प्रत्यया युक्ताः ॥

Colophon :

दौर्गसिंह्यामुणादिवृत्तौ षष्ठः पादः समाप्तः ॥

Date of copying—Kālayukti year.

383. 38. H. 7.

उणादिसूत्राणि—माणिक्यदेवकृतवृत्तिसहितानि

Paper. 168 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Legible writing.

Uṇādisūtras in different recension are commented by Māṇikyadeva, apparently a Jain author. The MS. does not give the author's name. Yet from the MS. described in No. 263 of the Des. Cat. of Sanskrit MSS. in the Bhandarkar Oriental Institute, Poona. Vol. II, it is known that Māṇikyadeva was the author of the commentery.

For further particulars see the introduction of the printed edition in the Sarasvati Bhavana Texts Series No. 81.

Complete in 10 pādas.

Beginning :

स्वयंभुवे नमस्कृत्य प्रणिपत्य सरस्वतीम् ।
वक्ष्ये वृत्तिमुणादीनां यथाबुद्धि यथाक्रमम् ॥
अर्तिसृधृधम्यश्यवतरिभ्यो निः ॥

इहेमेऽधिकाराः संबध्यन्ते । प्रत्ययः, परश्च, आद्युदात्तश्च, अनुदात्तौ सुप्पितौ, धातोः, तत्रोपपदं सप्तमीस्थम्, कृदतिङ्, वासरूपोऽस्त्रियाम्, वर्तमाने लट्, पुवः संज्ञायाम्, उणादयो बहुलम्, भूतेऽपि दृश्यन्ते, भविष्यति गम्यादयः, कर्तरि कृत्, दाशगोघ्नौ संप्रदाने, ताभ्यामन्यत्रोणादयः, कालाः संबध्यन्ते । एते च स्वरितलिङ्गाः सङ्क्रियमाणाः संग्राह्यमाणाः स्वविषयोद्भावनानुष्ठानसमर्थाः आ उणादिपरिसमाप्तेः दशपाद्यां सर्वत्रैवानुवर्तन्ते । अत्र यावतामधिकाराणां प्रयोजनं तत्र तावन्त एवाभिसंबध्यन्ते । एतेष्वनुवर्तमानेषु एभ्यो धातुभ्यो वर्तमानकाले यथासंभवं कर्त्रादिषु कारकेषु संज्ञाविषयेषु परः निप्रत्ययो भवति । 'ऋगतौ' भौवादिकः, ऋ सृ गतौ जुहोत्यादिः । ऋच्छति इयर्ति अर्यते वा अरणिः ।

End :

स्थः स्ताम्बजबकौ च ॥ २२ ॥

स्थाधातोः अम्बच् अबक इत्येतौ प्रत्ययौ भवतः । स्त् इत्ययं चादेशः धातोः । ष्ठा गतिनिवृत्तौ । तिष्ठतीति स्तम्बः समवायः । स्तबकः पुष्पापीडः कर्ता ।

Colophon :

इत्युणादिवृत्तौ प्रकीर्णको नाम दशमः पादः ।

384. 21. A. 67.

गणपाठः—पाणिनिकृतः

Palm-leaf. 22 Foll. $16\frac{1}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

An enumeration of words undergoing common operations of the rules of Pāṇini. In certain sūtras Pāṇini mentioned only one word by adding the word आदि which means etcetera. The words meant to be included in the lists are specifically mentioned in this work. The author is believed to be Pānini as per stanza :

"अष्टकं गणपाठश्च धातुपाठस्तथैव च ।
लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात् ॥"

Complete in 8 adhyāyas.

Beginning :

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

सर्वादीनि सर्वनामानि ॥ सर्व । विश्व । उभ । उभय । डतर । डतम । अन्य । अन्यतर । इतर । त्वत् । त्व । नेम । सम । सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् । तद् । यद् । एतद् । इदम् । अदस् । एक । द्वि । युष्मद् । अस्मद् । भवत् । किम् । इति सर्वादयः ॥

End :

आचार्यादणत्वं च । आकृतिगणोऽयम् । पाठान्तरम् । क्षुभ्न तृप्तु नृनमन नरनगर नन्दन यङ्नृती गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । इरिकादीनि वनोत्तरपदानि संज्ञायाम् । इरिका तिमिर समीर कुबेर कर्मार ॥

Colophon :

इति गणपाठे अष्टमोऽध्यायः । समाप्तश्च गणपाठः ।

385. 20. O. 13.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 25 Foll. 12¾ × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A list of verbal roots as meant by Pāṇini in his rules of Aṣṭādhyāyī. The roots are divided into 10 groups, namely भ्वादि, अदादि, जुहोत्यादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्रयादि and चुरादि. This work also is attributed to Pāṇini. The Commentators on Pāṇini opine that the meanings of roots were not written by Pāṇini; but one Bhīmasena added them in the Dhātupātha.

Complete up to the end of Curādi.

Beginning :

भू सत्तायाम् । एध वृद्धौ । स्पर्ध संघर्षे । गाधृ प्रतिष्ठालिप्सयोग्रन्थे च । बाधृ विलोडने । नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु । दध धारणे । स्कुदि आप्रवणे । श्विदि श्वैत्ये । वदि अभिवादनस्तुत्योः । भदि कल्याणे ।

End :

अन्ये तु दशगणपाठो बहुलं भवति । तेनेहापठिता अपि सौत्रा लौकिका वैदिकाश्च द्रष्टव्या इत्याहुः । इतरे तु नवगणीपठितेभ्योऽपि क्वचित्स्वार्थे णिच्, बहुलग्रहणात् । तेन रामो राज्यमचीकरदित्यादिसिद्धिरित्याहुः । चुरादिभ्य एव बहुलं णिजित्यन्ये । अङ्गवाचि प्रातिपदिकं निरसने णिङं लभते । श्वेताश्वाश्वतरगालोडिताह्वरकाणां चतुर्णां धात्वर्थे णिङ् अश्वतरतकलोपश्च द्रष्टव्यः । णिजेवेत्येके । पुच्छादिषु धात्वर्थ इत्येव सिद्धम् ।

386. 22. G. 23.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 13 Foll. 18⅜ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete up to the end of Curādi.

387. 22. P. 11.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 21 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete up to the end of Curādi.

The scribe adds :

साधारणाख्यके वर्षे भानौ कर्कटराशिगे ।
कृष्णपक्षे चतुर्दश्यां वारे भौमसमाह्वये ॥
श्रीवत्सगोत्रजातेन वेंकटेशेन धीमता ।
लिखिता भीमसेनेन कृता धात्वर्थमालिका ॥

388. 23. I. 2.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 15 Foll. 16⅛ × 1⅛ inches. 9 lines in a page. Telugu script. Old. Injured. Legible writing.

Complete up to the end of Curādi.

389. 25. K. 22.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 17 Foll. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete up to the end of Çurādi.

The scribe adds:

सौम्यनामसंवत्सरं चापमासं कृष्णपक्षं चतुर्थी सौम्यवासरे लिखितम् ।

Names of the scribes: Seṣayyan and Ramasvamiayyan.

The fly-leaf at the end contain the stanza:

"कस्त्वं शूली प्रविश भिषजां वेश्म + पातु मां पार्वतीशः ।"

390. 28. A. 5.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 23 Foll. 13 × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Complete up to the end of Curādi.

The following colophon is read:

इति भीमसेनविरचितो धातुपाठः समाप्तः ।

Three fly-leaves are added at the beginning and they contain the following:

Fol. 1:

"धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥"

Fol. 2:

"वाणीममरवाणीं मधुरसवेणीं तनोतु कल्याणीम् ।"

2 *b*:

"वल्लवीवल्लव संलप रे मोहनदेव
उल्लसति मोहलतिकामेऽतीव— वल्लवी
सुललितयान सुमशरभान
सुकुमारतरगान शोभनैकतान— ,,
समधिकमोहे सरसि विगाहे
कथमिदमिह सेवे कामकेलिमोहे— ,, (२)
विधिलिपिरिति विदितमिहारे
सा यदि तव भाति साधु मानमेति— ,, (३)
कमलानुकूल करुणालवाल
कमनीयमृदुचेल कान्तनीलनील— ,, (४)
मधुकृतचारे मलयसमीरे
मनसि मम रागजविचारे महति मुरारे— ,, (५)
विलसति सोमे विरहिणि भीमे
विकसति हृदि कामे विहर मुरारे— ,, (६)
परिहर रोषं परिचिनु तोषं
नतजनपरिपोषं नौमि चारुवेषं— ,, (७)
दवनमतापादवन यदुभूप
देववरदत्तरूप तेऽहमनुरूप— ,, (८)
कान्तचलतोरि रामण्य सकल गोलंहरिं कान्त
वरवल्लवीजार गोपकिशोरारे
अजभजिताजसुन्दर छलतो (९)
न हि विरहं सहे प्रियसु तापिञ्छा-
भलभलावण्यधे दयां छलतो— (१०)
अयि नन्दनजानन्त बलिदनुजारे
सरसरतीशमोहन छलतो— (११)
मयि ते मनो न हि तावकीया हारे
वरदत्तदानवसंनुत छलतो— ,, (१२)

391. 28. A. 6.

धातुपाठः

Palm-leaf. 13 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches.

7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete up to the end of Curādi.

Colophon :

धातुपाठः समाप्तः ।

The following stanza is added after the colophon :

"भूवादौ शबदादिकेषु लुगपि
श्लुः स्याज्जुहोत्यादिषु
श्यन् दैवादिकधातुषु श्नुरपि च
स्वादौ तुदादौ च शः ।
रुध्यादौ श्नमथो तनादिषु
भवेदुप्रत्ययः क्रयादिषु
श्ना स्यात् स्वार्थिकणिच्चु रादिषु
पुनस्तत्रापि शब्जायते ॥"

Two extra leaves are added at the end. The first leaf contains some conjugational forms of the roots भू and एध्. The second leaf reads.

"श्रीभक्ताख्यपुरीनिवासमहितः कालीयविद्वेषिणः
सद्मन्येव तदीयनूतनशिलागारप्रतिष्ठासु च ।
तद्भक्तैः . . . प्रधानकलशं चेलाञ्चितं चार्पितं
यूयं तद्ग्रहणेच्छवो मयि कृपाहीनं ब्रुवन्तु द्विजाः ॥
श्रीरा . . . . .
लीलासु षोडशसहस्रनरेन्द्रकन्या-
चित्तापहारविधमूर्तिमधादुपेन्द्रः ।
सोऽयं हि साधु भवदीयमनःसु वक्तुं
नाद्यापि चाक्रमत किंतु मदीयलाभे ॥
पूर्वं कोयंपुर्यामन्विजदवनिनिर्जराग्रेसरो यः
सम्यग्ज्ञातातुरीं श्रुतिमपि परिषन्नायकज्येष्ठतातः ।
तद्वंश्येनान्ध्र . . . . स्तम्भनाद्याः सुविद्याः
शोभन्ते श्लाघनीया सदसि हितवता श्रीनिवासाभिधेन ॥"

392. 28. A. 7.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 16 Foll. $15\frac{3}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Legible writing.

Complete up to the end of Kaṇḍvādi.

End :

अगद नीरोगत्वे । उरस् बलार्थः । तरण गतौ । पयस् प्रसृतौ । संभूयस् प्रभूतभावे । अम्बर संवर संवरणे । आकृतिगणोऽयम् ।

Colophon :

इति कण्ड्वादयः ।

393. 28. O. 12.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 35 Foll. $14\frac{1}{2} \times 1$ inches. 5 lines in a page. Grantha script. Old. Much injured. Good writing.

Complete up to the end of Curādi.

The fly-leaf gives the name of the former owner—Yajñasvāmi and contains the following stanza :

अतसीं तुलसीं धात्रीं द्वादश्यामच्युतं फलम् ।
यो भुङ्क्ते प्रथमग्रासे स याति परमां गतिम् ॥

394. 29. G. 25.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 19 Foll. 14 × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Complete up to the end of Kaṇḍvādi.

The fly-leaf at the beginning contains a few lines of Dhātupātha copied again. Seven blank leaves are added at the end. Then a leaf contains a list of MSS. probably owned by the former owner of this MS.

395. 30. G. 16.

धातुपाठः—पाणिनिकृतः

Palm-leaf. 11 Foll. 17 × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the Juhotyādi.

The following stanzas are added in the beginning :

"येनाक्षरसमाम्नायम् + तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसाम् + तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिम् + प्रणतोऽस्मि मुनित्रयम् ॥"

396. 22. P. 11.

धातुपाठः

Palm-leaf. 4 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This Dhātupātha is different from that of Pāṇini mentioned in previous numbers. It is said that these roots were collected from Tiṅantaśiromaṇi also called Dhātupratyayapañcikā, the second part of the Rūpāvatāra.

Contains up to the end of Curādi.

Beginning :

तिङन्तशिरोमणिरीत्या धातवो लिख्यन्ते । शब्विकरणम् । भू सत्तायाम् । एध वृद्धौ । डुपचष् पाके । टुनदि समृद्धौ । ध्वंस गतौ च । व्येञ् संवरणे । जि जये । ष्मिङ् ईषद्धसने । श्रिञ् सेवायाम् । डीङ् विहायसा गतौ ।

End :

गर्व माने । सूत्र विमोचने । मूत्र प्रस्रवणे । रूक्ष पारुष्ये । पार तीर कर्मपरिसमाप्तौ । वटि विभाजने । संग्राम युद्धे । अन्ध दृष्ट्युपसंहारे । इति स्वार्थण्यन्ताश्चुरादयः ।

इतः परं लडादिष्वेभ्य एव धातुभ्यो दशविकरणप्रत्ययविशिष्टानि रूपाणि प्रतिपाद्यन्ते ।

397. 29. F. 13.

धातुपाठः

Palm-leaf. 3 Foll. 13¾ × 1¼ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Enumerates the roots grouping them in the order of their meaning. Consequently the order is different from that of similar works described in previous numbers.

Beginning :

भू सत्तायाम् । विद सत्तायाम् । भू प्राप्तौ । एध वृद्धौ । वृधु वृद्धौ । टुनदि समृद्धौ । स्फायी ओप्यायी वृद्धौ । व्येञ् संवरणे । छदि संवरणे । गुह्व संवरणे । वृ वरणे ।

End :

वृष सेचने । उक्ष सेचने । नट नृत्ते । नृती गात्रविक्षेपे । कृष कृष्टौ । पुष पुष्टौ ।

Colophon :

धातुमाला संपूर्णा ।

398. 27. A. 26.

फिट्सूत्राणि—शन्तनुकृतानि

Palm-leaf. 1 Fol. 15 × 1¼ inches. 10 lines in a page. Grantha script. Old. Good. Illegible writing.

The work deals with svaras or accents of nominal stems called prātipadikas, in four pādas. The total number of sūtras contained in the work is 87 according to this manuscript and printed editions. But S'rīnivāsadīkṣita in his Svarasiddhāntacandrikā says that the total number of sūtras is 88. The difference is due to the addition of one more sūtra between the sūtras 15 and 16 in the 1st pāda. The colophons attribute the authorship to S'āntanavācaya and modern scholars hold the same view. But Haradatta in Padamañjarī mentions the author's name as S'antanu. Nāgesa and Bhairavamiśra refute the authorship of S'āntanavācārya and conclude that S'antanu was the author. The author of the Svarasiddhāntacandrikā also mentions the author as Sage S'antanu.

Complete in four pādas.

Beginning :

फिषोऽन्त उदात्तः । पाठलापालङ्काम्बासागरार्थानाम् । गेहार्थानामस्त्रियाम् । गुदस्य च । ध्यपूर्वस्य स्त्रीविषयस्य । खान्तस्याश्मादेः । बंहिष्ठवत्सरतिशत्थान्तानाम् । दक्षिणस्य साधौ ।

End :

चादयोऽनुदात्ताः । यथेति पादान्ते । प्रकारादिद्विरुक्तौ । शेषं सर्वमनुदात्तम् ।

Colophon :

इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः ॥

The following stanzas dealing with astrology are found after the colophon :

श्रवणादीनि पुष्यार्द्रे प्रथमं मृगशीर्षकम् ।
रोहिण्युत्तरफल्गुन्यावूर्ध्वं फलसमृद्धये ।
कृत्तिकाश्लेषमूलानि विशाखा भरणी तथा ।
पूर्वत्रयं मखं चैव मूले फलसमृद्धये ।
हस्तानूराधचित्राश्च ज्येष्ठा स्वाती पुनर्वसू ।
. . . उत्तरमन्त्यं च भानीमानि तु मध्यतः ।

After this seven extra leaves are added. The first leaf contains Vyākaraṇakroḍapatra. The second and third leaves contain the following lines :

मुख्यक्रमस्य कल्प्यत्वात् शरन्यायानुपपत्तेः कल्पनायां चापेक्षाया मूलत्वेन प्रयोगविध्युपजीव्यप्राथमिकातिदेशप्राप्येन पाठक्रमेणैवाकाङ्क्षाविच्छेदात् श्येनादावातिदेशिकनानाऋत्विगादिवदेवातिदेशिकपाठक्रमप्रापितक्रमस्यैव बलीयस्त्वम् । तदेतत्सिद्धमपि चोदकस्य प्रयोगविध्यपेक्षया बलवत्त्वस्फुटीकरणार्थं क्रमो निरूप्यत इति मन्तव्यम् । उपांशुयाजप्रयाजाज्यभागानूयाजादिद्रव्याणां जौहवादीनां स्विष्टकृदिडादीनि.

The rest are left blank.

399. 28. J. 47.

फिट्सूत्राणि

Palm-leaf. 2 Foll. 15¼ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete in 4 Pādas.

400. 28. J. 47.

फिट्सूत्रवृत्तिः

Palm-leaf. 7 Foll. 15¼ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a brief commentary on the Phiṭsūtras of S'antanu described above. The author's name is not known. This commentary is different from that of Bhaṭṭojidīkṣita.

Complete in 4 Pādas.

Beginning :

फिष्। फिष आन्तोदात्तो भवति। फिषिति प्रातिपदिकदर्शनार्थम्। शान्तनवाचार्यः फिषिति प्रातिपदिकसंज्ञां कृतवान्—अर्थवदधातुरप्रत्ययः फिष्। कृत्तद्धितसमासाश्चेति। डित्थः। ताम्रः। आम्रः। कर्ता। हर्ता। औपगवः। राजपुरुषः। ब्राह्मणकम्बलः। स्वरविधौ अन्त उदात्त इति प्रक्रान्तम्। सू—पाटलापोलङ्काम्बासागरार्थानाम्।

Colophon :

इति फिट्सूत्रवृत्तौ प्रथमः पादः।

End :

सू ॥ शेषं सर्वमनुदात्तं भवति। ग्रामो रमणीयः। प्रप्रायमग्नेः।

Colophon :

इति फिट्सूत्रवृत्तौ चतुर्थः पादः।

401. 38. C. 10.

फिट्सूत्रवृत्तिः

Paper. 35 Foll. 8 × 6⅛ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Complete in 4 Pādas.

This is a transcript of the MS. described under the last number. The differences in reading found in the printed edition are also noted herein.

402. 21. S. 4.

माधवीयधातुवृत्तिः—सायणकृता

Palm-leaf. 245 Foll. 13¼ × 1½ inches. 9 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Foll. 149 to 152 are much broken.

Wooden boards are added to both sides.

This is a treatise commenting upon the Dhātupāṭha of Pāṇini and giving various forms derived from the roots. The author Sāyana was the son of Māyaṇa and younger brother of Mādhava. Both Mādhava and Sāyaṇa were ministers of Vijayanagaram kings. Sāyaṇa says herein that he was the minister of Saṅgama II son of Kamparāja I (in the middle of the fourteenth century A.D.) It is believed that S'ri Vedāntades'ika, the famous S'ri-Vaiṣṇava saint and philosopher was Sāyaṇa's contemporary. The work has been named Mādhavīyadhātuvṛtti by the author in honour of his elder brother Mādhava. Sāyaṇa mentions herein a good number of works and authors among whom Kṣīrasvāmin, Maitreya-rakṣita, Rāmadeva, Vardhamāna, S'ivasvāmin, Sīradeva and Haradatta may be mentioned. The work is devided into two parts, *viz.* Dhātuvṛtti and Pratyayāntadhātuvṛtti. The first part deals with the roots

cited in Dhātupātha and the second with the roots formed by adding certain affixes.

Contains the Bhvādi portion only.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
जीयाद्दन्तिमुखो यस्य लीलयोर्ध्वाण्डखण्डने ।
कन्दाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥
चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु ॥
अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरंदरः ।
यत्कीर्तिमौक्तिकादर्शे त्रिलोक्या प्रतिबिम्ब्यते ॥
यशः क्षीराहुतीकृत्य यत्प्रतापहुताशने ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥
तूर्णं कर्णान्तिकं प्राप्ते यत्प्रतापधनंजये ।
पुरो निधाय गाङ्गेयं स्वात्मा संरक्ष्यते परैः ॥
कुर्वन् शत्रुयशांसि धूमपटलीं कूलंकषां ज्यास्पदः
काष्ठासङ्गविवर्धितः प्रकटयन् भूतिं नवां भूयसीम् ।
आतन्वन्नितरप्रतापदहनं स्फूर्जत्स्फुलिङ्गाकृतिं
प्रायो यच्छति यत्प्रतापदहनः कस्मै न विस्मेरताम् ॥
तस्य मन्त्रिशिखारत्नमस्ति मायणसायणः ।
यः ख्याति रत्नगर्भेति यथार्थयति पार्थिवीम् ॥
नित्योन्मीलितदानवारिरधिकं निर्धूतपङ्कोदयो
दूरापास्तहरीशलङ्घनविधिर्भङ्गप्रसङ्गोज्झितः ।
क्ष्माभृत्क्षोभकृतिक्षमः क्षणिकयन्दोषाकरोद्घोषणा-
मानन्दाय चकास्ति यस्त्रिजगतामाश्चर्यरत्नाकरः ॥
यत्कीर्तौ जाह्नवी स्फूर्तौ कीर्त्या विद्विषतामपि ।
कलिन्दनन्दिनीकान्तिः स्पर्धयेव प्रपद्यते ॥
येन निर्मीयते नित्यं धनैरायोधनैरपि ।
श्रेयसे यशसे दानं विदुषां विद्विषामपि ॥
न ध्यानं न व्रतं नार्चा न समाधिर्न वा जपः ।
मन्त्रसिद्धा बलं यस्य मतिरेव महीयसी ॥
तेन मायणपुत्रेण सायणेन मनीषिणा ।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते ॥
अस्याः पूर्वनिबन्धेभ्यो गुणवत्ता न कथ्यते ।
सर्व एव स्ववाक्येषु यदाहुर्गुणगौरवम् ॥
सा च संत्यक्तमात्सर्यैर्गुणगृह्यैर्मनीषिभिः ।
सूत्रवार्तिकभाष्याणां पारं याद्भिः परीक्ष्यताम् ॥
कल्पयन्तु खला दोषं किं तैर्यदयमुद्यमः ।
मुनित्रयगिरामर्थं सतत्त्वविदुषः प्रति ॥

नमः पाणिनिकात्यायनपतञ्जलिभ्यः ॥ भू सत्तामाम्। वर्तत इति शेषः । सत्तेहात्मभरणम् । यदाह हरिः—'आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते' इति । हेलाराजश्च—'अस्ति आत्मानं बिभर्ति सत्तां भावयतीति यावत्' इति । कैयटकारोऽपि—आत्मभरणवचनो भवतिरिति ।

End :

वृत् । यजादयो वृत्ता इत्यर्थः । भूवादिस्त्ववृत्कृत इति व्याख्यातारः । तेन चुलुम्पादीनामासप्रयोगसिद्धानामपि संग्रहः सिद्धो भवति ।

Colophon :

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरश्रीकम्पराजसुतसङ्गमराजमन्त्रिणा मायणपुत्रेण सायणेन विरचितायां धातुवृत्तौ भूवादयः संपूर्णाः ।

403. 9. D. 15.

माधवीयधातुवृत्तिः—सायणकृता

Palm-leaf. 186 Foll. $9\frac{3}{4} \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Foll. bearing the serial Nos. 1 to 7, 42 to 44, 69 to 78, 100 to 161 are missing.

Wants the beginning in Adādi and goes on up to the end of Curādi.

Beginning :

. . . . ट्टिलोपे विदयतीति भाव्यमिति । टिलोपस्तु शब्दान्तरप्राप्त्या अनित्यः । विदितः । वेदयतीति वेदयः । अनुपसर्गाल्लिम्पेत्यादिना ण्यन्ताच्छप्रत्यये गुणायौ । शास्त्रवित् प्रवित् । सत्सूद्विषेत्यादिना क्विप् । विदिभिदिच्छिदेः कुरच् इति कर्तरि कुरच् । वेदनशीलो विन्दुः । विन्दुरिच्छुरिति उप्रत्यये नुमि निपात्यते । वेदः हलश्चेति घञ् ।

End :

अन्ये तु पुच्छादीनां पुच्छभाण्डेति णिङ उक्तत्वादिह णिज् नास्तीति व्याचक्षते । पुच्छमुदस्यति उत्पुच्छयते । भाण्डानि समाचिनोति संभाण्डयते । चीवरमर्जयति परिधत्ते वा संचीवरयते । सिद्धशब्दो मङ्गलार्थः ।

Colophon :

इति पूर्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गममहाराजमहामहामन्त्रिणा मायणसुतेन माधवसहोदरेण सायणाचार्येण विरचितायां माधवीयायां धातुवृत्तौ चुरादयः संपूर्णाः । समाप्तोऽयं ग्रन्थः ॥

404. 21. S. 6.

माधवीयधातुवृत्तिः—सायणकृता

Palm-leaf. 96 Foll. $10\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Malayalam script. Old. Good. Good writing.

Contains the second part—namely Pratyayāntadhātuvṛtti.

Beginning :

यस्या रूपप्रहाणेन न ख्यातुमपि किंचन ।
शक्यते वस्तु लोकेषु जयत्येका सरस्वती ॥
धातुपाठनिविष्टानां धातूनां यः पुरा व्यधात् ।
विवृतिं माधवीयाख्यां भाष्यज्ञहृदयंगमाम् ॥
तेन मायणपुत्रेण व्याख्या कापि विरच्यते ।
धातूनां प्रत्ययान्तानां गणपाठजुषामपि ॥
तत्र प्रतिपदं शिष्टा गणसूत्रगता इमे ।
तत्रापि बहवो गणाः किं च सूत्राण्यधीयते ॥
आचार्येण पुरा प्रोक्तास्तानादौ विवृणोम्यहम् ।
एतावदेव सर्वस्मादर्थये सुमनोजनात् ॥
नामास्तु भवतां सार्थमन्यथापि न मे क्षतिः ॥

कण्ड्वादिभ्यो यक् ॥ एभ्यो यक् स्वार्थे । एते च धातवः प्रातिपदिकानि च । तत्र धातुत्वं यको धातुविहितत्वेनार्धधातुकत्वेन तन्निमित्तगुणनिषेधार्थेन कित्वेनावसीयते । प्रातिपदिकत्वं तु कण्ड्वादीनां केषांचिदीर्घान्तपाठात् । कण्डूयतीत्यादि रूपं तु ह्रस्वान्तादपि यकि मन्तूयतीत्यादिवत् अकृत्सार्वधातुकयोरिति दीर्घे कृते भविष्यति ।

End :

षष्ठ्येकवचने युष्मदस्मद्भ्यां ङसोऽशित्यशादेशे तवममौ ङसीति तवममयोरभावे शेषे लोपे युष् अस् इति भवति । इदं च शेषे लोपप्रदर्शनं शेषे लोप इत्यस्य शेषे विभक्तौ परत इत्यर्थपक्षे । यदा तु मात्परत्वं शेषत्वमिति पक्षः तदा शेषलोपाभावान्मश्रवणं भवतीति युष्मं अस्मं इत्यादि भवति ।

Colophon :

इति प्रत्ययान्तधातुवृत्तिः संपूर्णा ।

The following stanza is found at the end :

"लौहित्यनिर्जितजपां जितपद्मरागां
पाशाङ्कुशं धनुरिषूनपि धारयन्तीम् ।
ताम्राधरां तरुणमाल्यदुकूलशोभां
ताम्बूलपूरितमुखीं त्रिपुरां नमामि ॥"

405. 24. B. 4.

माधवीयधातुवृत्तिः—सायणकृता

Palm-leaf. 7 Foll. 18 × 2½ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing:

Wooden boards are added to both sides.

Contains a very small portion in Bhvādi.

406. 41. C. 2.

लिङ्गानुशासनम्—पाणिनिकृतम्

Paper. 5 Foll. 11¾ × 4 inches. 9 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

A work on genders of Sanskrit nouns; by Pāṇini.

Beginning:

लिङ्गम्। स्त्री। ऋकारान्ता यातृदुहितृस्वसृयातृननान्दारः। अन्यूप्रत्ययान्तो धातुः। अशनिभरण्यरणयः पुंसि च। मिन्यन्तः। वह्निवृष्ण्यग्नयः पुंसि। श्रोणियोन्यूर्मयः पुंसि च। क्तिन्नन्तः। ईकारान्तश्च।

End:

अविशिष्टलिङ्गम्। अव्ययं कतियुष्मदस्मदः। ष्णान्ता संख्या। गुणवचनं च। कृत्याश्च। करणाधिकरणयोर्ल्युट्। सर्वादीनि सर्वनामानि।

Colophon:

इति श्रीपाणिनिमुनिप्रणीतं लिङ्गानुशासनं समाप्तम्।

407. 22. L. 24.

लिङ्गानुशासनवृत्तिः—भट्टोजिदीक्षितकृता

Palm-leaf. 12 Foll. 11½ × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a short commentary on Pāṇini's Liṅgānuśāsana described above; by Bhaṭṭojidīkṣita. From the colophon it is known that this work also is a part of the Siddhāntakaumudī. But it is copied separately here.

Complete:

Beginning:

लिङ्गम्। स्त्री। अधिकारसूत्रे एते। ऋकारान्ताः मातृदुहितृस्वसृयातृननान्दारः। ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। स्वस्रादिकस्यैव ङीब्निषेधेन कर्त्रीत्यादेः ङीपा ईकारान्तत्वात्। तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोः ऋदन्तत्वाभावात्। अन्यूप्रत्ययान्ते धातुः। अनिप्रत्ययान्तः ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किम्? देवयतेः क्विप्। ऊठ् द्यूः, विशेष्यलिङ्गः।

End:

अविशिष्टलिङ्गम्। अव्ययं कतियुष्मदस्मदः। ष्णान्ता संख्या। शिष्टा परवत्। एकः पुरुषः। एका स्त्री। एकं कुलम्। गुणवचनं च। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रम्। कृत्याश्च। करणाधिकरणयोर्ल्युट्। सर्वादीनि सर्वनामानि। स्पष्टार्थेयं त्रिसूत्री।

Colophon:

इति भट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पाणिनीयलिङ्गानुशासनसूत्रवृत्तिः समाप्ता।

408. 22. G. 23.

लिङ्गानुशासनवृत्तिः—भट्टोजिदीक्षितकृता

Palm-leaf. 6 Foll. 17 × 1¼ inches. 8

lines in a page. Telugu script. Old. Injured. Good writing.

Almost complete, wanting the last line only.

409. 21. S. 23.

लिङ्गानुशासनम्—हर्षवर्धनकृतम्, पृथिवीश्वर-कृतव्याख्यासहितम्

Palm-leaf. 96 Foll. $6\frac{1}{2} \times \frac{3}{8}$ inches. 4 lines in a page. Malayālam script. Old. Injured. Good writing.

This is a metrical treatise on genders of nouns by Harṣavardhana son of S'rīvardhana. The text is followed by a commentary which is called Sarvalakṣaṇā written by Pṛthivīs'vara son of Bhaṭṭa Bharadvāja. The identification of the author of the text with the name-sake ruler of Kanouj and patron of Bāṇa (602—647 A.D.) remains still as a controversial subject among the modern scholars like Dr. Franke and Dr. Aufrecht. The discussion stands on the point whether S'rīvardhana, our author's father can be identified with Prabhākaravardhana, the father of Kanouj ruler. As regards the commentator, the verse 9 of the commentary gives rise to the supposition that he was a contemporary of Harṣavardhana, the author of the text whose time is not yet settled. Meanwhile a further complication of curious nature has arisen. The MSS. of this commentary noticed in Nos. 280 281 of the Des. Cat. of B. O. I. Vol. II describe Harṣavardhana as the son of Vardhamāna instead of S'rivardhana and mention the commentator as S'abarasvāmin son of Bhaṭṭa-Dīpra or Dīptasvāmin, instead of Pṛthivīs'vara son of Bhaṭṭa-Bharadvāja. It is not easy to reconcile these two statements conflicting each other. This MS. was apparently one of the originals on which the edition of the work in the Madras University Series was based. In the last stanza, Harṣavardhana says that he has written the present work after consulting the works written by Vyādi, S'aṅkara, Candra, Vararuci, Vidyānidhi and Pāṇini.

Complete.

Beginning :

नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्व-
मव्ययम् ॥

भूयाद्भूतपतिर्विभुर्दिवि भवो यो भोगभृद्भूषणो
भालाभीलदृगुद्भवोग्रहुतभुग्भारास्तभारो भवः ।
शंभुः संभृतभूतभूरिविभवो भीमः स्वयंभूद्भवो
भूभृद्भूप्रभुरात्मभक्तभयभिद्भर्गो भृशं भूतये ॥
श्रीमद्भूषणभोगिभोगभवनैर्भूमिप्रभैर्भास्वरै-
र्भ्राजिष्णु द्युतिमत्तदिन्दुवदनं वन्दे सतुन्दं वपुः ।
हैरम्बं वरसारदानमुखरै रत्नैरुदारैरलं
दिव्यैश्चारणराक्षसैः सुरगणैर्विघ्नोपशान्त्यै नुतम् ॥
अरूपं विश्वरूपाख्यमनाद्यन्तमकारकम् ।
प्रपद्ये प्रणवात्मानमलिङ्गासंख्यमव्ययम् ॥
नमस्यामि जगद्वन्द्यां कृत्स्नभद्राय मातृकाम् ।
स्थूलां सूक्ष्मां शिवां घोरां सत्त्वाकारां सरस्वतीम् ॥
दिश्यात्सुखानि भवतां कमलपलाशेन भूषिता सुखदा ।
लक्ष्मीरिवाद्रितनया कमलपलाशेन भूषिता सुखदा ॥
स्मरामि सर्वसाहित्यपारगाणां महात्मनाम् ।
गुरूणां यत्प्रसादेन प्राप्यते वैबुधं पदम् ॥

सारः सर्वस्य विद्वत्ता विदुषां कवयः पराः ।
कवीनां लिङ्गविज्ञानी न सन्ति सुधियोऽप्यतः ॥
प्रार्थितः शास्त्रकारेण पादग्रहणपूर्वकम् ।
लिङ्गानुशासनव्याख्यां करोति **पृथिवीश्वरः** ॥ ९ ॥

इह शास्त्राणि विशिष्टेष्टदेवतानमस्कारपूर्वकाणि समारभ्यन्त इति हि शिष्टाचारः । तदर्थमेव कविर्भगवन्तं नारायणं सर्वभूतावासं वासुदेवं विष्णुं विश्वव्यापिनं च कृष्णं नमस्कुर्वन् प्रथममेकं श्लोकं चकार—नम इति ।

नमो मथितदुर्वारदैत्यचक्राय चक्रिणे ।
सभूधरधराकारस्तम्भीभूतैकबाहवे ॥

भगवते चक्रिणे नमः । कीदृशाय? मथितदुर्वारदैत्यचक्राय । तथा सह भूधरैः वर्तते यासौ भूमिस्तदेवागारं गृहम् , तत्र स्तम्भीभूत एको बाहुर्यस्य, सशैलवनकानना भूमिरेकबाहुस्तम्भाश्रिता भगवत इत्यर्थः ।

End :

व्याडेः शंकरचन्द्रयोर्वररुचेर्विद्यानिधेः पाणिनेः
सूक्तान् लिङ्गविधीन् विचार्य सुगमं श्रीवर्धनस्यात्मजः ।
श्राव्यं व्यापि च हर्षवर्धन इदं स्पष्टीकृतप्रत्ययं
लिङ्गानामनुशासनं रचितवानत्यर्थसंसिद्धये ॥

सूक्तान् लिङ्गविधीन् विचार्य पर्यालोच्य सारं संगृह्य तेभ्यः सुगमं श्राव्यं व्यापि च लिङ्गानुशासनं रचितवान् । अन्यच्च स्पष्टीकृतप्रत्ययं घञन्तादयः प्रत्ययाः अस्पष्टाः संहिताः संश्लिष्टाः पृथक्कृत्य स्पष्टीकृता यत्र, तत्तत्प्रत्ययानां सोदाहरणानां दर्शनात् पृथक्स्पष्टतास्य । तत्र हि पुरुषाः स्वल्पाश्रिता मन्दधियः ष्यङ् अङ् नञ् ईय इत्येवमादिषु । किमर्थमिदं तात्पर्यं चेदित्यत आह—अत्यर्थसंसिद्धये । एतत्परिज्ञानार्थिनां तैषामयमर्थः कथमनायासेन सिध्येदिति लिङ्गं प्रदर्शितम् ।

Colophon :

इति भट्टभरद्वाजसूनोः पृथिवीश्वरस्य कृतौ हर्षवर्धनकृतलिङ्गानुशासनटीकायां सर्वलक्षणायां मिश्रलिङ्गप्रकरणं समाप्तम् ॥

The name of the scribe :

गर्तवनशंकरलिखितम्

410. 20. D. 38.

लिङ्गानुशासनम् (लिङ्गप्रबोधः)—वेङ्कटरङ्गकृतम्

Palm-leaf. 12 Foll. 13½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This is another work on genders of nouns arranging them into different groups according to genders. The author is Veṅkaṭaraṅga pupil of Sundararāja. The work is called Liṅgānuśāsana in the colophon and Liṅgaprabōdha in the stanzas found in the beginning and end.

Complete.

Beginning :

वाणी विश्वय . . . . . हूतमित्रायिता
स्वार्चापूर्णमनोरथाम्बुजभवप्रीतिप्रदा शाश्वती ।
नेत्रास्याङ्घ्रिकरप्रभाह्नुतप . . . . . .
स्माकं धृतकच्छपीजपमणिर्नृत्यात्सदा वाचि सा ॥
हंसाक्षाब्जमनोऽग्निशक्रवदनक्षोणी . . . . . .
सुन्दरराजनामभगवत्पत्पद्मलिट्षट्पदः ।
भूयाद्वेंकटरङ्गनामकसतो **लिङ्गप्रबोध** . . . .
. . . न्मुदे पिपठिषोर्बालस्य सर्वस्य च ॥

स्त्री ईमिन्यात्यूकारान्ताः । तृट्विपाट्प्रावृट्विप्रुट् रुट् त्विट् त्विषः । रुक्शुक्स्रक्स्रुक्त्वक्ज्योक्वाच . . . . . उष्णिग्गुपानत्स्नुहः द्योनौदिवः वेहत् हरि-

त्चित्सम्मित्त्रिवृत्योषित्संयत्ततटित् . . . . संवित्-मुत्प्रतिपत्विपत्संपत्शरत्संसत्परिषद्दृषदः ।

End :

अथ नपुंसकम् । मुखनयनलोहवनमांसरुधिरकार्मुक-विवरजलहलधनान्नबलकुसुमशुष्कयुद्धवाचकाः । इति नपुंसकाधिकारः ॥

श्रीमत्सुन्दरराजसंज्ञकमलाभूवाङ्महादेशिको
व्यालद्विड्भुजगेशमारुतिगुरुश्रीकण्ठनारायणः ।
पायान्मां निखिलात्मको गुणनिधिर्लिङ्गप्रबोधं कृतिं
संपूर्णां मम संतनोतु सततं मे प्यायतां मङ्गलम् ॥

Colophon :

इति लिङ्गानुशासनं संपूर्णम् ॥

411. 20. D. 42.

लिङ्गानुशासनम् (लिङ्गप्रबोधः)—वेङ्कटरङ्गकृतम्

Palm-leaf. 4 Foll. 15 × 1 inches. 4 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

412. 35. B. 11.

लिङ्गनिर्णयः

Paper. 8 Foll. 11 × 5½ inches. 15 lines in a page. Telugu script. Old. Slightly injured. Good writing.

A metrical treatise on genders enumerating nouns in the order of genders to which they belong. The author's name is not known. It contains 175 stanzas in all. The words are also arranged according to their final letters.

Complete.

Beginning :

लिङ्गनिर्णयः ॥ कान्ताः—

आनकः पुलकष्टङ्कः कलङ्कोऽङ्कः पिकः शुकः ।
पाकोऽर्भकोऽलकः शाको बिम्बकोऽर्कस्तु कोरकः ॥ १
पेचकः पृथुकोल्लूकौ बन्धूको बन्धुजीवकः ।
चूतको मोषकोऽलीकस्त्वामोकस्तु बलाहकः ॥ २
डाम्भिकः काशिकः श्लोकः सायको नायको वृकः ।
नारको नरकः कोकश्चक्रवाकस्तु पुंस्यपि ॥ ३
चन्द्रिका मृत्तिका लङ्का शङ्का टीका च तूलिका ।
मूलिका मक्षिका चैवोपत्यकाधित्यकालिका ॥ ४ ॥

End :

दन्ते केशे स्त्रियां ङीष् स्याद्बहुव्रीहिसमासतः ।
यथा शातोदरी कम्बुकण्ठी स्यात्पीवरस्तनी ॥ १७४ ॥
न ङीष् स्यादितरेषां तु चारुदेहाः प्रकीर्तिताः ॥ १७५

इति हलन्ताः ॥

Colophon :

इति लिङ्गनिर्णयः समाप्तः ॥

Name of the scribe : Jajala Subbāvadhāni.

413. 27. F. 64.

लिङ्गनिर्णयभूषणम्—रामसूरिकृतम्

Palm-leaf. 7 Foll. 15 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This also is a work on genders of nouns and based on Pāṇini's Liṅgānuśāsana. The author Rāmasūri was the son of Viṣṇusūri of Torūri family. A MS. of the work described in No. 1499 of the Des. Cat. of Madras Govt.

Oriental MSS. Library, Vol, III. mentions this work as Pāṇinīyaliṅgānuśāsanavṛtti Linganirṇayabhūṣanam. According to the colophon mentioned below the work is known as a part of the work Bālakaumudī written by this author.

Complete.

Beginning :

बाणीं प्रणम्य शिरसा बालानां ज्ञानसिद्धये ।
स्त्रीपुंनपुंसकं स्वल्पं वक्ष्यते शास्त्रनिश्चितम् ॥
तोरूरिविष्णुविदुषः सूनुना रामसूरिणा ।
विरच्यते बुधश्लाघ्यं लिङ्गनिर्णयभूषणम् ॥

आदौ तावत् स्त्रीलिङ्गा उच्यन्ते । सर्वजातिषु स्त्रीवाचकाः शब्दाः स्त्रियाम् । दारशब्दो बहुत्वे पुंस्येव । परिग्रहावरोधौ पुंसि नित्यम् । कलत्रं नपुंसकम् । भूमिविद्युन्नदीगोनिशारसनासेनालतावीणावाणीकरुणा - मौर्वीस्त्रीचन्द्रिकामृत्तिकादिक्प्रभाजिह्वानासाप्रज्ञार्थवाच - काः स्त्रियाम् ।

End :

ऋक्पूरब्धूःपथिन्राजाहन्सखिशब्दाः समासान्ताश्चेत् अकारान्ता भवन्ति । यथा अर्धर्चः, देवपुरम्, निर्मलापस्तटाकः, समधुरः, सरित्पथः, राजराजः, पुण्याहः, प्रियसखः । सक्थ्यक्षिनाभ्युक्षन्शब्दाः पुंवाचकबहुव्रीहिसमासान्ताश्चेत् अकारान्ता भवन्ति । तद्यथा—दीर्घसक्थः, पुण्डरीकाक्षः, पद्मनाभः, महोक्ष इत्यादि ।

Colophon :

इति रामसूरिविरचितायां बालकौमुद्यां लिङ्गनिर्णयः परिसमाप्तः ।

After the colophon the following stanza is written :

"स्वाज्ञानेन विवर्तते त्रिभुवनाकारेण यः सर्वदा
स्वस्मै यः स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वज्ञानेन च योऽद्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मै चिदस्मै नमः ॥"

414. 19. N. 23.

लिङ्गनिर्णयभूषणम् —रामसूरिकृतम्

Palm-leaf. 7 Foll. 15 × 1¼ inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

415. 21. O. 2.

लिङ्गनिर्णयभूषणम् —रामसूरिकृतम्

Palm-leaf. 11 Foll. 16 × 1¼ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

Fol. 11*b* contains the following stanza :

"लङ् वर्तमाने नित्यं स्यात् भूते लङ्लुङ्लिटस्तथा ।
विध्याशिषोस्तु लिङ्लोटौ लृङ् लृट् लुट् च भविष्यति ॥"

416. 22. M. 64.

लिङ्गनिर्णयभूषणम् —रामसूरिकृतम्

Palm-leaf. 7 Foll. 15 × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Clear writing.

Incomplete.

417. 24. L. 30.

लिङ्गनिर्णयभूषणम् —रामसूरिकृतम्

Palm-leaf. 18 Foll. 13½ × ⅝ inches. 5

lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Colophon :

रामसूरिविरचितो लिङ्गनिर्णयभूषणः समाप्तः ।

418. 29. F. 13.

लिङ्गनिर्णयभूषणम् —रामसूरिकृतम्

Palm-leaf. 7 Foll. 14 × 1⅜ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Complete.

Colophon :

इति रामसूरिविरचितो लिङ्गनिर्णयः समाप्तः ।

419. 21. A. 17.

अदसोमादितिसूत्रार्थविचारः

Palm-leaf. 2 Foll. 15¾ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

A short treatise dealing with the interpretation of Pāṇini's Sūtra *viz.* अदसो मात् (1-1-12) and insisting the importance of the Sūtra. The authors' name is not given.

Complete.

Beginning :

अदसो मात् ॥ अदसः मात् इति द्विपदं सूत्रम् । ईदूदेद् द्विवचनं प्रगृह्यम् इति सूत्रात् एत्पदरहितं पदैकदेशमप्यनुवर्तते, प्रगृह्यमिति च । तथाचायं सूत्रार्थः— अदःशब्दावयवमकाराव्यवहितोत्तरवृत्तिद्विमात्राकालिके - कारोकारौ प्रगृह्यौ स्त इति । अमी ईशः, रामकृष्णावमू आसाते इत्युदाहरणे । अमी इत्यत्र अदःशब्दार्थस्य योग्यक्रियानिरूपितकर्तृत्वविवक्षायां कर्तर्यभिहिते तन्निष्ठबहुत्वद्योतनार्थं प्रथमाबहुवचने जसि जकारस्य निवृत्तौ अदस् अस् इति स्थिते, त्यदादीनाम इत्यत्वे, अद अ अस् इति स्थिते, अतो गुणे इति पररूपे, अद अस् इति स्थिते, जसः शी इति शी इत्यादेशे, अद शी इति स्थिते, शकारस्य निवृत्तौ, अद ई इति स्थिते, आद् गुण इति गुणे एकारे, अदे इति स्थिते, अदसोऽसेर्दादु दो मः इति उत्वमत्वयोः प्राप्तयोस्तद्बाधकेन एत ईद् बहुवचने इति सूत्रेण ईत्वे मत्वे च अमी ईशा इति स्थिते, दीर्घे प्राप्ते, अदसो मादिति प्रगृह्यत्वे प्रकृतिभावः ।

End :

पुंलिङ्गे तु उत्वस्यासिद्धत्वात् अदौ इत्यौकारान्तत्वमेव वर्तत इति न तत्र पूर्वसूत्रेण सिध्यतीति तदर्थमवश्यमारम्भणीयमिति द्योतयितुं पुंस्त्वस्य विशेष्यवाचकपदश्रवणमन्तरा स्पष्टतया अप्रतीयमानत्वात् तत्प्रतिपत्तये तस्य ग्रहणमिति विदांकुर्वन्तु ।

420. 24. A. 7.

अनिट्कारिकाः

Palm-leaf. 1 Foll. 14¼ × 2 inches. 12 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A metrical enumeration of roots which do not take the augment इ before suffixes. These stanzas are taken from the Siddhāntakaumudī of Bhaṭṭojidīkṣita and written separately.

Complete.

Beginning :

ऊदृदन्तैर्यौतिरुक्षण्वुशीस्नुण्वुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥१॥

शक्लृपच्मुचिरिच्विच्विच्सिच्प्रच्छिच्यज्निजिर्भजः ।
भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुञ्ज्विजिस्वञ्जिसङ्सृजः
अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद् ।
शद्सदी स्विद्यतिःस्कन्दिर्हद्क्रुधी क्षुधिबुध्यती ॥

End :

विन्दतिश्चान्द्रदुर्गादेरिष्टो भाष्येऽपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥
रञ्जिमस्जी अदिपदी तुद् क्षुध् शुषिपुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसंमतेः ॥

421. 35. B. 134.

अनिट्कारिकाः

Paper. 4 Foll. 9 × 4 inches. 7 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This also is a metrical enumeration of the roots which are not permitted to take the augment इ. This is different from the one described in previous number. These verses are taken from the Kāśikāvṛtti (7-2-10). A commentary by an unknown author is added. The commentary is identical with that described in No. 703 of the India office Library Catalogue, part II.

Wants beginning :

Beginning :

. . . . . निटः प्रकीर्तिताः कथिताः ।
दिशिं दृशिं दंशमथो मृशिं स्पृशिं
रुशिं रिशिं क्रोशतिमष्टमं विञ्शिम् ।
लिशिं च शान्तानिटः पुराणगाः
पठन्ति पाठेषु दशैव नेतरान् ॥ ६ ॥

अस्यार्थः—शकारान्ता धातवो गणेषु पठ्यन्ते । तेषु मध्ये तद्विदः पुराणगा आचार्या दश धातूनिटः पठन्ति । इतरान् नेति । के ते? दिश अतिसर्जने, दृशिर् प्रेक्षणे, दंश दशने, मृश आमर्शने, स्पृश संस्पर्शने, रुश रिश हिंसायाम्, क्रुश आह्वाने रोदने च, विश प्रवेशने, लिश अल्पीभावे, एते अनिटः । इति शान्ताः ।

End :

पचिं वचिं विचिरिचिरञ्जिपृच्छतीन्
णिजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ।
त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन्
भुजिं स्वञ्जिं सृजिमृजी विद्ध्यनिट्स्वरान् ॥

अस्याः कारिकायाः संक्षिप्तोऽयमर्थः । चकारान्तेषु धातुषु मध्ये षट् धातूनिट्स्वरान् विजानीहि । अनुदात्तस्वरानित्यर्थः । छकारान्तेऽप्येकमनिटम् । जकारान्तेषु पञ्चदश धातूनिटो विद्धि । ते च यथाक्रममुपदिश्यन्ते । डुपचष् पाके, वच परिभाषणे, ब्रुवो वचिः द्वयोरपि ग्रहणम् । विचिर् पृथग्भावे, रिचिर् विरेचने, रञ्ज रागे, प्रच्छ ज्ञीप्सायाम्, णिजिर् शौचपोषणयोः, षिचिर् क्षरणे, मुच्लृ मोक्षणे, भज सेवप्याम्, भञ्जो आमर्दने, भ्रस्ज पाके, त्यज हाने, यज देवपूजासङ्गतिकरणदानेषु, युजिर्योगे युज समाधौ द्वयोरपि ग्रहणम् । रुजो भङ्गे, षञ्ज सङ्गे, मस्जो शुद्धौ, भुज पालनाभ्यवहारयोः, भुज कौटिल्ये द्वयोरपि ग्रहणम्, ष्वञ्ज परिष्वङ्गे, सृज विसर्गे, मृजूष् शुद्धौ, मृजु शौचालंकारयोः द्वयोरपि ग्रहणम् । एतेऽनिटः ।

Colophon :

इत्यनिट्कारिकाः ।

संवत् १७८२ वर्षे आश्विनमासे शुद्धपक्षे अद्य वटभद्रवासिजोषीरघुनाथजीसुतजोषीभाइजिना लिखिता अनिट्कारिका संपूर्णा ।

422. 8. J. 44.

अनित्यतावादपत्रम् —कृष्णसुधीकृतम्

Paper. 7 Foll. 8 × 6½ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

A controversial discussion on the meaning of Pāṇini's sūtra इकोचि विभक्तौ (7-1-73) mainly touching the point that the operation of the rule is only optional and not compulsory.

The author is Uruppaṭṭore Kṛṣṇasudhī.

Complete.

Beginning :

अनित्यतावादपत्रम ।

इकोऽचि विभक्तौ । इकः अचि विभक्ताविति त्रिपदमिदं सूत्रम् । अत्र नपुंसकस्य झलचः इत्यतोऽनुवृत्तस्य नपुंसकस्येत्यस्य इक इति विशेषणम् । यद्वा नपुंसकस्य इकः इत्युभयमपि अङ्गविशेषणम् । इक्पदे तदन्तविधिः । अचीति विभक्तावित्यस्य विशेषणम् । यस्मिन् विधिरिति तददिविधिः । इदितो नुमित्यतो नुमित्यनुवर्वते । तथाच इगन्तस्य क्लीबस्याङ्गस्य नुमागमः स्यात् अजादौ विभक्तौ परत इति सूत्रार्थः । अस्य चोदाहरणं वारिणी इत्यादिकम् । अत्र सुपीति वक्तव्ये विभक्ताविति चिन्त्यप्रयोजनमिति शेखरकाराः । यत्त्वत्र पाठकेनोक्तम्—सुपीत्येव वक्तव्यम्, न तु विभक्ताविति । अन्यथा नपुंसकवृत्तेरिदंशब्दात् अधुनाप्रत्यये प्रकृतेरिशादेशे अनेन नुमि यस्येति लोपानापत्तिरिति चिन्ताबीजमिति; तन्न, नुमि सत्यपि नस्तद्धित इति टिलोपेनेष्टसिद्धेः ।

End :

अनित्यत्वफलं तु हे वारि हे वारे इति गुणसिद्धिरिति भाष्यकैयटादिषु स्फुटम् । इदं च सामान्यापेक्षं ज्ञापकम्, न तु संबुद्धिमात्रविषयकमिति सकलमकलङ्कम् । इत्यष्टादशी ॥

The date of copying and the name of author :

अयं च ग्रन्थः दुर्मुखिमेषद्वादशदिने लिखितः । उरुप्पट्टूरु कृष्णविरचितः ।

423. 9. D. 93.

अनेकमन्यपदार्थसूत्रविचारः—उदयंकरकृतः

Paper. 12 Foll. 9 × 5 inches. 10 lines in a page. Devanāgarī script. Old. Good. Illegible writing.

A short treatise dealing with the meaning of Pāṇini's sūtra *viz.* अनेकमन्यपदार्थे (2-2-24). The author Udayaṅkara is said to have had a surname "Nānāpāṭhaka" and to have written commentaries on Nāgeśa's Laghuśabdenduśekhara called Jyotsnā and on Paribhāṣās called Paribhāṣāpradīpārcis. Aufrecht assignes him to the middle of the last century (about 1850).

Complete.

Beginning :

अनेकमन्यपदार्थे ॥ अत्र शेषो बहुव्रीहिः इत्यधिकाराच्छेष इति लब्धम् । उपयुक्तादन्यश्च शेषपदार्थः । शिष असर्वोपयोगे, कर्मणि घञ् । एवं च येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञा नोक्ताः, तेषामन्यपदार्थे वर्तमानानां समासो बहुव्रीहिसंज्ञः स्यात् इति सूत्रार्थः संपन्नः । तेन उन्मत्तगङ्गम्, पञ्चगवमित्यादौ प्राक्कडारात्परं कार्यमिति पाठे परत्वात्पाप्ता बहुव्रीहिसंज्ञा न भवति । किं त्वत्र पक्षे वीरपुरुषको ग्रामः अब्राह्मणको देश इत्यादावपि तन्न्यायात् बहुव्रीहिसंज्ञा न प्राप्नोति ।

तदर्थं वचनारम्भे गौरवात्। यदि आकडारादेका संज्ञेति पाठमवलम्ब्यानवकाशाभिरव्ययीभावादिसंज्ञाभिः बहुव्रीहिसंज्ञाया बाधनात् दोषाभावः, वीरपुरुषको ग्राम इत्यादौ तु परत्वाद्बहुव्रीहिणा इष्टं सिद्धमित्युच्यते, तदा शेषपदेन सप्तसु सुपां त्रिकेषु यस्य त्रिकस्य शृङ्गग्राहिका समासो नोक्तः तद्गृह्यते। प्रथमेति यावत्। ततश्चानेकं प्रथमान्तमन्यपदार्थे वर्तमानं समस्यते, स बहुव्रीहिसंज्ञः स्यात् इति सूत्रार्थः। तत्फलं तु पञ्चभिर्भुक्तमस्येत्यादौ विरुद्धविभक्तिकानां न बहुव्रीहिरिति भाष्यकाराः। सोऽयं पक्षः त्रिकतः शेष इत्येवं शास्त्रे व्यवहृतः।

End :

तत्र पञ्चविध इत्यस्य द्वितीयातृतीयाचतुर्थीपञ्चमीसप्तम्यर्थरूप इत्यर्थः। **शब्दरत्नकृतस्तु** तत्प्रतीकमुपादाय कर्मकरणसंप्रदानापादानाधिकरणरूप इति व्याचक्रुः। तन्न, कर्तुरसंग्रहापत्तेः। अथ करणपदं कर्तुरुपलक्षणं स्यात्, तदा पञ्चविधत्वहानिः। तृतीयार्थत्वेन द्वयोरनुगतयोर्लक्षणा इत्येतदपेक्षया तु मदुपदर्शितं व्याख्यानं भवति।

Colophon :

तत्पुरुषाश्रितैर्द्वन्द्वैर्द्विगुभिः समधिष्ठितान्।
प्रासीदद् बहुव्रीहिकेदारानुदयंकरः॥

424. 9. D. 6.

अनेकमन्यपदार्थसूत्रविचारः—उदयंकरकृतः

Paper. 8 Foll. 9¾ × 5 inches. 12 lines in a page. Telugu script. Old. Good. Good writing.

Incomplete.

425. 9. D. 6.

अर्थवत्सूत्रविचारः

Paper. 4 Foll. 9¾ × 5 inches. 14 lines in a page. Telugu script. Old. Good. Good writing.

A short treatise on the interpretation of the sūtra of Pāṇini *viz.*—अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1-2-45).

Incomplete.

Beginning :

हेरम्बभानुवाग्देवीफणीन्द्राणामहर्निशम्।
तथा गुरोः पदाब्जानि प्रणिपत्य पुनः पुनः॥
विचार्यतेऽर्थवत्सूत्रे किंचिदेव कुतूहलात्॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ अभिधेयवचनोऽत्रार्थशब्द आश्रीयत इति कैयटः। अभिधेयसामान्यवचन एवेति तदर्थः। धातुप्रत्ययपर्युदासवैयर्थ्यापत्त्या अभिधेयविशेषवचनस्याग्रहणमिति स्फोटयितुं सामान्येत्युक्तम्। प्रयोजनवदभिधेयानभिधेयवचनग्रहणे कूचीमञ्च्यादीनामपि व्युत्पत्तिप्रसङ्गः। न चेष्टापत्तिः, साधुत्वेन प्रयोगार्हत्वप्रसङ्गात्। व्याकरणनिष्पन्नत्वस्यैव तत्त्वात्। प्रमात्मकशाब्दबोधजनकत्वस्यापि सत्वात्।

End :

अन्यथा ब्राह्मणत्वावच्छेदेन विहितदधिदानस्य कौण्डिन्योद्देश्यकतक्रदानेन बाधो न स्यात्। तद्दानात्पूर्वं तदुत्तरं वा चारितार्थ्यात्। कौण्डिन्यस्य दधिदानप्राप्तिस्तु ब्राह्मणेभ्यो दधि देयं न कौण्डिन्याय देयमित्यत्र न देयमिति विशेषनिषेधश्रुत्या ब्राह्मणेभ्यो दधीत्यादौ ब्राह्मणपदस्य कौण्डिन्यातिरिक्तब्राह्मणपरत्वेन तद्वाक्यस्य कौण्डिन्यातिरिक्तब्राह्मणसंप्रदानकदधिदानबोधकत्वादिति दीधितिकारादयः। किंच पादोऽन्यतरस्यामित्यस्य टाङ्सिङसामित्यपवादो न स्यात्। तदभावपक्षेऽस्य चारितार्थ्यात्। तस्मात् उक्तमेव रमणीयम्। सत्यपि संभवे बाधनं भवतीति मिदचोऽन्त्यादिति सूत्रस्थं भाष्यमप्यत एव संगच्छते। लविधौ तिबादिविधौ च भूवादय इत्यस्योप . . . .

426. 21. A. 19.

अर्थवत्सूत्रविचारः

Palm-leaf. 2 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Good. Good writing.

This also is on the same subject as mentioned in the last number. But the work is different.

Complete.

Beginning :

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दस्वरूपं प्रातिपदिकं स्यादिति सूत्रार्थः । डित्थादयोऽव्युत्पन्नाः शब्दा उदाहरणम् । ननु अर्थवत्पदं व्यर्थम्, अधातुरप्रत्यय इति पर्युदासेन नञ्निवयुक्तन्यायादर्थवत्त्वलाभात् । तथाहि लोके अब्राह्मणमानय अनश्वमानयेत्यादिनञ्घटितस्थले ब्राह्मणाश्वभिन्नानां लोष्टादीनामानयनं नाचर्यते । किंतु ब्राह्मणाश्वभिन्नब्राह्मणाश्वसदृशक्षत्रियरासभादय आनीयन्ते, नञः सादृश्यबोधकत्वात् । तद्वदिहापि अधातुरप्रत्यय इत्युक्ते धातुप्रत्ययभिन्नाः धातुप्रत्ययसदृशा एव गृह्यन्ते । सादृश्यं चार्थद्वारकमाश्रीयते । तस्मादर्थवतामेव ग्रहणं सिध्यतीत्यर्थवत्पदं निरर्थकम् ।

End :

स्वादिषु सत्सु सप्तिङन्तं पदमिति पदत्वम् । पदत्वे सति सुप्सिपोः सकारस्य पदादित्वात् सात्पदाद्योरिति षत्वनिषेधः स्यात् । न चादेशप्रत्यययोरिति षत्वविधेर्निरवकाशतेति वाच्यम्, सर्पिषः धनुषः एष इत्यादौ सावकाशत्वात् । तस्मात् प्रत्ययस्य प्रातिपदिकसंज्ञानिरासार्थमप्रत्ययपदं सार्थकमेवेतीममर्थं समर्थयन्तु वैयाकरणमूर्धाभिषिक्ताः सुधियः ॥

Colophon :

इत्यर्थवत्सूत्रसमर्थनवादार्थः ॥

After the colophon the following stanza is found :

" विष्णो पादद्वयी ते भवसलिलनिधेस्तारिका
कापि नौका
राकाचन्द्रप्रभावात्सकलजनदृशां नन्दना
कापि लक्ष्मीः ।
कीर्तिस्ते सर्वपापप्रशमनपटुका वाक्छका
चित्तचौर्ये
त्वत्सेवाकारकः स्यां तव बहुपरिव्राजकायां
नगर्याम ॥ "

इति प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुप इति सूत्रप्रत्युदाहरणविषयश्लोकः ।

427. 21. Q. 15.

अर्थवत्सूत्रविचारः

Palm-leaf. 12 Foll. 7¼ × 1¼ inches. 7 lines in a page. Malayālam script. Old. Good. Good writing.

Wooden boards are added to both sides.

This also is on the same subject. But the work is different.

Incomplete.

Beginning :

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । अर्थवदिति पदसंस्कारपक्षे लिङ्गसर्वनामनपुंसकनिर्देशः, शक्यं च क्षुदुपहन्तुमितिवत् । वाक्यसंस्कारपक्षे तु शब्दानुशासनप्रस्तावात् शब्दस्वरूपविशेष्यत्वात् तल्लिङ्गनिर्देशः । अधातुरप्रत्यय इति च नञ्तत्पुरुषे परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति पुंल्लिङ्गनिर्देशः । अप्रत्यय इति

चावर्तते। ततश्चायं सूत्रार्थः—धातुप्रत्ययप्रत्ययान्तवर्जमर्थवच्छब्दरूपं प्रातिपदिकं स्यादिति। डित्थ इत्यादीन्युदाहरणानि।

End:

अनुकरणशब्देषु तु अनुकार्यानुकरणयोर्भेदविवक्षायामर्थवत्त्वात्प्रातिपदिकसंज्ञा। अभेदविवक्षायां तु नेति मुत्रो वुग्लुङ्लिटोः, भू सत्तायामित्यादिनिर्देशोपपत्तिः।

428. 22. P. 13.

अर्थवत्सूत्रविचारः

Palm-leaf. 3 Foll. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Similar to the above.

Complete.

Beginning:

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। चतुष्पदमिदं सूत्रम्। अर्थोऽस्यास्तीत्यर्थवत्। एतच्च शब्दस्वरूपस्य शब्दानुशासनप्रक्रमादुपस्थितस्य विशेषणम्। तेन नपुंसकत्वम्। अधातुरप्रत्यय इति पदे अपि तस्यैव विशेषणे। ते च यद्यपि नपुंसकविशेषणत्वान्नपुंसकत्वयोग्ये, तथापि नञ्तत्पुरुषत्वात् परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति पुंल्लिङ्गतामश्नुवाते। अप्रत्ययपदं चावर्तते। एकं प्रत्ययं पर्युदस्यति। अन्यच्च प्रत्ययग्रहणपरिभाषया प्रत्ययपदेन प्रत्ययान्तपरामर्शे सति प्रत्ययान्तं पर्युदस्यति। तथाचायं पर्यवसितार्थः—धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यादिति। ननु अप्रत्ययपदस्यावृत्त्या प्रत्ययप्रत्ययान्तोभयपर्युदासे किं प्रमाणमिति चेन्न। प्रत्ययस्यैव पर्युदासे कृत्तद्धितान्तानामुत्तरसूत्रे संज्ञाविधानं व्यर्थमेव स्यात्। अतः प्रत्ययान्तस्य पर्युदासो युक्तः।

End:

डित्थडबित्थादीनि पदान्येतस्य सूत्रस्योदाहरणानि। न च—

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु॥

इति डित्थादिपदानामपि कृदन्तत्वादेव सिद्धेर्नैतत्सूत्रोदाहरणत्वमिति वाच्यम्। अव्युत्पत्तिपक्षे उदाहरणत्वसंभवात्। व्युत्पत्तिपक्षे बहुपटव इत्यार्थं सूत्रम्।

429. 21. A. 17.

अवैहीत्यसाधुत्वविचारः

Palm-leaf. 5 Foll. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

In his Siddhāntakaumudī Bhaṭṭojidīkṣita stated that the form अवेहि is correct and अवैहि incorrect. The present work maintains that both the forms *viz.* अवैहि and अवेहि are correct.

Incomplete.

Beginning:

शिवेहीत्यत्र किंचिद्विचार्यते। वाक्यं विभज्यान्वाख्यानमिति पक्षे शिव आ इहि इति स्थिते सवर्णदीर्घगुणयोः प्राप्तयोः धातूपसर्गयोः कार्यमन्तरङ्गमित्यन्तरङ्गत्वाद् गुणे शिव एहीति स्थिते वृद्धौ प्राप्तायामन्तादिवच्चेति सूत्रेण एकाररूपैकादेशस्य पूर्वान्तवद्भावेनाङ्त्वात् ओमाङोश्चेत्यनेनापवादशास्त्रेण पररूपे एकारे शिवेहि इति सिद्धमिति ज्ञेयम्।

End:

एवमेव अवेहि अवैहीति द्वयमपि साधु। यत्र च सा स्यात् तत्रान्यतरस्मादेव साधुतां विना संप्रदायपठित-

शास्त्रेण स्वेच्छामात्रेण वक्तुमशक्यतया उक्तस्थलेषु तस्या दृढतराया अभावात् मदुक्तामेव रीतिमनुसरन्तु मात्सर्यमुत्सार्य सुधियः। यदि तु तथा प्रयोगो नेति ब्रूषे किमेतदपेक्षया लाघवमस्ति विदुषां निग्रहस्थानम्। ईश्वरातिरिक्तस्य निखिललक्ष्यविषयज्ञानासंभव इति आपामरपण्डितमाबालवृद्धं ज्ञातुं शक्यत्वात्। तस्माद्यदि भाष्यारूढं मानमस्ति तदपि यदि विचारक्षमं प्रौढिवाद-रहितमिति निष्कलङ्कं निश्चितं स्यात् तदा वयमपि यथा-मति विचार्य स्वीकुर्म इति निश्चिन्वन्तु पण्डिताखण्डलाः। तदुपरि यदि दूषणं न स्फुरति तदा मदुक्तमेव.

After this two extra leaves contain the following passages:

जगद्वशे वर्ततेदं कृष्णस्य सचराचरमित्यत्र वर्तते इदमिति पदच्छेदः। तत्र वर्तते इति तकारोपरि श्रूयमाणस्यैकारस्य इदंशब्दसंबन्धिनि इकाररूपे अचि परे एचोऽयवायाव इत्ययादेशे वर्ततय् इदमिति स्थिते लोपः शाकल्यस्य अवर्णपूर्वयोः पदान्तयोः यवयोर्वा लोपोऽशि परे इति द्वितीयतकारोपरि श्रूयमाणाकारा-त्परस्य यकारस्य तिङन्तपदान्तस्य इकाररूपे अश्र-त्याहारप्रविष्टे वर्णे परे लोपे वर्तत इदमिति स्थिते आद्गुण इति गुणे कर्तव्ये पूर्वत्रासिद्धमिति शास्त्रेण त्रैपादिकस्य लोपः शाकल्यस्येति प्राप्तयलोपस्यासिद्ध-त्वात् यकारस्य सत्त्वात् अकारस्याच्परत्वाभावेन गुणाप्रसिद्धया वर्तत इदमिति भाव्यम्। वर्ततेदमिति तु दृश्यते। तत्कथमित्याक्षिप्य, आर्षत्वान्न दोष इति केचित्समादधुः। तच्च ब्रह्मास्त्रमनभिधानान्न दोष इत्येत-त्समंमिति न सहन्ते विचारक्षमाः। परे तु अद इति छित्वा वर्तते इति तकारोपरि श्रूयमाणस्य एकारस्य अदःशब्दसंबन्धिनि अति परे एङः पदन्तादति इति पूर्वरूपे वर्ततेदः इति रूपमिति यद्यपि वक्तुं शक्यते, तथापि स पाठः क्वापि न दृश्यते। अत्र दोषे परिहृतेऽपि सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति इत्यत्र सखे इति पदच्छेदस्यावश्यकर्तव्यतया तत्र प्रकारान्तरेण पदच्छेदासंभवात् तद्रूपसंपत्तये पूर्वदीर्घस्वरं दृष्ट्वा परलोपो विधीयत इति सारस्वत-व्याकरणमङ्गीकृत्य एकाररूपदीर्घात्परस्य इकारस्य लोपमङ्गीकृत्यैव समाधेयतया तद्रीत्यैव वर्तते इदमि-त्यत्रापि तकारोपरि श्रूयमाणैकारात्परस्य इदंशब्दसंब-न्धिन इकारस्य लोपमङ्गीकृत्य सुसाधत्वात्। यत्र च पाणिनीयव्याकरणेनासाधुता न तत्र व्याकरणान्त-रेणापि साधुत्वमङ्गीकार्यमिति भगवद्भिर्महाभाष्यकारैरेव तत्र तत्र घण्टाघोषतया प्रतिपादितत्वात्। तस्मात् वर्तते इदमित्येव पदविभागः समञ्जसः। अन्ये तु जगद्वशेवर्ततेदमित्यत्र वशे अवर्तत इदमिति लङन्ततां स्वीकृत्य एङः पदान्तादति इति पूर्वरूपेण वशे इत्यत्र शकारोपरिश्रूयमाणैकारस्य अवर्ततेत्यत्रत्यप्रथमाकारे परे पूर्वरूपे अन्त्याकारस्य इदंशब्दसंबन्धीकारेण गुणे जगद्वशेऽवर्ततेदमिति सिध्यतीति वदन्ति। तत्र शब्द-साधुतायामपि लङः अनद्यतनभूतार्थद्योतकत्वेन भगवतः वशे जगत्पूर्वमवर्तत इदानीं तु नास्तीति प्रतीतेः अर्थासाधुत्वात् असमञ्जसमिति हृदयम्।

समासेऽनञ्पूर्वे क्त्वो ल्यप् समासे अनञ्पूर्वे क्त्वः ल्यप् इति पदानि। अनञ्पूर्वे समासे विद्यमा-नस्य क्वाप्रत्ययस्य ल्यबादेशः स्यात्। नमः कृत्वा इत्यत्र नमःशब्दस्य कृत्वा इति त्वाप्रत्ययान्तेन समासे क्त्वा इत्यस्य ल्यबादेशे लपयोर्निवृत्तौ नमः कृ य इति स्थिते ह्रस्वस्य पिति कृति तुक् इति तुगागमे नमःकृत्य, विसर्गस्य सत्वे नमस्कृत्य।

430. 9. D. 6.

असिद्धपरिभाषार्थविचारः

Paper. 5 Foll. 9¾ × 5 inches. 14 lines

in a page. Telugu script. Old. Good. Good writing.

A discussion on the meaning of the Paribhāṣā or rule for interpretation *viz.* असिद्धं बहिरङ्गमन्तरङ्गे. This Paribhāṣā is said to have been implied in Pāṇini's sūtra वाह ऊठ् (6-4-132).

Complete.

Beginning :

परिभाषाविषये पक्षद्वयम्। यथोद्देशः, कार्यकाल-पक्षश्चेति। तत्र यथोद्देशे अस्या वाहऊठ्सूत्रस्थत्वेन त्रिपाद्या असिद्धत्वादप्रवृत्तिः। कार्यकालपक्षे तु त्रिपाद्यां प्रवर्तत एव। तेन नार्कुटः, नार्पत्यः इत्यादौ नृकुट्यां भव इत्यर्थेऽणि आदिवृद्धौ भवार्थकतद्धितनिमित्तकवृद्धेः बहिरङ्गतया अन्तरङ्गे विसर्गे कर्तव्येऽसिद्धत्वात् स्थानिनोऽभावे विसर्गस्याभावः। नृपतिशब्दादपि दित्यदित्येत्यपत्ये ण्यप्रत्यये सर्वं पूर्ववत्। न च कार्यकाल-पक्षे त्रिपाद्यां प्रवृत्तावपि अनयोः परस्परनिमित्तव्याघातात् परस्परस्योपमर्दकत्वम्। तथा हि बहिरङ्गपरिभाषा वृद्धेरसिद्धत्वं कुर्वती पूर्वलक्षणविषयाभावात्पूर्वात्रासिद्धमित्यस्याप्रवृत्तिं साधयति।

End :

मन्मतेऽपि अजर्वाः इति भाष्योदाहरणात् दूलोप-विषयेऽप्रवृत्तिरिति न ज्ञाप्यते। किंतु दूलोप इति शास्त्रोपयोगिशास्त्रविषये परिभाषाया अप्रवृत्तिरिति। एवं च रोरीत्यस्य दूलोपशास्त्रोपयोगितया परिभाषा-प्रवृत्या कर्त्रर्थं हर्त्रर्थमित्यत्र दोषाभावः स्पष्ट एव। एतेन भाष्यस्थरोरीतिप्रतीकमुपादाय त्रिपाद्यां बहिरङ्गासिद्धत्वादिति भाव इति विवरणोक्तमपास्तम्।

431. 9. D. 6.

असिद्धवत्सूत्रविचारः

Paper. 5 Foll. 9½ × 5 inches. 14 lines in a page. Telugu script. Old. Good. Good writing.

A treatise on the meaning of Pāṇini's sūtra असिद्धवदत्राभात् (6-4-22). The author's name is not known.

Complete.

Beginning :

असिद्धवदत्राभात्॥ असिद्धवत् अत्र आ भात् इति पदचतुष्टयम्। आभादित्यस्यैकपदत्वे पदत्रयं वा। तस्य तत्त्वे च उत्सर्गत एकवचनार्थकम्। आङ् अभिविधौ। पञ्चम्यर्थो व्यापकत्वम्। आङ् द्योतकः। व्यापकत्वं च स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। यथा वह्निमान् धूमादित्यत्र धूमनिरूपितव्यपकत्वं वह्नौ। भशब्दो भाधिकारसंबद्धशास्त्रपरः लक्षणया, व्याख्यानात्। भाधिकारसंबद्धशास्त्राधिकरणकालादेर्ग्रहीतुमशक्यतया तदधिकरणं तादात्म्यसंबन्धेन तदेव शास्त्रम्। तत्र भाधिकारसंबद्धशास्त्राधिकरणं हन्तेर्ज इत्यादि। तादात्म्यसंबन्धेन तत्र वर्तमानोऽभावो घटादीनाम्। तत्प्रतियोगित्वं घटादौ। तदप्रतियोगित्वं तत्र संबद्धासिद्धवत्पदे। तादृशपञ्चम्यन्तस्य स्वाश्रयसंबद्धत्वसंबन्धेनाध्याहृतशास्त्रेऽन्वयः। तथाच भाधिकारसंबद्धशास्त्र-समानाधिकरणात्यन्ताभावाप्रतियोगित्वाश्रयसंबद्धशास्त्रे कर्तव्ये इत्यर्थः। अत्रैतद्विषये। यत्तु अस्मिन्विषये इति, तन्न; अत्रशब्दस्यैतत्प्रकृतिकत्वात्।

End :

एवंचारभ्यमाणे इति सूत्रार्थविवरणायैवोक्तम्, न तु सूत्रस्थापनाभिप्रायेणेत्याशयः। यदि तु पूर्वत्रापकर्षे उदात्तादिपदे स्वरितत्वयोगविभागादिकल्पने गौरवमुच्यते, तर्हि समानाश्रयत्वनिरुक्त्यनित्यत्वज्ञापनवुग्युटाविल्यादिवार्तिकस्वीकारे तव मतेऽपि महद्गौरवमिति विचार्यमार्यैः।

432. 26. G. 24.

असिद्धवत्सूत्रविचारः

Palm-leaf. 2 Foll. 18¾ × 2 inches. 15 lines in a page. Grantha script. Old. Much injured. Good writing.

Similar to the above. The author whose name is not known salutes one Īśvarasūri and praises him as well-versed in Śāstras.

Incomplete.

Beginning :

गुरवे सर्वविद्यानां निधये सर्वसंपदाम् ।
भिषजे भवरोगाय दक्षिणामूर्तये नमः ॥
वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
. . . . . परमानन्दकन्दलं वन्दे ॥

वेदे केवलवेदिनं कलयते लोको ह्ययं वैदिकः
शास्त्रे शास्त्रिणमामनन्ति विबुधास्तत्रैव रूढं मुहुः ॥
(साहि)त्ये तु तदेकतानधिषणं संप्रोचिरे तद्विदः
श्रीमानीश्वरसूरिराड्विजयते सोऽयं यमेवं विदुः ॥

असिद्धवदत्राभात् ॥ आभादिति निर्देश आकडारादित्यनेन व्याख्यातः । सिद्धशब्दो निष्पन्नवचनः । न सिद्धः असिद्धः । यः पुनः सिद्धोऽपि सिद्धकार्यं न करोति स तेन तुल्यं वर्तत इति असिद्धवत् । किं पुनस्तत्? प्राधान्यात् कार्यमिति प्राप्तम् । शास्त्रं हि कार्यार्थत्वादप्रधानम् ।

End :

अनुदात्तोपदेशेत्यादौ तत्रैव कर्तव्ये तस्यैवासिद्धत्वकथने न किंचित् प्रयोजनमिति तत्तत्कार्यवि . . . . . रित्यागेनेदमसिद्धवद्भवति । अत्र कर्तव्य इत्येव . . . रामर्शादन्यस्मिन्नप्यन्यस्यासिद्धत्व ।

Fol. 2*b* contains a small portion of Keśavamiśra's Tarkabhāṣā.

433. 26. H. 1.

असिद्धवत्सूत्रविचारः

Palm-leaf. 13 Foll. 16½ × ⅞ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Similar to the above.

Complete.

Beginning :

असिद्धवदत्राभात् । आपादपरिसमाप्तेर्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रायमधिकारो वेदितव्यः । सिद्धशब्दोऽयं निष्पन्नवचनः । न सिद्धः असिद्धः । असिद्धेन तुल्यं वर्तते असिद्धवत् । सिद्धोऽपि सिद्धकार्यं न करोतीत्यर्थः । तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः । आभादित्याकारोऽयमभिविधौ वर्तते । भमभिव्याप्येत्यर्थः । आभादिति विषयनिर्देशार्थः—आभात् यत्कार्यं विधीयते तद्विषय इति । न च आभादिति विषयनिर्देशार्थकत्वे असिद्धवद्भवतां निर्देशाभावात् कार्यमात्रस्यासिद्धवद्भावप्रसङ्ग इति वाच्यम्, अधिकारादेवासिद्धवद्भावसिद्धेः । अत्रग्रहणं सामानाश्रयप्रतिपत्त्यर्थं भवति ।

End :

सौरी बलाकेत्यत्रापि द्वयोरकारयोर्यस्येति चेति लोपेऽपि उपधाया इति वचनसामर्थ्यात् भूतपूर्वगत्योपधात्वाश्रयणात् यलोपसंभवेन नात्रासिद्धत्वमङ्गीकर्तव्यम् । तस्मात् प्रतिपत्तिगौरवपरिहारार्थमेव सूत्रारम्भणमिति सिद्धम् ।

असिद्धवद्भवत . . . . . कारतः ।
स नः पायादपायेभ्यः श्रीगोरीमल्लिकार्जुनः ॥

The fly-leaf at the beginning contains the stanza of Manusmṛti (8—108) *viz.* यस्य दृश्येत सप्ताहात् etc.

434. 35. C. 63.

कविकल्पद्रुमः—वोपदेवकृतः

Paper. 19 Foll. 10 × 4 inches. 9 lines in a page. Devanāgarī script. Old. Slightly injured. Illegible writing.

A metrical compendium of verbal roots followed by meaning, by Vopadeva, son of Keśava of Bhiṣak family and pupil of Dhaneśa. He states that in writing this work he consulted the works of Indra, Candra, Kāśakṛtsna, Āpiśali, Śākaṭāyana, Pāṇini, Amara and Jainendra. 1754 roots are dealt with in this work after arranging them alphabatically according to their final letter. The author is assigned to the 13th Century A.D.

Complete.

Beginning :

शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥ १ ॥
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ २ ॥
मतानि तेषामालोच्य सर्वसाधारणः स्फुटः ।
धातुपाठः स्वदाद्याद्यक्रमादन्तादिमक्रमः ॥ ३ ॥
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च ।
धातवः पठिताः पाठसूत्रलोकागमस्थिताः ॥ ४ ॥
पदानि द्वे द्विकरणाद्यनुबन्धगणोदितम् ।
क्रमोच्चारणमात्रेण स्पष्टमत्रानुबन्धतः ॥ ५ ॥
परोऽनुबन्धः पूर्वेषामेकवाक्यस्थधातुषु ।
नाम्रेडितानुबन्धेषु न परेषां च मध्यमः ॥ ६ ॥
तत्राकारः सुखार्थोऽथ निष्ठाभावादिकर्म वेट् ।

End :

तद्रि सादे मोह उल दाहे लुल विमर्दने ।
स्यात्सलुतलगत्यामृशगतिस्तुत्योरशत्वने ॥
भिष् रुग्जये पुष् भजने लुष हिंसन इत्यसौ ।
धातूनामिह सौत्राणां द्विचत्वारिंशदीरिताः ॥

इति सौत्राः ॥

इति स्फीतः सप्तदशशत्या षट्कोनषष्ट्या ।
धातुस्कन्धैर्बुधासेव्यः कविकल्पद्रुमः फलन् ॥
विद्वद्वनेशशिष्येण भिषक्केशवसूनुना ।
तेने वेदपदस्थेन वोपदेवद्विजेन यः ॥

Colophon :

इति श्रीवोपदेवविरचितः कविकल्पद्रुमो नाम धातुपाठः समाप्तः । संवत् १८४२ ।

The last Fol. (*b*) contains the following stanzas :

आद्योऽन्तःस्थोऽप्यनन्तं दिशति फलमसावद्वितीयं द्वितीयस्तार्तीयीकः पवर्गप्रकृतिरपि बलेनापवर्गं प्रसूते ।
तुर्यश्चातुर्यभाजां दिशति च चतुरः श्रोत्रपान्थः पुमर्थान्
राम त्वन्नामवर्णा जगति कतिपयं कौतुकं तन्वते नः ॥
गङ्गा पापं शशी तापं दैन्यं कल्पतरुर्हरेत् ।
पापं तापं च दैन्यं च सद्यः साधुसमागमः ॥

435. 9. D. 6.

काकतालीयन्यायविचारः

Palm-leaf. 2 Foll. 9¾ × 5 inches. 12 lines in a page. Telugu script. Old. Slightly injured. Good writing.

A treatise explaining the meaning of the expression Kākatālīya used in the Mahābhāṣya (5-3-106) and subsequent works. The author's name is not known.

Complete.

Beginning :

केचित्तु काकतालीयो देवदत्तस्य वध इत्यत्र काकतालसमागमसदृशो दस्युदेवदत्तसमागमः काकतालेति समासार्थः । काकवधसदृशश्च प्रत्ययार्थः । समासार्थका + सदृशसमागमस्य प्रत्ययार्थे सादृश्ये प्रयोज्यतासंबन्धेनान्वयः । तस्याभेदेन देवदत्तवधेऽन्वयः । तथाच काकतालसमागमसदृशदस्युदेवदत्तसमागमप्रयोज्यो यः काकवधसदृशस्तदभिन्नो देवदत्तवध इत्याकारकः शाब्दबोधः । काकवधादौ काकतालसमागमादिप्रयोज्यतालाभस्त्वधिक एव । एवं च काकस्यागमनं तालस्य पतनं च यादृच्छिकम् । तेन च तालेन पतता काकस्य वधः कृतः । तथैव देवदत्तस्यारण्यगमनं, तत्र दस्यूनां च निपातोऽपि यादृच्छिकः । तैस्तस्य वधः कृत इति प्राचीनकथामुपजीव्य काकतालीयेत्यादिव्यवहारः ।

End :

बहुधनः सुखवत्कलत्र इत्यादौ उद्देश्यतावच्छेदकघटकस्य धनबाहुल्यस्य विधेयतावच्छेदकघटककलत्र सुखादौ तथान्वयदर्शनादिति न किंचिदेतत् ।

436. 8. F. 74.

कारकनिरूपणम् —अमरचन्द्रकृतम्

Paper. 6 Foll. 10 × 5 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

A metrical exposition of Kārakas or syntax in Sanskrit in 76 anuṣṭubh verses. The author's name is not mentioned in the MS. However, on a comparison with the Nos. 365 and 366 of the Des. Cat. of Bhandarkar Oriental Institute Vol. II, it is known that the author was Amaracandra.

Complete.

Beginning :

कारकाणि कर्तृ कर्म करणं संप्रदानकम् ।
अथापादानमाधारः षट् संबन्धस्तु सप्तमः ॥ १ ॥
उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट् ।
उक्तेषु प्रथमैव स्यादनुक्तेषु यथाक्रमम् ॥ २ ॥
कर्मणि द्वितीया कर्तृकरणयोस्तु तृतीयका ॥
संप्रदाने चतुर्थी स्यादपादाने तु पञ्चमी ॥ ३ ॥
आधारे सप्तमी संबन्धे तु षष्ठीविभक्तयः ।
इह संक्षेपतः प्रोक्ता वक्ष्यन्तेऽग्रे सविस्तरम् ॥ ४ ॥

End :

जन्यजनकसंबन्धे जगतः पितरौ यथा ।
वध्यवधकभावे तु यथा कंसस्य हिंसकः ॥ ७३ ॥
भोज्यभोजकभावे स्यादहेर्भोक्तास्ति बर्हिणः ।
धार्यधारकभावे तु यथा छत्रस्य धारकः ॥ ७४ ॥
जिनो जयति जैनेन क्रियते प्राणिनां दया ।
स्नानीयं स्नान्यनेनेति दानीयो ऽस्मै तु दीयते ॥७५॥
बिभेत्यस्मादसौ भीम-
स्तस्मिन्नास्यत आसनम् ।
गोमान् सन्त्यस्य गावो हि
प्रोक्तान्युक्ता . . . न्यहो ॥ ७६ ॥

Colophon :

इति श्रीकारकनिरूपणं संपूर्णम् ।

The scribe and date of the MS.

पत्रपुरवासिभटवासुदेवात्मजेन नथुरामेण लिखितमिदं पुस्तकमात्मपठनार्थम् । संवत् अष्टादश ८८ शके १७६४ प्रवर्तमाने दक्षिणायनगते श्रीसूर्ये मासोत्तमे मासे शुभकृति ज्येष्ठमासे कृष्णपक्षे तिथौ अष्टम्यां भौमवासरे ।

437. 10. E. 28.

कारकवादः—मौनि-श्रीकृष्णभट्टकृतः

Paper. 27 Foll. 12½ × 4 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a dissertation on the meaning of Kārakas and their place in a sentence in accordance with the view of grammarians. The author S'ri-Kṛṣṇabhaṭṭa of the Mauni family was the son of Raghunāthabhaṭṭa and grandson of Govardhanabhaṭṭa. His brother Jayakṛṣṇabhaṭṭa wrote the Sumanoramā, a commentary on Bhaṭṭojidīkṣita's Siddhāntakaumudī. The Vṛttidīpikā, Tarkacandrikā and Sphoṭacandrikā are among his other works. The work has been printed in the Gujarati Press, Bombay with the title Laghuvibhaktyarthanirṇaya.

Incomplete.

Beginning :

कारुण्यवर्णजलदं फलदं तपसां सताम् ।
नीलोत्पलदलच्छायं निर्मायं धाम कामये ॥
तर्कव्याकृतिमीमांसापरिशीलनशालिना ।
मौनिश्रीकृष्णभट्टेन विभक्त्यर्थो विविच्यते ॥

अथ सुब्विभक्तीनामर्थो विविच्यते । तत्र सुत्वं स्यौजसमौडित्याद्यनुशासनानुशासितप्रत्ययत्वम् । तार्किकास्तु प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधकविभक्तित्वं सुपूत्वम् । तिङस्तु स्वार्थभावनान्वयिन्येव स्वार्थसंख्यामवबोधयन्ति, न तु स्वप्रकृत्यर्थ इति तेषां व्युदास इति वदन्ति । तन्न, पचतिकल्पं देवदत्त इत्यादौ प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधकत्वाभावेनाव्याप्तेः । उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते इत्यादौ उष्ट्रासनानीव देवदत्तकर्तृकान्यासनानि, हतशयनानीव देवदत्तकर्तृकशयनानीति बोधात्, भाष्ये धात्वर्थे संख्यान्वयस्य स्वीकृतत्वात्, स्वप्रकृत्यर्थभावनाधर्मिकस्वार्थबहुत्वसंख्यान्वयबोधकतिङ्विभक्तिष्वतिव्याप्तेश्च । विभक्तित्वं तु विभक्तिश्च प्राग्दिशो विभक्तिः इत्यनुशासनाभ्यामनुशासितसंज्ञावत्त्वम् ।

End :

यदपि शब्देन्दुशेखरे—यत्तु ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायां तु परत्वात् कर्मत्वम् । एवं चेप्सितमात्रे ईप्सिततमे वा शेषत्वेन विवक्षिते षष्ठ्येव । तत्र शेषत्वेन विवक्षितत्वातिरुक्तस्येप्सितमत्वमात्रस्य दुर्वचत्वात् । प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यफलाश्रयत्वस्यैवात्र सत्त्वेन वारयतिवैलक्षण्यादित्युक्तम् । तदप्यसमञ्जसम् ।

438. 24. M. 11.

कारकसंग्रहः

Palm-leaf. 2 Foll. 14½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

An elementary grammar dealing with Kārakas and kindred subjects in Sanskrit. The author's name is not known.

Incomplete.

Beginning :

सुबन्तं च तिङन्तं च पदं द्विविधमिष्यते ।
रामादिश्च भवत्यादिः सुतिङन्ते प्रकीर्तिते ॥
सुबन्तं त्रिविधं प्रोक्तं योगरूढोभयात्मकम् ।
पाचकादि तु योगं स्याद्रूढं घटपटादिकम् ॥
योगरूढं पङ्कजादि तत्स्वरूपं निगद्यते ।
पदस्य यस्यावयवैरर्थो ज्ञेयो भवेद्धि तत् ॥

योगं रूढं तु तज्ज्ञेयं यद्रूढयैवार्थबोधकम् ।
योगरूढं तु तज्ज्ञेयमुभाभ्यामर्थबोधकम् ॥
समस्तव्यस्तभेदेन पुनर्द्विविधमिष्यते ।
राज्ञः पुरुष इत्येतद्व्यस्तं स्याद्राजगतः पदम् ॥
तदेव षष्ठ्या हीनं चेत्समस्तं पदमिष्यते ।
एकं त्वेतत्पदं भिन्नं सप्तधा ह्यष्टधाथवा ॥
प्रथमा च द्वितीया च तृतीयाथ चतुर्थ्यपि ।
पञ्चमी षष्ठीसप्तम्यौ प्रथमा तु त्रिधा भवेत् ॥

End :

सप्तम्यपि त्रिधाधारनिमित्तविषयैरपि ।
विषये सप्तमी मोक्षे स्पृहाधारे तु सा भवेत् ॥
भूमौ घटो निमित्ते तु द्वीपिनं हन्ति चर्मणि ।
एवं सुबन्तं सर्वत्र ज्ञेयं बोधकुतूहलैः ॥
तिङन्तमेकदेशेन ज्ञेयं दशलकारतः ।

* * * * *

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेष्वपि सर्वेषु यन्न व्येति तदव्ययम् ॥

439. 24. M. 11.

क्रियामाला

Palm-leaf. 21 Foll. 14½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

This is an anonymous work on grammar citing the conjugational forms of some of the important roots. The work is useful to beginners in Sanskrit.

Complete.

Beginning :

लङ्वर्तमाने नित्यं स्याद्भूते लङ्लुङ्लिटस्तथा ।
विध्याशिषोस्तु लिङ्लोटौ लृङ् लृट् लुट् च भविष्यति ॥
परस्मैपदी—भू सत्तायाम् ।
लङ् भवत्यभवल्लुङ् स्याल्लोड् भवत्वथ लिङ् भवेत् ।
आशीर्लिङिति भूयाच्च लिङ् बभूव ततः परम् ॥
लुङभूल्लुट् च भविता ह्यभविष्यत्ततो लृङि ।
भविष्यति लृडित्येवं भू सत्तायां विधीयते ॥

वर्तमाने लट् । भवति । भवतः । भवन्ति । भवसि । भवथः । भवथ । भवामि । भवावः । भवामः । लिट् । बभूव । बभूवतुः । बभूवुः । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

End :

अथ तिङ्प्रत्यया लिख्यन्ते—

धातवो दशविधाः—भ्वादिगणः । अदादिगणः । जुहोत्यादिगणः । दिवादिगणः । स्वादिगणः । तुदादिगणः । रुधादिगणः । तनादिगणः । क्र्यादिगणः । चुरादिगण इति । सर्वेषां धातूनां दश लकाराः । वर्तमाने लट् । भूतार्थे लिट् लङ् लुङ् । भविष्यदर्थे लुट् लृट् लृङ् । विध्याशिषोः लोट् लिङ् । प्रथमपुरुषः । मध्यमपुरुषः । उत्तमपुरुषः । प्रथमपुरुषैकवचनम् । प्रथमपुरुषद्विवचनम् । प्रथमपुरुषबहुवचनम् । एवं सर्वत्रोन्नेयम् ।

The fly-leaf added at the beginning reads the following :

"पूर्वं रामतपोवनानि गमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसंभाषणम् ।
वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चा . . . . . ."

440. 20. I. 6.

क्रियामाला

Palm-leaf. 3 Foll. 13½ × 1 inches. 6

lines in a page. Grantha script. Old. Much injured. Clear writing.

Incomplete.

441. 21. A. 16.

क्रियामाला

Palm-leaf. 6 Foll. $13\frac{3}{4} \times 1\frac{1}{2}$ inches. 9 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

14 extra leaves are added at the end. They contain some stray verses from the Nāmaliṅgānuśāsana with Telugu meaning.

442. 21. A. 18.

क्रियामाला

Palm-leaf. 2 Foll. 17 × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Incomplete.

443. 25. L. 37.

क्रियामाला

Palm-leaf. 19 Foll. 14 × 1 inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants the beginning and end.

The former owner of the MS.—Subbarāyan.

444. 25. N. 25.

क्रियामाला

Palm-leaf. 2 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Incomplete.

445. 26. E. 9.

क्रियामाला

Palm-leaf. 13 Foll. $14\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Incomplete.

The scribe adds:

"शठकोपस्य तातेन वेंकटार्यस्य सूनुना ।
श्रीरामाचार्येण लिखिता क्रियामाला शुभक्षणे ॥"

446. 27. F. 65.

क्रियामाला

Palm-leaf. 2 Foll. $14\frac{3}{4} \times 1$ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Incomplete.

The following witty stanza is found at the end:

"अणोरणीयान् महतो महीयान्
मध्यो नितम्बश्च यदङ्गनायाः ।
तदङ्गहारिद्रविलेपनाया
यज्ञोपवीतं परमं पवित्रम् ॥"

447. 28. A. 15.

क्रियामाला

Palm-leaf. 2 Foll. $12\frac{1}{2} \times 1$ inches.

6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

448. 29. C. 20.

क्रियामाला

Palm-leaf. 14 Foll. 12 × 1 inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

449. 29. F. 13.

क्रियामाला

Palm-leaf. 2 Foll. $13\frac{3}{4}$ × $1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Incomplete.

450. 21. A. 27.

गजसूत्रवादार्थः—वेङ्कटाचार्यकृतः

Palm-leaf. 20 Foll. $16\frac{1}{4}$ × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A controversial discussion on Pāṇini's Sūtra—णेरणौ यत्कर्म etc. (1-3-67) which is also called Gajasūtra. The author Veṅkaṭācārya was the son of Aṇṇayācārya and grandson of S'rīnivāsatātācārya of S'āṭhamarṣaṇa family. He was the disciple of his paternal uncle called S'rīnivāsācārya. His father Aṇṇayācārya is described in the colophon as an expert in all S'āstras including arts—music, dance etc. The work is divided into two parts, the first being स्वसिद्धान्तसमन्वय and the second भट्टोजिदीक्षितमतनिरसन. From the stanza read after the colophon of the second part, it is evident that the author condemns the view of Bhaṭṭojidīkṣita and supports the view of Kaiyaṭa on the interpretation of this Sūtra. The work has been printed and published by late Mahāmahopādhyāya R. V. Krishnamachariar in 1909. The India Office Library Catalogue in No. 4992 presumes that the sūtra 1-3-67 of Pāṇini is called Gajasūtra, possibly by reason of the enormous mass of comments on it. It is also reasonable to say that the title is due to the illustration *viz.*, आरोहयते हस्ती found in commentaries.

Complete.

Beginning :

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरःस्थलं बिभ्रद्वस्तु स्वस्तिकृदस्तु नः ॥

इह खलु णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने इत्यनेनाण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकानाध्यानार्थकण्यन्ताव्यवहितोत्तरवर्तिलत्वमुद्देश्यतावच्छेद-कीकृत्य आत्मनेपदं विधीयत इति सैद्धान्तिकी पद्धतिः । तथाहि—प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषाबलात् णेरित्यनेन ण्यन्तादिति लब्धमात्मनेपदाक्षिप्तलकारेण संबध्यते । तस्मादित्युत्तरस्येत्यनुशासनाच्चाव्यवहितोच्चारणविषयत्वं पञ्चमीबलाल्लभ्यते । तथाच ण्यन्ताव्यवहितोच्चारणविषयलकारत्वमुद्देश्यतावच्छेदकं पर्यवसितम् । तस्मात्तस्य तथात्वेऽतिप्रसङ्ग इति तद्व्यावृत्तये अणौ यत्कर्म णौ चेदिति स कर्तेति च भागाभ्यामण्यन्तकर्मातिरिक्तकर्माराहित्यमण्यन्तकर्मकर्तृकत्वं चोद्देश्यतावच्छेदककोटौ निविशते ।

End of the first Pariccheda :

श्लोकक्रमे तु पूर्वश्लोके नैरर्थक्यशङ्का स्थिता । तत्परिहाराय परस्यानन्तरभाष्यस्यार्थं संगृह्य भगवति श्रीनिवासे समर्पणनिगमनपरोऽयं श्लोकः—

प्रभवति न चाप्येषा दोषाय कर्मवदित्यदः
प्रसरति यतः कर्मस्थार्थेषु धातुषु नान्यतः ।
इह पुनरनाध्यानार्थोक्त्या फलिष्यति कर्तृग-
क्रियविषयको योगः श्रीश्रीनिवास निशम्यताम् ॥

Colophon :

इति श्रीशठमर्षणकुलतिलकस्य सकलवेदान्तविद्यानिषद्यायितहृदयकमलश्रीनिवासतातार्यनन्दनस्य भरतगान्धर्वकलानुबन्धबन्धुराष्टभाषाभूषितचतुर्विधकविता-निर्वहणधूर्वहस्य पूर्वोत्तरमीमांसापारावारपारीणस्य आन्वीक्षकीव्याकरणशिक्षणदक्षिणस्य श्रीमदण्णयार्यदीक्षितस्य नन्दनेन तदनुजसर्वतन्त्रस्वतन्त्रश्रीनिवासार्यकरुणाकटाक्षलब्धविद्याविकासेन वेङ्कटदासेन कृते गजसूत्रवादार्थे भट्टोजिदीक्षितमतनिरसनं नाम प्रथमः परिच्छेदः ।

Here the title भट्टोजिदीक्षितमतनिरसनं नाम is apparently wrong. It should be स्वसिद्धान्तसमन्वयो नाम as found in other MS. noticed in next number and in printed edition.

End :

तथा सिद्धान्तपारावारपारदृश्वनां कैयटादीनां यथार्थभणितिषु प्रमादत्वकल्पनं महानयमष्टमः प्रमादः, तेषामप्रमत्तत्वात् । यत्तु

भृत्यादीनां परित्यागात् शुद्धाभेदपरिग्रहात् ।
कर्मवाक्यस्य तादर्थ्यवर्णनान्निस्तरेत् सुधीः ॥

इति स्वमतोद्घाटनम्, तत्रेदं वक्तव्यम्—

दर्शने साधनं कर्म स्वीकर्तव्यं मनीषिभिः ।
व्यावृत्तिश्चापि कर्तव्या प्रकृतिप्राप्तकर्मणः ॥
न शुद्धाभेदविज्ञानं प्रमाणपथमृच्छति ।
सिद्धान्तरीतिरुक्तानुश्रूयतां तत्त्वतस्ततः ॥

तथाच अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकाण्यन्तकर्मकर्तृकानाध्यानार्थकण्यन्ताव्यवहितोत्तरवर्तिलत्वमुद्देश्यतावच्छेदकीकृत्य आत्मनेपदविधानमिहेति सिद्धम् ।

Colophon :

इति श्रीशठमर्षणकुलतिलकस्य सकलवेदान्तविद्यानिषद्यायितहृदयकमलश्रीनिवासतातार्यनन्दनस्य भरतगान्धर्वकलानुबन्धबन्धुराष्टभाषाभूषितचतुर्विधकविता-निर्वहणधूर्वहस्य पूर्वोत्तरमीमांसापारावारपारीणस्य आन्वीक्षकीव्याकरणशिक्षणदक्षिणस्य श्रीमदण्णयाचार्यदीक्षितस्य नन्दनेन तदनुजश्रीनिवासार्यकरुणाकटाक्षलब्धविद्याविकासेन वेङ्कटदासेन कृते गजसूत्रवादार्थे भट्टोजिदीक्षितमतनिरसनं नाम द्वितीयः परिच्छेदः ।

णेरणावितिसूत्रस्थभट्टोजिगजपीडितम् ।
भाष्यस्वरसिंहेन कैयटं मोचयाम्यहम् ॥

451. 33. J. 10.

गजसूत्रवादार्थः—वेङ्कटाचार्यकृतः

Palm-leaf. 42 Foll. 15½ × 1¼ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete.

Colophon of the first part.

इति श्रीशठमर्षणकुलतिलकस्य + गजसूत्रवादार्थे स्वसिद्धान्तसमन्वयो नाम प्रथमः परिच्छेदः ।

Date of copying : 4th day of the Āvaṇi month in the year Siddhārthi.

452. 8. F. 24.

गजसूत्रवादार्थः—गणपतिशास्त्रिकृतः

Paper. 2. Foll. $7\frac{7}{8} \times 5\frac{7}{8}$ inches. 20 lines in a page. Grantha script. Old. Injured. Good writing.

This is another work on the same subject as described in previous number: by Mahāmahōpādhyāya Gaṇapatiśāstri of Paññānāḍu, Tanjore Dt.

Incomplete.

Beginning:

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने । अनेन ण्यन्तस्य धातोरात्मनेपदं विधीयते । अत्र चत्वारि वाक्यानि । णेरिति प्रथमम् । अणौ यत्कर्म णौ चेदिति द्वितीयम् । स कर्ता इति तृतीयम् । अनाध्याने इति तुरीयमिति । तत्र णेरिति प्रत्ययग्रहणेन तदन्तग्रहणम् ।

End:

अत्र केचित्—दर्शयते भृत्यान् राजा इति भाष्योदाहरणात् अध्यारोपितप्रेषणपक्षमाश्रित्य द्वितीयपर्वण्यात्मनेपदम् । अणौ यत्कर्म णौ चेदित्यत्र कर्मपदस्य क्रियावाचकत्वेन अणौ या क्रिया सैव चेत् ण्यन्तेनोच्यत इति वाक्यान्तरस्वीकारेऽपि एवकारस्य नान्ययोगव्यवच्छेदोऽर्थः । किंतु अयोगव्यवच्छेद एवार्थ इति वदन्ति ।

453. 26. C. 24.

तद्धितप्रत्ययमाला

Palm-leaf. 5 Foll. 13 × 1 inches. 6 lines in a page. Grantha script. Old. Much injured. Clear writing.

Mentions the Taddhitapratyayas ordained in Pāṇini's sūtras and gives illustrations thereof.

Incomplete.

Beginning:

सामान्यो यः स भावाख्यस्तद्धितस्त्रिविधो मतः ।
समर्थानां प्रथमाद्वा अनेकेषां परस्परम् ॥

पदार्थानां साकाङ्क्षाणां . . . . योग्यानां प्रथमादेव पदात विविधास्तद्धितप्रत्यया: संभवन्ति । तत्र तद्धितप्रत्ययास्तावत् . . . . इलच्, श, न, ण, र, व, वलच् ।

End:

अध्वर्योर्भाव: आध्वरम् । अण्प्रत्यय: । द्विहायनस्य भावो द्वैहायनम् । त्रैहायनम् । यूनो भाव: यौवनम् । स्थविरस्य भाव: स्थाविरम् । मार्दवम् ।

The former owner of the MS.—Vīrarāghavatātācārya of Conjeevaram.

454. 28. A. 15.

तद्धितप्रत्ययमाला

Palm-leaf. 8 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 5 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is different from the above though the subject is the same.

Complete.

Beginning:

मतुप्, वलच्, इलच्, लच्, षः, शः, नः, णः, उरच्, इनच्, युन्, विनिः, निः, इतिः, ठन्, आलुच्, रः, ऊलः, चेलुः, चूलः ।

End:

अतिशयेन पचति पचतितराम् । एवं त्रिंशदन्यतद्धिता: ।

Colophon:

इति तद्धिता: समाप्ता: ।

The former owner of the MS.—Pramuktilingam of S'ivapuram. Two extra leaves added in the beginning contain some conjugational forms of the root भू.

455. 21. H. 17.

तद्धिताधिकारक्रमः

Palm-leaf. 2 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

A small metrical work mentioning the Sūtras of Pāṇini relating to Taddita-prakaraṇa for the sake of convenience of young students. The author's name is not known.

Complete.

Beginning :

तद्धिताधिकारक्रमः ।
तस्यापत्यं तेन रक्तं नक्षत्रेण युतं तथा ।
दृष्टं साम वृतो रथस्तत्रोद्धृतममत्रतः ॥
स्थण्डिलात्संस्कृतं भक्षाः सास्मिन्सास्य च देवता ।
तथा तस्य समूहश्च विषयो देश एव च ॥
सोऽस्यादिरिति संग्रामे प्रयोजनतयोद्धृतः ।
तदस्यां प्रहरणमित्यपि सास्यां क्रिया घञः ॥
तदधीते च तद्वेद तदस्मिन्नस्ति देशके ।
तेन निर्वर्तितं तस्य निवासोऽदूरतो भवः ॥

End :

तेन तुल्यमथो तत्र तस्येव च तदर्हति ।
तस्य भावश्च धान्यानां भवने इयतः परम् ॥
भिन्नभिन्नप्रत्ययानां विधिरर्थं विशेषके ।
विशेषप्रकृतौ चापि कथितास्तद्धिताः पुनः ॥
मत्वर्थीया विभक्तिश्च दिक्शब्देभ्यस्ततः परम् ।
काधिकारस्तथा ज्ञातेऽनुकम्पायां च कुत्सिते ॥
अल्पे ह्रस्वे चैत एव इवे प्रतिकृतौ तु कन् ।
प्रकृत्यर्थादितो भिन्नाः प्रत्ययार्था विशेषतः ॥

Colophon :

इति तद्धिताधिकारः ।

Then the following stanzas are written :

"गुणानसंख्यान्नित्यानि षट् कर्माणि नरोत्तम ।
द्रव्यपङ्क्तिं च संदृश्य त्वय्यहं विस्मयं गतः ॥
सद्गुणः समवायित्वं द्रव्येष्वेवेति कथ्यते न्याये ।
अर्थिजनकल्पतरो चित्रं तव तत्तु सर्वभावेषु ॥"

456. 21. A. 19.

तरप्तमपौघसूत्रविचारः

Palm-leaf. 3 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Good. Good writing.

An explanatory commentary with discussion on the meaning of Pāṇini's Sūtra 1-1-22. The author's name is not found in this Manuscript. However the stanza found in the beginning leads to infer that the author might be Rāmabhadradīkṣita. The stanza is written on the salutation to Cokkanatha, and is generally found in the works of Rāmabhadradīkṣita. (Vide his Uṇādimaṇidīpikā No. 5675 of the Des. Cat. of Tanjore Palace Library Vol. X).

Complete.

Beginning :

फणिग्रामणिवाग्गुम्भप्राणनाडयदुक्तये ।
कलये शब्दकौमुद्याः कवये गुरवे नमः ॥

तरप्तमपौ घः। एतौ घसंज्ञौ स्त इति सूत्रार्थः। गौरितरा, गौरितमेत्युदाहरणम्। तथाहि—गौरशब्दात् स्त्रीत्वविवक्षायां षिद्गौरादिभ्यश्चेति ङीषि अनयोरतिशयेन गौरी आसामतिशयेन गौरीति विवक्षायां द्विवचनविभज्योपपदे तरबीयसुनौ, अतिशायने तमबिष्ठनाविल्याभ्यां सूत्राभ्यां गौरीशब्दात्तरप्तमपोः कृतयोरनेन सूत्रेण घसंज्ञायां सत्यां घरूपेति ह्रस्वे कृते गौरितरा गौरितमेति रूपसिद्धिः। न च तसिलादिष्वाकृत्वसुच इति पुंवद्भावः स्यादिति वाच्यम्, दर्शनीयतरेत्यादौ चरितार्थस्य पुंवद्भावस्य ब्राह्मणितरेत्यादौ जातेश्चेति पुंवद्भावनिषेधविषये चरितार्थेन परेण घरूपेति ह्रस्वेन गौरितरेत्यादावुभयप्रसङ्गे विप्रतिषेधे परं कार्यमिति बाधनात्। तदुक्तं वार्तिककृता—पुंवद्भावाद्ध्रस्वः खिद्घादिषु विप्रतिषेधेनेति। जातेश्चेति निषेधस्तसिलादिष्विति पुंवद्भावस्यापीति वृत्तौ स्थितम्। अत एव तत्र जातेश्चेति सूत्रे ब्राह्मणीपाशेत्युदाहृतम्। अतो गौरितरेत्यादौ पुंवद्भावं बाधित्वा ह्रस्वत्वं सिद्धम्।

End:

केचित्तु—तरबादयः स्वार्थिका अपि भवन्तीति सामान्येन ज्ञापकमाश्रित्य 'अहो महीयस्तव साहसिक्यम्' इति श्रीहर्षप्रयुक्तमीयसुन्प्रत्ययमपि साधयन्ति। न च प्रकरणोत्कर्षेण सूत्रे क्रियमाणे नदीतरेऽतिप्रसङ्गः। तरबिति रूपाश्रयायां घसंज्ञायामाश्रीयमाणायां प्रयोगे क्वचिदपि तरबिति रूपग्रहाभावादौपदेशिकतरबिति रूपस्य ग्राह्यतया प्रत्ययस्यैव तत्संभवात् नदीतरे तरबिति रूपस्योपदेशाभावात् घसंज्ञाया अप्रवृत्तेः। तस्मात्तरप्तमपौ घ इत्येव वक्तव्यमिति सुधीभिराकलनीयम्।

Colophon:

इति तरप्तमपौघसूत्रक्रोडार्थवादः।

The following stanzas are found after the colophon.

"संज्ञा च परिभषा च विधिर्नियम एव च।
अधिकारोऽतिदेशश्च षड्विधं सूत्रलक्षणम्॥
अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥"

457. 21. H. 15.

तर्कचन्द्रिका—मौनि-श्रीकृष्णभट्टकृता

Palm-leaf. 85 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

This work contains a set of Krodapatras on grammatical works, such as—Mahābhāṣyapradīpa, Siddhāntkaumudī, Praudhamanoramā, Laghuśabdaratna and Laghuśabdenduśekhara. The author Śrī-Kṛṣṇabhaṭṭa of the Mauni family was the son of Jānakī and Raghunātha and grandson of Govardhanabhaṭṭa. Jaya-kṛṣṇabhaṭṭa, the author of Subodhīnī, a commentary on the Siddhāntakaumudī, was his elder brother.

Complete.

Beginning:

नत्वा स्वीयपितामहं बुधवरं गोवर्धनं भक्तितो
नत्वा श्रीरघुनाथतातचरणौ श्रीजानकीं मातरम्।
ध्यात्वा व्यासपदाम्बुजं हृदि चिरं श्रीकृष्णभट्टाभिधो
मौनी संतनुते सतां सुखकरीं तर्कादिकां चन्द्रिकाम्॥

अत्र संहिताया अविवक्षणात्प्रगृह्यत्वे प्रकृतिभावाच्च संधिर्न भवति। स्वरसंधिस्तु न भवति, वर्णोपदेशे आजादिसंज्ञानामनिष्यादादिति कैयटः। नवीनास्तु

तच्चिन्त्यम्; वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्तमानानां यणादीनां सुद्धयुपास्य इयादौ तटस्थ इव उद्देश्यतावच्छेदकाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेर्दुर्वारत्वात्। अन्यथा तुल्यास्येत्यादौ सवर्णदीर्घो न स्यादित्याहुः। अत्रेयं चिन्ता—वर्णानुपूर्वीबोधके वर्णोपदेशे गुणादिप्रवृत्तौ अउण् इति अयुणिति वा स्यात्। तथा च इकारस्य अच् इण् इक्संज्ञा न स्यादित्यभिप्रायेणाजादिसंज्ञा न स्यादित्युक्तम्। न च लणित्यत्रानुबन्धान्तरे कर्तव्ये पुनर्णकारानुबन्धकरणाज्ज्ञापितया व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति परिभाषया औतोंशसोरितिवन्निस्तारः। ईदूदेद् द्विवचनमित्यादावसंदेहार्थतपरकरणेन ईदृशे विषये तस्या अप्रवृत्तिज्ञापनात्। अन्यथा तत्र तपरकरणं विनापि परिभाषयैव सिद्धौ किं तेनेति दिक्।

End:

इष्यते पुत्र इति। क्यचा तु न कर्तृप्रतीतिरिति। भिन्नार्थत्वात्। न च तत्रापि क्यबाक्षेपात् समानार्थत्वम्, लाघवात्पदद्वयघटितविग्रहे चरितार्थो विधिः पदत्रयघटितविग्रहे न प्रवर्तत इत्यभिप्रायात्। तस्मात् फलविशेषबोधोऽसंगत इति दिक्। स्पष्टं चेदमत्रैव सूत्रे आकरग्रन्थे इत्यलमनया अग्रे रचितयाप्यकृतवद्वास्मानया **तर्कचन्द्रिकया** कोविदचित्ताहलदिकया।

Colophon:

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजजानकीजानिरघुनाथभट्टसुतमौनिश्रीकृष्णभट्टरचिता तर्कचन्द्रिका।

अग्रे दर्शनाभावादसंपूर्णापि संपूर्णा।

458. 8. J. 44.

तारावलिः—कृष्णसुधीकृता

Paper. 15 Foll. 8 × 6½ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

A discussion on the meaning of the Sūtra अचो ञ्णिति (7-2-115) of the Aṣṭādhyāyī. It contains 27 arguments, and hence it is called Tārāvali. The author is Kṛṣṇasudhī.

The title तारावलि is written on the top of the MS.

Complete in 27 Vādas.

Beginning:

तारावलिः।

अचो ञ्णिति। अङ्गस्येत्यधिक्रियते। मृजेर्वृद्धिरित्यतो वृद्धिरित्यनुवर्तते। ञ् च ण् च ञ्णौ। तावितौ यस्य तस्मिन् ञ्णिति। एतच्चाङ्गाक्षिप्तप्रत्ययविशेषणम्। आक्षिप्तस्य शाब्दप्रतियोगित्वं नेति भट्टाचार्योक्तिस्तु प्रायिकी। अत एव आदिरन्त्येनेति सूत्रे आद्यन्तपदाक्षिप्तमध्यगानां संज्ञितया वाक्यार्थान्वयप्रतिपादनपरव्याख्यातृग्रन्थाः संगच्छन्त इति तत्त्वम्। प्रत्यय इत्यस्याध्याहारो वास्तु। अच इत्येतदङ्गस्येत्यस्य विशेषणम्। येन विधिरिति तदन्तविधिः। तथाच अजन्तस्याङ्गस्य वृद्धिः स्यात् ञिति णिति च प्रत्यये परे इति सूत्रार्थः संपन्नः। अस्य चोदाहरणं नायकः। पावकः। कारः। दारः। सारः इत्यादि।

अत्र चिन्त्यते। इदं सूत्रं मास्तु। नायकः पावकः कार इत्यादौ सर्वत्र सार्वधातुकार्धधातुकयोरिति गुणे कृते अनन्तरम् अत उपधाया इति उपधावृद्धौ इष्टरूपसिद्धेः। अकारान्ते तु न वृद्धिप्रसक्तिः, लोपेन बाधितत्वात्। एजन्ते तु आत्वं भवत्येव। तस्मादस्येगन्तमेव विषयः। तत्र च गुणे कृते उपधावृद्धया सिद्धमिष्टमिति सूत्रमिदं व्यर्थमिति प्रथमा।

अनेकपदघटितेषु प्रायः पदगौरवविचार एवेति भट्टाचार्योक्तिस्तु प्रायःपदघटितेवेति न चोद्यावकाशः। अत एव तत्र तत्र मात्रालाघवगौरवविचारपरव्याख्यातृग्रन्थसंगतिः। प्रक्रियालाघवं तु मात्रागौरवाभाव एव। किंचैतदन्यार्थकृतसूत्राननुष्ठानफलकतया हेयमेव। किंचैवं सिद्धान्तेऽपि वृद्धिर्न स्यादिति नात्र तदाश्रयितुं शक्यमिति उक्तप्रयोजनाय सूत्रमिदमावश्यकमेवेति सकलमनवद्यमिति सप्तविंशतिः।

Colophon:

मन्मथमीनविंशतितमदिने वात्स्येन कृष्णेन निर्मितं विलिखितं च समाप्तिमगमत्।

459. 35. C. 117.

दुर्घटवृत्तिः—शरणदेवकृता

Paper. 15 Foll. 8½ × 3¾ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

One fol. bearing the number 9 is missing.

This is a treatise on grammar trying to prove the correctness of the words which were used in classical works and yet held grammatically incorrect by some critics. The author S'araṇadeva states in the introductory verses that the work was composed in S'aka 1095=1173 A.D. and revised and published on his request by Sarvarakṣita. This work has been printed and published in Trivandrum Sanskrit Series No. 6 in 1909. In the preface of the edition the learned editor suggests that S'araṇadeva might be a disciple of Sarvarakṣita. S'araṇadeva quotes Rakṣita's Dhātupradīpa, Sarvarakṣita, Dhātupārāyaṇa etc.

Incomplete.

Beginning:

नत्वा शरणदेवेन सर्वज्ञं ज्ञानहेतवे।
बृहद्दुर्गकृताम्भोजकोशवीकासभास्वता॥
शाकमहीपतिवत्सरमाने एकनभोनवपञ्चविताने।
दुर्घटवृत्तिरकारि मुदे वः कण्ठविभूषणहारलतेव॥
वाक्याच्छरणदेवस्य छात्रोपाध्यायपीडया।
श्रीसर्वरक्षितेनैषा संक्षिप्य प्रतिसंस्कृता॥

किङिति च। कथं हनुह्वोरश्छन्दसीति, हृञ्धातोरिकि गुणनिषेधात् उच्चारणार्थैकारेणानङ्कत्वात् गुणाभावात्। उच्यते—अत एव निर्देशादिति रक्षितः। शबन्तस्यैकदेशस्योच्चारणार्थैकारेण वा निर्देशः। कथं नेनिजः नेनिजानीति? उच्यते—निज त्रयाणामिति गुणो नानेन बाध्यते, तस्यानिमित्तत्वात्, तन्निमित्तयोर्गुणवृद्ध्योरेव निषेधात्।

Colophon on Fol. 14.

इति सर्वरक्षितशरणदेवविरचितदुर्घटवृत्तौ भूपादः।

End:

जनि। कथं "जातं वंशे भुवनविदिते पुष्कलावर्तकानाम्" इति मेघः? उच्यते—वंश्यः प्रकृतिः, न तु वंश एव। स्पृहेः। 'कथं स्पृहणीया विभूतिः; पुष्पाणि स्पृहणीयानि' इति कर्मत्वम्? अनेन संप्रदानप्रसङ्गात्। उच्यते—ईप्सित.

460. 29. F. 16.

धातुरूपावलिः

Palm-leaf. 4 Foll. 15½ × 1¾ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Gives conjugational forms of some of the roots to give facility to the beginners in keeping them in memory.

Incomplete.

Beginning:

भू सत्तायाम् । परस्मैपदी । वर्तमाने लट् । भवति । भवतः । भवन्ति । भवसि । भवथः । भवथ । भवामि । भवावः । भवामः । लिट् । बभूव । बभूवतुः । बभूवुः । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

End:

लुङ् । अकृत । अकृषाताम् । अकृषत । अकृथाः । अकृषाथाम् । अकृढ्वम् । अकृषि । अकृष्वहि । अकृष्महि । लृङ् । अकरिष्यत । अकरिष्येताम् । अकरिष्यन्त । अकरिष्यथाः । अकरिष्येथाम् । अकरिष्यध्वम् । अकरिष्ये । अकरिष्यावहि । अकरिष्यामहि ।

461. 27. E. 13.

धातुरूपावलिः

Palm-leaf. 30 Foll. 15½ × 1¼ inches. 4 lines in a page. Telugu script. Old. Much injured. Good writing.

Wants the beginning.

End:

रूप वर्णक्रियायाम् । रूपयति । वर्ण वर्णक्रियाविस्तारगुणवचनेषु । वर्णयति । वर्णयांचकार । वर्णयिता । वर्णयिष्यति । वर्णयतु । अवर्णयत् । वर्णयेत् । वर्ण्यात् । अववर्णत् । अवर्णयिष्यत् ।

सारः संगृह्य लिखितो भ्वादिवर्णान्तधातुषु ।
अनेन प्रीयतां देवदेवो वैकुण्ठवल्लभः ॥

Six extra leaves are added at the end and they contain a few stray lines giving some conjugational forms of some roots unconnected each other.

462. 28. A. 3.

धातुरूपावलिः

Palm-leaf. 26 Foll. 16½ × 1⅛ inches. 5 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

463. 28. A. 5.

धातुरूपावलिः

Palm-leaf. 7 Foll. 13 × 1 inches. 6 lines in a page. Telugu script. Old. Slighly injured. Clear writing.

Incomplete.

464. 29. C. 20.

धातुरूपावलिः

Palm-leaf. 8 Foll. 12 × 1 inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

465. 21. Q. 15.

नामीतिसूत्रार्थविचारः

Palm-leaf. 5 Foll. 7¼ × 1¼ inches. 7 lines in a page. Malayālam script. Old. Good. Good writing.

Wooden boards are added to both sides.

A treatise discussing the meaning of the Sūtra नामि (6-4-3) and stressing its importance. The author's name is not known.

Complete.

Beginning:

नामि। नामीति षष्ठीबहुवचनं कृतनुट्कं गृह्यते। तस्मिन्परतोऽजन्तस्याङ्गस्य दीर्घो भवति। अग्नीनाम्, वायूनाम्, कर्तॄणामित्याद्युदाहरणम्। ननु किमर्थं नुडागमेन सह निर्देशः क्रियते। नुटीति वा आमीति वा सूत्रं क्रियताम्। तावतापि अग्नीनामित्याद्युदाहरणेषु दीर्घसिद्धेः। न चामीत्युक्ते अजन्तस्य नुटा व्यवधानादाम्परत्वाभाव इति वाच्यम्, तदागमास्तद्ग्रहणेन गृह्यन्त इति नुटोऽप्यामग्रहणेन ग्रहणादव्यवधायकत्वात्। अत्रोच्यते—यदि नुव्यजन्तस्य दीर्घो विधीयते तदा अनश्व इत्यादिनञ्समासे नञो नलोपे तस्मान्नुडचीति नुटि परतोऽकारस्य दीर्घः स्यात्।

End:

न च न इति लुप्तषष्ठीकं पदमावृत्य नान्तस्य नकारादावामि दीर्घविधानाच्चर्मणामित्यादौ नातिप्रसङ्ग इति वाच्यम्, आवृत्तस्यापि षष्ठ्यन्तस्य आमीति सप्तम्यन्तेनान्वयायोगात्। तस्मादामीत्युच्यमानेऽतिप्रसङ्गात् नामीत्येव सूत्रं कर्तव्यमिति सिद्धम्।

466. 22. P. 13.

नामीतिसूत्रार्थविचारः

Palm-leaf. 5 Foll. 15¾ × 1½ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

This is different from the above, though the subject is the same. The author's name is not known.

Complete.

Beginning:

नामि। अजन्तस्याङ्गस्य दीर्घः स्यात्, आमि सनुट्के परत इति सूत्रार्थः। रामाणां हरीणां शंभूनां कर्तॄणामित्यादीन्युदाहरणानि। अत्र ह्रस्वोपसूत्राद्दीर्घ इत्यनुवर्तते। दीर्घश्रुत्या अचश्चेति परिभाषाप्रवृत्तौ उपस्थितेनाच इत्यनेनाधिकृतस्याङ्गस्य विशेषणात्तदन्तविधौ अजन्तस्याङ्गस्य दीर्घ इत्यर्थः फलितः। ननु अचश्चेति परिभाषा न प्रवर्तते, सर्वत्र परिभाषाया अनिर्दिष्टस्थानिकविषयत्वात्। तथाहि—यत्र सार्वधातुकार्धधातुकयोरित्यादौ स्थानिनिर्देशो नास्ति तत्रैवैतत्परिभाषाप्रवृत्तिः। यत्र पुनः अचो ञ्णिति इत्यादौ अच इत्यादिस्थानिनिर्देशोऽस्ति न तत्र तत्प्रवृत्तिः। प्रकृते तु ह्रस्वोपसूत्राद्दीर्घग्रहणस्येव अण इत्यस्यानुवृत्तौ तेन चाङ्गस्य विशेषणे सति अणन्तस्याङ्गस्य दीर्घ इत्यर्थे पर्यवसन्ने अण इति स्थानिनिर्देशात् अचश्चेति परिभाषाया अप्रवृत्तौ कर्तॄणामित्याद्युदाहरणमसंगतमिति चेत्, सत्यम्।

End:

अनश्व इत्यादौ उत्तरपदावयवे नुटि लुप्तनकारस्य नञः अङ्गत्वासंभवान्नातिव्याप्तिः। नन्वेवमपि अक्षण्वानित्यादावतिव्याप्तिः। अक्षिशब्दान्मतुपि छन्दस्यपि दृश्यते इत्यनङादेशे अनो नुट् इति अनन्तात्परस्य मतुपो नुटि तस्य च प्रत्ययावयवत्वेन तस्मिन्परतः अक्षन्नित्यङ्गस्य नोपधाया इति सूत्रेण दीर्घप्रवृत्तेर्दुर्वारत्वादिति चेत्, न; न ह्यत्र नुट्परत्वमेवास्ति, नुटश्चैपादिकत्वेन नोपधाया इत्याङ्गं दीर्घशास्त्रं प्रत्यसिद्धत्वात्। सर्वविधीनां छन्दसि वैकल्पिकतया छान्दसत्वेनापि सुसाधत्वादिति सर्वमनवद्यम्।

467. 39. H. 7.

निपाताव्ययोपसर्गवृत्तिः—क्षीरस्वामिकृता, तिलककृतटीकासहिता

Paper. 50 Foll. 8¼ × 6⅝ inches.

14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a work enumerating the indeclinable words *viz*—Nipātas, Avyayas and Upasargas by Kṣīrasvāmin. The author, in his other works *viz.*, Kṣīrataraṅgiṇī and Amarakosodghāṭana commits himself as the author of six vṛttis on grammar. It is believed that the present work may be one of them. The work is followed by a gloss written by Tilaka. In introducing his commentary, Tilaka says that he is adorning learned scholars with a string of gems obtained by churning the milky ocean. By this metaphorical reference, the commentator evidently means to say that he intends to explain the words cited by Kṣīrasvāmin and to contribute suitable illustrations culled from well-known classical works. Aufrecht mentions Kṣīrasvāmin as the son of Īsvarasvāmin. This statement is confirmed in the introduction of the Amarakosodghāṭana (Printed in Poona Oriental Series No. 43) wherein the editor says that Kṣīrasvāmin is definitely mentioned in the Kavikāvyakālakalpanā as the son of Īsvarasvāmin. He also assigns the author to 1128 A.D. The India Office Library Catalogue also in No. 5022 describes the author Kṣirasvāmin as the son of Īsvarasvāmin. The six Vṛttis said to have been written by Kṣīrasvāmin are listed thus: 1. Nāmapārāyaṇa *alias* Amarakosodghāṭana, 2. Kṣīrataraṅgiṇī *alias* Dhātuvṛtti, 3. Nipātāvyayopasargavṛtti, 4. Amṛtataraṅgiṇī, 5. Nighaṇṭuvṛtti and 6. Gaṇavṛtti.

The MS. is a transcript made in 1931, from a codex of the Bhandarkar Oriental Institute, Poona, described in No. 427 of the Des. Cat. of MSS. Vol. II.

Complete in three Kāṇḍas.

Beginning:

नत्वेशं क्षीराब्धिप्रसूताव्ययरत्नमालया विदुषः ।
निजकुलतिलकस्तिलकस्तिलकयति निदर्शनेरेव ॥

द्योतका निपाता नामाख्यातयोर्धर्ममात्रव्यञ्जकाः । अत ऊर्ध्वं चादयो निपाता अधिक्रियन्ते । यत प्रायशो द्योतकाश्चाद्या निपातिताः । द्रव्यवृत्ति तु स्वराद्यमव्ययम् । प्रादयः प्रधानधात्वर्थविशेषकाः ।

कर्मप्रवचनीयास्तु क्रियासंबन्धभेदकाः ।
कुर्याद्यागतयो वृत्तौ कार्यार्थं सर्वमव्ययम् ॥

किंच,

इयन्त इति संख्यैषामर्थेयत्ता च नास्ति वै ।
प्रयोजनवशादेत्य निपतन्ति पदे पदे ॥

चः समुच्चयान्वाचयतुल्ययोगिताहेतुषु । समुच्चये गार्ग्यो वात्स्यश्चागतौ । पचति च पठति च चैत्रः । समाहारेतरेतरयोगविनियोगाः समुच्चय एव, अनेकस्यैकत्र प्रचयात् । गार्ग्यवात्स्यावहं त्वं च वृत्रहन् । अन्वाचये—भिक्षामट गां चानय । गवानयनमत्राप्रधानम् । तुल्ययोगितायाम्—ध्यातश्चोपस्थितश्च । हेतौ —ग्रामो न गन्तव्यः शीतं च । शीतात् कथं गच्छामीत्यर्थः । पूरणेऽप्याहुः—भीमः पार्थस्तथैव च । रात्रौ नव च नेत्र च । चो यद्यर्थे । त्वं चागमिष्यसि कृतार्थाः स्मः । त्वं यद्यागमिष्यसीत्यर्थः ।

Colophon in page 36:

इति निपाताव्ययोपसर्गवृत्तौ निपातकाण्डं प्रथमम् ।

Beginning of the 2nd Kāṇḍa *i.e.* Avyaya-kāṇḍa :

सत्त्ववृत्त्यव्ययम् । प्रायशः सत्त्ववृत्ति स्वराद्यमव्ययमित्यधिक्रियते । सत्त्वं द्रव्यम् । भेदकमिति यावत् । विशेष्यत्वं जातिगुणक्रियाद्रव्ययदृच्छाशब्दसंबद्धत्वात् ।

Colophon in page 58 :

इति निपाताव्ययोपसर्गवृत्तौ तिलककृतायां द्वितीयमव्ययकाण्डम् ।

Beginning of the 3rd Kāṇḍa *i.e.* Upasargakāṇḍa :

प्रपरा . . . . प्रतिपक्ष . . . अनन्तरक्रिया ।
प्रादिकर्मण्युपरमे दिग्योगैश्वर्यजन्मसु ।
नर्मप्रेम्णोः प्रकर्षेऽग्रे ज्ञाते प्रसवभूषणे ॥
दोषे नियोगेऽवसरे सेवासाहसशुद्धिषु ।
उपयोगे प्रकथनेऽनवधानबहुत्वयोः ॥
माने हिंसाशस्त्रनाम्नोर्वञ्चनार्थविपर्यये ।

प्र इत्ययमुपसर्ग आदिकर्मादिषु वृत्तः स्वार्थबलाद्धात्वर्थं बाधतेऽनुवर्तते विशिनष्टि वा । धातोरेव वानेकार्थस्य स सोऽर्थ उपसर्गैर्द्योत्यते । तत्रादिक्रियायाम् प्रक्रमते भोक्तुम् । वाक्यं प्रस्तौति । प्रारब्धं दक्षिणेन ।

End :

अनत्याधान उरसिमनसी । मध्येपदे निवचने च । उरसिकृत्य, अङ्गीकृत्येत्यर्थः । पक्षे उरसिकृत्वेत्यादि । नित्यं हस्तेपाणावुपयमने । हस्तेकृत्य, पाणौकृत्य, विवाह्येत्यर्थः । प्राध्वं बन्धने । प्राध्वंकृत्य, बन्धनहेतुकं . . . फल्यं कृत्वेत्यर्थः । जीविकोपनिषदावौपम्ये । जीविकाकृत्य उपनिषत्कृत्य, तत्तुल्यं कृत्वेत्यर्थः ।

Colophon :

इति निपाताव्ययोपसर्गवृत्तावुपसर्गकाण्डं तृतीयमिति भद्रम् । भट्टक्षीरस्वाम्युत्प्रेक्षितनिपाताव्ययोपसर्गीये तिलककृता वृत्तिः संपूर्णेति भद्रं पश्येम प्रचरेम भद्रमोमिति शिवम् ।

468. 21. S. 5.

पदमाला

Palm-leaf. 31 Foll. 7 × 1⅛ inches. 8 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Wooden boards are attached to both sides.

This is a small metrical work on grammer giving certain selected words derived from the roots when they are added with suffixes such as लुङ्, लिट्, सन्, क्त्वा. The work is followed by a gloss. The author's name is not known. The name Padamālā is not found anywhere in the MS. However from the first stanza of the work the name Padamālā is found appropriate. The work is the same as that described under R. No. 15313 of the Madras Govt. Oriental MSS. Library, wherein the work is called लुङादिरूपसंग्रहश्लोकाः ।

Incomplete.

Beginning :

नत्वा पुराणपुरुषं तदुरःस्थलस्था
मालेव या प्रतिपदोदितसूत्रबद्धा ।
माला सतां पदमयी हृदि भाति पुंसां
तां संदधामि सुभगंकरणीं सुरूपाम् ॥
लुङि लिटि सनि यानि क्त्वायङोः क्तक्त्वत्वोः
प्रतिपदविधिशिष्टानेकृकार्याश्रितानि ।
इह कतिपयवृत्तैः संग्रहीष्ये पदानि
प्रतिपदमथ तानि व्याकरिष्ये च किंचित् ॥

वैयाकरणिकया यः स्पृहयति सांश्लाघिनाय जनः ।
तिष्ठेत सतां सदसे स प्रतिपदमालभारिनिजकण्ठः ॥

तत्र तावदुपदेशक्रमेण लुङन्तानि प्रतिपदविहितानि संगृह्यन्ते—

आश्लिक्षन्निरपप्तदाह्रदलिपत्प्रादादपादास्थित
प्रत्यष्ठादुदगादपास्यदघसन्मा संसरत्प्राशिषत् ।
प्रास्तावीददिताधितारददरिद्रासीद्दरिद्रीच्च मा
प्राव्राजीदवधीदवोचदसिचत्प्राजागरीदश्वयीत् ॥ २ ॥

इह खलु लुङादिषूक्तेषु प्रत्ययेषु यानि प्रतिपदविहितकार्ययोगीनि पदानि तानि कैश्चिच्छ्लोकैः संगृह्यन्ते । श्लोकावसानेऽनभिज्ञानां प्रबोधनार्थं तत्तत्पदव्युत्पादकलक्षणप्रदर्शनमात्रं व्याख्यानं च तेषां क्रियते । तत्र यथाविधपदकदम्बकसंदर्भवाञ्छया श्लोकेषु यदुपसर्गपुरुषविशेषादिकमुपादीयते तस्य श्लोकाङ्गस्यादन्यत्प्रयोजनं नास्तीति वेदितव्यम् । यत्र तूपसर्गादीनां कार्यान्वयस्तत्र सोऽपि वक्ष्यते । आश्लिक्षदिति । आङ् आलिङ्गनद्योतनार्थः, श्लोकपूरणार्थश्च । श्लिषेर्लुङि शल इगुपधादिति क्से सिद्धे पुनः श्लिष आलिङ्गने इत्यस्य विधेर्नियमार्थत्वात् श्लिषेरालिङ्गन एव क्सो भवति । आश्लिक्षत्कन्यां देवदत्तः । आलिङ्गनादन्यत्र आश्लिषदिति भवति । अत्र पुषादित्वादङ् ।

End :

नशित्वेति । नशेः क्त्वाप्रत्यये रधादित्वात्पक्षे इडागमः । इडभावे मस्जिनशोर्झलि इति नुम् । जान्तनशां विभाषेति पक्षे नलोपः । विहाय हित्वा, विपूर्वस्य जहातेर्ल्यपि घुमास्थेत्यादिनेत्वे प्राप्ते न ल्यपीति प्रतिषेधः । ल्यबभावे जहातेश्च क्त्वि इति हिभावः । दधातेरपि क्त्वाप्रत्यये इदमेव रूपम्, दधातेर्हिरिति इत्वबाधनार्थं हिभावविधानात् । संसत्य संसाय, सनोतेः संपूर्वाल्ल्यपि तनोत्यादित्वात् वा ल्यपीत्यनुनासिकलोपे प्राप्ते तं बाधित्वा जनसनखनामित्यनुवृत्तौ ये विभाषेत्यात्वसद्भावाभावाभ्यां संसाय संसत्येति भवतः । आत्वाभावे वा ल्यपीत्यनुनासिकलोपः । स तु नकारान्तानां नित्यः । खात्वा खनित्वा, निखाय निखत्य । उदितो वेति खनेरिटि खनित्वा । तदभावे जनसनेत्यात्वात् खात्वा । निखत्य निखायेति ये विभाषेत्यात्वविकल्पात् सिध्यतः ।

469. 25. E. 15.

परमलघुमञ्जूषा—नागेशकृता

Palm-leaf. 39 Foll. 17½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Nāgesa herein summarizes his bigger work called Laghumañjūṣā, a work on philosophy of grammar according to the school of Pāṇini. It begins with Sphoṭavāda and deals with the nature of S'ābdabodha according to grammarians.

Complete.

Beginning :

शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥

तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा । तत्रापि जातिव्यक्तिभेदेन पुनः षोढा । अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेति संकलनयाष्टौ स्फोटाः । तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधकत्वात् । तेनैवार्थसमाप्तेश्च । तथाह भाष्यकारः—पदसमूहो वाक्यमर्थसमाप्ताविति । अस्य समर्थमिति शेषः । तत्र प्रतिवाक्यं संकेतग्रहासंभवात् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान् प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां

तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः । तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः ; प्रकृतिप्रत्ययास्तदर्थवाचका इति तदर्थः । उपसर्गनिपातधात्वादिविभागोऽपि काल्पनिकः । स्थानिनो लादयः, आदेशास्तिबादयः कल्पिता एव ।

End :

बहुव्युत्पत्तिभञ्जनमिति । अषष्ठ्यर्थबहुव्रीहौ प्राप्तोदक इत्यादौ पृथक्शक्तिवादिनां मते प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधात् तत्संबन्धिग्रामलक्षणायामुदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थलाभे प्राप्ते कर्त्रर्थकक्तप्रत्ययस्य कर्मार्थे लक्षणा । ततोऽपि समानविभक्तिकनामार्थयोरभेद एव संसर्ग इति व्युत्पत्त्या उदकाभिन्नं प्राप्तिकर्मेति स्यात् । उदकस्य कर्तृतया प्राप्तावन्वये तु नामार्थयोरभेदान्वयव्युत्पत्तिभङ्गः स्यादिति तात्पर्यम् । नामार्थप्रकारकशाब्दबुद्धिं प्रति विभक्त्यर्थोपस्थितिः कारणमिति व्युत्पत्त्यन्तरम् । तद्भञ्जनं च । मम तु पृथक्शक्त्यनङ्गीकारात् विशिष्टस्यैव विशिष्टार्थवाचकत्वात् नामार्थद्वयाभावान्न काप्यनुपपत्तिरित्यलम् ।

Colophon :

इति शिवभट्टसुतसतीगर्भजनागेशकृता परमलघुमञ्जूषा समाप्ता ।

The Scribe adds : Copied on the tenth day of Meṣa month of the year Parābhava.

470. 26. O. 10.

परमलघुमञ्जूषा—नागेशकृता

Palm-leaf. 23 Foll. 16½ × 1½ inches. 12 lines on a page. Grantha script. Old. Injured. Good writing.

Complete.

471. 33. J. 10.

परमलघुमञ्जूषा—नागेशकृता

Palm-leaf. 65 Foll. 16½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

472. 41. A. 44.

परिभाषापद्धति :

Paper. 30 Foll. 9¾ × 4 inches. 18 lines in a page. Devanāgarī script. Old. Slightly injured. Illegible writing.

The first leaf is broken in the left half.

This is a treatise on grammar of Hemacandra's school explaining various Nyāyas and Paribhāṣās used in the works relating to that school. The author whose name is not known, states that he is dealing with 57 Nyāyas which were actually cited by ancient authors and 67 Nyāyas which were arrived on consideration of general laws of interpretation. Besides these, he also deals with some Paribhāṣās which are implied in the Sūtras of grammar. He says that those who want to know much about these Nyāyas, may refer to a work called Nyāyamañjūṣā written by Hemahaṁsagaṇi, an expert in Haimavyākaraṇa. Aufrecht says that Hemahaṁsagaṇi was a pupil of Ratnaśekhara (1420 A.D.) and wrote in 1458 A.D. a work called Sudhīśṛṅgāravārtika, a commentary on Udayaprabhadeva's Ārambhasiddhi. In the Des. Cat. of Sanskrit MSS. of the Asiatic Society of Bengal, Vol. VI (page 60 of the

preface) Hemahaṁsagaṇi is said to have writen a commentary on the Paribhāṣās of Hemacandra school of grammar in the year 1457 A. D. at Ahmedabad. Most probably the Nyāyamañjūṣā referred to in this work may be the same. Therefore, it is clear that the present work must be later than 1457 A. D.

Beginning :

..... अत्र संज्ञेति । संज्ञाः स्वरव्यञ्जनाद्याः क्रियागुणद्रव्यजातिकाललिङ्ग ..... याः स्वं रूपं शब्दस्याशब्दंसंज्ञेत्यादयः । अत्रादिशब्दात्पञ्चम्या ..... येषु तेषु मध्ये यदत्र शास्त्रे उक्तं तदितो ज्ञेयम् । यच्चा ..... वैयाकरणतार्किकादिलोकेभ्यो ज्ञेयमिति भावः । तत्र संज्ञाः प्रकृते ..... यथास्थानं वक्ष्यन्ते । न्यायसंप्रदायस्त्वेवम्—नीयते संदिग्धोऽर्थो निर्णीयते ..... घञि निपातनात् न्यायाः । स्वेष्टसाधनानुगुणयुक्तयः । तथाहुः ..... तत्र ये श्रीसूरिभिः निरूपितास्ते प्रथममभिधीयन्ते । स्वं रूपं शब्दस्याशब्दसंज्ञा ।

2nd Fol.

न वर्णकल्पनं यथा—जेता इत्यादौ । धातोः नाम्यन्तत्वेन विशेषणमन्ते इति परिभाषया नामिनो गुणो ङितीति गुणः स्यात्; तथा एता इत्यादौ नामिमात्रस्यापि धातोः नाम्यन्तत्वकल्पनात् नामिनो गुणो ङितीति गुणः सिद्धः । नाम यथा—सर्वादेः स्मै स्मातौ इत्यत्र सर्वादेरित्यस्य स्वाद्यधिकाराक्षिप्तनामंविशेषणत्वात् विशेषणमन्त इति परिभाषया सर्वाद्यन्तस्य नाम्न इति न्यासकारव्याख्यानात् परमसर्वस्मै इत्यादावेव स्मादयः प्राप्नुवन्ति । परं सर्वस्मै इत्यादावपि सर्वशब्दस्य सर्वाद्यन्तत्वकल्पनात् स्मादायः स्युरिति । ज्ञापकं त्वस्य यन्तीत्यादौ इयूबाधनार्थं रिवर्णोरपूर्विति व्याविति इणो यत्वविधानम् । तद्धि धातोरिवर्णोवर्णस्येति इयादेशापवादः । इयादेशश्च इण श्वर्णान्तत्वकल्पनेवेति ॥ ५ ॥ प्रकृतिवदनुकरणम् ॥ ६ ॥

Fol. *22 b* :

न्यायानां बालबोधाय दिङ्मात्रमिह दर्शितम् ।
न्यायमञ्जूषावगाह्या विशेषार्थप्रथार्थिभिः ॥

विशेषतश्च न्यायानां ज्ञापकव्यासितात्पर्यादिकं हैमव्याकरणपारीणवैयाकरणशिरोमणिमहोपाध्यायश्रीहेमहंसगणिविरचितन्यायमञ्जूषाया विज्ञेयं विज्ञैरिति श्रेयः ।

अथ परितो व्याप्तां भाषां परिभाषां प्रचक्षते इति वचनात् सर्वत्र व्याकरणे उपयोगिन्यः परिभाषाः प्रदर्श्यन्ते । पञ्चम्या निर्दिष्टे परस्य । पञ्चम्या निर्दिष्टे यत्कार्यमुच्यते तत्परस्य स्थाने भवति । अतो भिस ऐस् । वृक्षैः ।

End :

Foll. 30 :

सर्वश्चर्मणा वृतः सार्वचर्मीणो वा रथः । कृतः पूर्वं कटोऽनेनेनि कृतपूर्वी कटमित्याद्या वृत्तयो भवन्ति । किं हि वचनान्न भवति ।

Colophon :

इति वरपरिभाषापद्धतिं जानतः स्याद्
द्रुततरमनपायं शब्दशास्त्रे प्रवेशः ।
न भवति परिभाषाज्ञानशून्यस्य लोके
व्यवहृतिपरिणद्धे कार्यजातेऽधिकारः ॥

परिभाषापद्धतिः ।

473. 28. G. 15.

परिभाषापाठ :

Palm-leaf. 2 Foli. 16½ × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a collection of the Paribhāṣās or subsidiary rules of interpretation as acknowledged in ancient commentaries on Pāṇini's Sūtras. Some of the Sūtras of the Aṣṭādhyāyī act themselves as Paribhāṣās which are called Paribhāṣāsūtras. The present work does not include them, but mentions only those which are not included in the Aṣṭādhyāyī. As Patañjali cites most of them in his Mahābhāṣya, they must have existed from the beginning of the Sūtra literature. Some MSS. attribute the authorship to Vyāḍi. As these Paribhāṣās were found scattered here and there in old works, certain unknown author might have collected them into a group. The order of the Paribhāṣās found in this work differs from that adopted by Nāgeśa in his Paribhaṣenduśekhara, but agrees with that adopted by Vaidyanāthadīkṣita in his Paribhāṣārthasaṁgraha wherein they are read in the order of pādas and adhyāyas of the Aṣṭādhyāyī. The total number of such Paribhāṣās comes to 125 of which 98 are attached to 8 adhyāyas of the Aṣṭādhyāyī and the rest are miscellaneous.

The MS. contains only 1 to 101 Paribhāṣās.

Beginning :

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ न हि कार्यी निमित्तत्वेनाश्रीयते । इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते । तदागमास्तदुग्रहणेन गृह्यन्ते । निर्दिश्यमानस्यादेशा भवन्ति । नानुबन्धकृतमनेकाल्त्वम् । वर्णाश्रये प्रत्ययलक्षणं नास्ति । क्वचिदेकदेशोऽप्यनुवर्तते । अर्थवद्ग्रहणे नानर्थकस्य । न वर्णग्रहणेषु । भाव्यमानेऽण् सवर्णान् न गृह्णाति ।

End :

पूर्वत्रासिद्धीयमद्विर्वचने । अनित्यमागमशासनम् । निमित्तापाये नैमित्तिकस्याप्यपायः ।

इत्यष्टमोऽध्यायः ।

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः । प्रधानाप्रधानयोः . . .

474. 23. F. 3.

परिभाषापाठः

Palm-leaf. 2 Foll. 16 × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Breaks off in the 101st. Paribhāṣā.

The fly-leaf at the end reads the following stanza :

"स्वामित्वाच्छ्रीशनारायण इति यशसा विक्रमाद्विष्टपानां श्रीमत्त्वाच्चक्रवर्त्वाज्जलनिधिशयनाच्चैव गोविन्दभावात् । वैकुण्ठस्वामिभावादपि च निजजनानर्चिराख्यादिगत्या स्वं लोकं प्रापयेच्छ्रीपतिरिति कथयां श्रीशाठारिर्बभूव ॥"

475. 29. K. 6.

परिभाषापाठः

Palm-leaf. 3 Foll. 17 × 1⅛ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the paribhāṣās 1 to 123 only; but the completion of the work is indicated by the words ओं नमः etc. at the end.

End :

व्यवस्थितविभाषया क्वचित् कार्याणि क्रियन्ते । अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति । ज्ञापकसिद्धं न सर्वत्र ।

ओं नमः पाणिनिकात्यायनपतञ्जलिभ्यो मुनिभ्यो गुरुभ्यः ।

No colophon :

476. 28. F. 52.

परिभाषाप्रदीपार्चिः—उदयंकरकृतः

Palm-leaf. 57 Foll. $13\frac{3}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A treatise explaining the meaning of the Paribhāṣās relating to Pāṇini's Grammar. The Paribhāṣās are dealt with here in the order of the pādas and adhyāyas of the Aṣṭādhyāyī in which they occur. The author Udayaṁkara had a surname Nānāpāṭhaka. He mentions herein his other work called as Mitavṛttyarthasaṁgraha, copy of which is available in the Jammu Library. M. A. Stien calls the author as Udayana on the strengh of the passage found in the beginning of the Mitavṛttyarthasaṁgraha *viz.*—"करोत्युदयनः साधु मितवृत्त्यर्थसंग्रहम्" (Vide his Catalogue of Sanskrit MSS. at Jammu, No. 916, page 261). As the first two stanzas of these two works are identical, there as no doubt about the identity of their authors. Aufrecht assigns Udayaṁkara to the middle of the 19th Centary A.D. on tradition.

Contains the first Adhyāya only.

Beginning :

अमन्दहृदयानन्दनिदानं शिवयोश्चिरम् ।
नमस्कुरुत हेरम्बं निष्प्रत्यूहफलाप्तये ॥
वल्लकीपुस्तककरां पुण्डरीकासनस्थिताम् ।
शारदां नीरकुन्देन्दुधवलां भावयेतराम् ॥
कृत्वा पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहम् ।
परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ॥

तत्र तावत्परिभाषात्वं नाम लिङ्गवत्त्वे सति संदिग्धार्थनियामकत्वम् । दीर्घीवेवीटामित्यादेः न धातुलोप इत्यादौ निषेधः, किमिक्परिभाषायाः, उत गुणवृद्ध्योरिति संदिग्धार्थस्य नियामकत्वात् परिभाषात्वं स्यात्; अतः सत्यन्तम् । संज्ञासूत्राणां विधिप्रदेशीयसंज्ञाबोधकपदरूपलिङ्गवत्त्वे सत्यर्थनियामकत्वेनातिव्याप्तेः संदिग्धेति ।

End :

सुपि चेत्यादौ तु अङ्गस्येत्यनेनानन्वयापत्तेर्न तदन्तविधिः । तदा घरूपेत्यत्रोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिनिषेधः । अत एव लेखग्रहणेन ज्ञापकेन भाष्ये पृथगेव साधितः सः । अपञ्चम्या इति निषेधस्य तु रदाभ्यामित्यादावेव प्रयोजनमिति दिक् ।

परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ।
प्रथमो व्याकृतोऽध्यायः संगतः सङ्गतः सताम् ॥
न तुष्यन्ति मितोक्त्यैके परे मूढा बहूक्तिषु ।
करवाणि ततो वाणि सकलावर्जनेऽञ्जलिम् ॥

Colophon :

इति नानापाठकीयपरिभाषाप्रदीपार्चिषि प्रथमोऽध्यायः ।

477. 8. J. 29.

परिभाषाभास्करः—शेषाद्रिसुधीकृतः

Paper. 142 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

This also is a commentary on the Paribhāṣās relating to Pāṇini's grammar. The

author is Seṣādrisudhī. Nothing is known about his date, lineage etc. The Paribhāṣās are dealt with in the order adopted by Nāgeśa in his Paribhāṣenduśekhara.

Complete.

Beginning :

नत्वा गुरुचरणयुगं स्मृत्वा ब्रह्माखिलात्मकं विमलम् ।
रचयति शेषाद्रिसुधीः परिभाषाभास्करं स्वशिष्यकृते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ।

व्याख्यानतोऽभिमतार्थबोधकाभियुक्तवचनात् विशेषस्याभिमतार्थस्य निर्णयो भवति । अत्र संदेहपदेन कोटिद्वयावगाहि ज्ञानमभिमतानभिमतसाधारणज्ञानमनभिमतमात्रज्ञानं चोच्यते । तस्मात् शास्त्रमलक्षणमभिमतार्थाबोधकं न भवतीत्यर्थः । तत्र ङेर्यः, ङेराम् नद्यामीभ्यः इत्यादौ कोटिद्वयावगाहिज्ञाने प्राप्ते ङेर्य इत्यत्र चतुर्थ्येकवचनस्य ङेरामित्यत्र सप्तम्येकवचनस्य ग्रहणमिति व्याख्यानादभिमतस्य निर्णयः ।

End :

किं च माषवापनीयमित्यत्रासति स्थानिवत्त्वे णत्वं प्राप्नोति । णत्वे स्थानिवत्त्वात् न भवति णत्वमिति ज्ञाप्यते । ज्ञापकसिद्धं न सर्वत्रेति वा उक्तस्थले स्थानिवत्त्वमिति कैयट इति दिक् ।

Colophon :

इति शेषाद्रिसुधीविरचितः परिभाषाभास्करः ।

478. 26. O. 5.

परिभाषाभास्करः—शेषाद्रिसुधीकृतः

Palm-leaf. 61 Foll. 16 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Date of copying : Māsi month of the year Krodhi.

The following stray stanzas are read after the colophon :

"लक्ष्मीसहाय गोविन्द त्वां नमामः सदा वयम् ।
देहि मे वाञ्छितं कृष्ण त्वामहं शरणं गतः ॥
कल्याणि वाञ्छितं दातुं शक्यते तव सौभगे ।
दीयन्तामस्य सौख्यानि त्वद्भक्तिं पालयस्व मे ॥
देवकीसुत गोविन्द पद्मनाभ जगत्प्रभो ।
देहि मे विभवं कृष्ण त्वामहं शरणं गतः ॥ "

479. 33. F. 14.

परिभाषाभास्करः—शेषाद्रिसुधीकृतः

Palm-leaf. 78 Foll. 16 × 1 inches. 8 lines in a page. Grantha script. Old. Much injured. Legible writing.

Fol. No. 61 is left blank.

Almost complete, wanting the last leaf only.

The fly-leaf at the beginning contains the name of the former owner of the MS. —Veṅgusāstri.

480. 28. G. 17.

परिभाषारत्नम्—अप्पासुधीकृतम्

Palm-leaf. 11 Foll. 13½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Illegible writing.

A brief metrical commentary on the Paribhāṣās on Pāṇini's grammar in the order of pādas and adhyāyas. The author who calls himself by the name Appāsudhī seems to be identical with the author of

the Paribhāṣārthasaṁgrahavyākhyā Sārabodhinī (described under No. 494 of this volume) wherein he is called Appādīkṣita, a descendant of the famous Appayadīkṣita. From this it is presumed that this Appādikṣita *alias* Appāsudhī is identical with the author of the Sūtraprakāśa (described under No. 141 of this volume) wherein he mentions himself as the 8th descendant of the famous Appayadīkṣita and son of Dharmarāja Veṅkateśvaradīkṣita. The order of the Paribhāṣās dealt with here is the same as that adopted by Vaidyanāthaśāstrin in his Paribhāṣārthasaṁgraha. At the end of the work the author specifies separately the total number of verses contained and Paribhāṣās dealt with thus: verses 193. Paribhāṣās 125.

Complete.

Beginning:

(प्रण)म्य शंकरं विष्णुं प्रणम्य च परां शिवाम् ।
करोति परिभाषाणां रत्नमप्पाभिधः सुधीः ॥
बालानां सुखबोधाय क्रियते यत्न ईदृशः ।
उदाहरणलिङ्गानि येनेमे जानते स्फुटम् ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥१॥
चतुर्थी ङेर्य इत्यत्र ङेरामित्यत्र सप्तमी ।
गृह्यतेऽनेन लिङ्गं तु पुनर्णग्रहणं स्मृतम् ॥ १ ॥
न हि कार्यी निमित्ततयाश्रियते नापि निमित्तं कार्यी॥२॥
तद्गुणः शयितेत्यादौ शीङो ङित्त्वेऽपि सिध्यति ।
स्थण्डिलेत्यत्र (लिङ्गं तु) शयितृग्रहणं विदुः ॥ २ ॥
इतरेतराश्रयाण्यपि क्रार्याणि शास्त्रे प्रकल्पन्ते ॥ ३ ॥
वृद्धिसंज्ञाभावितस्य सं . . . नं त्विति ।
दोषोऽयं नित्यशब्दत्वान्नेग्यणित्यत्र साधकम् ॥ ३ ॥
तदागमास्तद्ग्रहणेन गृह्यन्ते ॥ ४ ॥
(सर्वेषामिति) झल्येत्वं तस्माद्भवति सुस्वतः ।
लिङ्गं णेरनिटीत्यत्रानिटो ग्रहणमिष्यते ॥ ४ ॥
निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥
. . . . . जरस्यैव जरस्विधिः ।
षष्ठीति सूत्रं व्याख्यानात्सिद्धे लिङ्गमिहेष्यते ॥ ५ ॥

End:

अनिर्दिष्टार्थाः प्रत्यया: स्वार्थे भवन्ति ॥ २४ ॥
एवं यावक इत्यादौ स्वार्थ एव प्रतीयते ।
संज्ञा हि प्रत्यय इति सार्था भवति नान्यथा ॥ २४ ॥
ज्ञापकसिद्धं न सर्वत्र ॥ २५ ॥
तेनात्मनेपदादीनि शिष्टानां व्यवहारतः ।
क्वचिदेव न सर्वत्र ह्येवं सैद्धान्तिकी गतिः ॥ २५ ॥
युगपदधिकरणवचनो द्वन्द्वः ॥ २६ ॥
अनेकेषां पदार्थानामेकदा वचनं मतम् ।
अङ्गवङ्गकलिङ्गा इत्यत्र तद्राजलुक्कतः ॥ २६ ॥
पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ २७ ॥
तत्संस्क्रियत इत्यादौ ऋतश्चेति गुणो न वा ।
नित्यग्रहणसंबन्धात्पूर्वोक्ते चेष्टसङ्गतिः ॥ २७ ॥
इति परिभाषारत्ने
श्लोकाः (१९३) पञ्चाधिकविंशतिप्रयुक्तशतम् ।
परिभाषाः परिगीताः
सन्तः सदसद्विवेकमुपयान्तु ॥

Colophon:

इति परिभाषारत्नं संपूर्णम् ।
परिभाषा . . . ज्ञापकैर्युताः सूक्ताः ।
षडधिकविंशतिसंगति . . . . मे न्यायाः ॥

The fly-leaf contains the name of the former owner of the MS.—Appā.

481. 38. F. 9.

परिभाषार्थप्रकाशिका—धर्मसूरिकृता

Paper. 184 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A commentary on the Paribhāṣās by Dharmasūri son of Padmanābha of Pandilla family. The author quotes many authors among whom Haridīkṣita was the latest. The author mentions Upendrayati in the introductory verse apparently as his preceptor.

Complete.

Beginning:

पाणिन्यादिमुनित्रयं गणपतिं दुर्गामहेशौ गिरं
नामंनाममुपेन्द्रपादयतिवाग्जालानि संस्मृत्य च ।
भाष्यार्थानखिलान्विलोक्य परिभाषार्थप्रकाशं सुधी-
र्धर्माख्यो वितनोति शैलतनयावामार्धजानेर्मुदे ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहालक्षणं ।

विविच्य प्रतिपादनादर्थविशेषस्यावगतिर्भवति संदेहादप्रतिपादकमर्थस्य न । यथा अणुदिति सूत्रे पूर्वेण परेण वेति संदेहे परेणैवेति व्याख्यायते । ऋत उत् उपसर्गादृति धातौ इत्यादौ क्रः उपकारीयतीत्यादौ दीर्घादिव्यावृत्यर्थं कृतात्तपरकरणाल्लिङ्गात् । यत्तु भाष्यकारैः सवर्णेऽण्ग्रहणं ह्युरदिति ज्ञापकमुपन्यस्तं तद्ज्ञाप्यमानस्याप्यणः सवर्णग्राहकत्वमभ्युपेत्येति बोद्धव्यम् ।

End:

ऋतश्च संयोगादेरिति लिङ्सिचोर्नेट् . . . इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात् । संस्कृषीष्ट समस्कृत समस्कृषाताम् । ततश्च निर्दुष्टत्वादियमेवाश्रयितव्येति न्या(यसिद्धाः परिभा)षाः ॥

भाष्योन्मथनसमुत्थां कौयटगूढाभिसन्धिसन्धात्रीम् ।
पन्दिल्लधर्मसूरिः परिभाषार्थप्रकाशिकां तेने ॥
वाणी सूते पुष्कलं शब्दरत्नं
धत्ते लीला . . न्वकण्ठः ।
चूडारत्नं भाष्यसर्वस्वमेनां
सोऽदात्काशीविश्वनाथस्य तुष्ट्यै ॥

Colophon:

इति पन्दिल्लान्ववायदुग्धपाथोनिधिशरत्प्रकाशनिधिशाब्दिकचक्रवर्तिपद्मनाभतनयेन धर्मसूरिणा विरचिता परिभाषार्थप्रकाशिका समाप्ता ।

482. 28. F. 51.

परिभाषार्थप्रकाशिका—धर्मसूरिकृता

Palm-leaf. 152 Foll. 15½ × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Legible writing.

This MS. is the original of the MS. described under the last number.

Complete.

Three leaves are added at the end. The first leaf contains stanzas 1 to 10 in the 2nd Sarga of the Kirātārjunīya and the rest are left blank.

483. 28. G. 37.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 51 Foll. 17½ × 1½ inches. 9 lines in a page. Grantha script. Old. Good. Good writing.

This is a treatise on grammar explaining the meaning of the Paribhāṣās recognised in Pāṇini's grammar. The Paribhāṣās are dealt wtth in the order of the pādas

and adhyāyas of the Aṣṭādhyāyī wherein they were originated. Hence the order of the Paribhāṣās here differs from that adopted by Nāgesa in his Paribhāṣenduśekhara. The total number of Paribhāṣās dealt with here is 125 of which 98 pertain to the eight adhyāyas of the Aṣṭadhyāyī and the rest are miscellaneous. The author Vidyanāthaśāstrin also called Vaidyanāthadīkṣita was the son of Ratnagiridīkṣita and nephew (Sister's son) of the famous Rāmabhadradīkṣita son of Yajñarāmadīkṣita. The author Vaidyanāthaśāstrin is identical with the author of the Śabdakaumudīvyākhyā (described under No. 177 of this volume). The author herein refers to his other work called Paribhāṣopanyāsa copy of which is not available anywhere. He also quotes without author's name a work called Vajraṭaṅka on grammar which however should not be confounded with Vajraṭaṅkaśāstrin's works on Nyāya, *viz.*— Dīdhitivyākhyā and Bhāvānandīprakāśikā. He quotes and criticizes the Śabdakaustubha and Prauḍhamanoramā of Bhaṭṭojidīkṣita. The author may be assigned to the end of the 17th Century A. D.

Complete.

Beginning :

विजेज्यानः सदा शंभुर्जङ्गच्छद्विरिजां मुदा ।
संचञ्चुराणः पशुना तन्तान्ताद्वाग्गतिं मम ॥
मूर्तिर्यस्य हि पाणिनिः पदमहाभाष्यप्रबन्धा तथा
वाक्यानां कृदपि स्वयं वितनुते वाग्यस्य दास्यं सदा।
शिष्या यस्य विरोधिवादिमकुटीकुट्टाकवग्घाटिका-
स्तस्मै मातुलरामभद्रमखिने भूयो नमो मे भवेत् ॥
प्रणम्य परमं देवं भवानीपतिमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसंग्रहः ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ १॥

व्याख्यानतो व्याख्यानात् । पञ्चम्यन्तात् आद्यादित्वात्तसिः । औतोऽशसोरित्यादिसूत्रे आ ओत इत्याचार्यैर्व्याख्यानादस्माकं विशेषनिश्चयः । तथा ङेर्य इत्यत्र चतुर्थ्याः, ङेरामित्यत्र सप्तम्या आदेश इति ।

Colophon :

इति श्रीमद्वत्तगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिणः कृतिषु परिभाषार्थसंग्रहे प्रथमस्याध्यायस्य प्रथमः पादः ।

End :

अन्ये तु न हीदं वचनम्, नापि न्यायः; पूर्वत्रासिद्धमिति सत्त्वात् ष्टुत्वाप्रवृत्तेरिति दिक् ॥ ९८ ॥

Colophon :

इति श्रीमद्वत्तगिरिदीक्षितपुत्रस्य वैद्यनाथशास्त्रिणः कृतिषु परिभाषार्थसंग्रहे अष्टमोऽध्यायः ।
गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ ९९ ॥
गुणसंबन्धि गुणादागत इति वा इत्यर्थे तस्येदमित्यणि गौणशब्दः ।

* * * *

पूर्वं धातुरुपसर्गेण युज्यत इति केचित् । अस्मिन् दर्शने संस्कृषीष्ट इत्यत्रेडभावः । ऋतश्च संयोगादेरित्यत्रोपदेशपदानुवृत्त्या उपदेशे संयोगादेः स्तृप्रभृतेर्ग्रहणात् संस्क्रियत इत्यत्र गुणाभावः । नित्यं छन्दसीत्यतो नित्यग्रहणानुवृत्त्या गुणविधिसूत्रेण ऋतश्च संयोगादेर्गुण इत्यनेन नित्यं संयोगादेः स्तृप्रभृतेर्गुणविधानात् । इदं तु ध्येयम्—इमौ पक्षौ लक्ष्यानु-

रोधात्तत्र तत्राश्रीयेते इति उभयथा भाष्ये व्यवहारो दृश्यत इति ॥ १२९ ॥

Colophon :

इति श्रीमद्रत्नगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिविरचितः परिभाषार्थसंग्रहः संपूर्णः ।

It is stated in the last line that the total No. of Granthas of this work is 2030.

484. 22. P. 13.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 12 Foll. 17½ × 1½ inches. 10 lines in a page. Grantha script. Old. Good. Good writing.

Contains the first adhyāya only.

485. 22. P. 23.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 70 Foll. 17 × 1 inches. 7 lines in a page. Grantha script. Old. Good. Clear writing.

Complete.

Foll. 16 to 19 repeat a portion of the work relating to the first adhyāya. The pagination of the folios extends first up to 15 and then begins from 1 and extends up to 55.

The scribe adds :

"वैद्यनाथेन रचितः परिभाषार्थसंग्रहः ।
व्यलेखि वर्षे रौद्र्याख्ये सुन्दरेश्वरशास्त्रिणा ॥"

486. 28. G. 4.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 21 Foll. 12⅛ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Illegible writing.

Breaks off in the 3rd adhyāya.

487. 28. G. 12.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 12 Foll. 16⅛ × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Legible writing.

Contains the first adhyāya only.

488. 28. G. 15.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 90 Foll. 17⅛ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The first leaf is much broken.

Complete.

Date of copying. Uttarāyaṇa in the year Parābhava. The fly-leaf contains a few lines from the Naiṣadhiyacaritavyākhyā by Mallinātha.

489. 28. G. 30.

परिभाषार्थसंग्रहः—वैद्यनाथशास्त्रिकृतः

Palm-leaf. 46 Foll. 17½ × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

490. 28. G. 30.

परिभाषार्थसंग्रहव्याख्या चन्द्रिका—स्वयंप्रकाशानन्दकृता

Palm-leaf. 153 Foll. 17½ × 1¾ inches.

10 lines in a page. Grantha script. Old. Injured. Legible writing.

This is a commentary on Vaidyanāthasāstrin's Paribhāṣārthasaṁgraha described above by Svayaṁprakāśānanda, pupil of Advaitānandasarasvatī. The commentary is called Candrikā. Aufrecht mentions a Vedānta work called Vedāntanayabhūṣaṇa under the authorship of this author. The author may be identified with the preceptor of Acyutakṛṣṇānanda, the author of the Siddhāntalesasaṁgrahavyākhyā Kṛṣṇālaṁkāra and the Taittirīyopaniṣadbhāṣayavyākhyā Vanamālā.

Complete.

Beginning :

नत्वा गुरुपदद्वन्द्वं संसारजलधिप्लवम् ।
व्याकरोमि यथाबुद्धि परिभाषार्थसंग्रहम् ॥

ग्रन्थादौ शिष्टा मङ्गलमाचरन्ति । तस्य च भगवता भाष्यकारेण 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इति प्रचयगमनं प्रयोजनमुक्त्वा 'वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च' इति ग्रन्थाभ्यासकर्तृणां सामर्थ्यातिशयः आयुवृद्धिश्चेति प्रयोजनद्वयमुक्तम् । अतो मङ्गलाचरणस्यावश्यकत्वात्परमेश्वरप्रार्थनारूपं मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—**विजेज्यान** इति । विपूर्वात् जि जये इत्यस्माद्धातोः धातोरेकाच इति यङि तस्य यङोऽचि चेति चशब्दादनैमित्तिके लुकि प्रत्ययलक्षणेन यङन्तत्वात् सन्यङोरिति द्वित्वे गुणो यङ्लुकोरित्यभ्यासस्य गुणे पूर्वं प्रवृत्तां धातुसंज्ञामादाय वर्तमाने लट् इति कर्तरि लटि अटोरित्त्वात् लोपे तस्य लटः शतृशानचाविति शानजादेशः । विपराभ्यां जेरिति विधानात् । प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात् । ततः शपि तस्य अदिप्रभृतिभ्यः शपः इति लुक्, यङ्लुगन्तस्य चर्करीतं च इत्यदादौ पाठात् । एरनेकाच इति यण् । ततः सौ विजेज्यान इति रूपम् । तस्य चोत्कृष्टजयवानित्यर्थः । सदेति । सर्वस्मिन्काल इत्यर्थः । सर्वशब्दात्सप्तम्यन्तात् सर्वैकान्येति दाप्रत्यये सर्वस्य सोऽन्यतरस्यामिति सादेशः । शं भवतीति शंभुः । मितद्वादित्वात् डुः । जङ्गच्छत्; कौटिल्येन गच्छन्नित्यर्थः । गम्लृ गतावित्यस्माद्धातोः नित्यं कौटिल्ये गतौ इति यङि यङो लुकि द्वित्वे अभ्यासलोपे नुगतोऽनुनासिकान्तस्येति नुकि अनुस्वारपरसवर्णयोः तस्मात्पूर्ववल्लुटि लटः शतृशानचाविति शेषत्वात्परस्मैपदे शतरि शपि तस्य लुकि च सति इषुगमियमां छः इति छत्वे छे च इति तुकि स्वाद्युत्पत्तौ हल्ङ्यादिलोपः ।

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र-श्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमाणस्य श्रीमत्स्वयंप्रकाशानन्दस्य कृतौ **परिभाषार्थसंग्रहव्याख्यायां चन्द्रिकायां** प्रथमस्याध्यायस्य चतुर्थः पादः ॥

End :

ननु एतद्वचनाभावे स्नाति स्थाता इत्यादौ षत्वे . . . . . वर्तेतेत्याशङ्क्य पूर्वत्रासिद्धमिति ष्टुत्वस्यासिद्धत्वात् सत्त्वं प्रथमतः प्रवर्तते । ततः ष्टुत्वस्य प्राप्त्यभाव इत्याह—पूर्वत्रेति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदद्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमाणस्य स्वयंप्रकाशानन्दस्यकृतौ परिभाषार्थसंग्रहव्याख्यायां चन्द्रिकायामष्टमोऽध्यायः ।

गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ।

ननु गौर्बाह्लीक इत्यादिस्थले बाह्लीकस्य कथं गौणत्वम् ? न च तस्य गुणादागतत्वं गुणसंबन्धित्वं वास्तीत्याशङ्क्य गोशब्दमुख्यार्थसास्नादिमद्व्यक्तिगततिष्ठन्मूत्रत्वादिधर्मयुक्तत्वमेव गुणसंबन्धित्वमित्याह—गुणघटितेति ।

* * * *

एकाच इति सूत्रात् उपदेशग्रहणानुवृत्त्या उपदेशे यः संयोगादिः इत्यर्थस्वीकारेण स्तृषीष्ट स्तरिषीष्ट इत्यत्रैव स्तृञ् आच्छादन इति धातोराशीर्लिङि स्वीकारात् । ऋतश्च संयोगादेर्गुण इत्यत्रापि नित्यं छन्दसीति सूत्रात् नित्यग्रहणानुवृत्त्या नित्यं यः संयोगादिस्तत्रैव गुणः नान्यत्रेति स्वीकारात् कृधातोश्च नित्यं संयोगादित्वाभावात् न कोऽपि दोष इत्याह—**अस्मिन्निति** । लक्ष्यानुसाराच्चेदं सर्वं व्यवस्थितम् । अतो न कोऽपि दोष इत्याह—**इदं त्विति** । उभयोः स्वीकारे किं प्रमाणमिति विविदिषायां भगवता **पतञ्जलिना** तत्र तत्र व्यवहृतत्वादित्याह—**उभयथेति** । तथाच भाष्यकारवचनप्रामाण्यात्सर्वेष्टसिद्धिरिति भावः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्द्वैतानन्दसरस्वतीचरणारविन्दभृङ्गायमाणस्य स्वयंप्रकाशानन्दस्य कृतौ परिभाषार्थसंग्रहव्याख्या चन्द्रिका संपूर्णा ।

491. 22. P. 13.

परिभाषार्थसंग्रहव्याख्या चन्द्रिका—स्वयंप्रकाशानन्दकृता

Palm-leaf. 63 Foll. 16½ × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 3rd adhyāya.

Leaves 35 to 63 are broken.

The colophon herein reads the author's name as Svayaṁprakāśayatīndra instead of Svayaṁprakāśānanda.

492. 22. P. 23.

परिभाषार्थसंग्रहव्याख्या चन्द्रिका—स्वयंप्रकाशानन्दकृता

Palm-leaf. 73 Foll. 17 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the first adhyāya only.

The last line reads the following stanza in praise of Pārvatī.

"चेटीभवन्निखिलखेटी कदम्बतरुवाटीषु नाकिपटलीकोटीरचारुतरकोटीमणीकिरणकोटीकरम्बितपदा ।
पाटीरगन्धिकुचशाटी कवित्वपरिपाटी नगाधिपसुता
घोटीकुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥"

Then three extra leaves are added and they repeat a portion of the work of the 1st adhyāya.

493. 28. G. 37.

परिभाषार्थसंग्रहव्याख्या चन्द्रिका—स्वयंप्रकाशानन्दकृता

Palm-leaf. 131 Foll. 17½ × 1½ inches 9 lines in a page. Grantha script. Old. Good. Legible writing.

Breaks off in the 1st pāda of the 7th adhyāya.

494. 28. G. 16.

परिभाषार्थसंग्रहव्याख्या सारबोधिनी—अप्पादीक्षितकृता

Palm-leaf. 12 Foll. 15 × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Illegible writing.

This is another commentary on Vaidyanāthas'āstrin's Paribhāṣārthasaṁgraha. The author Appādīkṣita speaks of himself as a descendant of the famous Appayadīkṣita. Most probably our author may be identical with the author of the Paribhāṣāratna and the Sūtraprakās'a (Vide Nos. 480 and 141 of this volume) wherein he says that he was the 8th descendant of the famous Appayadīkṣita.

Wants beginning :

Beginning :

संप्रसारणम्। तदान्तरङ्गबहिरङ्गयोः समकालत्वमुपपादयति—अभ्यस्तस्य चेति। प्रकृतिप्रत्ययभावः षष्ठ्यर्थः। अभ्यासोत्तरखण्डस्येति। तस्यैव सन्परत्वादिति भावः। यथाश्रुतरूपसिद्धिरपि न संभवतीत्याह—एवं चेति। हकारेण व्यवधानम्। युवन्शब्देऽपि सवर्णदीर्घस्य स्थानिवद्भावेन व्यवधानसत्त्वेन संप्रसारणसूत्रे व्यवधानस्य सहनीयत्वात्।

Colophon :

इति परिभाषार्थसंग्रहव्याख्यायां सारबोधिन्यां षष्ठस्य चतुर्थः पादः संपूर्णः।

End :

पूर्वं धातुः साधनेन। तेनेति। साधनाश्रितकार्यस्य पूर्वं प्राप्तेस्तदानीं निमित्ताभाव इत्यर्थः। परिभाषासद्भावे न्यायमाह—क्रियेत्यादिना। धात्वर्थस्य कार्यित्वात् निमित्तित्वम्। कर्त्रादेस्तु निमित्तत्वमिति भावः। वचनादिति। संध्याधायकादित्यर्थः।

पूर्वं धातुरुपसर्गेण। केचिदिति। एतेन पूर्व एव पक्षे रुचिः। लक्ष्यानुरोधादिति। एवमेव भाष्यकारव्यवहारात् सर्वेष्टसिद्धिः। वैद्य+तस्यां वा न्यायाः समर्थिताः।

Colophon :

अप्पय्यदीक्षितवरान्वयसंभवेन
स्वात्मावबोधफलमात्रकृतश्रमेण।
अप्पाभिधेन मखिना रचिता समीयात्
. . . . . ॥

495. 28. G. 5.

परिभाषावृत्तिः

Palm-leaf. 7 Foll. 13½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

A brief metrical exposition of the Paribhāṣās of Pāṇini's grammar. The author's name is not known. The work is the same as that described under R. No. 4252 (*a*) of the Tri. Cat. of the Government Oriental MSS. Library Madras.

Incomplete, breaking off in the ताच्छीलिकेषु वासरुप etc.

Beginning :

प्रीणितोरुगुरुपादकटाक्षाः पाणिनीयरचिताः परिभाषाः।
अद्य पद्यगमितार्थविशेषाः कर्तुमुद्यतधियि प्रपतन्तु ॥१॥
अब्जसंभवमुखैरपि कृत्स्नं शब्दजातमुपदेष्टुमशक्यम्।
संग्रहेण कथनेऽर्थविशेषस्तत्र तत्र विवृतेरवधार्यः ॥२॥
संशयादिदमबोधकमित्थं नेति याभिदधती परिभाषा।
सा पुनर्लणितिसूत्रविशेषे णानुबन्धकरणादवगम्या ॥

लण्सूत्रे या संशयकृण्णानुबन्धपुनःकृतिः ।
सा व्याख्यानत इत्याद्यां परिभाषामसूसुचत् ॥ ४ ॥
न हि कार्यी निमित्तत्वेनाश्रीयत इतिह या ।
दीधीवेव्योर्जितः सा तु ज्ञाप्या गुणनिषेधतः ॥ ९ ॥

End :

वासरूपविधिर्नास्ति ताच्छीलिकविधिष्विति ।
निन्दहिंसादिसूत्रेण वुञ्विधानेन गम्यते ॥ १३७ ॥
निन्दकादौ ण्वुला सिद्धे वुञ्विधानं वृथान्यथा ।
तच्छीलाद्यर्थविषये तस्मान्न स्युर्ण्वुलादयः ॥ १३८ ॥

496. 39. F. 11.

परिभाषावृत्तिः

Paper. 50 Foll. $10\frac{1}{2} \times 7\frac{7}{8}$ inches. 12 lines in a page. Devanāgarī script. New. Good. Good writing.

Copies on side of papers.

Anonymous commentary on the Paribhāṣās known in Pāṇini's grammar.

Wants beginning.

Beginning :

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् । एको लक्षणेनाभिहितः । अपरः शास्त्र एव प्रतिनियतेन पदेन प्रतिपादितः । तयोर्ग्रहणसंभवे प्रतिपदोक्तस्यैव ग्रहणम् । न तु लाक्षणिकस्य । सन्लिटोर्जेः । जिगाय । जिनातेः संप्रसारणे जिरुपस्य लाक्षणिकत्वान्न भवति । जिज्यतुः । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि । प्रातिपदिकग्रहणे स्त्रीपुंनपुंसकलिङ्गैर्विशिष्टस्यापि ग्रहणं भवति । तृतीया सदृशादिभिः यथेह भवति पित्रा सदृशः पितृशदृश इति, एवं पितृसदृशीत्यत्रापि ।

End :

प्रत्ययः परः । सनादिराकपः प्रत्ययसंज्ञ उक्तः । स यतो विधीयते ततः परो भवति । सन् तितिक्षते । तव्यादयः कर्तव्यः, करणीयः । पञ्चमीनिर्देशात् पूर्वः परो वेति संदेहे पर एव यथा स्यादिति वचनम् । श्नंकामकज्बहुचस्तु विशेषविधानात् यथास्थानं भवन्ति ।

Colophon :

परिभाषावृत्तिः समाप्ता ।

497. 35. C. 140.

परिभाषावृत्तिः—सीरदेवकृता

Paper. 81 Foll. $9\frac{3}{4} \times 4\frac{3}{4}$ inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

This also is a commentary on the Paribhāṣās in Pāṇini's grammar by Sīradeva. The Paribhāṣās are herein dealt with in the order of the pādas and adhyāyas of the Aṣṭādhyāyī. Consequently the order of the Paribhāṣās herein is different from that followed by Nāgeśa in his Paribhāṣenduśekhara. Perhaps this is the earliest among the regular commentaries on the Paribhāṣās. As the author is quoted by Sāyaṇa (1377 A. D.) in his Dhātuvṛtti, he must be earlier than him.

Six folios bearing the numbers 64 to 69 are missing and consequently a portion of the 8th adhyāya is wanting; otherwise complete.

Beginning :

स्फुरदभिनवरागा भास्कराभा प्रगल्भा
प्रसभशमितदोषा स्फीतसल्लोकचक्रा ।

विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवतु परिभाषावृत्तिरासेवितैषा ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्।

व्याख्यानादाचार्यपारंपर्योपदेशात्संदेहेऽपि विशेषावगमो भवति। न तु लक्षणाभाव इति। तेन 'षष्ठीस्थाने योगा' इत्यस्य प्रत्याख्याने षष्ठीनिर्देशेऽप्यनेकसंबन्धसंभवेऽपि स्थानेयौगैव भवति। तदुक्तं व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। स्थान इति व्याख्यास्याम इति।

Colophon :

इति महामहोपाध्यायश्रीसीरदेवविरचितायां परिभाषावृत्तौ प्रथमः पादः।

End :

अभिन्नरूपं यथा—पूरणाद्भागे तीयादन् इति तृतीय इति। तत्र हि भावः प्रत्ययार्थो न संबन्धः। अव्यभिचरितसंबन्धो यथा—सच्छब्दः। अयं शतकृत्वः सत्स्वपि पदार्थेषु संबन्धं न व्यभिचरतीति तदुत्पन्नो भावप्रत्ययः सामान्यमभिदधाति। तत्रेति।

Colophon :

महोपाध्यायश्रीसीरदेवकृता परिभाषावृत्तिः समाप्ता।

498. 21. Q. 9.

परिभाषावृत्तिः—सीरदेवकृता

Palm-leaf. 161 Foll. 8 × 1¾ inches. 10 lines in a page. Malayālam script. Old. Good. Good writing.

Breaks off in the Paribhāṣā युगपदधिकरणवचनो द्वन्द्वः।

499. 29. F. 21.

परिभाषावृत्तिः—सीरदेवकृता

Palm-leaf. 122 Foll. 11½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The first leaf is missing.

Wants the beginning; otherwise complete.

The scribe :

पुल्लूर् ग्रामवासिना श्रीनिवासतनूजेन वैद्यनाथेन लिखिता।

500. 10. I. 2.

परिभाषावृत्तिव्याख्या—रामभद्रदीक्षितकृता

Paper. 82 Foll. 8¼ × 6¾ inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

A commentary on Sīradeva's Paribhāṣāvṛtti by Rāmabhadradīkṣita son of Yajñarāmadīkṣita. The author mentions herein the names of Tanjore Kings, Ekoji and Sāhaji and states that he was a resident of Sāhajipura *alias* Tiruvisanallur in Tanjore Dt. He also states that the work was written under the patronage of Ānandarāyamakhin son of Narasiṁharāya and minister of King Sāhaji. Thus the author's date must be the latter part of the 17th Century A.D.

Incomplete.

Beginning :

वन्देऽहं वसुधाकन्यावल्लभं वाक्प्रसिद्धये।
अपि वन्दिष्यमाणो यं वाणीं वाल्मीकिरानशे ॥

करोमि हृदयाम्बुजे कमपि वीरमम्भोनिधे-
निबन्धनमबिन्धनज्वलनबन्धुतूणीशयम् ।
न कश्चिदपि दृश्यते जगति यस्य शक्तो जये
स्मरं प्रहितजानकीनयनपद्मबाणं विना ॥
इदं व्याकरणस्यास्तु त्रिमुनिश्रेयसे नमः ।
प्रयोक्तव्येषु शब्देषु यस्यैवोक्तिः प्रमाण्यते ॥
अप्रत्युपक्रियसमस्तपदप्रबोध-
विश्राणनोपकृतिनिस्तुलितानुकम्पम् ।
शेषं द्वितीयमिव शब्दिकसार्वभौमं
श्रीचोक्कनाथमखिनं गुरुमानतोऽस्मि ॥
राजा स कश्चिदभवद्भुवि यः पुरन्ध्या
दीपाम्बया तनुभृता व्रतसंपदेव ।
विद्योतते स्म विधिरीश्वरयेव वाचां
शौरिः श्रियेव गिरिशो गिरिकन्ययेव ॥
मुख्योऽसाविति भोसलान्वयभुवां राज्ञामसौ कल्पका-
दन्योऽभीष्टफलप्रदायक इति प्राप्तेऽप्यसौ संयुगे ।
शक्तः केवल एव सन् रिपुनृपानुच्छेत्तुमित्युल्लिखन्
लोकस्य त्रिविधार्थतां बुधजनो ब्रूते यमेकाभिधम् ॥
तस्मादभूद्दशरथादिव पङ्कजाक्षः
श्रीशाहभूप इति शीलितधर्मविद्यः ।
यो मार्गणव्रजमु . . लं विमुच्य
भूमौ व्यपास्तखरदूषणतां दधाति ॥
लब्धश्रीषु यदीयपाणिकमलालम्बं गतेष्वद्भुतं
खड्गस्यैकतमस्य वृत्तिरभवत्पृथ्वीतले तादृशी ।
भक्ष्या यस्य विपक्षपक्ष्मलदृशां पत्रावली गण्डयोः
पातुं वारि न योग्यमस्ति हि तयोरप्यश्रुपूरे स्थिते ॥
सतां तेनार्पिते राज्ञा शाहराजपुराभिधे ।
अग्रहारे स्थितिमता **रामभद्रेण** यज्वना ॥
पाणिनेः परिभाषाणां वृत्तिर्व्याख्यायतेऽधुना ।
इदं शृण्वन्तु करुणां विधायास्मिन्विपश्चितः ॥
सरसकवितारसज्ञः षड्दर्शन्यर्थतत्त्वविदुदारः ।
भाति त्र्यम्बकयज्वा भाग्यपरीणाम एव सूरीणाम् ॥
एको यस्य विशुद्धयेऽलमुदयः काकोजिविद्वत्प्रभो-
रत्रेरप्यधिकादमर्त्यतटिनीस्नानं तदभ्युच्चयः ।
बोधे सत्यपि तावदौपनिषदे व्यक्त्यै जगत्यां विधि-
प्रामाण्यस्य सहस्रदक्षिणमखानुष्ठानमप्यादृतम् ॥
जातं जयन्तमिव शार्ङ्गभृता समस्य
यस्याग्रजान्मघवतो नरसिंहरायात् ।
वृद्धश्रवःप्रियगुणं विबुधैरुपेय-
मानन्दरायमखिनं कथयन्ति सन्तः ॥
शाहजिक्षितीन्द्रसचिवे तस्मिन्पोषयति रामभद्रमखी ।
लम्भितमनःप्रसादो रचयितुमधुनाहमुत्सहे ग्रन्थान् ॥
व्याचक्षे परिभाषाणां वृत्तिं बालविबुद्धये ।
गुरुपादाम्बुजध्यानज्ञातग्रन्थतदाशयः ॥

अथ सीरदेवः प्रारिप्सितग्रन्थपरिपूरणार्थं मङ्गलाचरणानन्तरकर्तव्यं प्रेक्षावत्प्रवृत्त्यर्थं विषयनिर्देशं सूचयन् ग्रन्थस्य साक्षात्प्रयोजनमाह—

स्फुरदभिनवरागा भास्वराभा प्रगल्भा
प्रसभशमितदोषा स्फीतसल्लोकचक्रा ।
विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवति **परिभाषावृत्तिरा**सेवितैषा ॥

स्फुरदिति । परितो भाष्यते व्याख्यायते आभिरिति परिभाषाः व्याख्यानतो विशेषप्रतिपत्तिरित्येवमादयः । तासां वृत्तिर्जीवनं व्याख्यानेन परिष्करणम् । यद्वा—तत्त्वतो भाषणं विवरणमिति यावत् । वृतेर्भावार्थात् क्तिन् । ग्रन्थस्येदं यौगिकं नाम । एषा आसेविता तात्पर्येण सेविता सती । जाड्यस्याबुद्धिमत्त्वस्य विविध-परिभाषार्थानभिज्ञत्वस्य यज्जातं समूहः तदेव वा यत्सामान्यं तस्य उपशान्त्यै प्रभवति शक्नोति ।

End :

एतच्च व्यपेक्षालक्षणं सामर्थ्यमाश्रित्योक्तमिति ज्ञेयम्। ननु इको यणचीत्यत्र तदन्तविधौ यणादेशः पदविधिस्थलेऽसमर्थत्वान्न स्यादिति तु शङ्का नोदेतीत्याह— किंत्वित्यादि । अतो भागवृत्तिकृतोक्तोऽप्यतिप्रसङ्गो दुर्घट इति ज्ञेयम्।

Colophon :

इति श्रीयज्ञरामदीक्षितपुत्रस्य श्रीरामभद्रदीक्षितस्य कृतौ परिभाषावृत्तिव्याख्यायां प्रथमस्याध्यायस्य प्रथमः पादः ।

501. 28. G. 10.

परिभाषावृत्तिसंग्रहः

Palm-leaf. 13 Foll. $14\frac{1}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a summary of the Paribhāṣa-vṛtti of Sirādeva.

Author's name is not given.

2 leaves bearing the Nos. 9 and 10 are broken.

Complete.

Beginning :

न हि कार्यी निमित्तत्वेनाश्रीयते।

यत् कार्यभाक् तत् कार्यं प्रति निमित्तं न भवतीत्यर्थः। तेनाध्येता अध्यापकः शयिता शायक इत्यत्र इङ्शीङोर्डित्त्वात् क्ङिति च इति गुणवृद्धिप्रतिषेधो न भवति।

इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते।

Colophon :

इति **परिभाषावृत्तौ** प्रथमः पादः ।

End :

युगपदधिकरणवचनो द्वन्द्वः ।

एकदैकैकार्थानामभिधाने द्वन्द्वो भवतीत्यर्थः। तेन . . . . . बहुत्वात् तद्राजस्य बहुषु तेनैवास्त्रियामिति लुक् सिध्यति।

Colophon :

इति महोपाध्यायसीरदेवकृतौ परिभाषावृत्तिः समाप्ता।

The colophon is apparently repeated from the original work.

502. 10. C. 33.

परिभाषेन्दुशेखरः—नागेशकृतः

Paper. 60 Foll. 10 × 4 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

A most popular exposition of the Paribhāṣās recognised in the system of Pāṇini's grammar, by Nāgeśabhaṭṭa son of Satī and S'ivabhaṭṭa. He was patronized by the king Rāmavarman of S'ṛṅgaberapura near Allahabad. It is said that Nāgeśa was invited by king Jayasiṁha to attend a sacrifice in 1714 A.D. This Jayasiṁha may probably be identical with the patron of Ratnākara, the author of Jayasiṁhakalpadruma written in 1714 A.D. (Vide India Office Catalogue No. 1595 page 500 part, III.)

Complete.

Beginning :

नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥

प्राचीनवैयाकरणतन्त्रे वाचनिकानि अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोर्निबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते । ननु लण् अइउण् सूत्रयोः णकारस्यैवोपादानेन अणिण्-ग्रहणेषु संदेहादनिर्णयः; अत आह—व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् । विशेषस्यान्यतराद्यर्थरूपस्य व्याख्यानात् शिष्टकृतात् प्रतिपत्तिर्निश्चयः; यतः संदेहात् शास्त्रमलक्षणमननुष्ठापकं लक्षणम्, न तथा, शास्त्रस्य निर्णयजनकत्वौचित्यादित्यर्थः ।

End :

तथा ओतः श्यनीति सूत्रे शितीति वक्तव्यम् । तत्रायमप्यर्थः—षिवुक्लम्विति सूत्रे शितीति न वक्तव्यं भवतीति भाष्ये न केवलं मात्रालाघवं यावदयमप्यर्थ इति कैयटोक्तेः प्रायेणेतीति शिवम् ।

Colophon :

इति श्रीमदुपाध्यायोपनामकसतीगर्भजनागोजिभट्टकृतः परिभाषेन्दुशेखरः संपूर्णः ।

503. 22. L. 31.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 11 Foll. $16\frac{3}{4} \times 1$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 28th Paribhāṣā.

Seven extra leaves added at the end contain some stray passages taken from the Prauḍhamanoramā and Laghuśabdenduśekhara.

504. 23. F. 3.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 60 Foll. 16×1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete.

505. 26. L. 26.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 80 Foll. $9\frac{1}{2} \times 2$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

An extra leaf added at the end repeats a few lines of the 50th Paribhāṣā of this work.

Date of copying: 1st day of the Vaikāśi month in the year Raktākṣi.

506. 28. G. 3.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 49 Foll. $12\frac{1}{4} \times 1\frac{1}{4}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden board is added in the front-side.

Complete.

507. 28. G. 11.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 50 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

508. 29. B. 2.

परिभाषेन्दुशेखरः—नागेशकृतः

Palm-leaf. 34 Foll. 14½ × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Wooden boards are added to both sides.

Incomplete.

509. 40. E. 27.

परिभाषेन्दुशेखरः—नागेशकृतः

Paper. 37 Foll. 10¾ × 4 inches. 13 lines in a page. Telugu script. Old, Injured. Legible writing.

Complete.

Three extra leaves are added at the end. Leaves 1 and 2 contain a few passages from the Laghuśabdenduśekhara. Leaf 3 contains a few lines from Laghu mañjūṣā.

The former owner of the MS.—Guruvayya Śāstri.

510. 21. B. 1.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथभट्टकृता

Palm-leaf. 117 Foll. 12½ × 1½ inches. 11 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a commentary on the Paribhāṣenduśekhara of Nāgeśabhaṭṭa. The author Vaidyanātha of the Pāyaguṇḍa family was the son of Veṇī and Mahādeva and the pupil of Nāgeśabhaṭṭa. The popular name of the commentary as specified in the opening stanza is Gadā, but the colophon names it Kāśikā. The author is known to have written some more works on grammar, *viz*—1 Śabdakaustubhaṭīkā Prabhā, 2. Śabdaratnavyākhyā Bhāvaprakāśikā, 3. Laghuśabdenduśekharavyākhyā Cidasthimālā, 4. Rapratyāhārakhaṇḍana, 5. Pradīpoddyotaṭippaṇa Chāyā, and 6 Laghumañjūśāvyākhyā Kalā. This Vaidyanātha should not be confounded with Tatsat Vaidyanātha who was the son of Rāmabhaṭṭa and grandson of Viṭṭhalabhaṭṭa and the author of Kāvyaprakāśavyākhyā Udāharaṇacandrikā, Kāvyapradīpavyākhyā Prabhā and Kuvalayānandavyākhyā Alaṁkāracandrikā. Aufrecht wrongly identifies our author with Bālambhaṭṭa of the Pāyaguṇḍa family who was in fact our author's son. (Vide the beginning and colophon of the Mitākṣarāvyākhyā Bālambhaṭṭī *alias* Lakṣmī as given below :

"श्रीलक्ष्मीरमणं नत्वा लक्ष्मीर्लक्ष्मीं शिशुप्रसूः ।
खेरडामुद्गलापत्यगणेशापत्यकृष्णकः ॥
महादेवः सुतस्तस्य वेदमूर्तिर्जटान्तवित् ।
श्रौतस्मार्तार्थनिपुणो दीक्षितो राजपूजितः ॥
पत्नी यस्य द्युमारूपा साध्व्युमा तस्य कन्यका ।
पायगुण्डोपाख्यवैद्यनाथपत्नी पतिव्रता ।
मिताक्षराया विवृतिं तनुते सर्वसंविदे ॥"

"इति श्रीमन्मिताक्षराव्याख्याने महादेवभट्टात्मजोमाङ्ग-जवैद्यनाथार्धाङ्गभूतबालकृष्णजननीपायगुण्डोपाख्यश्री - लक्ष्मीदेवीविरचिते लक्ष्म्यभिधे व्यवहारप्रकरणम्।" Chowkhamba Sanskrit Series. Vide also the indroductory verses of the Dharmaśāstrasaṁgraha by Bālambhaṭṭa :

श्रीशं नत्वा श्रीनिवासं दाक्षिणात्यो निबन्धकृत्।
नागेशपादनिरतो वैद्यनाथात्मजः सुधीः॥
सुमनःकुलबूरूकसाहेबालब्धजीविकः।
लक्ष्मीसूनुर्भवान्यम्बोविप्रद्वयविलेखकः॥
धर्मशास्त्रिमहादेवमन्नुदेवसहायकः।
बालशर्माबालबुद्धिः पायगुण्डोपनामकः॥

Vide. No. 1507. I. O. Catalogue.

The above mentioned passages clearly say that Lakṣmīdevī was the wife of Pāyaguṇḍa Vaidyanātha, that Bālakṛṣṇa *alias* Bālaśarman or Bālambhaṭṭa was Vaidyanātha's son, that Mitākṣarāvyākhyā called Lakṣmī *alias* Bālambhaṭṭī was written by Vaidyanāthā's wife Lakṣmīdevī who was the daughter of Umā and Mahādeva, son of Kṛṣṇa, grandson of Gaṇeśa and great grandson of Mudgala of Kheraḍa family and that Dharmaśāstrasaṁgraha was written by Bālaśarman *alias* Bālambhaṭṭa or Bālakṛṣṇa. Mannudeva referred to in the verse quoted above was a favourite pupil of Bālakṛṣṇa or Bālambhaṭṭa and was himself the author of the Laghuśabdenduśekharavyākhyā (Vide No. 346 of this volume). Thus it is proved conclusively that Vaidyanātha and Bālambhaṭṭa were two distinct persons, as father and son, and not different names for the same person as Aufrecht thinks. Now the question as to why the commentary on Mitākṣarā is called Bālambhaṭṭī while it was written by Lakṣmīdevī the mother of Bālambhaṭṭa and was named Lakṣmī by its authoress remains to be solved. Bābu Govinda Doss of Benares opines in his introduction to the Mitākṣarāvyākhyā Bālambhaṭṭī, that the real author of the commentary was Bālambhaṭṭa *alias* Bālakṛṣṇa and the commentary must have been dedicated to his mother Lakṣmīdevī after her death. He also exhibits several reasons to prove the above mentioned fact. It is believed that Bālambhaṭṭa wrote the work Dharmaśāstrasaṁgraha in 1800 A.D. when he was about 80 years old under the patronage of Colebrooke who was the Judge at Mirzapore from 1795 to 1801 A.D. It is also held that Bālambhaṭṭa lived about 110 years. Therefore our author Vaidyanātha may be assigned to the period from the last part of the 17th Century to the first part of the 18th Century A.D. and his son Bālambhaṭṭa from 1720 to 1830 A.D. It has been already stated in No. 346 *ante* that Mannudeva, the pupil of Balambhaṭṭa belonged to the 19th Century A.D. This commentry is also called Kāśikā.

Complete.

Beginning :

ब्रह्मादयो यस्य न पारमाप्नुवन्
गङ्गाद्भुतं मस्तकदेशवासिनी।
वामार्धदेहापि न चण्डिकाप यं
ध्यायामि देवं सनकादिवन्द्यम्॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानतिरूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातॄश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति—नत्वेति । निर्गुणमूर्तेर्नत्यसंभवादाह—साम्बमिति । रूपकमिदम् । बालानां भाष्यादितः परिभाषार्थनिर्णयासमर्थानाम् । परिभाषा एव इन्दुः अर्थप्रकाशकत्वात्, स शेखरे यस्येति ग्रन्थपक्षे । तत्र तासामेव व्याख्येयत्वेन मस्तकधृतत्वमारोप्यते । यद्वा स शेखरो भूषणं यस्य । यद्वा तस्य शेखर आश्रयः । यद्वा तासां प्रकाशकोऽलंकारस्तम् । शिवपक्षे तु परिभाषा इव इन्दुरित्यादि स्पष्टमेव ।

End :

तथेति । तथा इति भाष्ये इति कैयटोक्तिरित्यन्वयः । अर्थः प्रयोजनम । यावदिति ; पदगौरवलाघवमपीत्यर्थः । ऋलृक्सूत्रभाष्यं तु पदलाघवपक्षेणापि सुयोजमिति नात्र तदुक्तम । एवं ज्ञाजनोर्जा इत्यादिसूत्रभाष्यमप्यत्र गमकं बोध्यमित्यन्यत्र विस्तरः । इति सर्वमनवद्यमिति शिवम् ॥

Colophon :

इति श्रीपायगुण्डोपाख्यमहादेवसुतवेणीगर्भजवैद्यनाथभट्टकृतपरिभाषेन्दुशेखरकाशिका परिपूर्णा ।

511. 9. H. 38.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथकृता

Paper. 11 Foll. 12½ × 5 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants the beginning and breaks off in the 11th Paribhāṣā.

512. 9. D. 92.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथकृता

Paper. 4 Foll. 9½ × 5¼ inches. 20 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Breaks off in the 23rd Paribhāṣā.

513. 21. B. 12.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथकृता

Palm-leaf. 112 Foll. 16 × 1 inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Complete.

The scribe adds:

पायगुण्डकृता टीका परिभाषेन्दुशेखरे ।
अप्पाख्यविदुषालेखि वटारण्यनिवासिना ॥

The former owner of the MS.: Rāmacandra.

514. 26. L. 17.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथकृता

Palm-leaf. 75 Foll. 14¾ × 1¾ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the 52nd Paribhāṣā.

515. 30. E. 14.

परिभाषेन्दुशेखरव्याख्या गदा—(पायगुण्ड) वैद्यनाथकृता

Palm-leaf. 57 Foll. 16 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 50th Paribhāṣā.

516. 8. F. 5.

परिभाषेन्दुशेखरव्याख्या चन्द्रिका—विश्वनाथभट्टकृता

Paper. 32 Foll. 8⅛ × 5⅛ inches. 22 lines in a page. Grantha script. Old. Good. Good writing.

A commentary on Nāgeśa's Paribhāṣendusekhara by Viśvanāthabhaṭṭa of the last century. The commentary is called Candrikā.

Breaks off in the 12th Paribhāṣā (निर्दिश्यमानपरिभाषा).

Beginning :

नत्वा विश्वेश्वरं देवमानन्दाह्लब्धवृत्तिना ।
क्रियते विश्वनाथेन परिभाषेन्दुचन्द्रिका ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचारादिप्रतिबन्धकदुरितप्रशमाय कृतं मङ्गलमध्येतृणामनुषङ्गतो मङ्गलाय च निबध्नाति—नत्वा साम्बमिति । साम्बं शिवं ब्रह्मेति पदत्रयेण 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिप्रतिपादितं परं ब्रह्म प्रतिपाद्यते । शेते जगद्यस्मिन् इति व्युत्पत्त्या सर्वजगदाधारत्वस्य अम्बया जगदुत्पादयित्र्या सहितमिति व्युत्पत्त्या सर्वजगत्स्रष्टृत्वस्य बृंहयति वर्धयतीति व्युत्पत्त्या सर्वजगद्वर्धकत्वस्य च बोधनात् ।

End :

न च प्राथमिकत्वपरिष्कारघटकशास्त्रान्तरे तत्तच्छास्त्रभिन्नत्वेन संकोचात् न दोष इति वाच्यम्, अतिगौरवादिति चेदाह—अनयेत्यादि । तथा च येन विधिः यदागमाः, एतच्छास्त्रद्वयीसहकृतशक्तिग्रहाधीनत्वमेवोपस्थितौ प्राथमिकत्वमिति भावः । अन्ये तु यत्पदघटितशास्त्रासहकृतशक्तिग्रहाधीनत्वमुपस्थितौ प्राथमिकत्वमि . . . .

517. 8. F. 1.

परिभाषेन्दुशेखरव्याख्या चन्द्रिका—विश्वनाथभट्टकृता

Paper. 9 Foll. 11 × 9½ inches. 21 lines in a page. Grantha script. Old. Good. Good writing.

Breaks off in the अनेकान्तपरिभाषा.

518. 40. E. 26.

परिभाषेन्दुशेखरव्याख्या चित्प्रभा—ब्रह्मानन्दसरस्वती

Paper. 74 Foll. 12½ × 4 inches. 12 lines in a page. Telugu script. Old. Good. Good writing.

Another commentary on Nāgeśa's Paribhāṣendusekhara by Brahmānandasarasvatī. The MS. does not give the author's name. However on comparison with the work described under R. 1764 of the Tri. Cat. of the Madras Govt. Ori. MSS. Library, this commentary is known to have been written by Brahmānandasarasvatī, most probably otherwise known as Tārakabrahmānandasarasvatī who has written a Krodapatra on grammar.

Breaks off in the 51st Paribhāṣā *i.e.* असिद्धपरिभाषा.

Beginning :

विद्याधीशं त्रिनेत्रं विमलमतियुतं वैद्यनाथाभिधेयं
जन्मस्थित्यन्तकारी निखिलजनिमतां यश्च पूज्यैः सुरेशैः।
आनन्दाब्धिर्महेशः सकलकृतिनतो दुर्गमो बोधहीनैः
सत्यज्ञानस्वरूपो विगतपरिमितिस्तं नमामो गिरीशम् ॥
यस्याम्नायोऽपि धत्ते चकितमतिशयं निष्कलङ्कोऽप्यबाधो
यस्य स्मृत्या भवाब्धिं तरति गतमलः शुद्धसंवित्कृतात्मा।
श्रीकृष्णं तं दयेशं निगमनुतिचरं बन्धनं प्राणराशे-
र्ध्यायं ध्यायं नमामश्चरितकलुषहरं स्रग्धरं वेणुमन्तम्।
यां शक्तिं समुपासते हि विबुधा देवेन्द्ररुद्रादयो
यस्या धीशसहस्रतुण्डफणभृच्छक्तो न वक्तुं गुणात्।
यस्या वेदवचांसि सत्यमचलं शक्ता न वक्तुं स्वत-
स्तां ध्यायेन्मुनिशृङ्गशैलनिरतां प्राप्तातिभाग्यावलिम् ॥
श्रितदुरितसमूहहं गणेशं जितमतिधीरमुनीशवन्द्यपादम्।
जनिनिलयसुसंगसंनिधानाद्विपदमपाकुरुते नुमो वयं तम॥
चित्प्रभानामिकां व्याख्यां परिभाषेन्दुशेखरे।
बालानां सुखबोधाय कुर्वे भाष्यप्रदर्शिकाम् ॥

स्वचिकीर्षितनिबन्धसमाप्तिप्रतिबन्धकदुरितप्रशमाय शिष्टाचारप्रतिपालनाय च शिष्टाचारानुमितश्रुतिप्रमाणकं निखिलजगद्गुरुश्रीपरमेश्वरनत्यात्मकमङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—नत्वेत्यादिना। तत्र नागेशशब्दः चतुष्टयी शब्दानां प्रवृत्तिरिति पक्षे कस्मिंश्चित् पुरुषविशेषे संज्ञात्वेन विनियुक्त इति संज्ञाशब्दः। तत्र रथकाराधिकरणन्यायेन योगजोपस्थितिं प्रति रूढ्यर्थोपस्थितेः प्रतिबन्धकत्वात् पुरुषविशेषोपस्थितौ कश्चिन्नागेशः पुरुषविशेषः परिभाषेन्दुशेखरं कुरुत इत्यन्वयः। त्रयी शब्दानां प्रवृत्तिरिति पक्षे तु न सन्ति यदृच्छाशब्दाः। तत्र नागेशशब्दः षष्ठीसमासशब्दः। तस्य च गुणशब्देऽन्तर्भावः। व्यक्तिविशेषे तु तत्रत्यगुणारोपेण प्रवृत्तिः, तत्र रथकाराधिकरणन्यायानवतारात्। नागानामीशो नागेश इति व्युत्पत्त्या शेषस्यापि मुख्यार्थग्रहणे नागेशः शेषः मद्बुद्धावारुह्य परिभाषेन्दुशेखरं कुरुत इत्यत्रान्वयः।

End :

अचः परस्मिन् इति सूत्रभाष्य इति। षट्व्या मृद्वेत्यत्र स्थानिवद्भावस्य प्रयोजननिराकरणायेति शेषः। नन्विदमन्तरङ्गत्वं जातबहिरङ्गस्थले युगपत्प्राप्तिस्थले वा इत्यतो लोकन्यायेन तथाविधस्यालाभादाद्यं निराकरिष्यमाणो द्वितीयमङ्गीकरोति—तदपीति। वाह ऊठ् सूत्रे . . . .।

This MS. contains the text also side by side.

519. 10. E. 26.

परिभाषेन्दुशेखरव्याख्या त्रिपथगा—राघवेन्द्राचार्यकृता

Paper. 97 Foll. 11½ × 4 inches. 7 lines in a page. Devanāgarī script. Old. Good. Good writing.

A commentary on Nāgeśa's Parībhāṣendusekhara by Rāghavendrācārya pupil of Vyāsa Nīlakaṇṭha. Aufrecht states that the author died about 1855 A.D. He also mentions the following other works under the authorship of this author : 1. Śabdakaustubhaṭīkā Prabhā 2. Laghuśabdendusekharaṭīkā Viṣamī.

Beginning :

वितन्यते त्रिपथगा विष्णुपादाब्जसङ्गिनी।
सागरस्य प्रिया चेन्दुशेखराङ्कविहारिणी ॥

नागेश इति। आत्मनामेति निषेधो नामविशेषविषय इति केचित्। सुखमनायासः, आयासेन भाष्यादितोऽपि बोधसंभवात्। प्राचीनेति; पाणिनेः। ज्ञापकन्यायसिद्धानीति पृथक्कोटिः। अनेन परिभाषासूत्रव्युदासः। भाष्येति। इदं द्वयोर्विशेषणम्। अनेन श्तिपा शपेत्यादिव्युदासः। परिभाषेति। परितो व्याप्तां भाषां परिभाषां प्रचक्षते इति कारिकायाम्। लिङ्गवत्त्वे सति फलवत्त्वं परिभाषात्वमिति केचित्। संज्ञाशास्त्रान्यत्वे सति विध्यपेक्षितार्थप्रतिपादकत्वं तत्त्वम्। संज्ञा च परिभाषा चेत्यभियुक्तोक्तौ अतिदेशस्य पृथगुपादानं ब्राह्मणवसिष्ठन्यायेनेति परे।

End :

शिष्यमाणं लुप्यमानार्थाभिधायि। प्रयुक्तानामन्वाख्यानम्। यथालक्षणमप्रयुक्ते। तेन वचन्तीत्यादि न, प्रयोगमूलत्वाद्व्याकरणस्मृतेः। न्यायसिद्धैषा। जहत्स्वार्था वृत्तिः। अजहत्स्वार्था वृत्तिः। जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी। अन्त्या सर्वत्र।

इयं के परिभाषेन्दुशेखरेण विधार्यताम्।
यतस्त्रिपथगा विष्णुपदस्पृक् सुमनःप्रिया॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारीणव्यासनीलकण्ठान्तेवासिना राघवेन्द्राचार्येण विरचिता त्रिपथा समाप्ता।

520. 33. L. 27.

परिभाषेन्दुशेखरव्याख्या त्रिपथगा—राघवेन्द्राचार्यकृता

Palm-leaf. 64 Foll. 17½ × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The scribe adds :

सीतारामसुधीजन्मसुब्रह्मण्याख्यसूरिणा।
लिखितेयं त्रिपथगा पाल्यतां यत्नतश्चिरम्॥
क्रोधनाब्दे तुलामासि द्वितीयायां सितच्छदे।
समग्रं लिखिता बुद्धिमतां मतिसुवृद्धये॥

521. 21. B. 13.

परिभाषेन्दुशेखरव्याख्या—भैरवमिश्रकृता

Palm-leaf. 30 Foll. 16 × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is simple and very useful commentary on Nāgeśa's Paribhāṣenduśekhara by Bhairavamiśra son of Bhavadeva of Agastya family. His father Bhavadeva was the son of Lakṣmaṇamiśra and grandson of Vandimiśra who was a resident of Prayāga and had the title of Mahāmahopādhyāya. It is stated that this commentary was written on Sam. 1878= 1821 A.D. Bhairavamiśra has written also commentaries on the Laghuśabdenduśekhara, Laghuśabdaratna and Vaiyākaraṇabhūṣanasāra. All the four works written by this author are available in print.

Wants beginning; otherwise complete.

Beginning :

वृत्तिप्रसङ्गादाह—ननु व्याघ्रीत्यादि। आदिना अश्वक्रीतीत्यादिग्रहणम्। न स्यादिति। स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वात्। गतिकारकोपपद। अत्र प्राक् सुबुत्पत्तेरित्यस्य उत्तरपदे इति शेषः। तेन चर्मेक्रीतीत्यत्र पूर्वस्य पदत्वान्नलोपसिद्धिः। सुबिति। स्त्रीप्रत्ययस्याप्युपलक्षणम्। अन्यथा पूर्वोपस्थितनि-

मित्तकत्वेनान्तरङ्गत्वात् स्त्रीप्रत्ययोत्पत्त्यनन्तरं समासे पूर्वोक्तानुपपत्तितादवस्थ्यं स्यात् ।

End :

अत्रेदमवधेयम्—अत्र ग्रन्थादौ लण् अइउण्सूत्र-योर्णकारस्यैवोपादानेन अणिण्ग्रहणेषु संदेहादनिर्णय: प्राप्नोतीति तद्व्यावृत्त्यर्थं व्याख्यानतो विशेषप्रतिपत्तिर्न हीति परिभाषोपनिबद्धा । अन्त्येऽपि परिभाषान्त-राणां व्याख्यानं कृत्वा अर्धमात्रालाघवेनेति परिभाषा व्याख्यानद्वारैवोपनिबद्धा । न तु परिभाषान्तराणा-मिवास्यां अवतरणपूर्वकोपन्यास इति व्याख्यानस्य शिष्टकृतस्य मुख्यत्वं दर्शितम् । तेनानित्यपरिभाषाणां शिष्टकृतव्याख्यानेन लक्ष्यानुरोधेन प्रवृत्त्यप्रवृत्तिकल्प-नम् । एवमेकयोगनिर्दिष्टानां क्वचित् प्रवृत्तिनिवृत्ती क्वचिदेकदेशस्याप्यनुवृत्तिरित्यपि व्याख्यानेनैव कल्प-नीयमिति । एवमादौ प्राचीनवैयाकरणतन्त्रे वाचनि-कानीत्युक्तम् । तच्चायुक्तम् । अर्धमात्रालाघवेन पुत्रो-त्सवं मन्यन्ते, किंपुनर्बहूनां वचनानां ज्ञापनेनैव संग्रहे आनुपूर्वीरूपेण पठनेनापि तथेति सूचितमिति ।

भूतिसप्ताष्टचन्द्राब्दे नन्दनेऽखिलनन्दने ।
वसन्ततौ मधौ शुक्ले पक्षे चान्द्रतिथौ कुजे ॥
पूर्णेयं तनुतां मोदं यथाशक्ति मया कृतम् ।
विदुषां वक्षसि हरेर्न्यस्ता तस्मात्स तुष्यतु ॥

Colophon :

इति श्रीमत्तीर्थराजप्रयागनगरवासिदेवताप्रसादलब्धा-खिलेष्टफलमहामहोपाध्यायागस्त्यगोत्रोत्पन्नवन्दिमिश्रा-त्मजलक्ष्मणमिश्रसुतभवदेवमिश्रपुत्रभैरवकृतपरिभाषावि-वृतिव्याख्या समाप्तिमगमत् ।

522. 23. K. 9.

परिभाषेन्दुशेखरव्याख्या सर्वमङ्गला—शेषशर्म-कृता

Palm-leaf. 190 Foll. 15 × 1⅜ inches. 10 lines in a page. Grantha script. Old. Injured. Clear writing.

This is another commentary on Nāgesa's Paribhāṣenduśekhara, by Śeṣaśarman. From the stanza found in the beginning of the MS. described under the next number and from the colophon quoted in No. 1473 of the Des. Cat. of the Madras Govt. Ori. MSS. Library it is known that the author was Śeṣaśarman *alias* Kāśī Śeṣaśāstrin and he was patronized by Kṛṣṇarāja of Mysore. The work seems to be very recent one.

Breaks off in 94th Paribhāṣā.

Beginning :

विश्वेश्वरं गुरुं नत्वा ध्यात्वा च हृदि भारतीम् ।
विवृणोमि यथामेधं परिभाषेन्दुशेखरम् ॥
प्रवृत्तिमेतां दृष्ट्वा मे हसत्यात्मापि लज्जया ।
तथापि देशिकदया वाचालयति सांप्रतम् ॥
दोषान्वितोऽपि तनुतां मत्प्रबन्धः सतां मुदम् ।
सद्युक्तिभिरनुश्लिष्टकलङ्कोऽपि विधुर्यथा ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये एतच्छास्त्रस्य मूलभूतचतुर्दशसूत्रोपदेष्टृत्वेन प्राचार्य-त्वात्साम्बशिवस्य एतद्ग्रन्थादौ समुचितं तन्नत्यात्मकं मङ्गल शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेत्यादिना । कुरुत इति । यशस: शिष्याणामनायास-ज्ञानेजन्यसुकृतस्य चात्मगामित्वादात्मनेपदम् । बा-लानामिति । बालत्वं च भाष्यादित: परिभाषार्थग्रहणा-समर्थत्वे सति व्युत्पित्सुत्वम् । परिभाषेन्दुशेखरमिति । ग्रन्थपक्षे इन्दुरिव स्थिता परिभाषा शेखरो भूषणं व्यस्य । तस्या एव व्याख्येयत्वेन प्राधान्यात् भूषण-त्वारोप: । शिवपक्षे तु परिभाषेवेन्दुरिति मयूरव्यंस-कादित्वात्समास: ।

End :

किंच ज्यायानित्यत्र दीर्घप्रवृत्तिद्वारा अकारस्य कृतार्थतया सामर्थ्यविरहात् ज्येष्ठ इत्यत्र यस्येति लोपापत्तिः । प्रकृत्यैकाजितिसूत्रं तु आदेशेष्वजुच्चारण-सामर्थ्यात् टिलोपाप्रवृत्त्या प्रत्याख्यातमिति चेत्—न, अकृदिति पर्युदासेऽपि सुब्भिन्नत्वेनैवाङ्गीकार्यम् । न तु त्वदुक्तरीत्या, कष्टायत इत्यादौ.

Three extra leaves found at the end repeat a portion of the work described above.

The fly-leaf found at the beginning reads the following stanzas :

' असंपादयतः कंचिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत् पुंसः संज्ञायै जन्म केवलम् ॥
दातैव ह्यर्थिभिर्याच्यः क्षीणवित्तोऽपि सर्वदा ।
शुष्कोऽपि हि नदीमार्गः खन्यते सलिलार्थिभिः ॥
यस्य षष्ठी चतुर्थी च चिरस्य च चिराय य ।
अहं कथं द्वितीया स्याद् द्वितीया स्यामहं कथम् ॥"

523. 40. A. 82.

परिभाषेन्दुशेखरव्याख्या सर्वमङ्गला—शेषशर्मकृता

Paper. 96 Foll. 13 × 8 inches. 26 lines in a page. Devanāgarī script. Old. Injured, Good writing.

The following verse is added in the introduction :

नमन्महीपमण्डलीकिरीटरत्नभाझरी-
विराजिताङ्घ्रिकृष्णभूपतीन्द्रकृत्तसंमतिः ।
तनोतु सर्वमङ्गला सदा परां मुदं सता-
महीनवाग्विभूषिता मनीषिशेषशर्मणः ॥

Breaks off in the 12th Paribhāṣā *i.e.* निर्दिश्यमानपरिभाषा. This is written on one side of paper.

524. 10. B. 28.

परिभाषेन्दुशेखरव्याख्या—शंकरभट्टकृता

Paper. 21 Foll. 12½ × 5 inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

This also is a commentary on Nāgeśa's Paribhāṣenduśekhara, by Śaṁkarabhaṭṭa. The author's name is not found anywhere in the MS. But as the margins contain the mark शं on every page it is presumed that the work may be of Śaṁkarabhaṭṭa. The commentary is different from those described above.

Wants the beginning and end.

Beginning :

आहुरिति । यद्यपि परिभाषादेशे विधिशास्त्राणा मुपस्थितौ गुणभेदकल्पनेन तदेकवाक्यता ; नान्यथा । इको यणचीत्यादौ तत्तद्विधीनां व्यवहिताव्यवहित-साधारणप्रवृत्तौ परिभाषैकवाक्यतायामपि जातनिवृत्त्य-योगात् भुक्तवन्तमिति न्यायबाधापत्तेश्च प्राचीनोक्ता वाक्यैकवाक्यता कर्तुं न शक्या । संज्ञाशास्त्राणां तु मृजेर्वृद्धिरित्यादौ वृद्धिपदश्रुत्योपस्थितवृद्धिरादैजित्यस्य तदर्थमविज्ञाय वृद्धिपदाभिन्ना आदैच इति बोधः । मृजेरिकः स्थाने वृद्धिपदाभिन्ना आदैचो भवन्तीत्येतावत्तैव वाक्यैकवाक्यताव्यवहारान्नोक्तदोषः । तत्रैकवृद्धि-पदानर्थक्यं तु न, चारितार्थ्यात् । तथापि उक्तषष्ठी-स्थान इति सूत्रभाष्यात्तु प्राचीनैर्ज्ञापयितुं शक्या ।

End :

यद्यपि णचः स्त्रियामित्यत्र तदादिनियमेऽपि समु-

दायो भविष्यतीति नास्य फलम्, तथाप्यवयवावृत्त-द्व्यावृत्तये फलस्य सत्त्वादिति भावः। थाथेति। अत एव भाष्ये गतिकारकेत्युक्त्वा एवमप्यवयवत्वापत्तिः प्राप्नोतीत्याशङ्क्य अनया समाहितम्। तत्फलं तु अणि नियुक्त इति स्वरविधायके अनुपस्थित्या छत्रधार इत्यादावस्यासिद्धिः।

525. 26. L. 30.

पाणिनीयवादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 59 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a treatise containing controversial discussions on certain selected topics connected with Pāṇini's Grammar, by the famous author Appayadīkṣita son of Raṅgarājādhvarin of Bhāradvājagotra. It is said that this work was written by him after finishing the work Pūrvottaramimāṁsāvādanakṣatramālā, a similar work on Pūrvamīmāṁsā and Vedānta. From the title *viz.* Vādanakṣatramālā it is presumed that the work must consist of 27 vādas.

This codex contains only the following 5 vādas the last being incomplete:

१. क्ङौ लुप्तं न स्थानिवदिति निराकरणवादः, २. असिद्धत्वसमर्थनवादः, ३. नधातुलोपसूत्रप्रत्याख्यानवादः, ४. तक्रकौण्डिन्यन्यायार्थनिरूपणवादः and ५. विप्रतिषेधार्थनिरूपणवादः (incomplete.)

Beginning:

उद्धाव्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः॥
पूर्वोत्तरतन्त्रयुगे रचिता नक्षत्रसंमिता वादाः।
अधुना पाणिनितन्त्रे विदुषां तोषाय रच्यन्ते॥

क्ङिलुगुपधात्वचङ्परनिर्हासकुत्वेषूपसंख्यानमिति वार्तिके क्ङौ लुप्तं न स्थानिवत् इत्यर्थस्य क्वचिद् ग्रन्थेषु निषेधदर्शनात् क्वचिदङ्गीकारदर्शनाच्च विप्रतिपत्त्या विचार आरभ्यते। तत्र कश्चिदाह—क्ङौ विधिं प्रति न स्थानिवदित्येवाश्रीयते; न तु क्ङौ लुप्तं न स्थानिवदिति। तथाहि क्ङौ लुप्तं न स्थानिवदित्यर्थाश्रयणे लुनातेर्णिजन्तात्क्विपि लू इ व् इति स्थिते णिलोपादन्तरङ्गत्वाद्धातोर्वृद्ध्यावादेशयोः कृतयोः पश्चाल्लोपे वलि लोपात्परत्वात् ऊठि कर्तव्ये क्ङौ कृतस्य णिलोपस्य स्थानिवत्त्वनिषेधात् ऊठ्सिद्धावपि लवमाचष्टे लवयति लवयतेः क्विपि लव् इ व् इति स्थिते णिलोपटिलोपयोः क्ङौ कृतस्य णिलोपस्य स्थानिवत्त्वनिषेधेऽपि णौ कृतस्य टिलोपस्य स्थानिवत्त्वात् ऊठोऽप्राप्तौ क्ङौ विधिं प्रति न स्थानिवत् इत्यस्यार्थस्यावश्याश्रयणीयत्वात् अनेनैव लावयतेः लौः लवमाचष्टे लौः इत्युभयोपपादनसंभवे अर्थान्तराश्रयणस्य निष्प्रयोजनत्वात्, एकस्मिन् वाक्ये अर्थद्वयस्यालाभाच्च।

End:

अत एव अनुदात्तं पदमेकवर्जम् इत्यत्र सूत्रे आमलकीज इत्यत्र दीर्घकाशतुषभ्राष्टवटं जे दीर्घन्तस्यानुदात्तो भवतीत्याद्युदात्तत्वस्य शमीजः कुटीजः इत्यादौ सावकाशस्य अन्त्यात्पूर्वं बह्वचो जे बह्वचोऽन्त्यात्पूर्वमुदात्तं भवतीति उपसरज इत्यादौ सावकाशस्योत्तमोदात्तत्वस्य च प्रसङ्गे नोदात्तं पदमेकवर्जम् इति सूत्रणां विहाय अनुदात्तं पदमेकवर्जम् इति सूत्रणे स्वतन्त्रविधित्वे चास्याङ्गीक्रियमाणे चाद्युदात्तत्वोत्तमोदात्तत्वयोर्यौगपद्यासंभवात्...।

Colophon:

१. इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीमहाव्रतयाजिश्रीमदप्पयदीक्षितस्य कृतौ पाणिनीयवादनक्षत्रमालायां क्रौ लुसं न स्थानिवदित्यस्यार्थस्य निराकरणसमर्थनश्रवणनक्षत्रवादः ।

२. इति श्रीमद्भारद्वाज+नक्षत्रमालायामसिद्धत्वसमर्थनवादः ।

३. इति श्रीमद्भारद्वाज+नक्षत्रमालायां न धातुलोपसूत्रप्रत्याख्यानसमर्थनवादः ।

४. तक्रकौण्डिन्यन्यायार्थनिरूपणवादः ।

526. 34. F. 13.

पाणिनीयवादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 21 Foll. 18 × 1½ inches. 9 lines is a page. Grantha script. old. Slightly injured. Good writing.

Breaks off in the second Vāda.

527. 40. E. 65.

प्रबोधचन्द्रिका—वैजलदेवकृता

Paper. 8 Foll. 9½ × 4½ inches. 12 lines in a page. Devanāgarī script. Old. Much injured. Good writing. Fol. No. 2 is missing.

This is an elementary work on Sanskrit grammar dealing with the topics like vibhakti, kāraka, samāsa etc. written in anuṣṭubh verses. The author's name is spelt in different ways in different MSS. *viz.* Baijaladeva, Vaijaladeva and Vaisaladeva. According to this MS. the author was the son of Candrāvatī and Vīrasena of Cauhūna family. But the MSS. described in the Catalogues of the India Office Library (No. 898, page 249, part II), Madras Govt. Oriental MSS. Library (Des. No. 1493, Vol. III) and the Tanjore Palace Library (No. 5756, Vol. X) mention the author's father as Vikramāditya. The author is said to have been a petty ruler of Patna and a pious devotee of S'rī Rāma. It is also stated that the work was written originally for the benefit of the author's son Hīradhara or Hirādhara. From the concluding stanzas found in the Telugu Printed edition and the MS. described under D. No. 1493 of the Madras Govt. Oriental MSS. Library Catalogue, Vol. III, it is understood that the work was written in the year Dhātṛ Saṁvat 1862 or S'aka 1727 corresponding to 1805 A.D. The work consists of 432 verses in whole distributed to 8 chapters, *viz*—1. Svādi (92 verses). 2. Tyādi (33), 3. Kāraka (56), 4. Anukta (66), 5. Samāsa (38), 6. Taddhita (40), 7. Kṛt (36) and Sandhi (71). The work contains also suitable illustrations composed by the author purporting S'rī Rāma's Story.

The MS. breaks off in the 5th chapter dealing with Samāsa.

Beginning:

हरिहरगुरुभक्तः सर्वलोकानुरक्त-
स्त्रिभवनगतकीर्तिः कान्तकन्दर्पमूर्तिः
रणरिपुगणकालो वैजलक्ष्मोणिपालो
जयति जगति दाता सर्वकर्मावधाता ॥ १ ॥
चन्द्रावतीवदनचन्द्रचकोरभूत-
श्रीवीरसेनतनयो नयतन्त्रवेत्ता ।

चौहाणवंशतिलकः परमाधिनाथो
राजा परं जयति बैजलदेवनामा ॥ २ ॥
रामो मे विहितं करोतु सततं रामं भजे सादरं
रामेणापहृतं समस्तदुरितं रामाय दत्तं धनम् ।
रामान्मुक्तिरभीप्सिता सरभसं रामस्य दासोऽस्म्यहं
रामे तिष्ठतु मे मनः करुणया हे राम मां पालय ॥ ३ ॥
श्रीमद्बैजलदेवेन रामभक्तिरतात्मना ।
इति चिन्तितमेकान्ते कदाचित्तिष्ठता सता ॥ ४ ॥
अस्थि वज्रसमं यस्य यस्य चर्म च वर्मवत् ।
स दधीचिः स कर्णो वा नातिष्ठत्सुचिरं भुवि ॥५॥
न संप्रति शरीराणि न राज्यानि धनानि च ।
तेषां स्वर्गगतानां च कीर्तिर्जागर्ति भूतले ॥ ६ ॥
पद्मिनीपत्रजलवत्संसारे सर्वमस्थिरम् ।
कीर्तिरक्षरसंवृद्धा स्थिरा भवति भूतले ॥ ७ ॥
इह लोके सुखं येन परलोकेऽपि जायते ।
तदेव प्रत्यहं कर्म क्रियते दूरदर्शिना ॥ ८ ॥
संसाराम्भोधितरणं रामनामानुकीर्तनम् ।
रामनामाङ्किता तस्मात्क्रियते प्रक्रिया मया ॥ ९ ॥
बालकानां प्रबोधाय तोषाय विदुषामपि ।
आकल्पमपि संसारे कीर्त्यवस्थापनाय च ॥ १० ॥
चिन्तयन्निति निर्यातः क्रीडन्तं श्रीहिराधरम् ।
श्रीमान्बैजलभूपालः श्रीहीराधरमब्रवीत् ॥ ११ ॥

End :

कान्तोऽनुगम्यते क्रोशं कान्तया स्निग्धचेतसा ।
अन्यस्य कर्मणोऽसत्त्वे कालाद्यप्याह कर्म यः ॥ ६४ ॥
कुम्भकर्णेन सुप्यन्ते षण्मासा रामभूभुजा ॥
वने द्वादश वर्षाणि स्थीयते गुरुशासनात् ॥ ६५ ॥

Colophon :

प्रबोधचन्द्रिकायां तु कृतौ बैजलभूपतेः ।
इत्युक्तचन्द्रिका सम्यक्समाप्तातिमनोहरा ॥ ६६ ॥

समासः षड्विधो नाम्ना ज्ञेयस्तत्पुरुषस्तथा ।
कर्मधारयसंज्ञश्च बहुव्रीहिस्तथैव च ॥ १ ॥
द्विगुर्द्वन्द्वोऽव्ययीभावः प्राधान्यं च चतुर्विधम् ।
पूर्वोत्तरोभयान्येषां पदार्थानां विकल्पनात् ॥ २ ॥
तत्पुरुषो द्विप्रधानस्तत्र पूर्वप्रधानके ।
प्रधानं तु यथा पूर्वकायश्चापरकायवत् ॥ ३ ॥
अथोत्तरपदार्थस्य प्रधानं रामसेवकः ।
द्विप्रधानस्तथा कर्मधारयोऽपि भवेद्यथा ॥ ४ ॥
रामः पुरुषसिंहोऽयं पूर्वप्राधान्यमीदृशम् ।
नीलोत्पलमिवाक्ष्यादिरित्युत्तरपदार्थकः ॥ ५ ॥
द्विप्रधानं बहुव्रीहेरन्यत्रोभयत्र च ।
तत्रान्यपदार्थे च तत्प्रधानं निगद्यते ॥ ६ ॥
स्मृतरामोऽहमनिशमुभयत्र पदार्थके ।
प्रधानता यथा द्वित्राः पञ्चषाः सप्तषास्तथा ॥ ७ ॥
उभयत्र पदार्थे च द्वन्द्वे प्राधान्यमिष्यते ।
गुरोरादिश . . . . . ।

The fly-leaf added at the beginning contains the following :

"प्रथमा यत्र कर्ता स्याद् द्वितीया तत्र कर्मणि ।
तृतीया यत्र कर्ता स्यात्प्रथमा तत्र कर्मणि ॥
कर्तरि प्रत्ययो यत्र यथा कर्ता तथा पदम् ।
कर्मणि प्रत्ययो यत्र यथा कर्म तथा पदम् ॥

कर्तरि प्रथमान्तः कर्ता । द्वितीयान्तं कर्म । कर्मणि प्रथमान्तं कर्म । तृतीयान्तः कर्ता ।"

528. 41. A. 1.

प्रयोगसंग्रहः—वररुचिकृतः

Paper. 2 Foll. 11 × 4½ inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

A brief elementary grammar dealing with Kāraka, Samāsa, Taddhita and Kṛt in 25 anuṣṭubh verses. The author is one Vararuci, apparently different from the author of Vārtikas on Pāṇini's Sūtras.

Complete.

Beginning :

प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ।
संज्ञया षड्विधं भेदात् त्रयोविंशतिधा पुनः ॥ १ ॥
तत्र पञ्चविधः कर्ता कर्म सप्तविधं भवेत् ।
करणं द्विविधं चैव संप्रदानं त्रिधा मतम् ॥ २ ॥
अपादानं द्विधा चैव तथाधारश्चतुर्विधः ।
करोति कारकं सर्वं तत्स्वातन्त्र्यविवक्षया ॥ ३ ॥

End :

वर्तमाने तु निर्देशे वर्तेते शतृशानचौ ।
तव्यसंज्ञापनात्ताभ्यां समासो न तु सिध्यति ॥ २५ ॥
ग्रन्थगौरवभीत्याहं श्लोकानां पञ्चविंशतेः ।
पदार्थभारं निर्वोढुं प्रभवेयं भवे भवे ॥ २६ ॥

529. 24. L. 30.

प्रयोगसंग्रहः—वररुचिकृतः

Palm-leaf. 3 Foll. 13½ × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

At the end three extra leaves contain a few lines from the Dhātupratyayapañcikā and one leaf reads the following stanzas :

"चञ्चत्कङ्कणनिःस्वने कटिलसत्काञ्चीमनोज्ञस्वने
पद्माकारपदे प्रवालयुगले पद्मासमानेक्षणे ।
किंचिद्भ्रष्टकुचोत्तरीयवसने मन्दस्मिताभाषणे
वक्त्राभाजितदर्पणे तव करात्ताम्बूलमानीयताम् ॥
तालाकारपयोधरे तनुभुवस्तन्त्राधिकारक्रिये
ताम्यन्मध्यलते तटित्समरुचे तन्त्रीसमालापिनि ।
ताटङ्काङ्कतरङ्गिताक्षियुगले तन्वङ्गि ताम्राधरे
तारानाथनिभानने तव करात्ताम्बूलमानीयताम् ॥२॥
कस्तूरीपरिमोदपूगशकलं कर्पूरखण्डान्वितं
मुक्ताचूर्णसमेतमिन्दुधवलं स्वच्छाहिवल्लीदलम् ।
हे कान्ते नवयौवने शशिमुखी कंदर्पकान्तासमे
कल्पाकल्पकलापिनि प्रियतमे ताम्बूलमानीयताम् ॥"

530. 29. F. 16.

प्रयोगसंग्रहः—वररुचिकृतः

Palm-leaf. 6 Foll. 15½ × 1¾ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

The readings are slightly different. Reads the following colophon :

इति वररुचिमुनिविरचितः प्रयोगसंग्रहः ।

Complete.

The scribe adds :

"इत्थं वररुचिप्रोक्तप्रयोगस्तोमसंग्रहः ।
आत्रेयवेंकटार्येण लिखितो धीमतां मुदे ॥"

531. 41. A. 1.

प्रयोगसंग्रहव्याख्या प्रयोगमुखम्

Paper. 21 Foll. 11 × 4½ inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

An anonymous commentary on the preceding work. The commentary is called Prayogamukha.

Complete.

Beginning :

इदानीमेषां श्लोकानां व्याख्या । यो यथाविहितं प्रयोगं ज्ञातुमिच्छति तेन पुरुषेणादितः प्रथमतः कारकं ज्ञेयम् । प्रयुज्यत इति प्रयोगः । अकर्तरि च कारके संज्ञायाम् इति घञ् प्रत्ययः । घकारश्चजोः कु घिण्ण्यतोरिति विशेषणार्थः । अनेनैव कुत्वं गकारः । कीदृशं कारकम् ? संज्ञया षड्विधम् । नाम्ना षट्प्रकारम् । कथं तदित्याह—कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि ।

* * * * *

कर्मधारयः समासः । कर्म भूत्वा कर्ता भवति । किमुदाहरणम्—यथा स्वयमेव दृश्यते दुष्टजनदोषः, स्वयमेव लूयते केदारः । स्वयमेव छिद्यते प्राकृतजनस्नेहः । स्वयमेव पच्यते ओदनः । स्वयमेव छिद्यते वृक्षः । एषामयमर्थः । कश्चित् वृक्षं छिनत्ति, तदा वृक्षः कर्म भवति । स च वृक्षः छेदनक्रियायामानुकूल्यं भजमानः स्वयमेवात्मानं छिनत्तीत्यर्थः । एतेन कर्म कर्ता भवति । कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवद्भावः । अतिदेशोऽयम् । कर्मणा तुल्यक्रियः कर्ता कर्मवद्भवतीत्यर्थः । कर्माश्रयाणि कार्याणि प्रतिपद्यत इत्यर्थः ।

End :

शतृ यथा—कुर्वन् तिष्ठति । करिष्यन् । शानच् यथा—करिष्यमाणः । लटः शतृशानचौ भवतः । तव्यसत्संज्ञकाभ्यां च समासो नैव सिध्यति । कोऽर्थः ? एताभ्यां समासो न भवति । ब्राह्मणस्य कर्तव्यः । ब्राह्मणस्य कुर्वन् । ब्राह्मणस्य कुर्वाणः । ब्राह्मणस्य करिष्यन् । ब्राह्मणस्य करिष्यमाणः । पूरणगुणसुखितार्थसदव्यय इति समासनिषेधः ।

ग्रन्थनादभयेनाहं श्लोकानां पञ्चविंशतेः ।
पदार्थभारमुद्वोढुं प्रभवेयं भवे भवे ॥

Colophon :

इति श्रीप्रयोगमुखो ग्रन्थः समाप्तः ।

The MS. described under No. 5758 of the Tanjore Libr. Des. Catalogue, reads the following Colophon attributing the authorship to Vararuci, the author of the text :

इति श्रीमन्महापण्डितमण्डलीविराजमानव्याकरणपरमाचार्यश्रीवररुचिमहाशयेन दुर्बुद्धिबालकानां बोधनार्थं विरचिते प्रयोगमुखे कृदन्तपटलः समाप्तः ।

The date of copying :

भाद्रपदे कृष्णपक्षे अष्टम्यां रवौ कन्यास्थे लिखितोऽयं ग्रन्थः । संवत् १७४१ शक १६०६= 1684 A.D.

The former owner of the MS. : अस्य प्रतिनिधिः लिखित्वा धर्मेश्वरभट्टेभ्यो दत्तः । इदं पुस्तकं सुन्दरपन्तगणेशदशपुत्रस्य ।

532. 28. J. 12.

प्रातिपदिकार्थसूत्रार्थविचारः

Palm-leaf. 5 Foll. 17½ × 1½ inches. 11 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A short treatise explaining the meaning of Pāṇini's Sūtra *viz.* प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (2-3-46). The author's name is not known.

Incomplete.

Beginning :

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । प्रातिपदिकार्थश्च लिङ्गं चेत्यादिक्रमेण द्वन्द्वः । मात्रपदेन मयूरव्यंसकादित्वादस्वपदविग्रहः । द्वन्द्वोत्तरं श्रूयमाणस्य

मात्रपदस्य प्रत्येकमभिसंबन्धः। तथा च प्रातिपदिकार्थमात्रे इत्यादिवाक्यचतुष्टयम्। तत्र च प्रातिपदिकार्थमात्रे प्रथमेत्यस्यायमर्थः—प्रातिपदिकवृत्त्यधीनबोधविषयतावच्छेदकत्वाभिमतधर्मावच्छिन्नोऽर्थः। सप्तम्या बोधकत्वं वाचकत्वं वार्थः। तस्याश्रयतासंबन्धेनाक्षिप्तप्रातिपदिकङ्याबन्तप्रातिपदिकेष्वन्वयः। मात्रपदस्यान्ययोगव्यवच्छेदार्थकतयोक्तप्रातिपदिकार्थतावच्छेदकत्वाभिमतधर्मावच्छिन्नान्याविषयकता प्रातिपदिकार्थतावच्छेदकत्वाभिमतधर्मावच्छिन्नविषयकबोधजनकताश्रयङ्याबन्तप्रातिपदिकान्यतमोक्तवृत्तिः स्वौजसन्यतमात्मिका प्रथमेति वाक्यार्थः संपद्यते।

End:

उत्सर्गतः प्रातिपदिकजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति सुबन्तज्ञानं कारणमित्यागतम्। विशेषतस्तु प्रातिपदिकार्थाद्यन्यतमबोधं प्रति द्वितीयाद्यन्तत्वज्ञानस्य कारणाता स्यात्। एवं कर्मत्वादिविषयबोधकारणत्वं प्रथमान्तत्वादिज्ञानस्य स्यादिति विशेषतः कार्यकारणभाव आवश्यक इति। अत्र प्रथमान्तत्वज्ञानस्य कार्यतावच्छेदकवैलक्षण्यं दर्शयति—प्रातिपादिकार्थेत्यादिना।

533. 22. P. 11.

बालबोधः

Palm-leaf. 2 Foll. 15½ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Fol. No. 2 is missing and consequently verses 26 to 37 are wanting.

A small metrical work explaining briefly some of the leading topics of Pāṇini's grammar for the benefit of young students.

Incomplete.

Beginning:

श्रीकृष्णं सर्वलोकेशं नमस्कृत्य वितन्यते।
काव्यव्युत्पित्सुबालानां सुखबोधकरी कृतिः॥ १॥
भ्वादयो धातवः स्युस्त एकादशगणोदिताः।
भ्वाद्यदादिजुहोत्यादिदिवादिस्वादयस्तथा॥ २॥
तुदादिश्च रुधादिश्च तनादिः क्रयादयस्तथा।
चुरादिकण्ड्वादी चेति ते गणा गणिताः क्रमात्॥३॥
सत्तादिकाः क्रिया अर्था भ्वादीनां समुदीरिताः।
एकादशगणोक्तास्त इमे द्वेधा हि धातवः॥ ४॥
सकर्मकर्तृकाः केचित् केचिच्चाकर्मकर्तृकाः।
सकर्मकेभ्यो धातुभ्यो लकाराः कर्तृकर्मणोः॥ ५॥

End:

अनादरे च षष्ठी स्यान्निष्ठालादेशतृन्तृचाम्।
नैव षष्ठी सप्तमी च विषयत्वे तथैव च।
अभिव्याप्तौ च सा निर्धारणार्थेऽपि सा भवेत्॥४८॥

Then three extra leaves are added and they contain some unimportant domestic documents in Tamil written in favour of one Veṅkaṭasubbā S'āstri. As the writing is most illegible and confusive, the extracts of these documents are not given here.

534. 28. K. 5.

बालबोधिनी—बालसूरिकृता

Palm-leaf. 55 Foll. 17¼ × 1 inches. 8 lines in a page. Grantha and Tamil scripts. Old. Iujured. Good writing.

A primer in Sanskrit grammar explaining the fundamental principles in easy method for the benefit of young students. In certain instances the grammatical terms

are explained in Tamil also. The author Bālasūri was the son of S'eṣabhaṭṭa.

Contains the following chapters:

(१) अन्वयप्रकरणम् (२) शब्दप्रकरणम् (३) अव्ययप्रकरणम् (४) विभक्त्यर्थप्रकरणम् (५) धातुप्रकरणम् (६) समासादिपञ्चवृत्तिप्रकरणम् (७) संधिप्रकरणम् (८) वृत्तिप्रकरणम् (incomplete).

Beginning:

नत्वा श्रीशेषभट्टाख्यं पितरं बालसूरिणा।
लीलया बालबोधाय तन्यते बालबोधिनी ॥

आदौ द्राविडभाषया विभक्त्यर्था उच्यन्ते। *அவனிவன் அவளிவள் அவரிவர் அதுயிது அதுகளிதுகள் ஆக ப்ரதமை. வாராய் வாரீர் வாரும் வாருங்கள் ஸம்போதனப்ரதமை. அவற்றை இவற்றை அவனை இவனை அவளை இவளை அத்தை இத்தை ஆக த்விதீயை. ஆல் ஓடே த்ருதீயை. பொருட்டு சதுர்த்தி. நின்றும் காட்டில் நிமித்தம் ஆலே பஞ்சமி. க்கு, உடைய, ஷஷ்டி. இல் இலே ஸப்தமி. என்று ஏழுவிபக்திக்கும் அர்த்தம்.* अकारान्तः पुंलिङ्गो रामशब्दः। रामः रामौ रामाः। हे राम हे रामौ हे रामाः।

Colophon:

इति बालबोधिन्यां संक्षेपेण विभक्त्यर्थाकाङ्क्षान्वयकथनं नाम प्रथमं प्रकरणम्।

End:

नित्यं लोपः पदान्तस्य हल्पूर्वस्य यस्य तु। अवर्णपूर्वस्य पदान्तस्य यकारस्य नित्यं लोपः स्यात् हलि परे। देवा य् नम्या इति स्थिते नित्यं यलोपे कृते देवा नम्याः। एतत्तदोश्च सोर्यः स्यात्तस्य लोपो हलि स्मृतः। स्पष्टोऽर्थः। एष स् विष्णुः एष विष्णुः। स शंभुः। इति स्वादिसंधिः।

Colophon:

इति सप्तमं संधिप्रकरणम्।

परार्थाभिधानं वृत्तिः। अस्यार्थः—नीलघट इत्यादौ नीलपदघटपदवाच्यार्थाभ्यां भिन्नः नीलघटपदार्थयोः परस्परसामानाधिकरण्यसंबन्धरूपोऽर्थ इति यावत्। स एव वृत्तिशब्दार्थः। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। लोट् च। आशिषि लिङ्लोटौ। विधिः नियोगकरणम्। निमन्त्रणम् आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं कामचारानुज्ञा। अधीष्टः सत्कारः। आमन्त्रणे—इहासीत भवान्। अधीष्टे—पुत्रमध्यापयेत्। संप्रश्ने—किं भो वेदमधीयीयोत तर्कम्। प्रार्थने—भो भोजयेय अहम्। एवं लोट्।

अवीतन्त्रीतरीलक्ष्मीधीश्रीहीणामुणादितः।
सप्तानामेव शब्दानां सुलोपो न कदाचन ॥

The date of copying and the name of the scribe:

क्रोधननामसंवत्सरं तुलामासम् 1 ऒ *நல்லாடையிலிருக்கும் ஸாம்பமூர்த்தி ஸ்வஹஸ்தலிகிதம்.*

535. 28. K. 15.

बालबोधिनी—बालसूरिकृता

Palm-leaf. 8 Foll. 12½ × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. 3 and 4 are missing.

Contains the fourth Prakaraṇa *i.e.*, Kārakaprakaraṇa only incomplete.

536. 39. F. 14.

मुखभूषणम्

Paper. 83 Foll. $7\frac{1}{8} \times 5\frac{3}{4}$ inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

Justifies the correctness of some of the words found in standard works and criticized as grammatically incorrect by some later critics. The author's name is not known.

Incomplete.

Beginning :

नित्यां ज्योतिर्मयीमेकां विग्रहत्रयशालिनीम् ।
परब्रह्मस्वरूपां तां परां वाचमुपास्महे ॥

इह खलु द्विविधाः शब्दाः लौकिका वैदिकाश्चेति । वेदे भवा वैदिकाः । यद्यपि लौकिकानां वेदेऽपि वृत्तिस्तथाप्यसाधारणवैदिकापेक्षया ते लौकिका इत्युच्यन्ते । लोक्यते शब्दार्थः पुरुषार्थो वात्रेति लोको वृद्धव्यवहारः । द्विविधा वृद्धा इतिहासज्ञाः क्राव्यज्ञाश्चेति । तेषां व्यवहारो वृद्धव्यवहारः । तत्र विदिता लौकिकाः । तत्र तावत् कविव्यवहारगोचराः केचन शब्दाः प्रक्रियाणां दुर्लक्षत्वात् अपशब्दाभासतां प्रतिपन्नाः प्रतीतिस्खलनं सहृदयानामुत्पादयन्ति । किं च,

पुरुषस्य स्वविद्यायामर्थं वर्णयतः सतः ।
पदं प्रत्यनभिज्ञत्वं नैव शोभावहं भवेत् ॥

तस्मात्तेषां व्युत्पत्तिः किंचिन्निरूप्यते । यथा—

'सोढुं न तत्पूर्वमवर्णमीशे
आलानितं स्थाणुमिव द्विपेन्द्रः' ।

अत्रायादिसंध्यभावदर्शनादपशब्दप्रतीतिर्न कार्या । कथम् ? संहितायामित्यस्मिन् सूत्रे विवक्षितायामिति संबध्यते । तेन विवक्षितस्तु संधिर्भवतीत्यर्थः सेत्स्यति । संहितैव संधिः । तेन तत्कार्यभूतो गुणादिरुच्यते । तत एचोऽयवायाव इति । अस्यायमर्थः—संहितायामिति वर्तते । एचः स्थाने यथासंख्यम् अय् अव् आय् आव् इत्येते आदेशा भवन्ति अचि परतः संहितायां विवक्षितायामिति । एतदनुसारेणात्र संधिर्न विवक्षितः । तेनायादेशो न भवति ।

Colophon :

इति मुखभूषणे संधिविमर्शो नाम प्रथमः परिच्छेदः ।

End :

तथा च भट्टिकाव्ये—आश्वासथ निशाचरा इति । तस्मादाश्वसन्त्य इति नुमागमसहितः पाठो युक्त इति केचित् । तन्न युक्तम् । अन्यथापि रूपसिद्धेः । यत्र हि गणकार्यस्यानित्यत्वमपेक्ष्यैव रूपसिद्धिर्भवति तत्रैव तदाश्रयणस्य युक्तत्वात् ।

537. 27. I. 11.

यङ्लुक्संग्रहश्लोकव्याख्या

Palm-leaf. 7 Foll. $14\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Much injured. Illegible writing.

This is a metrical work on grammar showing the frequentative forms (यङ्लुगन्तरूपाणि) of some of the roots. From the colophon it is understood that this work is a metrical explanation by an unknown author on a work called Yaṅluksaṅgraha-śloka by an unidentified author known as Āhitāgnigṛha. See for another copy of the work R. No. 4373*a* of the Catalogue of the Madras Government MSS. Library.

Complete.

Beginning :

प्रणिपत्य जगन्नाथं रामं राजीवलोचनम् ।
प्रक्रिया यङ्लुकः कैश्चित्पद्यैः किमपि गद्यते ॥
धातोर्हलादेरेकाचो यङ्प्रत्यय इह स्मृतः ।
क्रियासमभिहारेऽर्थे गत्यर्थेभ्यस्तथा पुनः ॥
कौटिल्ये भावगर्हायां लुपादेश्च यङः पुनः ।
यङोऽचि चेति तस्यास्य लुगचि प्रत्यये स्मृतः ॥
बहुलं छन्दसीति प्राक्प्रकृतं यत्पदद्वयम् ।
एतद्यङोऽचि चेत्यत्र चशब्देनानुकृष्यते ॥
इत्येके तत्र भाषायां प्रयोगो नैव यङ्लुकः ।
तथाच हुश्नुग्रहणं वाक्यकारैर्निराकृतम् ॥
हुश्नुवोरिति सूत्रेऽस्य छान्दसत्वेन यङ्लुकः ।
अपरे तु चकारेण केवलो बहुलग्रहः ॥
अनुकृष्टः पुनश्छन्दोग्रहो नेति जगुस्ततः ।
छन्दस्यपि च भाषायां प्रयोगस्तस्य संमतः ॥
तथा च भाष्यकारेण हुश्नुग्रहणमेव तत् ।
भाषायां यङ्लुगस्तीति लिङ्गत्वेन समर्थितम् ॥
वृत्तिकारादयोऽप्यत्र तदेव मतमास्थिताः ।
अस्माभिरपि तन्नीत्या प्रक्रियात्र प्रदर्श्यते ॥
प्रथमं तत्र भूधातुं प्रकृत्य प्रयतामहे ।
धातोरित्यादिना धातोर्भवतेर्यङि तस्य तु ॥
यङोऽचि चेति लुक्तत्र लुगसौ बहुलग्रहात् ।
उपाधिव्यभिचारार्थादनच्यप्यनिमित्तकः ॥

End :

जाग्राहिषीष्टेत्यादि स्याच्चिण्वत्त्वे सीयुडादिषु ।
एवं यङ्लुकि सर्वत्र कार्या सूक्ष्मेक्षिका बुधैः ॥
यो वेद यङ्लुकं सम्यक्स वैयाकरणाग्रणीः ।
इत्येतद्भाष्यकारेण प्रशंसार्थं प्रदर्शितम् ॥
किरतिं चकैरीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ॥
तपरत्वान्न कुरुते किरतौ यो रुगादिकम् ।
संग्रहो जानता प्राप्तिं तेन साधुगिरां कृतः ॥

Colophon :

आहिताग्निगृहाख्येन शाब्दसिंहेन ये कृताः ।
यङ्लुकः संग्रहश्लोकास्तद्व्याख्यैषा मया कृता ॥
अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

Then reads the following :

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च । अस्य योगस्य श्लोकरूपेणोदाहरणानि—

प्रेरितो दशकण्ठेन सेनायां जानकीपतेः ।
शुकसारणशार्दूलानुवाचेदं विभीषणः ॥
शार्दूल किं त्वं मन्येऽन्यैरदृष्टः संचराम्यहम् ।
अस्मिन् कपिबले बद्धस्तल्लाङ्गूलैर्विकृष्यसे ॥
निलीयेथे परेभ्योऽत्र मायया वां द्विषद्बले ।
किमु मन्ये वृथैवेयं मयि वां शुकसारणौ ॥
मायया मोहयिष्याव आवां प्रत्यर्थिसैनिकान् ।
मन्यते किं भवन्तौ क बाधते भास्करं तमः ॥
युवामिदानीं मन्येथे निग्रहीष्यावहे परैः ।
रामाय धर्मविज्ञाय दूतहत्या न रोचते ॥
द्विष्ठोऽप्यस्य परार्थत्वात् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते ॥
षष्ठ्यर्थकारिका ॥
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥

The following lines are written at the end :

"श्रीमन्निरवधिगुणमणिगणालंकृतेषु निष्ठाकनिष्ठिताखिलकपिलवसिष्ठादिमुनिवरिष्ठेषु शमधनमूर्धन्येषु सुहृ-

ज्जनमन:कमलकमलबान्धवेषु सहोदराधिकसौभ्रात्रभरितेषु अस्मदाप्ततमेषु प्रणामा विलसन्तु ।"

538. 21. S. 5.

यङ्लुक्संग्रहश्लोकव्याख्या

Palm-leaf. 12 Foll. 7 × 1¾ inches. 8 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides. Complete.

539. 9. D. 6.

यथोद्देशकार्यकालपरिभाषार्थविचार:

Paper. 5 Foll. 9¾ × 5 inches. 12 lines in a page. Telugu script. Old. Slightly injured. Good writing.

A treatise on the Paribhāṣās यथोद्देशं संज्ञापरिभाषम् and कार्यकालं संज्ञापरिभाषम् well-known in Pāṇini's grammar. The author's name is not known.

Complete.

Beginning:

यथोद्देशं संज्ञापरिभाषम् । कार्यकालं संज्ञापरिभाषम् । तत्राद्ये प्रकारद्वयम् । तत्राद्यमाह—उद्दिश्यते उच्चार्यते यस्मिन् काले स उद्देश: । तमनतिक्रम्य यथोद्देशम् । यस्मिन् काले परिभाषा संज्ञा चोच्चारिता तत्रैव वाक्यार्थबोधेन गृहीतपरिभाषार्थेन गृहीतसंज्ञापदशक्त्या च अष्टाध्याय्यां सर्वत्र व्यवहार: । ननु कार्यार्थत्वात्संज्ञापरिभाषाणां कार्यदेशवृत्तित्वं न्याय्यम् । किं च तदानीं विधिवाक्यार्थज्ञानेन किमस्य फलमित्याकाङ्क्षाशान्त्यभावेन साकाङ्क्षत्वात् अयं पक्षोऽसङ्गत इति चेत्, अत्र कैयट:—यदा अनुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमभिसंधाय भविष्यति किंचिदनेन प्रयोजनमिति ज्ञानमात्रेण संतुष्यद्यथाश्रुतग्राहिप्रतिपत्त्रपेक्ष: पक्ष इति ।

End:

किं च भपदसंज्ञेति विरोधिप्रतिद्वंद्विनिर्देशेन यत्रोभयो: प्राप्तिस्तत्रैवागत्या यथोद्देशपक्षाश्रयणेऽप्यन्यत्र कार्यकालपक्ष एवेत्याशय इति केषांचित्समाधानमपि न समञ्जसम् । तत्रापि कार्यकालपक्षे गतेरुक्तत्वेनागत्या मुख्यपक्षत्याग इत्यस्यायुक्तत्वादित्यलम् । एवं च ष्यङ: संप्रसारणमिति सूत्रभाष्यमप्यनुगृहीतं भवतीति सुधीभिराकलनीयम् ।

540. 9. D. 6.

रप्रत्याहारमण्डनम् —(पाठक)रामचन्द्रकृतम्

Paper. 6 Foll. 9¾ × 5 inches. 12 lines in a page. Telugu script. Old. Good. Good-writing.

Nāgeśa refuted रप्रत्याहार accepted by Bhaṭṭojidīkṣita. Pāṭhaka Rāmacandra son of Murāri and elder brother of Lakṣmaṇa, condemns herein Nāgeśa's view and upholds Dīkṣita's view on रप्रत्याहार.

Complete.

Beginning:

संचिन्त्य वादिप्रवरं जेतारं श्रीपतञ्जलिम् ।
कुर्वे वादिविलासार्थं रप्रत्याहारमण्डनम् ॥

लण् । अत्र लकाराकारोऽनुनासिक: प्रतिज्ञायते । तेन लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयो: संज्ञेति सिद्धमिति कैयटमाधवहरदत्तदीक्षितादय: । अत्र वदन्ति—अस्यानुनासिकत्वे अतो लरेति पाणिनि: लकारं नोच्चारयेत् । प्रत्याहारेणैव निर्वाहात् । किं चास्ये-

त्संज्ञकत्वे यण्घटितसूत्रेषु बहुषु अर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत्। किं चानुबन्धानामच्-प्रत्याहारे ग्रहणाभावे आचारादप्रधानत्वाल्लोपश्च बलवत्तर इति भाष्योक्तस्य तृतीयहेतोरव्यापकतापत्तिः।

End:

एतेन वस्तुतो रप्रत्याहाराभावेन रपर इत्यस्य स्थाने लपर इति पठनीयमिति लपरत्वं वक्ष्यामीति तुल्यास्यसूत्रभाष्याल्लभ्यत इति उरण्रपरसूत्रस्थः शब्देन्दुशेखरः परास्तः। एवं हि भाष्यादिसर्वग्रन्थस्वारस्ये दृढतरयुक्तेरभावे च महासाहसमवलम्ब्य कथमेतद् दूषयांचक्रुरिति त एव प्रष्टव्याः। मात्सर्यमुत्सार्य निपुणतरैर्विभावनीयं सुहृद्भिर्विद्वद्भिः।

Colophon:

रामचन्द्रविरचितं रप्रत्याहारमण्डनं समाप्तिमगमत्॥

Then reads the following stanza:

"बिन्दा विन्दति यत्र पात्रपदवीं सन्तो लघुत्वं गताः
पुंभिश्चेदवलम्ब्यते रतिकथाः केणीदृशामादरः।
विश्रान्ता यदि धाकरीषु कविता सत्सूरिणां का कथा
भूपाले यवने समस्तभुवने वैदग्ध्यमस्तं गतम्॥"

541. 9. D. 91.

रप्रत्याहारमण्डनम्—(पाठक)रामचन्द्रकृतम्

Paper. 5 Foll. 9 × 5¼ inches. 18 lines in a page. Telugu script. Old. Good. Good writing.

Fol. 3*b* is left blank. Complete.

Colophon:

इति श्रीमत्पाठकमुरारिसूनुपाठकलक्ष्मणाग्रजपाठकरामचन्द्रविरचितं रप्रत्याहारखण्डनं संपूर्णम्।

The reading रप्रत्याहारखण्डनं found in the above-mentioned colophon is apparently wrong. It should be रप्रत्याहारमण्डनम्. The remark written in the margin as रप्रत्याहारस्थापनं strengthens the reading as मण्डनम्.

542. 9. F. 49.

रप्रत्याहारमण्डनम्—(पाठक)रामचन्द्रकृतम्

Paper. 5 Foll. 9¼ × 8 inches. 17 lines in a page. Telugu script. Old. Good. Good writing.

Complete.

543. 22. P. 13.

रप्रत्याहारमण्डनम्—(पाठक)रामचन्द्रकृतम्

Palm-leaf. 6 Foll. 15½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following colophon:

इति विद्वत्केसरिमिश्रविरचितं रप्रत्याहारमण्डनं संपूर्णम्।

544. 27. E. 3.

लघुमञ्जूषा

Palm-leaf. 32 Foll. 18 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is a valuable work on the philosophy of grammar and speech written by Nāgeśa, son of Satī and Śivabhaṭṭa and protege of the prince Rāmavarman ruler of Śṛṅgabera near Allahabad. The work deals also with the general topics relating to Śābdabodha like Gadādhara's,

Vyutpattivāda discussing the structure, import and power of the words. The main sections of the subjects dealt with are—the theory of Sphoṭa, Dhātvartha, Nipātārtha, Tiṅartha and Subartha. In explaining the theory of Sphoṭa, the author says that the theory is derived from the grammarian called Sphoṭāyana who was anterior to Pāṇini. The work is available in print together with two commentaries called Kalā and Kuñcikā written by the author's pupil Pāyaguṇḍa Vaidyanātha and Durbala Kṛṣṇamitra respectively. From the stanzas found at the end of the work it is known that Nāgeśa was the pupil of Haridīkṣita in Vyākaraṇa and of Rāmarāma in Nyāya. He describes his two important works *namely* Śabdenduśekhara and Mañjūṣā as his son and daughter respectively. The author may be assigned to the end of the 17th Century and the beginning of the 18th Century A.D. as he was invited to attend to a religious rite *aśvamedhayāga* by Jayasiṁha, the ruler of Jeypur (1688 to 1728 A.D.). This work is an abridgement of the author's bigger work called Mañjūṣā. The Paramalaghumañjūṣā described under No. 469 *ante* is another work of the author being a further abridgement of this work.

The MS. contains the Dhātvarthavicāra and Nipātārthavicāra (incomplete).

Beginning :

अथ सकलशब्दमूलभूतत्वाद्धात्वर्थो निर्णीयते । तत्र फलानुकूलो यत्नसहितव्यापारो धात्वर्थ इति सिद्धान्तः । यत्तु फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति ; तन्न, लः कर्मणि चेत्यादिविरोधात् । न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते । किं च पचसि, पक्ष्यसि पक्त्वानित्यादौ फूत्कारादीनां प्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षया एकस्य धातोरेव शक्तिकल्पनोचिता । किंच फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि कारणत्वकल्पने गौरवम् ।

End :

'पञ्च पञ्चनखा भक्ष्याः' इत्यादाववधारणविषयबुद्धिस्थवृत्तिपञ्चत्वसंख्यावति पञ्चपदस्य लक्षणा । अवधारणं चात्र पञ्चातिरिक्तसंख्या . . . णसंबन्धिसमभिव्याहृतप्रकारकज्ञानरूपम् । तेनान्ये अभक्ष्या इति फलति । एवकारस्य तदर्थलक्षणया वा । फलं तु प्रापकप्रमाणबोधितस्य तदतिरिक्तविषयत्वाभावकल्पनमितीष्टसिद्धिः । यत्तु एवकारार्थो . . . ।

545. 20. E. 1.

वर्णविभागः

Palm-leaf. 2 Foll. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A work on Sanskrit alphabets specifying their total number and other aspects in each group.

Incomplete.

Beginning :

वर्णास्तावदेकपञ्चाशत् । ते द्विविधाः—अचो हलश्चेति । तत्राच एकाधिकपञ्चदश वर्णाः । हलः पञ्चत्रिंशद्वर्णाः । तत्र पञ्च वर्गाः । प्रतिवर्गं पञ्च वर्णाः । कादयो मावसानाः स्पर्शाः । यरलवा अन्तःस्थाः ।

End :

ध्रुव औन्नत्यं गतः । रामोऽभिरामः ।

546. 40. A. 22.

वाक्यपदीयम् —भर्तृहरिकृतम्

Paper. 24 Foll. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. 8 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is the well-known treatise on the philosophy of grammar by Bhartṛhari, pupil of Vasurāta. The work is also known by the name Harikārikās after the author's name. It is divided into three Kāṇḍas, *namely* 1. Āgamakāṇḍa, 2. Vākyakāṇḍa and 3. Padakāṇḍa dealing with the Sphoṭa, vākya and pada respectively.

In the first Kāṇḍa the author expounds from all possible standpoints the theory of Sphoṭa as the most essential truth of verbal sounds. Perhaps, Bhartṛhari was the first author who was responsible for separating the doctrine of Sphoṭa from the ordinary functions of grammar and treating it elaborately with an advanced philosophical idea so as to identify the grammatical Sphoṭa with the Vedantic Brahman in pure advaitic principles of Vivartavāda. Hence this chapter has been given also the title Brahmakāṇḍa. He also insists herein the necessity of Āgamaprāmāṇya or S'abdaprāmāṇya, probably in opposition to the view held by Vaiśeṣikas. Hence it is also called Āgamakāṇḍa.

In the second Kāṇḍa the author deals with the vākya giving its characteristics and putting forth the arguments in favour of the theory that a sentence is distinct from the group of words and it has been endowed with a separate power of import. At the end of this Kāṇḍa he gives the following historical information on Pāṇini's grammar:—After Pāṇini and Kātyāyana, the author Vyāḍi wrote a bulky treatise on grammar called Saṁgraha in a lakh of granthas. But in course of time the work suffered much owing to the want of students and almost perished. At that time Patañjali came and wrote the Mahābhāṣya summarizing the Saṁgraha. Again the scarcity of capable teachers in the Mahābhāṣya gave opportunity to rival grammarians such as Baiji, Saubhava and Haryakṣa for destroying the work as they were already the opponents to the Saṁgraha and consequently to the Mahābhāṣya also. Thus the Mahābhāṣya was not in vogue and remained only in a manuscript for a long time in the south. Then Candrācārya, Vasurāta and some others succeeded in their attempts to get back the work from the south and popularised it. Our author Bhartṛhari studied the Mahābhāṣya and learnt the secrets of grammatical science from Vasurāta.

In the third Kāṇḍa he deals with the word explaining the structure, import and power in it and treating some miscellaneous topics relating to it. Hence this Kāṇḍa is also known as Prakīrṇakāṇḍa or miscellaneous chapter. Mammaṭa and Nāgeśa quote a few prose passages under the name of this work. Therefore it is understood that the work must have been in the form of prose and verses. But this MS. contains the verses only.

As regards the date of the author modern scholars relying upon the accounts given by the famous Chinese traveller Itsing, fix it between 600 and 650 A.D. But as Vasurāta, the author's preceptor, is said to have been a contemporary and opponent of Vasubandhu (337 to 437 A.D.) the author of the Abhidharmakoṣa, our author may be fixed in the perriod still early *i.e.*, 400 A.D. (Vide page 14 of the Introduction to the Abhidarmakoṣa written by Rahula Sāṅkṛtyāyana, Benares, 1931). Bhartṛhari was also the author of a commentary on the Mahābhāṣya called Pradīpikā. (*Vide* No. 110 *ante.*). The work has been completely printed and published in the Benares Sanskrit Series. The colophon found at the end of the third Kāṇḍa describes the author as the king of Avantī.

Contains the Kāṇḍas 1st complete and 2nd incomplete.

Beginning :

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेन च वर्तते ॥
अव्याहतकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥
एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥
प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मैव समाम्नातः पृथक्पृथक् ॥

Colophon :

इति भगवद्भर्तृहरिकृते वाक्यपदीये आगमसमुच्चयः प्रथमः काण्डः ।

End :

क्रियान्तरेण चैतेषां भवन्ति न हि शक्तयः ।
रूपादेव तु तादर्थ्यं नियमेन प्रतीयते ॥
तथैव रूपशक्तिभ्यामुत्पत्त्या समवस्थितः ।
शब्दो नियत . . . . . ॥

547. 38. I. 3.

वाक्यपदीयम्—भर्तृहरिकृतम्

Paper. 223 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a MS. available in the Govt. Oriental MSS. Library, Madras.

As said in the last number, the work herein contains the verses and prose representing the text and Vṛtti on it by Bhartṛhari. The first Kāṇḍa of this work has been printed and published by the Society of Ram Lal Kapur Trust Lahore, under the editorship of Cārudeva S'āstri in 1934. The shorter vṛtti published in the Benares Sanskrit Series for the first Kāṇḍa with the authorship of Harivṛṣabha seems to be a condensed version of this Vṛtti.

This MS. contains the Kāṇḍa 1 complete and the 2 incomplete.

Beginning :

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

सर्वपरिकल्पनातीतत्वं भेदसंसर्गसमतिक्रमेण स . . . . . विद्याविद्याप्रविभागरूपमप्रविभागं काल-भेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानु-

पातिभिर्धर्मैः सर्वास्ववस्थास्वनाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते। न हि कार्यकारणा . . . . विभक्तस्यैकस्य ब्रह्मणः सर्वप्रवादेष्वपूर्वापरे प्रवृत्तिनिवृत्तिकोटी संपरिसंख्यायेते। न चास्योर्ध्वमधस्तिर्यग्वा मूर्तिपरिवर्तप्रत्यङ्गानां क्वचित्क्वचिदवच्छेदोऽभ्युपगम्यते। तच्च भिन्नरूपाभिमतानां विकाराणां प्रकृत्यन्वयित्वाच्छब्दोपग्राहिता चावतिष्ठते शब्दतत्त्वमित्यभिधीयते। स्थितिप्रवृत्तिनिवृत्तिप्रविभागा हि शब्देनाक्रियन्ते। तच्चाक्षरनिमित्तत्वादक्षरमित्युच्यते। प्रत्यक्चैतन्येऽन्तः संनिवेशितस्य बोधनार्था व्यक्तिरभिनिष्यन्दते।

Colophon :

इति श्रीहरिवृषभमहावैयाकरणोपरचिते वाक्यपदीये आगमसमुच्चयो नाम प्रथमकाण्डं समाप्तम्।

2 Kāṇḍa begins :

शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति।
विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते॥

यस्तावन्निमित्तरूपफलभेदादप्रसिद्धभेदक्रमवद्भिरयुगपद्भावैरवयवैर्युक्त इत्येव प्रतीतः शब्दः तस्यैवं नित्यत्वपक्षे योगः परिकल्पितो व्यवहारविषयो द्रव्यशक्तिनिमित्तानुपाती शब्देषु प्रत्यस्तरूपो विभागः स नास्ति।

End :

तथा द्विर्वचनेऽचीति तन्त्रोपायादिलक्षणः।
एकशेषेण निर्देशो भाष्य एवोपवर्णितः॥

सहविवक्षाविषयलक्षणानुपातिनमेकशेषमन्तरेणापि भाष्ये द्विर्वचनेऽचीत्यत्र द्विर्वचनं च द्विर्वचनं चेति तन्त्रोच्चारणविषय एकशेषविकल्प एवोपन्यस्तः।

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान्।
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते॥
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥
अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्।
तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः॥
बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके॥
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।
कालेऽथ दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः॥
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।
स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः॥
न्यायप्रस्थानमार्गास्तानभ्यस्य स्वं च दर्शनम्।
प्रणीतो गुरुणास्माकमयमागमसंग्रहः॥

548. 38. I. 20.

वाक्यपदीयव्याख्या पद्धतिः—वृषभदेवकृता

Paper. 291 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary called Paddhati on the Vākyapadīya which is in the form of verses and prose as described under the last number. The author Vṛṣabhadeva was the son of Devayasas and protege of the king Viṣṇugupta who still remains unidentified. This commentary has been condensed and included in the book of Vākyapadīya published by the society of Ram Lal Kapur Trust, Lahore in 1934. The author Vṛṣabhadeva admits that there were already many commentaries on the Vākyapadīya before his.

The first Kāṇḍa only complete.

Beginning ;

सर्वप्रपञ्चरूपं विगताशेषप्रपञ्चजालमलम्।

जयति जगतां निमित्तं भवबन्धच्छिदे परं ब्रह्म ॥
विमलचरितस्य राज्ञो विदुषः श्रीविष्णुगुप्तदेवस्य ।
भृत्येन तदनुभावाच्छीदेवयशस्तनूजेन ॥
बन्धेन विनोदार्थं श्रीवृषभेण स्फुटाक्षरं नाम ।
क्रियते पद्धतिरेषा वाक्यपदीयोदधेः सुगमा ॥
यद्यपि टीका बह्व्यः पूर्वाचार्यैः सुनिर्मला रचिताः ।
सन्तः परिश्रमज्ञास्तथापि चैनां ग्रहीष्यन्ति ॥

'द्वावुपादानशब्देषु' इत्यतः प्रभृति प्रकरणं प्रवर्तिष्यते । तस्य त्वनाख्यातसंबन्धाभिधेयप्रयोजनस्य प्रेक्षापूर्वकारिणामनुपादेयतैव स्यादिति ते कथयितव्याः । तत्र संबन्धः प्रमाणप्रयोजनयोः हेतुहेतुमद्भावलक्षणस्तदन्तर्गतत्वान्न पृथगुक्तः । प्रकरणं हि शब्दादिपदार्थानुगमकम् । तस्य तत्फलम् । मोक्षस्तु पारम्पर्येण । ताभ्यां च सहास्य हेतुहेतुमद्भाव इति । यस्त्वस्य प्रकरणस्य व्याकरणेन सह संबन्धः तमयं 'नित्याः शब्दार्थसंबन्धास्तत्राम्नाता महर्षिभिः' इत्युपोद्घातकारिकायां स्वयमेव कथयिष्यति यतो मुनिभिर्व्याकरणे नित्याः शब्दादयः कथितास्ते चानेन प्रकरणेन समनुगम्यन्त इति । गुरूपक्रमं द्वितीयकाण्डान्ते स्वयमेव ग्रन्थकारो दर्शयिष्यति 'प्रायेण संक्षेपरुचीन्' इत्यादिभिः श्लोकैः । अभिधेयदर्शनाय तु 'अपोद्धारपदार्था ये' इत्यादिकारिकाद्वयम् । यतोऽष्टौ पदार्था निरूप्यन्तेऽस्मिन्प्रकरणे । द्विविधोऽर्थः अपोद्धारितः स्थितलक्षणश्च । शब्दो द्विविधः प्रतिपादकोऽन्वाख्येयश्च । संबन्धो द्विविधः कार्यकारणभावलक्षणः योग्यतालक्षणश्च । फलं द्विविधम् । अर्थप्रतिपादनं धर्मश्चेति । स्मृत्यर्थमनुगम्यन्त इति प्रकरणप्रयोजनम् । यतो व्याकरणाङ्गभूताष्टपदार्थस्मरणं प्रयोजनमस्य प्रकरणस्य । विशिष्टदेवतानमस्कारस्तु ब्रह्मणः शास्त्रादौ संकीर्तनान्न कृतः, यतो देवताः सर्वाः तस्यैव विवर्ता इति । सति व्याकरणस्य प्रयोजनवत्त्वे तदङ्गभूतपदार्थानुगमो युक्त इति नित्याः शब्दार्थसंबन्धा इत्यतः पूर्वाः कारिकाः सर्वा एव व्याकरणप्रयोजनान्वाख्यानाय ।

End :

तदेवं श्रुतिस्मृतीनां स्वरूपमाख्याय व्याकरणस्मृतेरन्याभिः स्मृतिभिस्तुल्यतामाह—कायवाग्बुद्धीति । ते हि यथावस्थितपदार्थपरिच्छेदविरोधिनो बुद्धेः कालुष्यहेतव उपप्लवाः । तदुपघातेति । रागाद्युपघातहेतुभूतं वैराग्यादि । तस्य ये उपायास्तेषां लक्षणभूतान्यध्यात्मशास्त्राणि पातञ्जलादीनि ।

* * * * *
* * * * *

सूक्तकरणिकालकाविनाविद्याषप्रयो विद्वद्भिः संज्ञेया भवति । विप्रयबन्धुपदानाम् ।

Colophon :

इति श्रीवृषभदेवविरचितायां वाक्यपदीयपद्धतौ प्रथमं काण्डं समाप्तम् ।

549. 23. L. 2.

वाक्यपदीयव्याख्या पद्धतिः—वृषभदेवकृता

Palm-leaf. 110 Foll. 19 × 1½. 8 lines in a page. Malayālam script. Old. Injured. Illegible writing.

Contains the first Kāṇḍa only complete.

This is the original of the transcript described in the last No.

550. 39. F. 3.

वाक्यपदीयव्याख्या पद्धतिः—वृषभदेवकृता

Paper. 160 Foll. 7½ × 6¾. 18 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a MS. of the Government. Oriental MS. Library Madras.

Breaks off in the 82nd stanza of the 1st Kāṇḍa.

The following colophon which mentions the work as complete is apparently wrong.

Colophon :

इति देवयशस्तनूजेन वृषभदेवेन विरचिता वाक्यपदीयटीका संपूर्णा ।

551. 40. B. 29.

वाक्यपदीयव्याख्या प्रकाशः—हेलाराजकृतः

Paper. 79 Foll. $8\frac{3}{4} \times 5$ inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing. The folios are given the serial numbers 1 to 251 of which 2 to 173 are missing.

This is a valuable commentary called Prakāśa on the third Kāṇḍa *i.e.* Padakāṇḍa *alias* Prakīrṇakāṇḍa of Bhartṛhari's Vākyapadīya. The author Helārāja was the son of Bhūtirāja a descendant of Lakṣmaṇa, the minister of the King Muktāpīḍa. Kṣemendra in his Aucityavicāracarcā quotes a stanza under the authorship of Rājaputra Muktāpīḍa while the same stanza is quoted in Vallabhadeva's Subhāṣitāvali under the authorship of Bhartsu. From this it is presumed that Muktāpīḍa had another pet name Bhartsu. According to Kalhaṇa's Rājataraṅgiṇī Muktāpīḍa was the son of Tārāpīḍa and a contemporary of King Yaśovarman and the poet Vākpatirāja of the 8th Century A.D. But this information will not help us in fixing the exact date of Helārāja, as he was only a remote descendant of Muktāpīḍa's minister. As the author quotes Kaiyaṭa's Pradīpa he must be later than the 11th century A.D. in which Kaiyaṭa is supposed to have lived. Helārāja states that he has also written a commentary on the first two Kāṇḍas of the work by the name S'abdaprabhā. But this is not available anywhere. The author divides the third kāṇḍa into the following 14 sections, *viz*—1. Jāti, 2. Dravya, 3. Sambandha, 4. Bhūyodravya, 5. Guṇa, 6. Dik, 7. Sādhana, 8. Kriyā, 9. Kāla, 10. Puruṣa, 11. Saṁkhyā, 12. Upagraha, 13. Linga and 14. Vṛtti. The manuscript and the printed edition of this commentary, contain gaps in two places in the 7th section and make up for the omission by supplying the commentary of Puṇyarājā for the corresponding portions. From this we may presume that Puṇyarājā has written commentary on the third Kāṇḍa also.

The MS. contains one leaf in the beginning of the 1st section and then begins in the 82nd stanza of the 7th section and goes on up to the end of the 8th section.

यस्मिन्संमुखतां प्रयाति रुचिरं कोऽप्यन्तरुज्जृम्भते
नेदीयान्महिमा मनस्यभिनवः पुंसः प्रकाशात्मनः ।
तृप्तिं यत्परमां तनोति विषयास्वादं विना शाश्वतीं
धामानन्दसुधामयोर्जितवपुस्तत्प्रातिभं संस्तुमः ॥
काण्डद्वये यथावृत्ति सिद्धान्तार्थस्तु तत्त्वतः ।
प्रबन्धो विहितोऽस्माभिरागमार्थानुसारिभिः ॥

तच्छेषभूते काण्डेऽस्मिन् सप्रपञ्चे स्वरूपतः ।
श्लोकार्थद्योतनपरः **प्रकाशोऽयं** विधीयते ॥

इह पदार्थाष्टकविचारपरत्वाद्वाक्यपदीयस्य प्रथमकाण्डेन प्रयोजनादिपदार्थे निर्णीतेऽनन्तरकाण्डोपपादितोपपत्तिभिर्वाक्यतदर्थयोरन्वाख्येयस्थितलक्षणयोः पदार्थयोर्निर्णीतत्वात्तदपोद्धारकोपोद्धाररूपः पदविचारः प्रक्रम्यते । तत्र नियतविकल्पो यथाभिप्रायमपोद्धार इति यथासंभवं पदभेदानुद्दिशति—

द्विधा केश्चित्पदं भिन्नं चतुर्धा पञ्चधापि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ॥

वाक्यस्यैव निरंशस्य वाचकत्वादन्तरा पदप्रवृत्तिर्विभ्रम इति किमसत्यपदव्युत्पादनेनेत्याशङ्क्यापोद्धृत्यैव वाक्येभ्य इत्याह । अपोद्धृत्य कल्पनाबुद्ध्या पृथक्पदं निष्कृष्य । अखण्डवाक्यव्युत्पत्तावुपायः पदव्युत्पत्तिर्वाक्यवादिनाम् , अखण्डपदव्युत्पत्ताविव परिकल्पितरूपप्रकृतिप्रत्ययागमादेशादिव्युत्पत्तिः पदवादिनाम् ; आनन्त्याद्धि वाक्यानां स्वालक्ष्येनाशक्या व्युत्पत्तिः कर्तुमिति सदृशपदद्वारकम् ।

End :

यथाहि नोपाध्यायरूपादन्यन्मातुलत्वं तथा न भावादन्यत्पचिरूपम् । सामान्यविशेषयोरत्यन्तभेदाभावात् सकलविशेषपरिहारेण समान्यरूपानुपपत्तेरिति सर्वत्र सिद्धिः ।

Colophon :

इति श्रीभूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे क्रियासमुद्देशोऽष्टमः । ग्रन्थः २९६९ ।

552. 39. G. 13

वाक्यपदीयव्याख्या प्रकाशः—हेलाराजकृतः

Paper. 128 Foll. $8\frac{1}{4} \times 6\frac{1}{4}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a MS. of the Government Oriental MSS. Library, Madras.

Contains the 3rd Kāṇḍa, sections 9 to 13 only.

Fol. 123 is left blank ; but there is no gap in the matter.

Beginning :

क्रियानन्तरं कालः समुद्दिष्टः । स हि क्रियायाः परिच्छेदकः । तत्र दर्शनान्तरलक्षितं तावत् तत्स्वरूपमाह—

व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम् ॥

परावरादिप्रत्ययलिङ्गो व्यापक एको मूर्तोऽत एवाकृतकत्वान्नित्यः कालः क्रियाव्यतिरिक्तो जन्मादिक्रियाद्वारेण भावपरिच्छेदको वैशेषिकैराम्नातः । तस्य परिच्छेदकान्तरेभ्यः परिच्छेद्यभेदेन भेदमाह—

दिष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ॥

मूर्तिरसर्वगतद्रव्यपरिमाणम् । तत् परिच्छिद्यते दिष्ट्याद्यायाममानेन । तथा च मूर्तिमद्वस्तुगतमेव दिष्टिर्वितस्तिरित्यादि । एकदिग्विभागावच्छेदेन चानेन वस्तुपरिच्छेदे प्रमाणम् । प्रस्थादिना तु सर्वतोऽवच्छेदेनारोहपरिणाहाभ्यां व्रीह्यादेः परिच्छेदः । प्रस्थः द्रोणः आढकमित्येतत् परिमाणम् । परिः सर्वतो भावे । सुवर्णादिरुन्मानं तु तत्तद्विशेषेण द्रव्यं परिच्छिनत्ति सुवर्णं निष्कं पलमित्यादि । एभ्यो व्यतिरिक्तः कालोऽमूर्तक्रियापरिच्छेदहेतुः । सूर्यसंचारो हि कालेन मीयते मासः संवत्सर इत्यादि । मूर्ताः मूर्तस्य सर्वस्य संख्या परिच्छेदमादधाति प्रमाणादेश्च । द्वौ घटौ, बहव आ-

त्मानः, द्वे क्रिये, एका वितस्तिः, द्वौ हस्तौ, चत्वारः प्रस्थाः, पञ्च पलानि। संख्यापि च संख्यया मीयते; द्वे विंशती, पञ्च पञ्चाशत इति। कालेन तथा क्रियाः परिच्छेद्यन्त इत्याह—

उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्।
निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम्॥

जन्मस्थितिविनाशाः समस्ताः क्रियाः कालान्तर्भवनहेतव इति तद्द्वारेण जन्मादिमतां पदार्थानां निमित्तकारणं कालमाहुः।

Colophon :

इति भूतिराजतनयेन हेलाराजेन कृते प्रकीर्णप्रकाशे कालसमुद्देशो नवमः।

End :

अभावे शशविषाणादीनामपि वस्तुभूतोत्तरपदाश्रयं लिङ्गम्। न चान्यथाभावोपाश्रयत्वादभावो व्यवह्रियत इति व्यापकमिदं संस्त्यानप्रसवौ स्थितिश्चेति लिङ्गत्रयं सिद्धान्ततमवगन्तव्यमित्यसमस्तपदसंस्कारनिमित्तभूताः पदार्थाः पर्यवसितविचाराः।

Colophon :

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे लिङ्गसमुद्देशस्त्रयोदशः।

553. 39. C. 7.

वाक्यपदीयव्याख्या प्रकाशः—हेलाराजकृतः

Paper. 437 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a MS. of the Govt. Oriental MSS. Library, Madras.

Contains the 14th section *viz.* वृत्तिसमुद्देश of the 3rd Kāṇḍa.

Beginning :

असमस्तपदगतानर्थान् विचार्य समस्तपदविषयान् विचारयितुं पञ्चप्रकारवृत्तिपदविचारः प्रस्ताव्यते। तत्र प्रथमं समानाधिकरणतद्धितविचारः। तथाहि—कुत्सितादीनामर्थे चेल्लिङ्गवचनानुपपत्तिः, कुत्सितादिसमानाधिकरणादिति चेदतिप्रसङ्गो यथा टाबादिष्विति प्रत्ययार्थपक्षं समानाधिकरणपक्षं च दोषवन्तमुद्भाव्य सिद्धं तु येन कुत्सितादिवचनं तद्युक्तात् स्वार्थे प्रत्ययविधानादिति प्रकृत्यर्थविशेषणपक्षोऽवस्थापितः। येन धर्मेण कुत्सादयः प्रतिपद्यन्ते तद्धर्मयुक्तार्थाभिधायिनः प्रातिपदिकात् तेनैव कुत्सादेरुपादानात् तद्द्योतनाय स्वार्थे कनादयः प्रत्यया विधेया इति वार्तिकार्थः। एवं च प्रकृत्यर्थविशिष्टः प्रत्ययार्थः, न तु कुत्सादिधर्ममात्रमिति लिङ्गवचनोपपत्तिः। उपात्तकुत्सादेरेव च शब्दात् प्रत्यय इति तत्समानाधिकरणादिदमादेः स्वयमनुपात्तकुत्सादेस्तदभावः। एवं स्थिते केन धर्मेण कुत्सादय इत्युक्तम्—स्वार्थमभिधाय शब्दो निरपेक्ष इत्यादि। स्वार्थादिपञ्चकाभिधायिनः प्रातिपदिकात् स्वार्थादिनिमित्तकुत्सनादिद्योतनाय कनादयः प्रत्यया इति प्रकृत्यर्थविशेषणपक्षः। प्रियकुत्सनादिषु पुनः प्रवर्ततेऽसौ विभक्त्यन्त इति च। न सुबन्तात् प्रत्ययविधानपरमेतद्वचनम्। अपि तु पञ्चकार्थनिमित्तत्वात् कुत्सनादेः देवदत्त इत्यादौ कुत्सादिमात्रे प्रत्ययेन द्योतिते प्रकरणादेः तद्धेतुर्लिङ्गादीनामन्यतमोऽवधार्यते। स च सुबन्तेन द्योतित इति विशिष्टकुत्साद्यर्थप्रतिपादनाय विभक्त्यन्तः प्रवर्तत इत्युच्यते। तदेतत् व्याचष्टे—

कुत्साप्रशंसातिशयैः समासार्थं तु युज्यते।
पदं स्वार्थादयः सर्वे यस्मात् कुत्सादिहेतवः॥

स्वार्थद्रव्यलिङ्गसंख्याकर्मादिलक्षणेनार्थेन परिपूर्णाभिधेयं पदं स्वार्थादिनिमित्तेन विशिष्टेन कुत्साद्यर्थेन

युक्तमवधार्यते । स्वार्थादयश्चान्यत्र व्याख्याता नेह प्रपञ्चयते । तदत्र प्रातिपदिकार्थनिमित्तत्वात् कुत्सादेस्तद्विशिष्टाभिधायिनः प्रातिपदिकादेवाधिकारात् प्रत्ययः । प्रत्ययान्तात् विभक्तिपराच्च कुत्सादिहेतोर्विशिष्टस्याभिव्यक्तिरिति समाप्तार्थं तेन संबन्ध्यत इत्युच्यते ।

End :

द्रव्यवाचिनामपि गवादीनां बाहीकादौ गुणनिमित्तसादृश्यवशेन प्रवृत्तेः प्रकारे गुणवचनत्वमस्त्येवेति किं विशेषणेन व्यावर्त्येत । तस्मात् गुणवचनग्रहणसामर्थ्यात् गुणवचनो यः शब्दो निर्ज्ञातस्तस्य प्रकारे सादृश्ये द्योत्ये द्विर्वचनमिति नास्त्यतिप्रसङ्ग इति । गुणोपसर्जनद्रव्यवाचिनः शुक्लादेरेव द्विर्वचनं गुणवाचिनश्चेति शुक्लशुक्लः पटः, शुक्लशुक्लं रूपं, पटुपटुरितीष्टं सिद्धम् । तदेवं संसर्गावस्थः पदार्थो वाक्यार्थादपोद्धृत्य पदविभागपूर्वकं समीक्षितपरिसमाप्तोऽर्थद्वारकः पदविचार इति ।

Colophon :

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे वृत्तिसमुद्देशश्चतुर्दशः । समाप्तं चेदं पदकाण्डम् ।

मुक्तापीड इति प्रसिद्धिमगमत् काश्मीरदेशे नृपः
श्रीमान् ख्यातयशा बभूव नृपतेस्तस्य प्रभावानुगः ।
मन्त्री लक्ष्मण इत्युदारचरितस्तस्यान्ववाये भवो
हेलाराज इमं प्रकाशमकरोच्छ्रीभूतिराजात्मजः ॥
तमोध्वंसः सूर्यादिभिरिह कृतो यद्यपि भुवि
प्रदीपः साफल्यं क्वचिदपि तथाप्यत्र विषये ।
प्रयात्येव प्रायो जगति खलु भावाः कृतधियां
न शक्या निह्नोतुं स्फुरदभिनवास्फाररुचिराः ॥
निराकाङ्क्षेण वपुषा गता सर्वजनीनताम् ।
तृतीया वागवस्थेयं प्रतिष्ठामुपयात्वतः ॥
त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदी कृता ।
तस्मै समस्तविद्याश्रीकान्ताय हरये नमः ॥
सूक्तिश्रियः स्फुटा एता जयन्ति जगतां गुरोः ।
हरेर्भाष्याब्धिपीयूषच्छटाच्छुरितविग्रहाः ॥

समाप्तोऽयं प्रकीर्णप्रकाशः ।

The scribe of the original MS. from which the MS. under notice was copied, adds :

" विचित्रगुणनानार्थदर्शनैकनिबन्धनम् ।
निर्मलानन्तबोधात्मचक्षुः सारस्वतं नुमः ॥
परगुणपरदानप्रस्तुताशेषकृत्या
निजगुणकलिकाभिर्लोकमामोदयन्तः ।
अविदितपरदोषा ज्ञानपीयूषपूर्णाः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
कदम्बमूले कदलीवनान्तरे
विचित्ररङ्गे वसती सखीभिः ।
विनोदयन्ती कलनादवीणया
सरस्वती मद्वदनेऽस्तु तुष्टा ॥ "

554. 26. C. 37.

वाक्यपदीयव्याख्या प्रकाशः—हेलाराजकृतः

Palm-leaf. 203 Foll. 19 × 1$\frac{3}{4}$ inches. 12 lines in a page. Malayālam script. Very old. Very much injured. Illegible writing.

Contains the third Kāṇḍa only.

This is the original MS. from which the transcript described under the next number was made. The leaves are much broken and placed in disorder.

555. 39. H. 25.

वाक्यपदीयव्याख्या प्रकाशः—हेलाराजकृतः

Paper. 1108 Foll. 8$\frac{1}{4}$ × 6$\frac{1}{2}$ inches. 14

lines in a page. Devanāgarī script. New. Good. Good writing. Bound in four volumes.

Transcribed from the palm-leaf MS. described under the last number.

Contains the third Kāṇḍa only.

556. 29. A. 15.

विद्वन्मुखभूषणम्—(प्रयाग) वेङ्कटाद्रिभट्टकृतम्

Palm-leaf. 89 Foll. 16½ × 1½ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

A small metrical work giving the conclusions arrived at after long discussions as found in the Mahābhāṣya on each of the sūtras of Pāṇini with suitable similes. Each verse is followed by an explanation in prose by the same author. The work is also called Mahābhāṣyavidvanmukhabhūṣaṇa. Nothing is known about the author's lineage, date etc. except that he was probably an inhabitant of a place called S'ubhagiri or S'obhanādri as he salutes the Lord S'rī Rāma enshrined at that place.

Contains the 1st pāda of the 1st adhyāya.

Beginning :

दासायते यद्दासस्य स्वयमेव चतुर्गुणः ।
श्रीरामं तमनाद्यन्तं वन्दे शुभगिरीश्वरम् ॥
शिष्टा एव न किंतु ग्राह्यं क्षुधितार्थिमात्रमिह दात्रा ।
अन्नस्यादैज्मात्रमिवादैच्छब्देन वृद्धिसंज्ञायाम् ॥

अत्र भगवता भाष्यकृता तद्भावितानामादैचां ग्रहणम्, उतादैज्मात्रस्येति संशयं प्रदर्श्य पक्षद्वयेऽपि दूषणमुक्त्वा आदैज्मात्रपक्षे दूषणोद्धारपूर्वकं स एव पक्षः सिद्धान्तितः । तथा च यथा वृद्धिसंज्ञायां वृद्धिसंज्ञाविधायके वृद्धिरादैजिति सूत्र इत्यर्थः । आदैज्ग्रहणेन आदैच्छब्देन आदैज्मात्रं गृह्यते । न तु शिष्टाः विहिताः तद्भाविता एवादैचो गृह्यन्त इति ; आदैज्मात्रपक्षस्यैव सिद्धान्ततत्वादिति भावः ।

Colophon :

इति श्रीमहाभाष्यविद्वन्मुखभूषणे प्रथमे पादे तृतीयमाह्निकम् ।

End :

तमिमं भाष्यकारसिद्धान्तं निबध्नाति—

प्राचामाचार्याणां पदमेङादि व्यवस्थितं यद्वत् ।
तद्वदनुभवति कश्चिद्वृद्धत्वं सदसि न स्वभार्यायाम् ॥

प्राचां प्राचीनानामाचार्याणां मत इति शेषः । एङादि एङ् आदिर्यस्य तत् एङादि । एङादि पदं यद्वत् यथा वृद्धत्वं वृद्धसंज्ञां व्यवस्थितमनुभवति क्वचित्प्राप्नोति क्वचिन्न प्राप्नोतीत्यर्थः । व्यवस्थितविभाषाश्रयणादिति भावः । तद्वत् तथा कश्चिद्धूर्त इति शेषः, सदसि सभायां वृद्धत्वं स्थविरभावमनुभवति । क्वचिदुद्ग्राहः कर्तव्य इति सभ्यैरनुयुक्तो बाल्ये मम सामर्थ्यमुद्ग्राहे स्थितम् ; इदानीमहं वृद्धो जातः ; उद्ग्राहं कर्तुं न शक्नोमीति स्वस्मिन् वृद्धत्वमारोपयतीत्यर्थः । न तु स्वभार्यायाम् ; तस्यां तु युववदेव व्यवहरतीति भावः । अत एव तस्यापि वृद्धत्वं व्यवस्थितम् । उद्ग्राहादौ विषये वृद्धत्वमस्ति भार्यायां विषये नास्तीति दृष्टान्तदार्ष्टान्तिकयोस्तुल्यता ।

आह्निकसमाप्तिं च कथयति ।

Colophon :

इति श्रीप्रयागवेङ्कटाद्रिभट्टविरचिते महाभाष्यविद्वन्मुखभूषणे प्रथमाध्याये प्रथमे पादे नवममाह्निकम् ।

557. 24. L. 13.

विभक्त्यर्थकारिका:

Palm-leaf. 3 Foll. 13½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

A small metrical work explaining the meaning of the Kārakas or case-affixes applied to nouns, with suitable illustrations. The author's name is not known.

Complete.

Beginning :

अथ कारकविभक्तीनामुपपदविभक्तीनां चोदाहरणान्युच्यन्ते—

तत्रोक्ते कर्तरि यथा रामो जयति वैरिण: ।
रणे रामौ च रामाश्च जयतश्च जयन्ति च ॥ १ ॥
संबोधने तु प्रथमाविभक्तिर्भवति ध्रुवम् ।
यथा हे राम हे रामौ हे रामा इत्यनुक्रमात् ॥ २ ॥
हेशब्देन विनापि स्यात्क्वचिदन्तेऽपि हे भवेत् ।
यथा राम प्रसीद त्वं राम हे त्वां भजाम्यहम् ॥३॥
इत्युदाहरणं दत्तमुक्ते कर्तरि केवलम् ।
अथोदाहरणं किंचिदुक्ते कर्मणि दीयते ॥ ४ ॥
न जीयते न जियेते न जीयन्ते रणाङ्गणे ।
रामो रामौ च रामाश्च शत्रुभिश्चेति निश्चितम् ॥५॥

End :

क्रिया चेत्क्रियया लक्ष्या तत्र स्यात्सप्तमी तथा ।
मयि खादति रामोऽगान्मध्याह्नमत्युपागत: ॥
एवं सर्वेषु शब्देषु विभक्तिवचनेषु च ।
उक्तानुसारि विज्ञेयमुदाहरणमुत्तमम् ॥

Colophon :

इति विभक्त्यर्थप्रकरणम् ।

558. 19. L. 49.

वृत्तिदीपिका—(मौनि)श्रीकृष्णभट्टविरचिता

Palm-leaf. 27 Foll. 15 × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Deals with various Vṛttis or power of words according to the principles accepted by the philosophers of grammar. The author is Mauni S'ri-Kṛṣṇabhaṭṭa son of Raghunāthabhaṭṭa and grandson of Govardhanabhaṭṭa of the Mauni family. The author was younger brother of Jayakṛṣṇa, the author of the Siddhāntakaumudīvyākhyā Subodhinī. He salutes Mādhavendrasarasvatī as his preceptor.

Complete.

Beginning :

हरि: ओम् । वृत्तिदीपिका ।
सजलजलदकालं सर्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाभ्यक्तफालम् ।
विहतदुरितजालं फुल्लराजीवनालं
विलसितवनमालं नौमि गोपालबालम् ॥
ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मैनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

इह सकलजनाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्वमस्यादिमहावाक्यार्थबोधजन्यत्वात् शाब्दबोधे च वृत्तिग्रहजन्योपस्थितेर्हेतुत्वाद्वृत्तिर्निरूप्यते ।

End :

इत्थं निरूपिता: पञ्च व्यक्तिस्फोटा: । बोपदेवेन तु शक्तावच्छेदिका जातिरेव वाचिकेत्युक्तम् । जातिश्चाविद्यको धर्मविशेष: । तथाच वर्णजातिस्फोट: पद-

जातिस्फोटः वाक्यजातिस्फोट इति तन्मते स्फोटत्रयं सिद्धम् ।

Colophon :

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मज-रघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ।

559. 26. L. 28.

वृत्तिदीपिका—(मौनि)श्रीकृष्णभट्टकृता

Palm-leaf. 6 Foll. $13\frac{3}{4} \times 1\frac{1}{4}$ inches. 9 lines īn a page. Grantha script. Old. Injured. Good writing.

Incomplete.

560. 24. B. 3.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 151 Foll. $14\frac{1}{2} \times 1\frac{3}{4}$ inches 12 lines in a page. Malayālam script. Old. Slightly injured. Illegible writing.

Wooden boards are added to both sides.

In the shape of a commentary on the Vaiyākaraṇamatonmajjana of Bhaṭṭojidikṣita, the work enters lengthy discussions on the philosophy of grammar and establishes the principles of grammarians after refuting the views of the opposite schools of Nyāya and Mīmāṁsā on the subject. The author Koṇḍubhaṭṭa was the son of Raṅgojibhaṭṭa, the brother of famous Bhaṭṭojidīkṣita. Raṅgoji is said to have defeated one Vidyādhīsayati of the Dvaita school of philosophy in a philosophical contest and received honours in the court of Keladi Veṅkaṭappa. Raṅgoji is also said to have written a work on Vedanta (probably the Advaitacintāmaṇi) and a work called Mādhvasiddhāntabhaṅga. The work is divided into the following chapters : 1. Dhātvarthanirṇaya, 2. Lakārārthanirṇaya, 3. Subarthanirṇaya, 4. Nāmārthanirṇaya, 5. Samāsaśaktinirṇaya, 6. Śaktinirṇaya, 7. Nañarthanirṇaya, 8. Nipātārthanirṇaya, 9. Bhāvapratyayārthanirṇaya, 10. Devatāpratyayārthanirṇaya, 11. Abhedaikatvasaṁkhyānirṇaya, 12. Ktvādyarthanirṇaya and 13. Sphoṭanirṇaya.

The author quotes a work called Vedāntabhūṣaṇa.

Complete.

Beginning :

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥
पाणिन्यादिमुनीन्प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणैकफलिकां पुंभाववाग्देवताम् ।
दुण्ढि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये॥४॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
श्रीकोण्डुभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥ ५ ॥

प्रारिप्सितप्रतिबन्धकप्रत्यूहव्यूहोपशमनाय विरचितं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥

इति । देवतान्तरं त्यक्त्वा फणिन एव स्मरणं तु तस्य प्रकृतशास्त्रनिर्मातृतयाभ्यर्हितत्वेनेष्टतरत्वादित्याहुः । उद्धृत इत्यत्रास्माभिरिति शेषः । भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युपादानं च तत्रत्यकथनस्याधुनिककल्पितत्वेनापाणिनीयत्वाश्रद्धेयत्वपर्युदासाय । तस्याश्रद्धेयत्वे च तन्मूलकत्वादेतस्याप्यश्रद्धेयत्वं स्यादिति भावः । तत्र निर्णीत इत्यादुपादानं चेतोऽप्यधिकजिज्ञासुभिरस्मत्कृतशब्दकौस्तुभादाववधेयमिति ध्वनयितुम् ।

Colophon :

इति वैयाकरणभूषणे धात्वाख्यातसामान्यार्थयोर्निरूपणं समाप्तम् ।

End :

उक्तं हि वाक्यपदीये—

अजन्मनि यथा नित्ये पौर्वापर्यविवर्जिते ।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते ॥

इति । तस्मादविद्यादशायामुत्करीत्या जातिरेव स्फोटः । निष्कर्षे तु ब्रह्मैव स्फोट इति भावः । परं त्वविद्यादशायामपि वर्णानां वाचकत्वमभ्युपेत्य स्फोटखण्डनमयुक्तमिति ध्येयम् । ब्रह्मैवेत्यनेन "अत्रायं पुरुषः स्वयं ज्योतिः" "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयतीति सिद्धम् ।

विद्याधीशवरेण्यसंज्ञकयतिं श्रीमाध्वभट्टारकं
जित्वा केलदिवेङ्कटप्पसविधे ह्यान्दोलिकां प्राप्तवान् ।
यश्चक्रे मुनिवर्यसूत्रविवृतिं सिद्धान्तभङ्गं तथा
माध्वानां तमहं गुरूपमगुरुं रङ्गोजिभट्टं भजे ॥

पाणिनीयवचसां खलु मूलं चन्द्रशेखर भवानिति रूढम् ।
तेन भूषणमिदं हि तवैव प्रीतये भवतु साम्बशिवस्य ॥

Colophon :

इति श्रीपदवाक्यप्रमाणपारावारपारीणधुरीणरङ्गोजिभट्टात्मजकोण्डुभट्टकृते वैयाकरणभूषणे चरमः स्फोटवादः समाप्तः ।

561. 20. I. 5.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 105 Foll. 18 × 1¼ inches. 5 lines in a page. Telugu script. Old. Good. Good writing.

Contains up to the end of Subarthanirṇaya.

Date of copying :

"सर्वजिद्वत्सरे शुक्लें दशम्यां चैत्रके तथा ।
लिखितं मन्दवारे च वैयाकरणभूषणम् ॥"

562. 20. I. 7.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 61 Foll. 17½ × 2½ inches. 10 lines in a page. Telugu and Grantha scripts. Old. Much injured. Clear writing.

Wooden boards are added to both sides.

Wants beginning in the Lakārārthanirṇaya and goes on up to the end of the work.

563. 20. I. 10.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 137 Foll. 15 × 1½ inches.

7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Begins in the Samāsas'aktinirṇaya and goes on up to the end of the work.

The scribe adds :

"इति स्वयं साम्बमूर्तिश्रीनिवासद्वयेन च ।
स्वामिरामानुजाभ्यां च नरसिंहद्वयेन च ॥
अलेख्ययं ग्रन्थवरो वैयाकरणभूषणम् ।
चोलियाप्पाख्यविदुषो ह्यनायासाद्विशेषतः ॥"

Date of copying :

चतुर्विंशतिपरिवृत्तिगतसाधारणवर्षे लिखितम् ।

564. 20. I. 11.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 143 Foll. 15 × 1½ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains from the Dhātvarthanirṇaya to Samāsas'aktinirṇaya.

The following verses are found at the end :

"धात्वाख्यातार्थवादश्च लकारार्थस्तथैव च ।
सुबर्थवादो नामार्थ इति वादचतुष्टयम् ।
समाप्तिमगमत्पूर्वखण्डः साधु विवेचितः ॥"

565. 20. I. 15.

वैयाकरणभूषणम् —कोण्डुभट्टकृतम्

Palm-leaf. 48 Foll. 17¾ × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

Breaks off in the Lakārārthanirṇaya.

566. 28. G. 15.

वैयाकरणभूषणम्—कोण्डुभट्टकृतम्

Palm-leaf. 10 Foll. 16 × 1⅛ inches. 5 lines in a page. Grantha script, Old. Much injured. Clear writing.

Contains a small portion in the beginning.

567. 11. C. 3.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Paper. 39 Foll. 12 × 6½ inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a summary of the bigger work called Vaiyākaranabhūṣaṇa described under previous numbers, by the same author.

Complete.

Beginning :

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
पाणिन्यादिमुनीन्द्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवताम् ।
दुण्ढि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥

प्रारिप्सितप्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥

उद्धृत इत्यस्माभिरिति शेषः। भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोद्धृतानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितत्वेनासारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। तत्र निर्णीत इत्युक्तिरितोऽप्यधिकजिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम्।

End:

उक्तं च वाक्यपदीये—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम्॥ इति॥

ब्रह्मैवेत्यनेन 'अत्रायं पुरुषः स्वयं ज्योतिः' 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचयायान्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णात्मन इत्यादिना।

568. 11. C. 3.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Paper. 91 Foll. 11 × 5½ inches. 10 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

Wants beginning; otherwise complete.

569. 20. I. 13.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Palm-leaf. 49 Foll. 16 × 1¼ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Complete.

After the colophon at the end the following remark is added: विद्वन्मतोन्मज्जन्यां टिप्पणं समाप्तम्। ग्रन्थसंख्या 1460. From this it is presumed that the Kārikās on which the Bhūsaṇasāra is a commentary are also called Vidvanmatonmajjanī.

570. 22. P. 12.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Palm-leaf. 42 Foll. 16 × 1⅛ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete.

The colophon herein reads thus:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणरङ्गोजिभट्टात्मजकोण्डुभट्टकृते वैयाकरणभूषणसारे स्फोटवादः समाप्तः।

The scribe adds:

प्रमोदूताख्यके वर्षे सिंहमासे तु शुक्लके।
पक्षे वारे च जीवस्य तारे ज्येष्ठाख्यके वरे॥
श्रीवत्सकुलजातेन वेंकटेशाख्यसूरिणा।
ग्रन्थो भूषणसाराख्यः संपूर्णो लिखितो वरः॥

571. 24. K. 25.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Palm-leaf. 54 Foll. 12¼ × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete.

572. 28. I. 36.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Palm-leaf. 22 Foll. 18 × 1 inches. 6

lines in a page. Telugu script. Old. Injured. Good writing.

Foll. bearing the numbers 1 to 5, 8 to 11, 15, 19, 25, 28 and 29 are missing.

Wants the beginning and end with many gaps in the middle.

573. 35. C. 16.

वैयाकरणभूषणसारः—कोण्डुभट्टकृतः

Paper. 29 Foll. 10½ × 5½ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Breaks off in the S'aktinirṇaya.

574. 9. D. 23.

वैयाकरणभूषणसारव्याख्या दर्पणः—हरिवल्लभकृतः

Paper. 55 Foll. 10 × 6¼ inches. 16 lines in a page. Telugu script. Old. Slightly injured. Good writing.

A commentary on the Vaiyākaraṇabhūṣaṇasāra of Koṇḍubhaṭṭa by Harivallabha son of Vallabha of Kūrmācala. The author's father Vallabha is said to have been known with surname Utprabhātiya and to have written a work called Vinodamañjarī on Vedānta.

Breaks off in the सुबर्थनिर्णय.

Beginning :

रमाप्रेमामत्रं जगदवनदक्षं मधुहृत-
श्रुतिस्तोमाहृत्या परिजनितवेदाननमुदम् ।
अखण्डानन्दाढ्यं निखिलजनहृत्कञ्जनिलयं
हयग्रीवं वन्दे प्रकृतकृतिविघ्नक्षतिकृते ॥

सत्येकस्मिन्नपि बाधके समवहितसाधकसहस्रादपि कार्योत्पत्तेरदर्शनादपेक्षितप्रारिप्सितप्रत्यूहापोहायानुष्ठितं भगवत्स्तुतिरूपं मङ्गलं ग्रन्थकृच्छिष्यशिक्षार्थमादौ निबध्नाति—श्रीलक्ष्मीरमणमिति । अधिकरणव्युत्पन्नल्युडन्तरमणशब्देन कर्तृषष्ठ्यन्तलक्ष्मीपदस्य समासः । तेन च श्रीसहितशब्दस्य मध्यमपदलोपी समासः, शाकपार्थिवादेराकृतिगणत्वात् । तदुपादानं च सशक्तिकस्यैव भगवतो जगन्निर्माणे कारणत्वमिति ध्वनयितुम् । नौमीति । णु स्तुताविति धातोरस्मच्छब्दाप्रयोगेऽपि गम्यमानतदर्थसामानाधिकरण्यस्य लकारार्थकर्तरि सत्त्वात् वर्तमानक्रियाद्योतकलडुत्तमपुरुषः, अस्मद्युत्तम इत्यत्र पूर्वसूत्रात् स्थानिनीत्यस्यानुवृत्तेः । स्तुतिश्चोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः । स एव च प्रकृतधात्वर्थः । बोधरूपधात्वर्थफलाश्रयत्वाल्लक्ष्मीरमणस्य कर्मता । एवं च वैयाकरणमते प्रकृते श्रीसहितलक्ष्मीरमणाश्रयकोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो मदभिन्नाश्रयको वर्तमानशब्दप्रयोगरूपो व्यापार इति वाक्यार्थः ।

Colophon :

इति भूषणसारदर्पणे धात्वर्थाख्यातार्थनिरूपणम् ।

End :

अपरे तु खदिराङ्गारसवर्णे इति विशेषणोपादानात् तत्र कुण्डलयोः प्रकृतित्वं गम्यते । सिद्धाया विकृतेः पाकानपेक्षणात् । पुनरपरयाकृत्या युक्त इति विशेषणेन तु सुवर्णपिण्डस्य विकृतित्वम् । आकृत्यन्तरयोगस्य प्रकृतित्वाप्रयोजकत्वात् । युज्यते चैतत् । मृत्तिकेत्येव सत्यमितिवत् संहृतिमुखेन पुनरावृत्त इति विशेषणेनापि सुवर्णपिण्डस्य विकृतित्वं गम्यते । तथा सति पूर्वोपक्रान्तकृतिपरंपरायास्तत्पर्यवसायित्वेन सिषाधयिषितसुवर्णनित्यत्वस्य सिद्धेः ।

575. 11. D. 142.

वैयाकरणमतोन्मज्जनम्—भट्टोजिदीक्षितकृतम्

Paper. 3 Foll. $9\frac{1}{2} \times 5\frac{1}{2}$ inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a metrical work by Bhaṭṭoji-dīkṣita summarizing the essence of the philosophical doctrine of grammarians in 74 verses. These verses have been commented upon by Koṇḍubhaṭṭa in his Vaiyākaraṇabhūṣaṇa and Sāra thereof. Pāyaguṇḍa Vaidyanātha mentions this work by the name Vaiyākaraṇamatonmajjana in his commentary on the Laghumanjūṣā. Vide also No. 4229 of the Des. Cat. of the MSS. in the Asiatic Society of Bengal, Vol. I. 1931.

Complete.

Beginning :

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥
फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥
फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥

End :

सत्यासत्यौ च यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥
इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ।

Colophon :

इति शब्दकौस्तुभसंक्षेपार्थः ।

After this some stray stanzas from the Vākyapadīya are written.

576. 8. F. 24.

व्याकरणक्रोडपत्रम्

Paper. 2 Foll. $7\frac{1}{4} \times 6$ inches. 20 lines in a page. Grantha script. Old. Injured. Good writing.

An explanatory commentary with discussion on Pāṇini Sūtras 1-1-9 and 1-1-10. As the MS. contains a collection of works by M. M. Ganapati S'āstri of Paññānāḍu it may be presumed that this work also might have been written by him.

Beginning :

वाणीं पाणिनिमाचार्यं कात्यायनमुनिं तथा ।
कृताञ्जलिर्नमस्यामि भगवन्तं पतञ्जलिम् ॥
योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।

ओं नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्या-संप्रदायकर्तृभ्यः परमऋषिभ्यो गुरुभ्यः ।

तुल्यास्यप्रयत्नं सवर्णम् । नाज्झलौ । अनयोरय-मनुगमः । स्वजनकास्यभवत्वव्याप्यजातिविशेषावच्छि-न्नप्रयत्नत्वव्याप्यजातिविशेषावच्छिन्नोभयप्रयोज्यसाद-श्यवत्त्वस्ववृत्तिवर्णत्वव्याप्यजातिमत्त्वोभयसंबन्धेन स्वविशिष्टत्वम् ।

End :

द्वौ नञौ आवश्यकत्वं बोधयतः—अनान्तर्य नष्टाश्वो दग्धरथः न सादृश्याभावरूपाभावात् । लोपे चासति। वाक्यसंस्कारपक्षः, पदसंस्कारपक्षः। संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते । तेषां यथेष्टमभिसंबन्धो भवति । वाक्यादपोद्धृत्य पदानि संस्क्रियन्ते ।

577. 19. F. 12.

व्याकरणक्रोडपत्रम्

Palm-leaf. 5 Foll. 16½ × 1¼ inches. 10 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

Beginning :

लः कर्मणि च भावे चाकर्मकेभ्यः। कर्तरि कृदित्यतः कर्तरीत्यनुवर्तते । धातोरित्यधिक्रियते । सकर्मकेभ्य इत्यनेन धातोरित्येतद्विशेष्यते। तथा च लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च भवन्तीत्येकं वाक्यम्। ततो भावे चाकर्मकेभ्य इति अपरं वाक्यम् । तत्र कर्तरि च धातोरिति च वर्तते । अकर्मकेभ्य इत्येतत् धातोरित्यस्य विशेषणम्। तथा चाकर्मकेभ्यो धातुभ्यो भावे कर्तरि च लकारा भवन्तीत्युत्तरवाक्यार्थः । अत्र प्रथमस्योदाहरणम्। पचति तण्डुलं देवदत्तः, पच्यते देवदत्तेन तण्डुल इत्यादि । उत्तरस्य च भवति देवदत्तः भूयते देवदत्तेनेत्यादि । अत्र सकर्मकत्वं फलव्यधिकरणव्यापारवाचकत्वम्। प्रथमोदाहरणे पचिः विक्लेदनानुकूलव्यापारवाचकः। तत्र विक्लेदनस्य फलस्य तण्डुलनिष्ठतया व्यापारस्य देवदत्तनिष्ठतया च एतद्व्यधिकरणत्वाल्लक्षणसंगतिः ।

End :

अनुकूलत्वं विवरणवाक्ये द्वितीयार्थतया व्यापारश्च धात्वर्थतया विक्लेदश्च घञन्तवाच्यतया च भासत इति धातोरेव पचेः विक्लेदनानुकूलव्यापारपर्यन्तमुपस्थापकताया निरङ्कुशत्वात्। किं च पचतीत्यस्य विवरणत्वापादनमपि न संभवद्युक्तिकम्। न केवला प्रकृतिरिति न्यायेन केवलस्य ति-इत्यस्य प्रयोगासमवायित्वेन किं करोतीति प्रश्ने पचतीत्युत्तरात् आख्यातस्य व्यापारार्थकत्वं निश्चीयत इति वाच्यम्। पचतीत्युत्तरवत् पाकं करोतीत्युत्तरस्यापि संभवात्। एतयोश्च समानार्थकत्वस्य पूर्वमेव प्रतिपादितत्वात् तदनुरोधेन किं करोतीति प्रश्नवाक्यघटक . . . . ।

578. 19. F. 23.

व्याकरणक्रोडपत्रम्

Palm-leaf. 7 Foll. 15 × 1⅛ inches. 5 lines in a page. Telugu script. Old. Much injured. Legible writing.

Contains critical notes on some of the selected topics on Pāṇini's grammar.

Beginning :

करोति क्रियां जनयतीति कारकम्। अधिकारो नाम उत्तरसूत्रावयवत्वेन स्वार्थबोधकत्वम्। चादयोऽसत्त्वे। अद्रव्यार्थाः चादयो निपातसंज्ञाः स्युः। विषवृक्षोऽपीत्यत्र अपिशब्दो निपातः।

End :

लक्षणेत्थंभूतेत्यादिना सिद्धे पुनर्विधानसामर्थ्यादित्यत्र लक्षणेत्थंभूतेत्यादिनानोः कर्मप्रवचनीयत्वे सिद्धे अनुर्लक्षणे इति पुनर्विधानसामर्थ्यात्परापि हेतौ तृतीयानेन बाध्यते ।

579. 20. M 38.

व्याकरणक्रोडपत्रम्

Palm-leaf. 2 Foll. 18¾ × 1¾ inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

A discussion on the Sūtra—सरूपाणां etc.

Incomplete.

Beginning :

सरूपाणाम् । स्यादेतत् । सूत्रे एकग्रहणं सुपगिति क्विबन्तस्य तृतीयैकवचने पचाद्यजन्तसुपचशब्द-प्रकृतिकटाबन्तप्रथमैकवचने च सारूप्यमाश्रित्य प्राप्त-स्यैकशेषस्य वारणाय । विभक्तिग्रहणं तु विशेष्यं समर्पयितुम् । एवं स्थिते सरूपविभक्तिनिरूपितसा-रूप्यवतामेकशेष इत्यर्थलाभेन मातृमात्रोः परमसर्व-सर्वशब्दयोश्च दोषः स्यादत आह—अपकर्षणादिति । न च यत्किंचिद्विभक्तिमादाय विभक्तौ सारूप्यवत् यत्किंचिद्विभक्तिमादाय विभक्तौ वैरूप्याभावस्याप्युप-पादयितुं शक्यतया तदपकर्षणेऽपि दोषो दुरुद्धर इति वाच्यम् । गेहैकदेशे घटसत्तामात्रेण गेहे घटोऽस्तीति व्यवहारवत् गेहैकदेशे तदभावमात्रेण घटवति गेहे घटो नास्तीत्यप्रयोगेण पर्याप्तिसंबन्धावच्छिन्नाभाव-संबन्धस्यैवाभावीयाधिकरणतावच्छेदकत्वस्वीकारात् ।

End :

अत्रेदं चिन्त्यम् । आभ्यन्तरकार्यभेदेन यत्नस्य भेदो वाच्यः । तत्राभ्यन्तरकार्यस्य प्रत्यासत्त्या वर्णो-त्पत्त्यव्यवहितस्यैव वाय्वभिघातस्य ग्रहणे तस्यैकत्वेन भेदानुपपत्तिः । न च संबन्धिभेदेन संबन्धभेदवत् अभिहन्यमानतालवादिप्रदेशभेदेनाभिघातभेदस्य वक्तुं शक्यतया तदुपपत्तिरिति वाच्यम् । एवं सत्यष्टौ स्था-नानीति स्थानसंख्यानुगुण्येन प्रयत्नानामप्यष्टत्वस्य ।

The fly-leaf contains the name of the former owner of the MS.—Viśveśvara son of Veṅkaṭācalavādhyār of Roṭṭikāra-maṭam of Tiruvottiyur.

580. 21 A. 5.

व्याकरणक्रोडपत्रम्

Palm-leaf. 19 Foll. $16\frac{3}{4} \times 1\frac{3}{4}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains critical notes on certain grammatical Sūtras of Pāṇini.

Incomplete.

Beginning :

मृजेर्वृद्धिः । मृजेर्वृद्धिः स्यादित्युक्ते अलोऽन्त्यस्येति परिभाषया षष्ठीनिर्दिष्टस्य यत् कार्यमुच्यते तदन्त्यस्य स्यादिति मृजेर्जकारस्य स्थाने वृद्धौ प्राप्तायां वृद्धिशब्देन यत्र वृद्धिर्विधीयते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठत इत्युक्तत्वात् मृजेर्वृद्धिरिति सूत्रेण वृद्धिशब्देन वृद्धेर्विधीयमानत्वात् इक इति षष्ठ्यन्त-पदस्योपस्थित्या मृजेरिको वृद्धिर्भवतीति वाक्यार्थः संपद्यते ।

End :

तस्मात् यान्तु पान्तु इत्यत्र जुसप्रवृत्त्या षष्ठ्य-न्तात् वतिप्रत्ययस्वीकारे न दोष इति चेत् अगुरित्यत्र दोषः । तथाहि इण् गतावित्यस्माद्धातोर्लुङि बहुवचने झिप्रत्यये इणो गा लुङीति गादेशे च्लि लुङि, च्लेः सिजिति सिचि, गातिस्थाघुपाभूभ्य इति सिचो लुकि अगा झि इति स्थिते सिजभ्यस्तविदिभ्यश्च ।

The last page contains the following verse :

विष्णो पाददयी ते भवसलिलनिधेस्तारिका कापि नौका राकाचन्द्रप्रभावात्सकलजनदृशां नन्दना कापि लक्ष्मीः । कीर्तिस्ते सर्वपापप्रशमनपटुका वाक् शका चित्तचौर्ये त्वत्सेवाकारकः स्यां तव हि बहुपरिव्राज-कायां नमर्याम् ॥

581. 21. F. 23.

व्याकरणक्रोडपत्रम्

Palm-leaf. 7 Foll. $14\frac{1}{2} \times 1$ inches. 6

lines in a page. Grantha script. Old. Much injured. Good writing.

Contains critical notes one some selected topics on Pāṇini's Grammar.

Incomplete.

Beginning :

. . . मुपादाय यदा 'पूर्वपदात्संज्ञायाम्' इति नियमार्थमिति पक्षः तदैतदुच्यते—समानपदेति । समानेति निमित्तनिमित्तिनोः . . . . त्वं नियम्यते । यदा तु समानग्रहणात् समानमेव यन्निमित्तं तदाश्रीयते तदा पूर्वपदादित्यस्य विध्यर्थत्वात् असमासेऽपीति ग्रहणस्य ज्ञापकत्वानुपपत्तिरिति ।

End :

उक्तमेतत् । उत्तरपदत्वे चापदादिविधौ लुमतालुप्ते प्रत्ययलक्षणं न भवतीति भाष्यम् । अत्र विवरणम्—सिद्धान्त्येकदेश्युक्तं ।

One extra leaf at the beginning contains a few lines of the S'abdendus'ekharavyākhyā Jyotsnā.

582. 21. Q. 15.

व्याकरणक्रोडपत्रम्

Palm-leaf. 11 Foll. $7\frac{1}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Malayālam script. Old. Good. Good writing.

Wooden boards are added to both sides.

Contains discussions on the Sūtras : आर्धधातुकस्येड्वलादेः, (७-२-३५) सुप्तिङन्तं पदम् (१-४-१४) च्लेः सिच् (३-१-४४) ।

Beginning :

आर्धधातुकस्येड्वलादेः । वलादेरार्धधातुकस्य इडागमः स्यात् । भवितृ, भवितव्यमित्यादिकमुदाहरणम् । बलादेरित्युक्तेः तनोतीत्यादौ उप्रत्ययस्यार्धधातुकस्य नेडागमः । आर्धधातुकस्येत्युक्तेः आस्ते, शेते इत्यादौ वलादेः सार्वधातुकस्य नेडागमः । नन्वार्धधातुकग्रहणं न कर्तव्यम् । न च आस्ते, शेते इत्यादौ वलादेः सार्वधातुकस्येट्प्रसङ्ग इति वाच्यम् । रुदादिभ्यः सार्वधातुके इत्येतन्नियमार्थं भविष्यति । सार्वधातुकस्येडागमो यदि, तदा रुदादिभ्यः परस्यैव, नान्येभ्यः परस्येति । तेन आस्ते शेते इत्यत्रेडागमस्याप्राप्तेर्व्यर्थमार्धधातुकग्रहणमिति चेन्न । विपरीतोऽपि नियमः संभाव्येत ।

End :

अत्र वदामः । सिच इकार उच्चारणार्थ एव । न च अमंस्त इत्यत्रोपधालोपप्रसङ्गः । सिजन्तस्यानिदितामिति इकारलोपो न भवति । हलः सिजिति सिचः कित्त्वविधानाल्लिङ्गात् । तथाहि—आङ्पूर्वाद्धन्तेरकर्मकादस्वाङ्गकर्मकाच्च भूते लुङि आडो यमहन इत्यात्मनेपदे च्लौ सिचि अडागमे अहन्-स्-त इति स्थिते अनुदात्तोपदेशेति नकारलोपार्थं हनः सिजिति कित्त्वं विधीयते । यदि च सिजन्तस्यानिदितामित्युपधालोपः स्यात् सिचः कित्त्वमनर्थकं स्यात् । कृतं तु ज्ञापयति सिजन्तस्यानिदितामित्युपधालोपो न भवतीति । तेन अमंस्तेत्यादिसिद्धिरिति सुष्ठूक्तं सिच इकार उच्चारणार्थ इति ।

After this 20 extra leaves containing a portion of the Aṣṭādhyāyī and Vārtikas of the 7th and 8th adhyāyas, are added.

583. 22. L. 49.

व्याकरणक्रोडपत्रम्

Palm-leaf. 11 Foll. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains footnotes on selected passages of the Siddhāntakaumudī of Bhaṭṭoji-dīkṣita.

Incomplete.

Beginning :

समो वा लोपमेक इति भाष्यम्। लोपस्यापि रुप्रकरणस्थत्वात् अनुस्वारानुनासिकाभ्यामेकसकारकं रूपद्वयम् । द्विसकारकं तूक्तमेव । अणोऽनुनासिकत्वे अष्टोत्तरशतम् । समो वेति । एकेषां मते संसंबन्धिमकारस्य लोपो वा न तु रुः इति भाष्यार्थः। नन्वेकेषां मते सम इत्यभावे अत्रानुनासिकस्येति अनुनासिकः अनुनासिकादित्यनुस्वारश्च न स्यात्। तथा च एकसकारात्मकं रूपद्वयं न सिध्येदित्यत आह—लोपस्यापीति। अत्रानुनासिकेत्यत्र विधित्वपक्षे अत्रेत्यस्य रुप्रकरण इत्यर्थकत्वेन रुप्रकरणे पूर्वस्यानुनासिको भवतीत्युक्ते अवध्याकाङ्क्षायामवधित्वेन तत्प्रकरणविधेयस्य कस्यचिदन्वयादिति भावः।

End :

बहुलं तणि। बहुलं तणीति वक्तव्यम्। किमिदं तणीति? संज्ञाछन्दसोरिति गृहाण। अन्नशब्दे जग्ध्यभावः । वधक इति ण्वुलि वधादेशः । गात्रमिति इण औणादिके त्रनि गादेशः । विचक्षणे ख्याञभावः । अजिरे अजेर्विभावाभावः । इतीमानि बहुलग्रहणस्य प्रयोजनानीति मनसि निधाय किं प्रयोजनमिति प्रश्नपूर्वकम् अन्नवधकगात्रविचक्षणाजिराद्यर्थमित्युक्तम्।

Three blank leaves are added at the end.

584. 22. P. 13.

व्याकरणक्रोडपत्रम्

Palm-leaf. 2 Foll. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

Beginning :

विकरणेभ्यो नियमो बलीयान्। शबादिविकरणात् अनुदात्तङित इत्यादिनियमशास्त्राणि तावत्प्रवर्तन्ते। तेन एध वृद्धावित्यस्माद्धातोः लटि लस्येत्यधिकृत्य तिपूतस्झि-इत्यादिना अष्टादशसु तिबादिषु प्राप्तेषु कर्तरि शबिति शप् प्राप्तः। अनुदात्तङित इति नियमोऽपि प्राप्तः । तत्र परत्वाद्विकरणे प्राप्ते अनया परिभाषया नियमः प्रवर्तते ।

End :

अतश्च अङ्गस्य विधीयमानत्वात् अडागमोऽनित्यः। विकरणस्तु शब्दान्तराद्विधीयमानत्वादनित्यः। तदेवमडागमं बाधित्वा विकरणः प्रसक्तः। तं बाधित्वा प्रकृतया परिभाषया नियमः। तमपि परत्वान्नित्यत्वाच्चाडागमः। तं नित्यत्वात् विकरण इत्यादिक्रमेण चक्रकापत्तिः ।

585. 27. A. 26.

व्याकरणक्रोडपत्रम्

Palm-leaf. 1 Foll. $14 \times 1\frac{1}{2}$ inches. 6 lines in a page. Grantha script. Old. Injured. Illegible writing.

Incomplete.

Beginning :

जनिकर्तुः प्रकृतिः। कर्ता आश्रयः; जायमान इत्यर्थः। तस्य प्रकृतिः कारणमपादानसंज्ञकमिति सूत्रार्थः। उदाहरणानि—ब्रह्मणः प्रजाः प्रजायन्ते इत्यादीनि। अत्र च प्रकृतिशब्दस्य कारणसामान्यपरत्वं वा उपादानकारणपरत्वं वेति विप्रतिपत्तिः। पुत्रात्प्रमोदो जायते इत्यादिप्रयोगबलात् कारणसामान्यपरत्वं निश्चिनुमः।

End :

चतुर्थस्तु हेताविल्यादौ गौणमुख्यन्यायाभावेन सर्वहेतुवाचकेभ्यस्तृतीयासिद्धिवत् प्रकृतेऽपि तदभावेन तदर्थं प्रकृतिग्रहणस्यानावश्यकतया तद्ग्रहणेनोपादानस्यैव ग्रहणमिति । पञ्चमस्तु . . ।

586. 28. G. 3.

व्याकरणक्रोडपत्रम्

Palm-leaf. 2 Foll. $12\frac{1}{4} \times 1\frac{1}{4}$ inches. 10 lines in a page. Grantha script. old. Injured. Good writing.

Wooden board is added in the beginning.

Incomplete.

Beginning :

अणुदित्सवर्णस्य चाप्रत्ययः । अत्राप्रत्यय इति उदिदंशेनान्वेति । विधेये उदित्करणाल्लिङ्गादिति राद्धान्तः । ननु यदि उदिदंशेनान्वेति तर्हि कुहोश्चुः स्तोश्चुना श्चुः ष्टुना ष्टुः इत्यादौ यथा विधेयेनोदिता सवर्णानां ग्रहणम्, तथा स्वजसमौडित्यत्र सोरुदित्त्वेन स्वसवर्णस्य प्लुतल्लृकारस्यापि ग्रहणे सोऽपि प्रातिपदिकात्प्रसज्येतेति चेत्-नैतद्युज्यते । तथा हि सत्यां भित्त्यामालेख्योल्लेख इति सति सवर्णत्वे स तं गृह्णीयात् ।

End :

यदि प्रत्याहारेष्वितां ग्रहणं स्यात् तर्हि एच्प्रत्याहारे ङकारप्रवेशेन अणुदित्सूत्रेणाण्प्रत्याहारान्तर्गतैचप्रत्याहारमध्यप्रविष्टङकारेण स्वसवर्णककारस्यापि ग्रहणेन तस्यापि एच्त्वादयाद्यापत्तिरिति सार्वजनीनतया वक्तुं शक्यत्वात् ।

587. 33. L. 30.

व्याकरणक्रोडपत्रम्—तारकब्रह्मानन्दसरस्वतीकृतम्

Palm-leaf. 48 Foll. 18 × $1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

A discussion on the Sūtra of Pāṇini इतोऽत्सर्वनामस्थाने (7-1-86) by Tārakabrahmānandasarasvatī.

Complete.

Beginning :

इतोऽत् सर्वनामस्थाने । अत् इत्यत्र तकार उच्चारणार्थः, तस्य विधेयत्वेन दीर्घाघनापत्तेः । इत इत्यत्रापि तकार उच्चारणार्थः, तस्योद्देश्यत्वेऽपि तपरकरणस्य कुत्रचित् व्यावृत्त्यसंभवादिति हरदत्तः । अत्रोच्यते — व्यावृत्त्यसंभवादित्यसंगतम्, पथीयतेः क्विपि अल्लोपयलोपयोरेकदेशन्यायेन पथिशब्दस्याक्षतत्वेन पथ्निनयाविल्यादावत्ववारणार्थत्वेन तपरकरणस्य साफल्यमिति व्यावर्त्यस्य सुलभत्वात् । न च परत्वादेरनेकाच इति यणि पथ्निनयाविल्यसंगतमिति वाच्यम्, नित्यत्वात् यणं बाधित्वा पूर्वं न्थे संयोगपूर्वत्वस्याक्षतत्वेन एरनेकाच इत्यस्याप्रसक्तौ पन्थियाविल्यस्यासंगतत्वानापत्तेः ।

End :

अर्थाश्रयेति भाष्यस्य लौकिकार्थवत्त्वयोग्यपदाश्रय इत्यर्थकल्पने प्रमाणाभावः; शक्यार्थे संभवति लाक्षणिकार्थकल्पनस्यान्याय्यत्वं चेति चेत् — अस्त्वेवम्, एवमपि इतोत्सर्वनामस्थाने इत्यस्य शब्दाश्रयत्वात् पन्थियाविल्यत्र परिभाषाप्रवृत्तेर्दुर्निरूपत्वं वरीवर्तितराम् । तस्मात् पस्थियाविल्यादौ क्वौ लुप्तं न स्थानिवदिति निषेधेनाव्यवहितसर्वनामस्थान-

परकत्वात् अत्वप्रसक्तौ तद्वारणार्थं तपरकरणमावश्यकमेवेत्यलं विस्तरेण ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीतारकब्रह्मानन्दसरस्वतीकृतक्लौलुप्तविवरणकोटिरत्नमहोदधिः समाप्तः ।

One extra leaf at the end contains the errata of the work.

588. 22. L. 49.

व्याकरणक्रोडपत्रम्—ताकरब्रह्मानन्दसरस्वतीकृतम्

Palm-leaf. 20 Foll. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Much Injured. Good writing.

Same as the last.

Incomplete.

589. 10. I. 32.

व्याकरणदीपव्याख्या प्रभा—गङ्गाधरदीक्षितकृता

Paper. 293 Foll. $8 \times 6\frac{1}{4}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on Cidrūpāśrama's Vyākaraṇadīpa which is an independent representation of Pāṇini's grammar with slight modifications done with a view to make its study simple for beginners. The commentator Gaṅgādhara was the son of Bālakṛṣṇa and grandson of Viśvanāthasūri. He salutes his paternal uncle Rāmachandra and one Gadādharaguru. The colophon found at the end of Sandhiprakaraṇa says that he was the pupil of Cidrūpāśrama and a resident of the village Ambilālagrāma. The stanza found at the end of Subantaprakaraṇa gives the date Sam. 1674=1617 A.D. which may be taken as the date of composition of the work. Contains the following Chapters: 1. Sandhiprakaraṇa, 2. Śabdādhikāra, 3. Strīpratyaya, 4. Kāraka, 5. Samāsa, 6. Taddhita, 7. Padavyavasthā, 8. Ākhyāta and 9. Kṛtprakaraṇa.

The text and commentary are available in the Tanjore Palace Library—Nos. 5853 and 5854, Vol. X.

Beginning :

प्रणम्य पदपङ्कजं जनकजापतेर्मञ्जुलं
विरिञ्चिभवपूजितं सकलसिद्धसंसेवितम् ।
तनोमि परमादरात्परमहंसचिद्रूपह-
त्प्रकाशितमहामतिप्रसृतिहेतुदीपप्रभाम् ॥
गदाधरगुरोर्गुरोरपि जगद्गुरोरञ्चितं
प्रणम्य चरणाम्बुजं चरिकरीमि गङ्गाधरः ।
यतिप्रवरसत्कृतेर्विवृतिमुत्तमां यत्नतः
कुतः स खलु संभवेदिह ममान्तरायोऽन्तरा ॥
फणीश्वरवचोऽर्णवं निजधिया रयात्तीर्णवान्
सुवर्णमृगतृष्णयाकुलमना मनाङ् नापि यः ।
पितृव्यमतिरामचन्द्रमिह रामचन्द्राभिधं
बुधप्रवरवन्दिताङ्घ्रियुगमीड्यमीडेऽनिशम् ॥
श्रीहरेश्चरणपङ्कजं भजे
यत्परागमनुरागतो वहन् ।
मन्दधीरपि गुरुं धियाधरी-
चर्करीति न तुलास्य तस्य यत् ॥
प्रभेयं चिद्रूपप्रणयकृतदीपस्य रुचिरा
चिरात्संसर्पन्ती प्रतिबुधमिहाशासु दशसु ।
गुरूणामस्माकं कुमुदनिकुरुम्बद्युतिजय-
स्फुरन्तीं सत्कीर्तिं प्रथयतुतरामुन्नतिपराम् ॥

अबद्धं निबद्धं भवेद्यन्मयेह
क्षमध्वं कृपासिन्धवः साधवस्तत् ॥
महाकालनामा महादेव ईदृक्
समक्षं हि मे चापलं चक्षमे सः ॥

शिष्यप्रवृत्तयेऽभिधेयं प्रतिजानीते—श्रीशमिति। अहं शब्दागारे यावद्बोधं दीपं कुर्वे। कुर्वे इति संबन्धादहमिति कर्ता लभ्यते, अस्मद्युत्तम इत्युक्तेः। यावान् बोध इति यावद्बोधम्। अव्ययीभावसमासः। यथामतीत्यर्थः। शब्दानामगारं गृहं शाब्दागारं व्याकरणम्। शब्दागारमिति वदता शब्दा एव प्रतिपाद्यत्वेनाभिधेया इत्युक्तम्। दीपं प्रकाशं विरचयामीत्यर्थः।

Colophon (page 58.)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्चिद्रूपाश्रमचरणसरोजरजःप्रसादावाप्तबुद्धिना निसर्गनिर्बुद्धिना श्रीरामचन्द्रचरणोपासिना अम्बिल्आलग्रामवासिना गङ्गाधरेण विरचितायां श्रीमच्चिद्रूपाश्रमविरचितव्याकरणदीपप्रभायां पञ्चसंधिप्रकाशः।

Page 294.

वेदस्वरर्त्विन्दुमितेऽत्र वर्षे
वलक्षपक्षे मधुमासि षष्ठ्याम्।
चिद्रूपयोगीश्वरसंप्रदिष्ट-
दीपप्रभायां लिखितः सुबन्तः।

End:

तथा च श्रीराघवागारे राघवभक्तैः स्नेहेन दीपो ज्वाल्यते, तद्वदयमपि तैरुज्ज्वाल्य इति समासोक्त्युत्थापितोपमया श्रीराघवागारीयदीपतोद्दीपिता। न केवलमैहिककरिकनकतुरगादिमात्रफलिका, किं त्वामुष्मिकफलदीपितशब्दागारीयदीपोद्दीपितापीति वस्तुध्वनिः।

Colophon:

इति श्रीविश्वनाथसूरिवरतनयरामचन्द्रानुजबालकृष्णाङ्गजश्रीगङ्गाधरदीक्षितविरचितायां श्रीमच्चिद्रूपाश्रमिविरचितव्याकरणदीपप्रभायां कृदन्तप्रकाशः समाप्तः।

प्रभेयं चिद्रूपप्रणयकृतदीपस्य रुचिरा
चिरात्संसर्पन्ती प्रतिबुधमिहाशासु दशसु।
गुरूणामस्माकं कुमुदनिकुरुम्बद्युतिजय-
स्फुरन्तीं सत्कीर्तिं प्रथयतुतरामुन्नतिपराम् ॥
चिद्रूपचारुचरणाम्बुजयोः पुरस्ता-
न्न्यस्ता समस्तजडजाड्यतमोऽपहन्त्री।
तत्क्लृप्तशब्दसदनोज्ज्वलदीपदीप्ति-
रर्थान्प्रकाशयति तोषकृतेऽर्भकाणाम् ॥

590. 21. Q. 13.

व्याकरणप्रवेशकः

Palm-leaf. 31 Foll. 12 × 1¾ inches. 8 lines in a page. Malayālam script. Old. Good. Good writing.

Wooden boards are added to both sides.

An elementary grammar in Sanskrit according to Pāṇini written in verse. The work is the same as that described under No. 809 of the Des. Cat. of Sanskrit MSS. in the Palace Library, Trivandrum wherein the authorship is attributed to Acyutapisharaṭi, preceptor of the famous Malabar poet Nārāyaṇabhaṭṭadri. This work differs from that published with the same title, in the Cochin Sanskrit Series No. 2.

Breaks off in the 15th section.

Beginning:

गण्डस्थलस्खलदुदारमदाम्बुधारा-
गण्डूषमत्तमधुपस्तुतिदत्तकर्णम्।

स्वर्णाद्रिकूटकषणादतितीक्ष्णदन्तं
दन्तावलाननमुपैमि दुरिष्टशान्त्यै ॥
विनायकमहं वन्दे जगत्यामेकनायकम् ।
गङ्गाप्रवाहतुल्यां मे वाग्विभूतिं करोतु सः ॥
महर्षिं पाणिनिं नत्वा मन्दमध्यममेधसाम् ।
महाशास्त्रप्रवेशार्थमार्गं वक्ष्ये प्रवेशकम् ॥
इक्षुं खादन्ति नादन्ता रसं शर्करया विदुः ।
प्रवेशकेन जानन्ति शब्दान् व्याकरणाक्षमाः ॥
दर्पणे पणमात्रेऽपि दन्ती प्रतिफलेद्यथा ।
तथाल्पेऽपि प्रकरणे महद्व्याकरणं स्फुरेत् ॥
वर्णागमो वर्णविपर्ययश्च
द्वौ चापरौ वर्णविकारलोपौ ।
धातोस्तदर्थातिशयेन योगो
यत्रास्ति तद्व्याकरणं निरुक्तम् ॥
पाठक्रमः प्रसिद्धोऽत्र पञ्चाशद्वर्णसंततेः ।
स्वराः षोडश तत्राद्या अच इत्यपि संज्ञिताः ॥
कादयोऽन्ये हलाख्याश्च व्यञ्जनाख्याः प्रकीर्तिताः ।
पद्यांशैः सूत्रकाप्राप्ताः प्रयुञ्ज्यात्प्रक्रियाक्रमम् ॥

Colophon Foll. 2*b*:

इति वर्णागमो नाम प्रथमोऽध्यायः ।

End:

पदयोरुभयोर्वृद्धिः समासेष्वाग्निमारुतम् ।
इत्येवमन्ये विज्ञेयाश्चातुरर्थ्यविभक्तिषु ॥
आञ्जनेयोऽयमात्रेयो गाङ्ग्यो वैनतेयवत् ।
पैतृष्वसेयश्चाप्येवं पैतृष्वस्त्रीय इत्यपि ॥
स्वस्त्रीय एव भ्रात्रीयो न वृद्धिः कानुबन्धतः ।
क्वचित्कीयः क्वचिन्नीयः प्रत्ययोऽयं प्रयुज्यते ॥
वत्सीयः कलभीयश्च गोधुग्वत्सीयचेद्वितः ।
वल्मीकीय . . . . . ॥

591. 39. F. 9.

व्याकरणप्रवेशकः

Paper. 28 Foll. 9½ × 7½ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

This also is an elementary grammar in Sanskrit written in verse. The printed edition of this work published in the Cochin Sanskrit Series No. 2, attributes the authorship to Acyutapisharaṭi, the preceptor of famous Malabar poet Nārāyaṇabhaṭṭādri.

Incomplete.

Beginning:

अशेषागमतात्पर्यकैरवोद्बोधचन्द्रिकाम् ।
उपास्महे ज्ञानमुद्रां रामचन्द्रकरोदिताम् ॥
लक्ष्म्या प्रकाशविषयं रञ्जयन्निजया निजम् ।
नित्यमुद्यन्विजयते सुकृतालम्बनं रविः ॥
प्रवेशकः संस्क्रियते शब्दशास्त्रप्रवेशकः ।
सुगमोऽयमृजुर्मार्गो बालानां मन्दचेतसाम् ॥
प्रवेशकेन जानन्ति शब्दान् व्याकरणाक्षमाः ।
इक्षून्खादन्ति नादन्ता रसं शर्करया विदुः ॥
दर्पणे पणमात्रेऽपि दन्ती प्रतिफलेद्यथा ।
तथाल्पेऽपि प्रकरणे महद्व्याकरणं स्फुरेत् ॥

End:

शपश्यन्म्यां नुं शतुर्नित्यं भवन्ती लोचने उभे ।
अहः पदत्वे नो रः स्याद्विसर्गो नस्य वै सुपि ॥
अहरत्राहनी अह्नी अहोभ्यां स्यादहःसु च ।
यद्ये यानि त्विदमिमे स्याददोऽमू अमूनि च ॥

Colophon:

इति हलन्तनपुंसकलिङ्गप्रकरणम् ।
पूर्वभागः समाप्तः ।

592. 11. C. 3.

शक्तिस्फुटम्—कलाधरकृतम्

Paper. 22 Foll. 11½ × 5. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a work dealing with the S'akti of the Kārakavibhaktis according to the grammarians of Pāṇini school. From the introductory stanzas the author is known to be one Kalādhara.

Incomplete.

Beginning :

नामं नाममुमापतेः पदयुगं भट्टोजिभट्टैः कृतान्
ग्राहं ग्राहमनेकभाष्यविलसत्सिद्धान्तसंस्थापकान् ।
राद्धान्तान्कृतिनां मुदे हि तनुते शक्तिस्फुटं कौस्तुभे
गूढार्थं च कलाधरो हरपदद्वन्द्वार्चनप्राप्तधीः ॥
कलाधरकरोत्कराक्षरसुगन्धबन्धद्धिं गतं
सुधीजनमनोमधुव्रतनिकायलब्धास्पदम् ।
मुकुन्दचरणेऽर्पितं वसतु चारु शक्तिस्फुटं
चिरं विकचकैरवं व सुपदार्थधीकारकम् ॥

विघ्नविघाताय श्रीमद्भगवत्फणिभाषितशास्त्रसिद्धान्तस्थापकविततदुरवगाहदुर्ज्ञेयकौस्तुभप्रणेतृश्रीमद्भट्टोजिभट्टसिद्धान्तरूपं मङ्गलं स्मरन् प्रतिजानीते ।

कर्तुरीप्सिततमं कर्म । कर्ता धातूपात्तव्यापाराश्रयः । स च केनाप्तुमिच्छतीति करणाकाङ्क्षायां विशेषणीभूतेन व्यापारेणेत्यर्थाल्लभ्यते । तण्डुलं पचति, ग्रामं गच्छति इत्याद्युदाहरणम् ।

Colophon :

इति द्वितीयाविभक्तिनिरूपणम् ।

End :

संख्या प्रथमार्थः । तथाहि—एकः द्वौ बहव इति । न चात्रापि प्रातिपदिकार्थमात्रे प्रथमा स्यादिति वाच्यम् । एकादिशब्दैः संख्याया उक्तत्वेनोक्तार्थानामप्रयोग इत्यनेन प्रथमाया अप्रवृत्तेः । न चापदं न प्रयुञ्जीतेति भाष्योक्तत्वात् विभक्तिः स्यादेवेति वाच्यम् , द्विशब्दादेकवचनप्रसङ्गेन उच्चैरुद्घोषस्य सुस्थत्वात् ।

Colophon :

इति शक्तिस्फुटे प्रथमाविभक्त्यर्थनिरूपणम् ।

593. 20. K. 20.

शब्दताण्डवम्

Palm-leaf. 3 Foll. 16 × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

An explanatory discussion on certain topics selected from the Siddhāntakaumudī and other grammatical works. The topics dealt with herein are, अनुनासिकनिर्देश, अदर्शनं लोपः, तुल्यास्यप्रयत्नं सवर्णम् , विश्वपाभिः, अणुदित्सवर्णस्य चाप्रत्ययः. A MS. of the work containing 292 pages dealing with more topics is available in the Govt. Oriental MSS. Library, Madras (see D. No. 1492).

Incomplete.

Beginning :

नत्वा गुरुचरणाम्बुजमम्बां वागीश्वरीं च वाक्सिद्धयै ।
अतुलकलाधरशेखरसंतुष्टयै शब्दताण्डवं रचये ॥

प्रत्याहारेष्वितां न ग्रहणम् । अनुनासिक इत्यादिनिर्देशसामर्थ्यात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यत इति यत्कौमुद्यामुक्तं तत्र विचार्यते । अत्र यदि णसधातोर्णवुलि नासिकाशब्दो व्युत्पाद्यते तदा अच्कार्यशब्देन

यदि यण् विवक्षितः तर्हि प्रत्ययस्थादितीत्वविधिसामर्थ्यादेव यण् परिहर्तुं शक्यः । यस्येति चेतीकारलोपस्तु न शङ्कितुं योग्यः । ककारस्याच्त्वेऽपि प्रत्ययस्य तदादित्वाभावेन स्वादित्वाभावेन च भत्वस्यैवाभावात् । यदि तु णासृधातोः गुरोश्च हल इत्यप्रत्यये टापि कप्रत्यये च केण इति ह्रस्वे टापि च नासिकाशब्दो व्युत्पाद्यते तदा यद्यप्यच्कार्यशब्देन यस्येति चेति लोपो विवक्षितः, प्रत्ययस्थादितीत्वं तु कारिका सर्विकेत्यादौ चरितार्थमिति वक्तुं शक्यम्, तथापि प्रत्याहारेष्वितां ग्रहणपक्षे ककारस्याप्यच्त्वेन केऽण इत्यस्य येन नाप्राप्तन्यायेन यस्येति चेत्येतदपवादतया नासिकाशब्दे केऽण इत्यनेनापवादेन यस्येति चेत्युत्सर्गस्य बाधः स्पष्ट एव ।

End :

अत एव ऋदुपधादिति सूत्रे तपरकरणेन णिचोऽनित्यत्वं ज्ञाप्यत इति पदमञ्जर्याम् । यद्वा ग्रो यङि इति ऋकारस्याचि परे यणादेशकरणमेवात्र ज्ञापकम् । अन्यथा ऋकारस्य इक्त्वाभावेन यण् न स्यादिति ॥ ९ ॥

अप्रत्यय इत्यत्र कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणमिति न्यायेन इञित्यादौ . . . ।

Then the following 2 stanzas are written.

भूवादौ शबदादिकेषु लुगपि श्लुः स्याज्जुहोत्यादिषु
श्यन्दैवादिकधातुषु श्नुरपि च स्वादौ तुदादौ च शः ।
रुध्यादौ श्नमथो तनादिषु भवेदुप्रत्ययः क्रयादिषु
श्ना स्यात्स्वार्थिकणिच्चुरादिषु पुनस्तत्रापि शब्जायते॥
अन्योन्याश्रयवारणाय बहुधा व्याख्यातृभिर्वर्णिता
युक्तिर्व्याकरणे हलन्त्यविषये स्यात्कार्यसिद्धिर्यथा ॥
भो स्वामिंस्तव युष्मदीयविदुषां चान्योन्यभावोऽधुना
कार्यप्रापकतामुपैति बहुशः श्रुत्वा मयेत्यागतम् ॥

594. 20. K. 10.

शब्दमञ्जरी

Palm-leaf. 31 Foll. 13 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Gives the declension of some nouns for the convenience of beginners.

Contains up to the end of हलन्तनपुंसकलिङ्गशब्द

Beginning :

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

अथाजन्ताः पुंलिङ्गा उच्यन्ते—रामः रामौ रामाः + रामेषु ।

End :

अदः अमू अमूनि + अमुना अमूभ्याम् अमीभिः, इत्यादि पुंलिङ्गवत् । इति हलन्ता नपुंसकलिङ्गाः ।

The former owner of the MS.—Rāmacandra.

595. 20. K. 6.

शब्दमञ्जरी

Palm-leaf. 8 Foll. 12¼ × 1¼ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Incomplete.

596. 20. K. 7.

शब्दमञ्जरी

Palm-leaf. 20 Foll. 11 × 1½ inches. 10 lines in a page. Malayālam script. Old. Slightly injured. Good writing.

Incomplete.

One extra leaf at the end contains some conjugational forms of the roots भू and एध्.

597. 20. K. 8.

शब्दमञ्जरी

Palm-leaf. 16 Foll. 17 × 1½ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Incomplete.

The last two leaves contain some conjugational forms of the roots भू and एध्. Name of the scribe—Kavīśvara Subrahmaṇya.

598. 20. K. 9.

शब्दमञ्जरी

Palm-leaf. 12 Foll. 11¾ × 1½ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Incomplete.

The former owner of the MS—Aiyyāvayyangar son of Vānamāmalaiayyangar and younger brother of Śrīnivāsayyangar.

One extra leaf at the end contains some conjugational forms of the roots भू and एध्.

599. 20. K. 40.

शब्दमञ्जरी

Palm-leaf. 10 Foll. 15¼ × 1⅛ inches. 5 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Incomplete.

600. 20. N. 9.

शब्दमञ्जरी

Palm-leaf. 5 Foll. 15¼ × 1¼ inches. 5 lines in a page. Telugu script. Old. Good. Good writing.

Incomplete.

601. 23. A. 17.

शब्दमञ्जरी

Palm-leaf. 42 Foll. 16¾ × 1¼ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

602. 25. I. 25.

शब्दमञ्जरी

Palm-leaf. Foll. 16 × 1½ inches. 11 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains up to the end of हलन्तनपुंसक-शब्द.

The names of the owners—Veṅkaṭācāri and Śrīnivāsācāri.

Four extra Foll. are added at the beginning. Fol. 1 contains two horoscopes of Velāṅkuppam Śrīnivāsatātācarya's son, and Koḍiyālam Anantācārya's son. Fol. 2 contains a stanza

from Vedāntadesika's Pādukāsahasra. स्थिरागसां etc. Foll. 3 and 4*a* repeat some forms of nouns found in S'abdamañjarī. Fol. 4*b* contains a list of MSS. probably owned by the owner of this MS.

603. 25. K. 18.

शब्दमञ्जरी

Palm-leaf. 4 Foll. 12 × 1 inches. 7 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

604. 27. F. 30.

शब्दमञ्जरी

Palm-leaf. 3 Foll. 15½ × 1 inches. 5 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

605. 27. F. 65.

शब्दमञ्जरी

Palm-leaf. 3 Foll. 14¾ × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Incomplete.

The following stanzas are found in the beginning.

रामो हरिः करी भूभृद्भानुः कर्ता च चन्द्रमाः ।
तस्थिवान् भगवानात्मा दशैते पुंसि नायकाः ॥
रमा रुचिर्नदी धेनुधीर्वाक्सरिदनन्तरम् ।
क्षुत्प्रावृट्शरदश्चैव दशैताः स्त्रीषु नायकाः ॥
ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा ।
मधु नाम मनोहारि दशैतानि नपुंसके ॥
सर्वे ब्रह्म वदिष्यन्ति संप्राप्ते तु कलौ युगे ।
नानुतिष्ठन्ति कौन्तेय शिश्नोदरपरायणाः ॥
छेदश्चम्पकचूतचन्दनवने रक्षा करीरद्रुमे
हिंसा हंसमयूरकोकिलकुले काकेषु लीलारतिः ।
मातङ्गेषु खरक्रिया समतुला कर्पूरकार्पासयो-
रेषां यत्र विभावना विजयते देशाय तस्मै नमः ॥

606. 27. I. 75.

शब्दमञ्जरी

Palm-leaf. 6 Foll. 12½ × 1 inches. 6 lines in a page. Grantha script. Old. Much injured. Illegible writing.

Incomplete.

607. 29. C. 20.

शब्दमञ्जरी

Palm-leaf. 14 Foll. 12 × 1 inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

The following stanzas are found in the beginning:

रामः सर्व उभौ पूर्वो निर्जरो विश्वपा हरिः ।
पतिः सखा ग्रामणीश्च सूक्ष्मधीर्गुरुरात्मभूः ॥
पिता विधाता ग्लौरेते पुंस्यजन्ताः प्रकीर्तिताः ।
पयोमुक्क्रतुभुक्सुभ्राट् सुगण् च भगवान्मरुत् ॥
सुपाद्य एष सोऽहं त्वं राजा पन्थाः करी वृषी ।
कोऽयं सदृग्विट् द्विट् चापि चन्द्रमास्तस्थिवानसौ ।
मधुलिट् च तुराषाडप्यनड्वांश्च हलन्तकाः ॥

608. 30. J. 36.

शब्दमञ्जरी

Palm-leaf. 60 Foll. 16½ × 1 inches. 5 lines in a page. Telugu script. Old. Much injured. Clear writing.

Contains up to the end of हलन्तनपुंसक-शब्द.

Pāṇini's rules are occasionally quoted to support the forms. Two extra leaves added at the end contain some Pāṇini's Sūtras and rules selected for the sake of young students.

609. 42. A. 135.

शब्दमञ्जरी

Paper. 21 Foll. 16¾ × 3¾ inches. 5 lines in a page. Bengali script. Old. Good. Good writing.

Incomplete.

610. 9. C. 122.

शब्दमाला—गणेशभिषक्कृता

Paper. 55 Foll. 6 × 4 inches. 7 lines in a page. Devanāgarī script. Old. Good. Good writing.

Foll. 32 to 35 are missing and consequently the 3rd adhikāra wants some portion in the middle.

Enumerates in verse the nouns after arranging them according to their genders, final letters and meaning in order to facilitate their declension etc., by young students. The work is divided into following four chapters :

१. लिङ्गानुशासनाधिकारः ।
२. एकाक्षराव्ययाधिकारः ।
३. कारकाद्यधिकारः ।
४. अनेकार्थाधिकारः ।

The author Gaṇeśabhiṣak was the son of Haribhaṭṭa of Dvārakā and grandson of Sri-Kṛṣṇa of the S'rīvatsa family.

Complete.

Beginning :

श्रीगजास्यं प्रणम्यादौ बालधीवृद्धिसिद्धये ।
शाब्दिकीं प्रक्रियां कुर्वे सुबोधां नातिविस्तराम् ॥ १ ॥
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ २ ॥
इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः ।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥ ३ ॥
तथापि शब्दमालेयं यथामति विरच्यते ।
आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात् ॥४॥
भूवादयो धातवः स्युः कृदाद्याः प्रत्यया स्मृताः ।
तत्संयोगोद्भवाः शब्दाः कथिता मुनिपुंगवैः ॥ ५ ॥
रामकृष्णमुकुन्दाद्याः सर्वाद्या निर्जरस्तथा ।
शङ्खध्मा विश्वपा हाहाश्चार्यग्निहरयोऽपि च ॥ ६ ॥
श्रीपत्यब्धिसखायश्च रविकव्यादयस्तथा ।
कत्येकद्वित्रयश्चापि औडुलोमिस्तथापरः ॥ ७-१॥
वातप्रमीर्ययीपप्यावतिलक्ष्मीस्तथा प्रधीः ।
ग्रामण्युन्न्यौ कुमारी च नीर्बहुश्रेयसी तथा ॥ ८ ॥

End :

मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
हितकृत्सर्वलोकस्य लेखको राजसंनिधौ ॥ ७९ ॥
राजा वृक्षो ब्राह्मणास्तस्य मूलं
भृत्याः पर्णं मन्त्रिणस्तस्य शाखाः ।

मूले भग्ने राजवृक्षस्य नाश-
स्तस्माद्राजन् ब्राह्मणा रक्षणीयाः ॥ ८० ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वल्लुंघून्वर्धय-
न्नत्युच्चान्नमयन्पृथून्विलघयन्विश्लेषितान् संघयन् ।
क्षुद्रान्कण्टकितान्बहिर्निरसयन्स्वारोपितान्पोषय-
न्मालाकार इव प्रयोगचतुरो राजा चिरं जीवति ॥
कल्याणभाजः सकला भवन्तु
लोका घनो वर्षतु तोयराशिम् ।
सन्तो लभन्तां सततं यशांसि
प्राप्नोतु धर्मो जयमत्र नित्यम् ॥ ८२ ॥
यावन्नीरनिधौ नीरं दिवि भानुदिवाकरौ ।
क्षोणौ मेरुः कुलं तावच्छ्रीगणेशः स मावतात् ॥८३॥

Colophon :

इति श्रीवत्सान्वयाब्धीन्दुश्रीकृष्णात्मजश्रीमद्द्वार-
केशहरिभट्टतनयगणेशभिषग्विरचितायां शब्दमालाया-
मनेकार्थाधिकारश्चतुर्थः समाप्तः ।

611. 25. I. 8.

शब्दसंस्कारः

Palm-leaf. 20 Foll. 16½ × 1 inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

An elementary work on Sanskrit grammar briefly summarizing the Siddhāntakaumudī of Bhaṭṭojidikṣita. The author whose name is not known, salutes the famous Appayadīkṣita in the beginning of the work.

Incomplete.

Beginning :

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥
अल्पायासेन जिज्ञासूनधिकृत्येह बालकान् ।
प्रसिद्धशब्दसंस्कारो दिङ्मात्रेण प्रदर्श्यते ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति प्रत्याहारार्थानि माहेश्वराणि चतुर्दश सूत्राणि । हकारादिष्वहकार उच्चारणार्थः । लकारे त्वित्संज्ञकः । उपदेशेऽजनुनासिक इत् । अजिति प्रत्याहारः । उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । अनुनासिकत्वं व्याख्यातृवचनगम्यम् ।

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥

तस्य लोपः । तस्येतो लोपः स्यात् । हलन्त्यम् । उपदेशेऽन्त्यं हलित्संज्ञं स्यात् ।

End :

यस्य च भावेन भावलक्षणम् । भावः क्रिया । यस्य क्रियया क्रियान्तरं लक्ष्यते तत्र सप्तमी । गोषु दुह्यमानासु गतः । षष्ठी चानादरे । अनादराधिके भावलक्षणे भाववतः ।

Four extra leaves are added at the end. Leaf 1 contains some conjugational forms of certain roots.

Leaves 2 and 3 contain a portion of the Liṅgānuśāsanavṛtti of Bhaṭṭojidikṣita.

Leaf 4 contains the following stanza.

कः खे चरति का रम्या का जप्या किं विभूषणम् ।
को वन्द्यः कीदृशी लङ्का वीरमर्कटकम्पिता ॥
हनूमता हते रामे सीता संहर्षनिर्भरा ।
रुदन्ति राक्षसाः सर्वे हा हा रामो हतो हतः ॥

वटवृक्षो महारण्ये मार्गमावृत्य तिष्ठति ।
अत्र संबोधनं वक्तुं दैवैरपि न शक्यते ॥
संध्यावन्दनवेलायां तटाकान्ते द्विजोत्तमैः ।
अत्र क्रियापदं वक्तुमवधिर्ब्रह्मणो वयः ॥
केशवं पतितं दृष्ट्वा पाण्डवा हर्षनिर्भराः ।
रुदन्ति कौरवाः सर्वे हाहा केशव केशव ॥
केचिद्वदन्त्यमृतमस्ति पुरे सुराणां
केचिद्वदन्ति वनिताधरपल्लवेषु ।
ब्रूमो वयं सकललोकमतानुसारा-
ज्जम्बीरनीरपरिपूरितमत्स्यखण्डे ॥
पथि तिष्ठसि किं मूर्ख व्याघ्रो मां भक्षयेदिति ।
तेन किं वद मांसज्ञः पथिकान्भक्षयेदिति ॥
दुन्दुभिस्तु सुतरामचेतन-
स्तन्मुखादपि धनं धनं धनम् ।
एवमेष निनदः प्रदृश्यते
किं पुनर्यदि जनः सचेतनः ॥
तव तन्वि कुचावेतौ लोकानां चक्रवर्तिनौ ।
सर्वराजकरग्राही देवो यत्र करप्रदः ॥
काचिद्बाला रमणवसतिं प्रेषयन्ती करण्डं
सा तन्मूले निभृतमलिखद्बालमस्योपरिष्टात् ।
गौरीनाथं पवनतनयं चापकं चात्र भावं
पृच्छत्यस्मिन्सदसि विदुषां मल्लिनाथः कनीन्द्रः ॥
जटा नेयं वेणीकृतकचकलापो न गरलं
गले कस्तूरीयं शिरसि शशिरेखा न कुसुमम् ।
इयं भूतिर्नाङ्गे प्रियविरहजातो धवलिमा
पुरारातिभ्रान्त्या कुसुमशर किं मां प्रहरसि ॥
नाथो मे विपणिं गतो न गणयत्येषा सपत्नी च मां
त्यक्त्वा मामिह पुष्पिणीति गुरवः प्राप्ता गृहाभ्यन्तरम् ।
शय्यामात्रसहायिनीं परिजनः श्रान्तो न मां सेवते
स्वामिन्नागमलालनीय रजनीं लक्ष्मीपते रक्ष माम् ॥

612. 24. C. 23.

शाब्दसिद्धान्तः

Paper. 23 Foll. $10\frac{1}{2} \times 2\frac{1}{2}$. 11 lines in a page. Malayālam script. Old. Slightly injured. Clumsy writing.

A brief work giving the principles of grammar as expounded by Patañjali, Kaiyaṭa and other commentators on Pāṇini.

Incomplete.

Beginning :

सृष्टिर्विश्वसृजोऽप्यादौ पुष्टा यन्नतिपूर्विका ।
हेरम्बो मे स कुरुतान्निष्प्रत्यूहं समीहितम् ॥
सज्जनादृतवाग्योगभाष्योदयपरंपराम् ।
वाग्देवी मम पुष्णातु निष्णाता भक्तपोषणे ॥
वन्दे मुनीन् पाणिनिवाक्यकार-
पतञ्जलीनञ्जलिमादधानः ।
यद्वाग्विरोध्यन्यवचः प्रमाणं
नान्यत्व इत्याप्तगिरः प्रथन्ते ॥
सिद्धान्यालोच्य मतान्यद्य मया शुद्धसंप्रदायानि ।
बालव्युत्पादाय क्रियते संक्षिप्य **शाब्दसिद्धान्तः** ॥

तत्रादौ प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनादि स्पष्टत्वात् सूत्रेऽनुक्तमन्वर्थसंज्ञोक्तिद्वारेण भाष्ये भाषितम् —अथ शब्दानुशासनमिति । शब्दानुशासनं शास्त्रमारभ्यत इत्यर्थः । असाधुभ्यो गाव्यादिभ्यो विविच्य गवादीनां गमेर्डोः इत्यादिना प्रकृत्यादिविभागेन ज्ञापनमनुशासनम् । तेन गवादयः साधवः शब्दा विषयाः । तज्ज्ञानं प्रयोजनम् । प्रतिपाद्यप्रतिपादकभावश्च संबन्धः । ज्ञानार्थी चाधिकारीति विषयप्रयोजनसंबन्धाधिकारिलक्षणमनुबन्धचतुष्टयं द्रष्टव्यम् ।

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान्यथावद्व्यवहारकाले ।

सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः ॥

इति स्मृत्या श्रुत्या च सिद्धमध्येयं व्याकरणमिति। इदमत्र विचार्यते—सर्वाण्यपि व्याकरणानि सर्वदा प्रमाणानि, उत नेति। तत्र पूर्वं पूर्वमुपजीव्य उत्तरस्य साध्यं प्रामाण्यमिति सर्वाण्यपि व्याकरणानि सर्वदा प्रमाणानीति प्राप्ते ब्रूमः। स्मृतीनां नियतकालतया व्यवस्थाहेतुत्वात् अद्यत्वे च त्रिमुनिस्मृतेरेव वेदाङ्गतया महाजनपरिग्रहात्सैव प्रमाणम्। तद्विरुद्धं तु नेदानीं प्रमाणम्। एतच्च शताच्च ठन्यतावित्यादौ कैयटादौ स्पष्टम्।

End:

अत्र छन्दोऽधिकारात् ऋक्पादस्य ग्रहणम्। सौषधीरनु ऋध्वसे। लोपे चेत् किम्। स एव व्यासो भवति। छन्दोऽनुवृत्तिर्नेति पक्षे श्लोकपादोऽपि।

Colophon:

इति स्वादिसन्धिः। संहितापरिच्छेदः संपूर्णः।

613. 29. M. 29.

समासकुसुमावलिः—मङ्गलेश्वरकृता

Palm-leaf. 5 Foll. 16¾ × 1 inches. 6 lines in a page, Telugu script. Old. Slightly injured. Good writing.

A primer on elementary grammar written in verse dealing with the compounds or Samāsa by Maṅgaleśvara of the Madhyamandira family.

Complete.

Beginning:

भूनायकं वा धननायकं वा
भजन् भुवं वा धनमेति लोके।
तद्विघ्ननाथं न भजामि किं तु
सहस्रशस्तं प्रणमामि नित्यम् ॥ १ ॥
श्रीमत्पाणिनिसूत्राणि समालोच्य यथामति।
बालव्युत्पत्तये कुर्मः समासकुसुमावलिम् ॥ २ ॥
तत्पुरुषोऽष्टविधोऽभूत्प्रथमाविभक्तिनञ्कृतैर्भेदैः।
उत्तरपदजनितार्थो मुख्यस्तत्रेति पण्डितैः ख्यातः ॥३॥

प्रथमातत्पुरुषो यथा—

अमृतं योऽपिबद्दैत्यस्तं वैकुण्ठो द्विधाच्छिनत्।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवद्ध्रुवः ॥ ४ ॥

पूर्वः कायः पूर्वकायः। उत्तरः काय उत्तरकाय इत्येवमादयः ॥ ४ ॥

द्वितीयातत्पुरुषो यथा—

दुःखातीतो भवत्येव यदि कृष्णाश्रितो जनः।
अथ वान्नबुभुक्षुः सन् मुहूर्तसुखमश्नुते ॥ ५ ॥

दुःखमतीतो दुःखातीतः। कृष्णं श्रितः कृष्णश्रितः। मुहूर्तं सुखं मुहूर्तसुखम् ॥ ५ ॥

End:

सनाद्यन्तधातुवृत्तिर्यथा—

यः पास्पर्धीति वा लोकान् देवैर्वैरायते सदा।
राक्षसस्य विनाशाय तस्य पुत्रीयतु प्रभुः ॥ ५१ ॥

पुत्रमात्मन इच्छतु पुत्रीयतु ॥ ५१ ॥

एकशेषवृत्तिर्यथा—

सर्वेषामपि लोकानां पितरौ यौ सनातनौ।
विदितौ पालनाच्चित्ते शिवौ तौ सततं भजे ॥५२॥

माता च पिता च पितरौ। सनातना च सनातनश्च सनातनौ। विदिता च विदितश्च विदितौ। या च यश्च यौ। सा च स च तौ। शिवा च शिवश्च शिवौ ॥ ५२ ॥

समासवृत्तिः सर्वेषु समासेषु निरूपिता ।
परार्थस्याभिधानं हि वृत्तिरित्यभिधीयते ॥ ५३ ॥
दूरान्मात्सर्यमुत्सार्य वात्सल्यान्मत्कृतामिमाम् ।
पश्यन्तु विबुधाः सर्वे समासकुसुमावलिम् ॥५४॥
श्रीमध्यमन्दिरकुलाम्बुधिपूर्णचन्द्र-
श्रीसर्वमङ्गलमनीषिकृता सलीलम् ।
एषा समासकुसुमावलिराब्जतारं
जीयात्कृपानिधिसदाशिवसत्प्रसादात् ॥ ५५ ॥

Colophon :

इति श्रीमङ्गलेश्वरकृतौ समासकुसुमावलिः समाप्ता ।

In the fly-leaf it is said that the MS. was copied by one Vāvilāla Subrahmaṇya-somayājulu and given to Rāmaliṅgasāstri on Sunday the 9th day of the Jyeṣṭha month in the year Rudhirodgārī.

614. 30. L. 25.

समासकुसुमावलिः—मङ्गलेश्वरकृता

Palm-leaf. 7 Foll. 15 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

615. 30. L. 25.

समासकुसुमावलिः—मङ्गलेश्वरकृता

Palm-leaf. 5 Foll. 15 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

This is another copy of the work contained in the MS. described above.

Begins in the Bahuvrihisamāsa and goes on up to the end of the work. The following 2 stanzas are inserted between the stanzas 53 and 54; thus making the total number of stanzas as 57.

अथ प्रसङ्गात्प्रयोगानामह—

रामो भूमण्डलममाद्रामचन्द्रो बभौ भुवि ।
रामेणामारि दैतेयो रामचन्द्रेण भूयते ॥
रामचन्द्रयशोगङ्गा गां निनायति शुभ्रताम् ।
पञ्चानामपि चैतेषां प्रयोगाणां च पद्धतिः ॥

The last stanza is slightly different.

श्रीमध्यमन्दिरकुलाम्बुधिपूर्णचन्द्र-
श्रीमङ्गलेश्वरमनीषिकृता सलीलम् ।
एषा समासकुसुमावलिराब्जतारं
जीयात्कृपानिधिसदाशिवसत्प्रसादात् ॥

Then five extra leaves are added. Leaves 1 and 2 contain some conjugational forms of the roots भू and एध. Leaves 3 and 4 contain Avyayapātha as found in the Siddhāntakaumudī. Leaf 5 reads a few verses from the Vṛttaratnākara.

616. 19. D. 74.

समासचक्रम्

Palm-leaf. 6 Foll. 13⅓ × 1⅛ inches. 6 lines in a page. Telugu script. Old. Good. Good writing.

Three stanzas dealing with Samāsa are taken from the Prayogasaṅgraha of Vararuci and explained herein with suitable illustrations. The author's name is not known.

Complete.

Beginning :

षोढा समासाः संक्षेपादष्टाविंशतिधा पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा ॥
द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः ।
तेषां पुनः समासानां प्राधान्यं स्याच्चतुष्टयम् ॥

समासास्तत्पुरुषः कर्मधारयो बहुव्रीहिर्द्विगुर्द्वन्द्वोऽव्ययीभावश्चेति षड्विधाः । अष्टविधस्तत्पुरुषः यथा—प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्तत्पुरुषश्चेति । तत्र प्रथमातत्पुरुषो यथा-पूर्वं कायस्य पूर्वकायः । अपरं कायस्यापरकायः । पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति समासः । अर्धं पिप्पल्या अर्धपिप्पली । अर्धं कोशातक्या अर्धकोशातकी । द्वितीयं भिक्षाया द्वितीयभिक्षा । तृतीयं भिक्षायास्तृतीयभिक्षा । एवं चतुर्थभिक्षा । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यामिति समासः । प्राप्तापन्ने च द्वितीयेति समासः । यथा—प्राप्तो जीविकां प्राप्तजीविकः । एवमापन्नजीविकः । द्वितीयातत्पुरुषो यथा—कृष्णं श्रितः कृष्णश्रितः । कान्तारमतीतः कान्तारातीतः । नरकं प्राप्तो नरकप्राप्तः । ग्रामं गतो ग्रामगतः । द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति समासः ।

End :

तेषां पुनः समासानां प्राधान्यं स्याच्चतुष्टयम् । कथम् ? पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । नित्यसमासो यथा—कुरुषु चरतीति कुरुचरः । कुम्भं करोतीति कुम्भकारः । अनित्यसमासो यथा—कृष्णं श्रितः कृष्णश्रितः । लुक्समासो यथा—राज्ञः पुरुषो राजपुरुषः । अलुक्समासो यथा—वने चरतीति वनेचरः । उरसि जायत इति उरसिजः । कण्ठे कलङ्को यस्य सः कण्ठेकलङ्कः ॥

पूर्वकायस्तत्पुरुषः श्वेताश्वः कर्मधारयः ।
बहुग्रामो बहुव्रीहिर्न्द्वन्द्वः स्याद्रामलक्ष्मणौ ॥

Colophon :

समासचक्रं संपूर्णम् ।

The owner of the MS.—S'ivapuram Muktilingam.

The MS. is said to have been copied from the original belonging to Evaṭūri Mallikārjunam.

617. 19. D. 75.

समासचक्रम्

Palm-leaf. 8 Foll. 17 × 1⅜ inches. 6 lines in a page. Grantha script. Old. Slightly injured. Good writing.

With slightly different readings. It ends thus :

अवयवव्युत्पत्तिर्यथा—व्याप्नोतीति विष्णुः । रमयतीति रामः । करोतीति कर्ता । रूढव्युत्पत्तिर्यथा—निशां करोतीति निशाकरः । प्रभां करोतीति प्रभाकरः । मूलव्युत्पत्तिर्यथा—रथस्याङ्गमिवाङ्गं यस्य स रथाङ्गः । चक्रस्याङ्गमिवाङ्गं यस्य स चक्राङ्गः ॥

Colophon :

समासचक्रं समाप्तम् ।

Name of the Scribe:—Kavīs'vara Subrahmaṇya.

618. 19. D. 76.

समासचक्रम्

Palm-leaf. 4 Foll. 16¼ × 1⅜ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

With slightly different readings.

It ends thus:

पद्ममिवाक्षिणी यस्य स पद्माक्षः। पद्मं नाभौ यस्य स पद्मनाभः। इति समासान्तप्रत्ययाः।

Two extra leaves are added at the end. First leaf contains some conjugational forms of the roots भू and एध and gives illustrations for कर्तरि प्रयोग, कर्मणि प्रयोग and भावे प्रयोग. The second leaf reads a few verses from the work Citraratnākara.

619. 19. D. 77.

समासचक्रम्

Palm-leaf. 4 Foll. 15½ × 1½ inches. 4 lines in a page. Telugu script. Old. Slightly injured. Good writing.

With slightly different readings and without the introductory stanzas.

It ends thus:

अकरदाः करदाः संपद्यमानाः कृताः करदीकृताः। अकुण्डलं कुण्डलं संपद्यमानं कृतं कुण्डलीकृतम्।

Colophon:

समासचक्रं संपूर्णम्।

620. 19. D. 78.

समासचक्रम्

Palm-leaf. 3 Foll. 15 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

It ends like the MS. 19. D. 75. described above under No. 617.

Two extra leaves added at the end give some conjugational forms of the roots भू, एध्, and व्रज्.

621. 19. D. 79.

समासचक्रम्

Palm-leaf. 8 Foll. 15½ × 1½ inches. 6 lines in a page. Grantha script. Old. Injured. Clear writing.

With slightly different reading.

It ends thus:

दम्भेन वर्तत इति दाम्भिकः। साहसिकः। द्वयोः संख्यापूरको द्वितीयः। तृतीय इत्यादि। गन्तुमिच्छुः जिगमिषुः। कर्तुमिच्छुः चिकीर्षुः।

622. 19. D. 81.

समासचक्रम्

Palm-leaf. 11 Foll. 17 × ¾ inches. 5 lines in a page. Grantha script. Old. Much injured. Good writing.

Incomplete.

The fly leaf reads समासचक्रम् संपूर्णम्.

The former owner of the MS.—Rangaswami.

623. 20. N. 9.

समासचक्रम्

Palm-leaf. 9 Foll. 14¼ × 1¼ inches. 5

lines in a page. Telugu script. Old. Good. Good writing.

With slightly different readings and with the following end :

मन्दुरायां जातः मन्दुरजः । संस्काराज्जातः संस्कारजः । अदृष्टाज्जातः अदृष्टजः । इति कृत्प्रत्ययान्ताः ।

Incomplete.

624. 23. A. 17.

समासचक्रम्

Palm-leaf. 3 Foll. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

Fol. 3*b* repeats the first 3 stanzas of the work.

625. 24. D. 29.

समासचक्रम्

Palm-leaf. 7 Foll. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

With slightly different readings.

After this one extra leaf is added and it contains a few stray forms of the root भू.

626. 26. C. 35.

समासचक्रम्

Palm-leaf. 4 Foll. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants the beginning and end.

The fly leaf at the beginning contains the 1st stanza of the Mēghasandesa of Kālidāsa.

627. 24. M. 11.

समासचक्रम्

Palm-leaf. 10 Foll. $14\frac{1}{2} \times 1$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Without the beginning and with different end as given below :

End :

अतिशयेन लघुः लघीयान्, लघिष्ठः । स्त्री लघीयसी । अतिशयेन पापः पापीयान् पापिष्ठः । स्त्री पापीयसी । अतिशयेन वृद्धो ज्यायान् ज्येष्ठः । द्वयोः संख्यापूरकौ द्वितीयः । तृतीयः । एकादशः । द्वादशः इत्येवमादयस्तद्धितप्रत्ययाः ज्ञातव्याः ।

628. 25. I. 25.

समासचक्रम्

Palm-leaf. 2 Foll. $16 \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha script. Old. Injured. Illegible writing.

Incomplete.

After this one extra leaf is added and it repeats a small portion of the work.

629. 26. E. 35.

समासचक्रम्

Palm-leaf. 5 Foll. $16 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Incomplete.

The former owner of the MS.—Purisai Naḍādūr Rāghavāchāriar.

630. 27. F. 62.

समासचक्रम्

Palm-leaf. 8 Foll. 14½ × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

With slightly different readings.

Incomplete.

It ends thus :

शुक्लः घनः पटः यस्य तत् शुक्लघनपटम् । शुक्लौ घनौ पटौ ययोस्ते शुक्लघनपटे । शुक्लाः घनाः पटाः येषां तानि शुक्लघनपटानि । इति नपुंसके । संख्योत्तरपदो यथा ।

अस्मिन् समासचक्रे षोढा समासाः संक्षेपादित्यादि प्रथमातत्पुरुषो यथेत्यन्तं संख्योत्तरपदो यथेत्यासमाप्तेश्च पुस्तकान्तरे द्रष्टव्यम् ।

After this three leaves give Tamil meaning of some simple Sanskrit sentences in active and passive voices for the use of beginners.

631. 29. C. 20.

समासचक्रम्

Palm-leaf. 7 Foll. 12 × 1 inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

Incomplete.

The following remark on the date of copying is found at the end.

ईश्वरवर्षभाद्रपदबहुलं शुक्रवारं आर्द्रा नक्षत्रम् ।

632. 29. M. 29.

समासचक्रम्

Palm-leaf. 4 Foll. 16¾ × 1 inches. 6 lines in a page. Telugu script. Old. Slightly injured. Illegible writing.

Complete.

End :

अयमनयोरतिशयेन पटुः पटुतरः । अयमनयोरतिशयेन वृद्धः ज्यायान् । इमनिच् प्रत्ययो यथा—गुरोर्भावो गरिमा । लघोर्भावो लघिमा । अणोर्भावः अणिमा । महतो भावो महिमा ।

Colophon :

इति समासः समाप्तः ।

633. 30. J. 36.

समासचक्रम्

Palm-leaf. 4 Foll. 16½ × 1 inches. 5 lines in a page. Telugu script. Old. Much injured. Clear writing.

Incomplete.

Four extra leaves added at the end contain the Avyaya portion of the Siddhāntakaumudi.

634. 30. L. 25.

समासचक्रम्

Palm-leaf. 4 Foll. 15 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

635. 30. L. 25.

समासचक्रम्

Palm-leaf. 3 Foll, 15 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Wants the beginning and end.

This is another copy of the work found in the same MS. as described in last No.

636. 28. K. 5.

समासचक्रम्

Palm-leaf. 5 Foll. 17¼ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing.

With slightly different readings.

It ends thus:

समाहारयोगो यथा—शङ्खश्च पटहश्च शङ्खपटहम्। मुखं च हस्तौ च पादौ च कर्णौ च नेत्रे च वक्षश्च ग्रीवा च नासिके च अंसौ च नाभिश्च मुखहस्त-पादकर्णनेत्रवक्षोग्रीवांसनाभि। प्राण्यङ्गत्वादेकवद्भावः। रथाश्च गजाश्च तुरगाश्च पत्तयश्च रथगजतुरगपत्ति।

Two extra leaves are added at the end. The first leaf contains the name of the former owner of the MS. as—Sāmbamūrti Rāmu. The second leaf repeats a few lines of the work.

637. 29. B. 25.

समासचक्रम्

Palm-leaf. 4 Foll. 15¾ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

With slightly different readings.

Complete.

The colophon reads thus:

समासंचूडामणिः समाप्तः।

638. 29. H. 12.

समासचक्रम्

Palm-leaf, 4 Foll. 15 × 1½ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

639. 30. M. 15.

समासचक्रम्

Palm-leaf. 4 Foll. 19 × 1 inches. 4 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

640. 33. D. 9.

समासचक्रम्

Palm-leaf. 4 Foll. 7¼ × 2 inches. 10 lines in a page. Malayālam script. Old. Injured. Good writing.

With slightly different readings.

Complete.

Followings stanzas are added after the colophon:

द्वौ शब्दौ प्रथमौ कृत्वा परलिङ्गप्रधानतः।
ततो विशेष्यलिङ्गं स्याद्बहुव्रीहिस्तु यस्य सः॥
तद्वच्चकारसहितौ कृत्वा तत्परलिङ्गवत्।
मध्येऽसौ वा च तच्छब्दः कर्मधारय ईरितः॥

Beginning :

. . . . स्य कम्बलो ब्राह्मणकम्बलः, ब्राह्मणस्य कम्बल इति वा । लुगलुक्त्वेन च द्विधेति । लुक्समासोऽलुक्समासश्चेति । लुक्समासो यथा—कष्टं श्रितः कष्टश्रितः । अलुक्समासो यथा—कण्ठे स्थितः कालो यस्यासौ कण्ठेकालः । उरसि लोमानि यस्येत्युरसिलोमा । तत्राष्टधा तत्पुरुष इति ।

End :

अव्ययीभावस्त्रिप्रधानः—पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, अन्यपदार्थप्रधानश्चेति । प्रथमो यथा—उपकुम्भम् । द्वितीयो यथा—शाकप्रति । तृतीयो यथा—उन्मत्ता गङ्गा यस्मिन्देशे स उन्मत्तगङ्गं देशः ।

Colophon :

इति वररुचिकृतं समासपटलं समाप्तम् ।

The scribe adds :

द्विवेदिना करुणाशंकरेण लिखितमस्ति स्वोपकारार्थम् ॥

647. 29. F. 16.

समाससंघः

Palm-leaf. 4 Foll. 15½ × 1¾ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

An elementary grammar dealing with Samāsas with illustrations.

Complete.

Beginning :

पदसंघः समासः स्यादैकपद्यमुपाश्रितः ।
पदार्थबोधकं वाक्यं विग्रहः स द्विधा मतः ॥
लौकिकोऽलौकिकश्चेति प्रयोगार्हस्तु लौकिकः ।
समासः पञ्चधा ज्ञेयः सामान्यादिप्रभेदतः ॥

सामान्योऽव्ययीभावस्तत्पुरुषो बहुव्रीहिर्द्वन्द्वश्चेति । तत्र सामान्यसमासश्चतुर्विधः—इवसमासः, इवार्थसमासः, गुणसमासः, क्रियाविशेषणसमासश्चेति । इवसमासो यथा—वागर्थसदृशौ वागर्थाविव । इवार्थसमासो यथा—काकागमनमिव तालपतनमिव काकतालम्; काकतालमिव काकतालीयम् । गुणसमासो यथा—विस्पष्टं पटुः विस्पष्टपटुः । क्रियाविशेषणसमासो यथा—पूर्वं भूतो भूतपूर्वः ।

End :

उन्मत्तगङ्गम्; अतिमालः; पञ्चषाः; पाणिपादमित्यादिषु तत्तल्लक्षणाभावात् समासान्तरलक्षणसत्त्वाच्च । तदेवं पञ्चविधः समासो सपरिकरो निरूपितः ।

Colophon :

समाससंघः समाप्तः ।

648. 29. H. 12.

समाससंघः

Palm-leaf. 5 Foll. 15 × 1½ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

Another copy of the work described above.

649. 33. J. 10.

साधुत्वादिनिर्वचनम्

Palm-leaf. 3 Foll. 15 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Gives definitions of some of the technical terms used in grammatical works and

incidentally answers the objections raised by other schools of philosophy against the school of grammar. For instance Mīmāṁsakas do not want to attach much importance to Vyākaraṇasāstra and hence argue against the *Sādhutva* or correctness of words which is the main purpose of the grammar. This work gives correct definition of the term *Sādhutva* and maintains the importance of the Vyākaraṇasāstra.

Incomplete.

Beginning :

साधुत्वं च व्याकरणव्याख्येयत्वम् । पुण्यजनकतावच्छेदकधर्मवत्त्वं वा . . . निष्ठशक्तिव्यञ्जकत्वम् । उच्चारितप्रध्वंसित्वम् उच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वम् । एकपदार्थज्ञानतदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा आकाङ्क्षा योग्यता च परस्परान्वयप्रयोजधर्मवत्त्वम् ।

End :

क्रियाजनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थवत्त्वं कारकविभक्तित्वम् । स्वघटितसमुदायावधिकस्वेतरसमुदायव्यावृत्तधर्मकरणपृथक्करणत्वं निर्धारणत्वम् । विशेषणविशेष्यभावावगाह्युपस्थितिजनकत्वं समासे सामार्थ्यम् ।

650. 8. J. 44.

सुलोपचर्चा—कृष्णमाचार्यकृतः

Paper. 15 Foll. 8 × 6½ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

A discussion on the meaning of the Sūtra of Pāṇini अदस औ सुलोपश्च (7-2-107) by Kṛṣṇamācārya of S'rīvatsa family.

Complete.

Beginning :

सुलोपचर्चा ।

अदस औ सुलोपश्च । अदसः औ सुलोपः च इति पदचतुष्टयम् । अदस इति षष्ठी । औ इत्यविभक्तिको निर्देशः । अदःशब्दस्य औकारः स्यादिति सूत्रार्थः । स च अलोऽन्त्यपरिभाषया अन्त्यस्य भवति । तथा चान्त्यस्य सकारस्य औत्वे कृते हलः परत्वाभावात् सुलोपाप्राप्तौ सुलोपविधिः । वस्तुतस्तु सु लोप इति भिन्नं पदम् । सु इति षष्ठ्याः सौत्रो लुगिति व्याख्येयम् । समासघटकपदयोः परस्परमुद्देश्यविधेयभावेनान्वयाबोधकत्वमिति व्युत्पत्तेः । तच्छरीरं तु समासघटकपदार्थनिष्ठविधेयतानिरूपितोद्देश्यतासंबन्धेन शाब्दबुद्धिं प्रति समासघटकपदजन्योपस्थितिः प्रतिबन्धिकेति । अत एव देवदत्तं पण्डितं जानीहि इति वाक्यादिव देवदत्तपण्डितं जानीहि इति समासान्नोद्देश्यविधेयभावप्रतीतिः । अत एव च वषट्कर्तुः प्रथमभक्षः इत्यत्र ऋत्विजो हविःशेषान् भक्षयन्तीति विहितभक्षणमनूद्य न प्राथम्यविधिः । अपितु प्राथम्यविशिष्टभक्षणस्यैव विधानम् ।

End :

वस्तुतस्तु अदस ओ णिच्चेति न्यस्यताम् । अदसः परस्य सोरोकारादेशः स्यात्, स च णिदिति तस्यार्थः । एवं च णित्त्वसामर्थ्यात् पूर्वं वृद्धौ अदन्तत्वाभावेन टापोऽप्रवृत्त्या न असकौ स्त्री इत्यत्रेत्वापत्तिः । अत एव च हे असावित्यत्र संबुद्धिलोपादिकमपि सुशकवारणमिति सर्वं रमणीयमित्यष्टादशी ।

Colophon :

इति वात्स्यकृष्णमाचार्यकृता सुलोपचर्चा ।

651. 9. D. 6.

स्थानिवत्सूत्रविचारः

Paper. 4 Foll. $9\frac{3}{4} \times 5$ inches. 14 lines in a page. Telugu script. Old. Good. Good writing.

A discussion on the meaning of the Sūtra स्थानिवदादेशोऽनल्विधौ (1-1-56) of Pāṇini.

Complete.

Beginning:

स्थानिवदादेशोऽनल्विधौ । आदेशः स्थानिवत्कार्यं लभते । तत्र स्थानिवदित्यत्र तृतीयान्ताद्वतिः । स्थानिशब्दस्य स्थानिकर्तृकसत्तायां लक्षणा । वत्यर्थः सादृश्यम् । तृतीयार्थः प्रतियोगित्वम । एवंच स्थानिकर्तृकसत्ताप्रतियोगिकसादृश्यवदादेशकर्तृका सत्तेति बोधः । अनल्विधाविति किमयं पर्युदासः ? प्रसज्यप्रतिषेधो वा । नाद्यः ; स्थान्यल्भिन्नाश्रयविधौ स्थानिवदित्यर्थे तन्वन्तीत्यादौ स्थान्यल्भिन्नाल् वकारः, तदाश्रयविधौ स्थानिवत्त्वापत्तेः । स्थान्यलाश्रितविध्यन्यविधाविति त्वर्थे तु बभूविवेत्याद्यसिद्धयापत्तेः । इटः स्थान्यलाश्रितविधेः सत्त्वात् । नान्त्यः, दोषस्य प्रसिद्धत्वादिति चेन्न । असमर्थसमासस्यापि व्याख्यानतोऽङ्गीकारेणादोषात् ।

End:

न च प्रविगण्येति भाष्योदाहरणात् पञ्चमीसमासानित्यत्वेनैव सिद्धे पूर्वोक्तवचनं व्यर्थमेवेति वाच्यम, अनित्यत्वे तत्र तत्र लक्ष्यानुरोधापेक्षया वचनस्यैव युक्तत्वात् । गौरित्यादौ तु अव्यवहितत्वादेशेनैव निर्वाहः । नन्वेवं मात्रपदनिवेशे धिन्वन्तीत्यस्यासिद्धिः । त्वद्रीत्या पञ्चमीसमासेन अपरविधाविति वक्तव्यमिति न्यासेन वा स्थानिवद्भावस्य वक्तुमशक्यत्वादिति चेन्न, अन्तरङ्गपरिभाषया निर्वाहस्य सुकरत्वात । हे राम तवेत्यत्र ते इत्यादेशापत्तिश्च दूषणम् । संबुद्ध्यवयवहलो लोपविधानादामन्त्रितत्वानापत्तिः ।

652. 9. B. 5.

स्फोटचन्द्रिका —(मौनि)श्रीकृष्णभट्टकृता

Paper. 5 Foll. $8\frac{5}{8} \times 5\frac{1}{4}$ inches. 21 lines in a page. Telugu script. Old. Good. Good writing.

Fol. 3 is missing.

A treatise on the theory of Sphoṭa of grammarians by Mauni S'ri-Kṛṣṇabhaṭṭa son of Jānakī and Raghunāthabhaṭṭa and grandson of Govardhanabhaṭṭa of the Mauni family. He was also the author of Tarkacandrikā and Vṛttidīpikā.

Complete ; but with gap in the middle.

Beginning:

पित्रोः पादयुगं नत्वा जानक्षीरघुनाथयोः ।
मौनिश्रीकृष्णभट्टेन तन्यते स्फोटचन्द्रिका ॥

शाब्दिकानां वाच्यलक्ष्यव्यङ्ग्यार्थप्रतिपादकानां वाचकलक्षकव्यञ्जकानां शब्दानां तन्निष्ठजातेर्वा स्फोट इति व्यवहारः । स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या पङ्कजादिवत् योगरूढः स्फोटशब्दः । केवलयोगस्वीकारे वाच्यलक्ष्यव्यङ्ग्यानां चेष्टायाश्च व्यङ्ग्यार्थप्रतिपादकत्वात् अतिव्याप्तेः । न वा वाचकादिपर्यायः स्फोटशब्दः प्रसिद्धः । अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय इति हरिवंशे दृष्टत्वात् । तेचवर्णपदवाक्याखण्डपदाखण्डवाक्येति पञ्च व्यक्तिस्फोटाः । शक्यतावच्छेदिकाया जातेर्वाच्यत्ववत् शक्तावच्छेदिकाया जातेर्वाचकत्वमिति मते वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटः । एवं चाष्टौ स्फोटाः ।

End :

किं च कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा भीर्ह्रीरित्येतत् सर्वं मन एवेति श्रुत्या कामादीनां मनोधर्मत्वे प्रतिपादितेऽपि तार्किकैरात्मधर्मत्वमुक्तम् । तच्च सर्वैरप्यङ्गीकृतम । तत्तु भ्रामात्मकम् । तद्बीजं तु यथा जपाकुसुमसंनिधाने स्फटिको लोहित इति ज्ञानम् । प्रकृते तु मनःसांनिध्यमात्मधर्मभ्रमे बीजम् । श्रुतिबाधाच्च । स्फोटे तु न तथा । तस्मादेकवर्णात्मको-ऽखण्डवाक्यस्फोटो वाचक इति सिद्धम् ।

Colophon :

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मज-जानकीजानिरघुनाथभट्टात्मजश्रीकृष्णकृतस्फोटचन्द्रिका संपूर्णा ।

653. 10. D. 39.

स्फोटवादः—नागेशभट्टकृतः

Paper. 18 Foll. 8 × 3 inches. 13 lines in a page. Telugu script. Old. Good. Illegible writing.

An elaborate and excellent treatise dealing with the characteristics of the theory of Sphoṭa of grammarians. This is a separate work of Nāgeśa and does not constitute a part of his any main works. Nāgeśa herein states that he was the pupil of Haridīkṣita in Vyākaraṇa and of Rāmarāma in Nyāya. The views of different schools of philosophy in respect of the Sphoṭa are dealt with here.

The work has been edited by Pandit V. Krishnamāchārya together with his own commentary called Subodhinī and puplished in the Adyar Library Bulletin in 1945-46.

Complete.

Beginning :

ननु कः स्फोटो नामेति चेत् ; शृणु । वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखण्डपदवाक्यस्फोटः वर्ण-पदवाक्येन त्रयो जातिस्फोटा इति वैयाकरणसिद्धान्तः । तत्र स्फुटत्यर्थोऽस्मादिति स्फोटः । वाचक इति यावत् । एवं च वर्णस्फोटादिपदानां वर्णादयो वाचका इत्यर्थः । तत्र रामो भवति इत्यादौ तत्तदानुपूर्व्यवच्छिन्नवर्ण-समुदायरूपाः प्रकृतिप्रत्ययभागाः प्रयुज्यमानपदवा-क्यादौ श्रूयमाणा वाचकाः ; न तु तैः स्मृता आदेशिन इति वर्णस्फोटपक्षः । सरः रसः इत्यादावविशेष-वारणाय तत्तदानुपूर्व्यवच्छिन्नेति । प्रयुज्यमानपदा-नन्तर्गता वर्णा वाचका न वेति विप्रतिपत्तिशरीरम् । अत्र विधिकोटिः परेषाम् । निषेधकोटिरस्माकम् ।

End :

तदुक्तं हरिणा—

संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ॥

इति । एवं च वाच्यं वाचकं च ब्रह्मैवेति ध्येयम् । शास्त्रीयप्रक्रिया तु जातिव्यञ्जकबोधार्था प्राग्वदेवेति सर्वेष्टसिद्धिः ।

अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात् ।
न्यायतन्त्रं रामरामाद्वादिरक्षोघ्नरामतः ॥
वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
प्ररिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ॥
दृढस्तर्कोऽस्य नाभ्यास इति चिन्त्यं न धीयुतैः ।
दृषदोऽपि हि संतीर्णाः पयोधौ रामयोगतः ॥

इति जातिस्फोटतत्त्वम् ।

एते च सर्वे पक्षाः स्थानिवत्सूत्रपस्पशाह्निकअइ-इण्सूत्रप्रत्याहाराह्निकान्तादिस्थभाष्यकैयटादिषु तत्र तत्राकरग्रन्थे सूक्ष्मदृशां स्फुटा एव ।

Colophon :

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतनागेशविरचितः स्फोटवादः ।

654. 54. C. 1.

स्फोटवादः—नागेशकृतः

Paper. 37 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This was transcribed from a MS. available in the Govt. Oriental MSS. Library, Madras.

Complete.

Eight extra leaves added at the end contain the Ākaṅkṣāvāda of the Laghumañjūṣā.

655. 21. P. 24.

स्फोटसिद्धिः

Palm-leaf. 3 Foll. 7 × 1 inches. 7 lines in a page. Old. Malayālam script. Good. Good writing.

A small work written in Āryā meter dealing with the theory of Sphoṭa of grammarians. The author's name is not known. This work is different from those of Maṇḍanamiśra and Bharatamiśra.

Beginning :

यद्विवर्तः प्रपञ्चोऽयं वाच्यवाचकलक्षणः ।
नित्यं निगमवेद्यं तच्छब्दतत्त्वमुपास्महे ॥
गजाननं गिरां देवीं गुरून् गुरुकृपानपि ।
प्रणम्य प्रोच्यतेऽस्माभिः स्फोटसिद्धिः प्रयत्नतः ॥
अस्ति हि गौरित्यादिषु पदमेकमिति प्रतीतिरखिलानाम् ।
पदबुद्ध्यवलम्बः कस्तत्रेतीदं विचिन्त्यमभियुक्तैः ॥
पदबुद्ध्याश्रयता नो वर्णानां संभवेदनेकत्वात् ।
न च तत्समुदायस्य क्रमिकत्वात्तस्य संभवाभावात् ॥
एकश्रुत्यारोपात्समुदायः संभवीति नो वाच्यम् ।
क्रमबुद्धानां तेषां युगपत्स्मृतिसंभवाभावात् ॥

End :

मतभेदानामेषामुपसंहारे न भेदलेशोऽपि ।
वर्णव्यतिरिक्तं यद्वाचकमेतत्पदं हि सकलमते ॥
यस्तु विविच्य विवेक्ति स्फुटमेतच्छब्दतत्त्वमतिगूढम् ।
ऐहिकमामुत्रिकमपि लभते सुखमञ्जसा पुमानेषः ॥

Colophon :

इति स्फोटसिद्धिः समाप्ता ।

656. 19. J. 21.

हयवरट्सूत्रविचारः

Palm-leaf. 4 Foll. 16 × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A discussion on the Pratyāhāra Sūtra—*viz* हयवरट् .

Beginning :

हयवरट् । अत्र विचार्यते । हयवरट् इति यकारमारभ्य शषसरिति रेफेण साकम् आदिरन्त्येनेति प्रत्याहारे यर्प्रत्याहारघटितत्वात् रेफस्य यरुद्देशेन विधीयमानमचो रहाभ्यामिति द्वित्वं यथा हर्यनुभवः न ह्यस्ति इत्यत्र यकारस्य प्राप्नोति तथा मद्रहृदो भद्रहृद इत्यत्र रेफस्यापि प्रसज्येत । तथा सति द्विरेफश्रवणमेव दोषः । न च रोरीति लोपे कृते द्विरेफो न

श्रूयेतेति वाच्यम्। रोरीति लोपं प्रति द्वित्वस्यासिद्धत्वात्। न च हलो यमामिति लोपेन निर्वाहः, तस्य पाक्षिकत्वेन पक्षे द्विरेफश्रवणात्।

End:

यद्यपि मूर्धस्थानिकस्य रेफस्य तत्स्थानिकानुनासिको णकार एव, तथापि अन्तरतमशब्देन स्थानप्रयत्नाभ्यामन्तरतमत्वमपेक्ष्यते। तथाच रेफणकारयोः स्थानसाम्येऽपि रेफस्येषत्स्पृष्टप्रयत्नत्वेन णकारस्य स्पृष्टप्रयत्नत्वेनोभयोः प्रयत्नभेदात् रेफनिरूपितान्तरतमत्वाभावात् णकारो न प्रवर्तते। अन्योऽनुनासिकोऽप्रसिद्ध एवेति न दोषः। न द्वितीयः . . .।

657. 9. D. 6.

हलन्त्यसूत्रार्थविचारः—नारायणकृतः

Paper. 6 Foll. $9\frac{3}{4} \times 5$ inches. 14 lines in a page. Telugu script. Old. Good. Good writing.

A discussion on Pāṇini's sūtra **हलन्त्यम्** explaining the views of Patañjali, Kaiyaṭa, Haradatta and other commentators on it.

Complete.

Beginning:

शेषीभूय विशेषीकृतवन्तं पाणिनीयसर्वस्वम्।
सर्वस्वामिनमीशं तं गौरीशं मुदे वन्दे॥
श्रीगुरोरुपदेशेन मुनित्रयनिरूपितः।
हलन्त्यसूत्रसिद्धान्तः सिद्धान्तं गम्यते पुनः॥

हलन्त्यम्। पूर्वसूत्रेऽनुपसंजातविरोधित्वेनानुनासिकपदसामानाधिकरण्यात् अवधृतपुंस्त्वकम् इदिति तावदत्रानुवर्तते। तच्च वैलिङ्ग्येऽपि विधेयत्वात्प्रातिपदिकमित्यादिवत्संबध्यते। उपदेश इत्यपि वर्तते। तस्य च उपदिश्यते अज्ञातमुपज्ञाप्यतेऽनेनेति बाहुलकात्करणे घञ्; शास्त्रमर्थ इति भाष्ये स्थितम्। ये तु बाहुलकत्वमगतिकगतिरित्यादि जल्पन्तो नैतत्क्षमन्ते। ते हि समाहारादिषु स्पष्टं मतुब्लोपोऽत्र द्रष्टव्य इत्यादि भाष्यम्, तौ समाहीयेते यस्मिन्नचीति वृत्तिग्रन्थोपमर्देन कृल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति ल्युटा बाधात् अर्थकथनमात्रमेतत्। सामानाधिकरण्यं तु अर्शआद्यचा समर्थनीयमिति **हरदत्ता**दिभिः कृतं व्याख्यानमप्यनादृत्याधिकरणे घञं दर्शयन्तः केनापि मन्ये व्याहतं न जानते तत्त्वम्।

End:

प्रत्युत प्रकृतसूत्रस्थभाष्यग्रन्थविरोधादन्त्यनिवृत्तेर्यथासिद्धान्तं सुवचत्वात् आदिरन्त्येनेति सूत्रवैयर्थ्यानभ्युपगमाच्चेति दिक्।

तदेवमुक्ता बहवोऽपि पक्षाः
साक्षात्तु ये भाष्यकृतोपदिष्टाः।
तेष्वेव कश्चिल्लघुरत्र विज्ञैः
पक्षोऽभ्युपेयः सकलेष्टसिद्ध्यै॥

इतरैस्तु किमेभिरश्रद्धेयकल्पैरिति पूर्वोक्तमेव दर्शनं भगवतो मुनित्रयस्य सिद्धम्।

Colophon:

श्रीविष्णुभद्रतनयेन गुरुप्रसादा-
न्नारायणेन कृतिना रचितक्रमश्रीः।
श्रीमन्मुनित्रयनिरुक्तहलन्त्यसूत्र-
सिद्धान्त एष शिवयोरधिकं मुदेऽस्तु॥

658. 21. A. 22.

हल्ङ्याप्सूत्रार्थविचारः

Palm-leaf. 6 Foll. $16\frac{5}{8} \times 1$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

A discussion on the meaning of the Sūtra of Pāṇini हल् ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (6-1-68).

Incomplete.

Beginning :

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्। अस्यार्थः—हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यत इति। तथाहि—लोपो व्योर्वलीत्यस्मात् पूर्वसूत्रात् लोप इत्यनुवर्तते। पूर्वसूत्रे भावसाधनप्रत्ययान्तत्वेऽप्यस्मिन् सूत्रे हलिति प्रथमान्तपदस्य श्रूयमाणत्वात् तत्सामानाधिकरण्याय कर्मसाधनकृत्प्रत्ययान्तो लोपशब्द आश्रीयते। हल् च ङी च आप् च हल्ङ्यापः, तेभ्यः। हल्ङ्याब्भ्य इति समस्तपदत्वेऽपि दीर्घादित्येतत् ङ्यापोरेव विशेषणम्। न तु हलः, असंभवात्। सुतिसीत्यत्र उकारे इकारे च लुप्तेऽपि स् त् स् इत्येतेषामेकदेशविकृतस्यानन्यत्वात् सुतिसीति व्यवहारः।

End :

अत्र अचः परस्मिन् पूर्वविधाविति सूत्रेण अमालादित्यादौ पञ्चमीसमासपक्षमाश्रित्य परनिमित्तोऽजादेशः सवर्णदीर्घः स्थानिवत् स्यात्, स्थानिभूतादचः पूर्वस्मादमालेत्यस्मात् परत्वेन दृष्टस्य तिस्योरपृक्तस्य लोपे कर्तव्य इति स्थानिवद्भावे शपा व्यवधानस्य सिद्धत्वात् आबन्तादपि तिस्योरसंभव इति सत्यमेव। तस्मात् ङ्यन्तादाबन्तात् तिस्योः परत्वं न संभवतीति ङ्यन्तात्परत्वं यद्यप्यसंभवि, तथाप्याबन्तात् परत्वं संभवत्येवेति प्रौढमनोरमाकृद्वचनमसंगतमिति पूर्वः पक्षः।

Then reads the following lines :

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः।
उक्तानुक्तदुरुक्तादिचिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः॥
पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजनम्।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्॥
धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः॥
संयोगान्तस्य लोपे हि नलोपादिर्न सिध्यति।
रात्तु तेनैव लोपः स्याद्धलस्तस्माद्विधीयते॥

The fly-leaf at the beginning contains the following Stanza :

सुधासिन्धौ बन्धौ सरसिजदृशामीश विषयै-
र्वियुक्तानां शंभो शशिनि शिशुभावे तव मुदे।
किरीटत्वं प्राप्ते तदनु शिवयाश्लिष्टसुतनु-
र्मुदं भुङ्क्षे नास्मान्न दिवि मनुषे प्रेक्षतु भवान्॥

659. 19. J. 56.

ह्रस्वनद्याप इति सूत्रार्थविचारः

Palm-leaf. 7 Foll. $11\frac{1}{2} \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha script. Slightly injured. Good writing.

An explanatory treatise discussing the meaning of the Sūtra of Pāṇini (7-1-54) ह्रस्वनद्यापो नुट् as explained by Bhaṭṭoji in his works.

Complete.

Beginning :

भुजङ्गभोगपर्यङ्कशायिनं पङ्कजेक्षणम्।
प्रणम्य ह्रस्वनद्यापोनुट्पत्रं तन्यते मया॥

ह्रस्वनद्यापो नुट्। ह्रस्वनद्यापः नुट् इति पदद्वयघटितमिदं सूत्रम्। ह्रस्वश्च नदी च अप् च तेषां

समाहारद्वन्द्वः । ततः पञ्चमी । ह्रस्वनद्यापः । अङ्ग्स्येत्यनुवर्तते । तच्च ह्रस्वनद्याप इत्यनेन विशेष्यते । पञ्चम्या विपरिणम्यते । विशेषणेन तदन्तविधिः । आमि सर्वनाम्नः सुडित्यतो आमीत्यनुवर्तते । तत्र आमीति सप्तमीश्रुत्या ह्रस्वनद्याप इति पञ्चमीश्रुत्या च तस्मिन्निति तस्मादिति परिभाषयोरुपस्थितौ ङः सि धुडिति न्यायेनोभयनिर्देशे परविप्रतिषेधेन पञ्चमीनिर्देशस्य प्राबल्यात् आम एव नुडुद्देश्यत्वं लभ्यते । तथा च ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्य आमो नुड् भवतीति सूत्रार्थः । उदाहरणम्—रामाणाम्, नदीनाम्, गौरीणाम्, रमाणामित्यादि । न च—ह्रस्वनद्याप इति पञ्चम्यन्तत्वे किं बीजम् । त्रेस्त्रय इत्यादाविव षष्ठ्यन्तत्वमेवास्तु । तथाचोभयनिर्देशाभावेन ङः सि धुडिति न्यायाप्रवृत्त्या कथमामो नुडुद्देश्यत्वमिति शङ्कनीयम् । आमि सर्वनाम्न इत्यत्रैव सर्वनाम्न इति पञ्चमीश्रुत्या उभयनिर्देशस्य विद्यमानत्वेन ङः सि धुडिति न्यायप्रवृत्त्या पञ्चमीनिर्देशस्य प्राबल्यात् आमः सुडुद्देश्यत्वसिद्धौ इहानुवर्तमानस्य आमीत्यस्य नुडुद्देश्यत्वस्य सिद्धत्वात् ।

End :

परंतु कण्ठतः प्रतिपादनेऽपि यत्र तारतम्यं तत्राधिकशब्दघटितं परित्यज्य लघुशब्दघटितं लक्षणं प्रणेतव्यम् । यथा अकः सवर्णे दीर्घ इत्यत्र अकोऽकीत्येव सुवचमिति । इह तु ह्रस्वग्रहणाभावे अनेकक्लिष्टकल्पनापत्तौ गौरवं स्वरसार्थाङ्गीकारे च लक्ष्यासिद्धिरिति ह्रस्वग्रहणमेवास्थेयमिति सर्वं रमणीयम् ।

गुरुपादाम्बुजद्वन्द्वषट्पदायितचेतसा ।
मया ह्रस्वनदीसूत्रदशकोटी व्यरच्यत ॥

(*b*) NON-PĀṆINĪYA

In order to meet the requirements of ordinary students who were unable to read and understand the entire rules of Pāṇini with the Commentaries, many authors of later periods have written many works in simpler and easier methods. The following works are among them:

1. *Kātantravyākaraṇa*: The work is so called because it is a short work. It is also called Kaumāravyākaraṇa and Kālāpa-vyākaraṇa from the fact that it was revealed by Kumāra *alias* Subrahmaṇya and his pea-cock (Kalāpin). Mahāmahopādhyāya Haraprasādas'āstri gives the following information on the origin of the work in his preface to the Descriptive Catalogue of Sanskrit MSS. in the collection of Asiatic Society of Bengal Vol. I. One of the Kings of the S'ātavāhana dynasty in the 1st Century A.D. took a wife from Northern India. She spoke Sanskrit which the king did not know. He often made curious and ludicrous mistakes in trying to talk Sanskrit. At last unable to bear the jeerings of his wife he made up his mind to study Sanskrit and asked his Paṇḍit S'arvavarman to write an easy work on grammar. S'arvavarman produced a grammar in six months and gave the King what he wanted.

2. *Cāndravyākaraṇa.* It was written by Candragomin in the 5th Century A.D.

3. *Jainendravyākaraṇa.* It was written by a Jaina author in the 5th Century A.D.

4. *S'abdānus'āsana.* It was written by Sākaṭāyana in the 9th Century A.D.

5. *S'abdānus'āsana.* It was written by Hemacandra in the 12th Century A.D.

6. *Saṁkṣiptasāra.* It was written by Kramadīs'vara in the 11th Century A.D. The author is said to have borne the title Vādīndra-Cakra-cūḍāmaṇi. The work is also called Jumaravyākaraṇa as it was revised by Jumaranandin.

7. *Bhojavyākaraṇa* by King Bhoja of Dhārā, 11th Century A.D.

8. *Sārasvatavyākaraṇa* attributed to Goddess Sarasvatī. It was subsequently expounded by Anubhūtisvarūpācārya in the 13th Century A.D.

9. *Mugdhabodhavyākaraṇa* by Vopadeva, 13th Century A.D.

10. *Supadmavyākaraṇa.* It was written by Padmanābha in the 14th Century A.D.

Sārasvatavyākaraṇa

660. 8. G. 51.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 238 Foll. 11 × 6 inches. 10 lines in a page. Devanāgarī script. Old. Much injured. Good writing.

The leaves are arranged and grouped into 3 sets each containing separate pagination. The first set contains 105 leaves, the second 90 and the third 43.

The work Sārasvataprakriyā belongs to the Sārasvata school as the title itself implies. It is in the form of a text and commentary, the text being in Sūtra from and the commentary in ordinary prose. The total number of Sūtras comes to above 1000 of which 700 are said to be original and the rest additions made by the commentator. As the tradition goes, the original Sūtras have the devine authorship of the Goddess Sarasvatī after whom the Sūtras get their name as Sārasvatasūtras just as the 14 Sūtras in Pāṇini's grammar have their authorship of Siva and are called Māheśvarasūtras. Consequently this school also gets its title as Sārasvata school. This assertion is further supported by the colophons found in the MSS. of the work deposited in the Library of the Asiatic Society of Bengal, *viz.*:

"इति वाणीप्रणीतसूत्राणामष्टाध्यायी समाप्ता ।"
"इति सरस्वतीप्रोक्तसूत्रसप्तशतं समाप्तम् ॥"

(Vide Nos. 4419 and 4421 of the Descriptive Catalogue of the Sanskrit MSS. of the Society, Vol. VI) and by the introductory verse of the commentary called *Siddhāntacandrikā* No. 680 of this volume. The gloss contained in the *Sārasvataprakriyā* has been ascribed to Anubhūtisvarūpācārya to whom the original Sūtras are said to have been revealed by the Goddess Sarasvatī. The author Anubhūtisvarūpācārya is said to have been an ascetic and a resident of Benares. The work is divided into two parts, namely the Pūrvārdha and the Uttarārdha, the first dealing with Subanta an the second Tiṇanta and Kṛdanta. The author Govindācārya in his *Sārasvatabhāṣyaṭīkā Padacandrikā* divides the work into five adhyāyas each containing four pādas and gives the contents of each of the 20 pādas thus: 1 Saṁjñā; 2 to 5 Sandhi; 6 to 8 Subvibhakti and Strīpratyaya; 9 Kāraka; 10 Samāsa; 11 Taddhita; 12 to 19 Ākhyāta and 20 Kṛt. (*Vide* No. 4443 of the Descriptive Catalogue of the Sanskrit MSS. in the collection of the Asiatic Society of Bengal, Vol. VI).

T. M. Tripāṭhi in his introduction to the *Tarkasaṁgraha of Ānandajñāna* (No. 3 Gaekwad's Oriental Series) says about our author Anubhūtisvarūpācārya,

—that he was the same as the preceptor of Ānandajñāna, the author of the *Tarkasaṁgraha*;

—that he had, besides Ānandajñana, another disciple called Narendrapurī *alias* Narendranagarī, a commentator on the *Sārasvataprakriyā*;

—that he was the author of some more works, namely—1 *Gauḍapādakārikābhāṣyaṭīkā*, 2 *Nyāyamakarandasaṁgraha*, 3 *Nyāyadīpāvalivyākhyā Candrikā* and 4 *Pramāṇamālānibandhana*;

—that he was a contemporary of Vopadeva (1260 A.D.)

As regards Narendrapurī mentioned

above, he is said to be the author of the *Sārasvataprakriyā* in No. 793 of the I. O. Catalogue, Part I. (Page 211). But this statement has been refuted by T. M. Tripāṭhi in the introduction to the *Tarkasaṁgraha.*

Besides the works mentioned above one more work namely *Bhagavadgītābhāṣyaṭippaṇī* goes by Anubhūtisvarūpa's name, copy of which is available in the Adyar Library.

Complete.

Beginning:

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥
इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः ।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥

तत्र तावत्संज्ञा संव्यवहाराय संगृह्यते । **अ इ उ ऋ ऌ** समानाः । अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते । तेषां समानसंज्ञा च विधीयते । नैतेषु सूत्रेषु संधिरनुसंधेयोऽविवक्षितत्वात् ; विवक्षितस्तु संधिर्भवतीति नियमात् ; लौकिकप्रयोगनिष्पत्तये समयमात्रत्वाच्च । **ह्रस्वदीर्घप्लुतभेदाः सवर्णाः** । एतेषां ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा भण्यन्ते । लोकाच्छेषस्य सिद्धिरिति वक्ष्यति । ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्याः । एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः । व्यञ्जनं चार्धमात्रकम् ।

एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ॥
चाषस्त्वेकां वदेन्मात्रां द्विमात्रं वायसो वदेत् ।
त्रिमात्रं तु शिखी ब्रूयान्नकुलश्चार्धमात्रकम् ॥

As the last portion of the MS. is very much injured the extract from the end could not be given from this MS. It will be given in the next number from another MS.

661. 11. D. 11.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 53 Foll. 10 × 4½ inches. 7 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged into two sets with separate pagination. The first set contains 37 leaves and the second 16.

Contains the Uttarārdha dealing with Ākhyāta and Kṛt.

Beginning:

आख्यातप्रक्रिया निरूप्यते । **धातोः** । वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः । **भ्वादिः** । भू सत्तायामित्यादिशब्दो धातुसंज्ञो भवति । स च त्रिविधः—आत्मनेपदी परस्मैपदी उभयपदी चेति । **आदनुदात्तङितः** । अनुदात्तेतो ङितश्च धातोरादित्यात्मनेपदं भवति । **ञित्स्वरितेत उभे** । ञितः स्वरितेतश्च धातोरुभे आत्मनेपदपरस्मैपदे भवतः । आत्मगामि चेत्फलमात्मनेपदम् । परगामि चेत्फलं परस्मैपदं वेदितव्यम् ; अन्वर्थात् । **परतोऽन्यत्** । पूर्वोक्तनिमित्तविधुरादन्यस्माद्धातोः परस्मैपदं भवति ।

End:

वर्णात्कारः । रादिफो वा । र इति वर्णः रेफः । रकारः ।

रकारादीनि नामानि शृण्वतो मम पर्वति ।
मनः प्रसन्नतामेति रामनामाभिशङ्कया ।

लोकाच्छेषस्य सिद्धिः यथा मातरादेः । इति कृत्प्रक्रिया ।

स्वरूपान्तोऽनुभूत्यादिः शब्दोऽभूद्यत्र सार्थकः ।
स मस्करी शुभां चक्रे प्रक्रियां चतुरोचिताम् ॥
अवताद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुरासुरनराकारमधुपापीतपत्कजः ॥

Colophon :

इत्यनुभूतिस्वरूपाचार्यविरचिता सारस्वतप्रक्रिया समाप्ता ।

The scribe adds : संवत् १८४६ वर्षे शके १७२० प्रवर्तमाने दक्षिणान्यगते श्रीवरसारतुमहामाङ्गल्यप्रदे मासोत्तममासे आषाढ ।

662. 8. D. 51.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 71 Foll. 9½ × 5 inches. 8 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the Uttarārdha dealing with Ākhyāta and Kṛt.

663. 8. D. 62.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 11 Foll. 6 × 5 inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Sandhi portion of the Pūrvārdha.

664. 8. F. 64.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 91 Foll. 10 × 5 inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Pūrvārdha only.

665. 11. B. 42.

सारस्वतप्रक्रिया —अनुभूतिस्वरूपाचार्यकृता

Paper. 29 Foll. 8 × 4 inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Ākhyāta portion only without the beginning in the Uttarārdha.

666. 11. B. 45.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 40 Foll. 8 × 4 inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the Ākhyāta portion only in the Uttarārdha.

Date of Copying : S'aka 1675. S'rīmukha year. 6th day of the bright fortnight of the Phālguna month.

667. 11. C. 15.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 39 Foll. 10 × 4½ inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing. Fol. 6 is missing.

Contains the Kṛt portion only of the Uttarārdha.

Beginning :

निजजनैर्विधिना निखिलापदो
झटिति यो विनिवर्तयति स्मृतः ।
जलधिजापरिरम्भणलालसो
नरहरिः कुरुतां जगतां शिवम् ॥

अथ कृदन्तप्रक्रिया निरूप्यते । कृत् कर्तरि च । वक्ष्यमाणप्रत्ययः कृत्संज्ञकः स च कर्तरि भवति । भावकर्मणोरपि । तृवुणौ । धातोस्तृवुणौ प्रत्ययौ भवतः । डुपचष् पाके । पच् तृ इति स्थिते चोः कुः पक्तृ इति स्थिते कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा इति नामत्वम् । नामसंज्ञायां स्यादिर्विभक्तिः । पचतीति पक्ता पक्तारौ पक्तार इत्यादि ।

End :

वर्णात्कारः । वर्णमात्रात्कारप्रत्ययो भवति । क इति वर्णः ककार इत्यादि । अ इति वर्णः अकारः । वर्णसमुदायादपि कारो दृश्यते । अहंकारः । ओंकारः । टकारः । पकारः । तकारः । मकारः । इत्यादि । रादिफो वा । र इति वर्णः रेफः रकारः ।

रकारादीनि नामानि श्रुत्वा तत्रास रावणः ।
रत्नानि च रमण्यश्च संत्रासं जनयन्ति मे ॥
रकारादीनि नामानि शृण्वतो मम पार्वति ।
मनः प्रसन्नतामेति रामनामाभिशङ्कया ॥

लोकाच्छेषस्य सिद्धिर्यथा मातरादेः । अस्य सारस्वतव्याकरणस्य शेषप्रयोगः लोकात् अन्यव्याकरणप्रयोगसिद्धिः यथा मातरादेः । इत्यादिप्रयोगानुसारेण बोद्धव्यम् ।

स्वरूपतोऽनुभूत्यादिः शब्दोऽभूद्यत्र सार्थकः ।
स मस्करी शुभां चक्रे प्रक्रियां चतुरोचिताम् ॥
अवताद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुरासुरनराकारमधुपापीतपत्कजः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानुभूतिस्वरूपाचार्यविरचितायां सारस्वतप्रक्रियायां कृदन्तप्रक्रिया संपूर्णा ।

The Scribe adds :

संवत् १८४२ वर्षे भाद्रपदमासे कृष्णपक्षे अमावास्यायां रविसंयुक्तायां वटपत्तने कृतनिवासश्रीगौडजाति-जोशिनारणजीसुत-रघुनाथजीसुतभाइजी कृतमिदं पुस्तकमात्मपठनार्थं परं तु आत्मानां पठनार्थं तथा अन्येषां सज्जनानामवलोकनार्थम् ।

अदृष्टदोषान्मतिविभ्रमाच्च
यदर्थहीनं लिखितं मयात्र ।
तन्मार्जयित्वा परिशोधनीयं
कोपं न कुर्यात्खलु लेखकस्य ॥
उद्दिश्य यं कृतवती गिरिजा तपस्यां
यत्पादपङ्कजरजो विबुधा नमन्ति ।
आशास्यते भुजगभूतिविभूषिताङ्गं
तं चन्द्रचूडमनिशं मनसा स्मरामि ॥

668. 11. C. 16.

सारस्वतप्रक्रिया —अनुभूतिस्वरूपाचार्यकृता

Paper. 56 Foll. 11 × 4½ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Breaks off in the Ākhyāta portion of the Uttarārdha.

Foot-notes on a few selected passages are found.

669. 11. C. 18.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 38 Foll. 11 × 5½ inches. 16 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the Pūrvārdha without the beginning and end.

Foot-notes on some selected passages are added. As each page contains in the margin the letters महीदा it is presumed that the foot-notes must have been taken from the gloss of Mahīdāsa on the work.

Beginning of the foot-note :

लौकिकेति । अनादिवृद्धप्रयोगव्युत्पादनाय समयमात्रत्वं समयसिद्धान्तत्वम् । तस्मादत्रापि संधिर्न विवक्षितः । यथा पाणिनीयैः अ इ उ ण् इत्यादौ, कुमारकारैरपि ए ऐकारे चेत्यादौ संधिर्न विवक्षितः ।

End of the foot-note :

ननु सकारस्य आदीत्वाभावात्संयोगाद्यस्तु पुंस् अत्र शिरसि मकार एव संयोगादिः । तस्मादादित्वं द्विविधम् । मुख्यमापेक्षिकं च । तत्र सस्यादित्वमापेक्षिकम् । पुंस्कृ इत्यत्र ककारापेक्षया सकार आदिः । सकारापेक्षया मकार आदिः । ततः सकारस्यैव लोपो वक्तव्यः ।

670. 11. C. 26.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 70 Foll. 11 × 4¼ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Leaf No. 1 is missing.

Contains the Uttarārdha without the beginning.

Date of copying: Sam. 1841. ज्येष्ठमासे शुक्लपक्षे अष्टमीबुधवासरे ।

The Scribe adds :

"रूपान्तरेण देवान्ते विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ॥"

The last page contains the following.

"तस्मात् पदपदार्थयोः संबन्धान्तरमेव शक्तिः ।
तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् ॥"

671. 11. C. 35.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 13 Foll. 11 × 5½ inches. 16 lines in a page. Devanāgarī script. Old. Much injured. Illegible writing.

Contains the Ākhyāta portion incomplete in the Uttarārdha with footnotes attributed to Mahīdāsa.

The following stanza is found in the beginning :

लक्ष्मीनृसिंहं प्रणिपत्य काश्यां
बुधांश्च पद्माकरभट्टमुख्यान् ।
सारस्वतीयां च तिङन्तवृत्तिं
क्रमाल्लिखेयं गणपप्रसादात् ॥

Beginning of the foot-note :

आख्यायते कर्तृकर्माद्यर्थो यैस्ते आख्याताः । आख्यातानां प्रक्रिया ।

पदभावोत्तरीभूतपरशब्दात्मभावयोः ।
भ्वाद्यदादिजुहोत्यादिदिवादिस्वादयस्तथा ॥
रुधादिश्च तनादिश्च तुदादिः क्रयादयस्तथा ।
वैयाकरणभाषायां चतुर्धा नैव लुप्यते ॥

अनुदात्तश्च ङ् च अनुदात्तङौ । तौ इतौ यस्य स अनुदात्तङित् । तस्मात् अनुदात्तङितः ।

End :

स्याविदः । आदन्तानां यमिरमीति इट् सक् । इरितो वा । ऋ अर् । नृतः स्यपः ।

672. 11. E. 35.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 89 Foll. 11½ × 6½ inches. 12. lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Pūrvārdha only.

Date of copying etc. Sam 1821. कार्तिकशुक्लैकादशीसौम्यवासरे वटभद्रग्रामवास्तव्यब्रह्मश्रीगौडजातीयजोशीरविदेवसुतंजोशीदेवशंकरजोशीनीलकण्ठजोशीकरुणाशंकरपठनार्थं पुस्तकमिदमलेखि ।

673. 33. B. 3.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Palm-leaf. 48 Foll. 12½ × 1⅝ inches. 4 lines in a page. Oriya script. Old Good. Good writing.

Contains the Pūrvārdha incomplete.

674. 35. B. 5.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 62 Foll. 10⅛ × 4¾ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Begins in the Vibhaktiprakaraṇa and ends in the Taddhitaprakaraṇa of the pūrvārdha.

The end is different.

तयायडौ संख्यायाम् । द्वितयम् । त्रितयम् । द्वयम् । त्रयम् । मध्यादिभ्यो भवार्थे मोऽधसः सलोपश्च । आदिमः । मध्यमः । अधमः । सिध्मादेर्लः । सिध्मलः । मृदुलः । नडादिभ्यो ड्वलच् । नडादिशब्देभ्यो ड्वलच्प्रत्ययो भवति मत्वर्थे । शाड्वलः । रजःकृष्यादिभ्यो वलच् । रजस्वला । रजस्वलः । वेतसादिभ्यो ड्वतुः । वेतस्वान्नदः । नड्वान् । शेषा निपात्याः । कत्यादयः । इति तद्धितप्रक्रिया ।

Colophon :

इति स्यादिर्विभक्तिः समाप्ता ।

675. 35. B. 135.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 14 Foll. 10½ × 4½ inches. 8 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Kṛt portion only without the beginning

Date of copying and the name of the scribe : Sam. 1642 चैत्रमासे भौमवासरान्वितायां पञ्चम्यां वारिपुरस्थेन भट्टगोविन्दात्मजेन भट्टनानाख्येन लिखितेयं सारस्वती प्रक्रिया समाप्ता ।

676. 35. C. 60.

सारस्वतप्रक्रिया—अनुभूतिस्वरूपाचार्यकृता

Paper. 7 Foll. 10¾ × 5 inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the Sandhi portion only.

677. 35. C. 123.

सारस्वतप्रक्रियाव्याख्या—मण्डनभाष्याम्

Paper. 24 Foll. 9½ × 4¼ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The first leaf bears the number 108 and the last one No. 132 one leaf

(No 121) being lost in the middle.

This is a commentary on the Sārasvataprakriyā of Anubhūtisvarūpācārya. The commentator's name is not ascertainable from this MS. However attempt may be made to find out the same with the aid of the MS. of Sārasvatamaṇḍana found on page 204 of the 3rd report on the Sanskrit MSS. in the Bombay circle by Prof. Peterson, 1887. The MS. is said to have been deposited in the Temple of Sāntināth, Cambay. The following extract from the MS. has been given in the Report.

Beginning :

"ते नः पान्तु चलत्कलिन्दतनयाकल्लोललीलाभृतः
कालोत्तालभुजंगदर्पभजनताजीवैकजीवातवः ।
उन्मीलत्कवितालताङ्कुरकिरत्कादम्बिनीकेलयो
मातर्मातृपुराधिवासिनि तव स्मेराः कटाक्षोत्कराः ॥

* * *

शान्तः संतप्तचित्तप्रचुरतरनरस्वान्तविश्रान्तकान्त-
ध्वान्तध्वस्तिप्रशस्तप्रकटपटुतराजिह्मवाग्ब्रह्मवाहः ।
कर्मन्दी कोऽपि मन्दीकृतसुकृतकृतोदञ्चितानन्दकन्दा-
मन्दस्वानन्दसान्द्रः स्फुरतु मम हृदि श्रीनरेन्द्रो
मुनीन्द्रः ॥
वाणीमुखश्रृङ्गारः सौजन्यसुधारसैकभृङ्गारः ।
दुरितौघतृणाङ्गारः स्फुरतु श्रीभट्टतुङ्गारः ॥
यः पक्षं पक्षिलस्य क्षपयति नियतैर्लक्षणाक्षेपदक्षः
काणादं निष्प्रणादं तृणयति तरलं कापिलं चाप्य-
लङ्घ्यम् ।
चञ्चच्चार्वाककेलिं कलितमतकृतोत्तालसंतापसंप-
त्तान्तं तौतातितं तं नयति न नयति व्यक्ततां युक्तिसूक्तैः ॥
तस्य प्रसादादधिगम्य सम्यक्
पदादिविद्यापरिपाकपूरम् ।
श्रीमण्डनाचार्य(?)कुतूहलार्थं
निर्मामि सारस्वतमण्डनं स तत् ॥"

इह खलु विविधवैयाकरणवर्यविप्रतिपत्तिव्रात . . . सारस्वतप्रक्रियाया आजंवं प्रतिजानीते—प्रणम्य परमात्मानमिति ।

From the extract given above it is understood that the work Sārasvatamaṇḍana is a commentary on the Sārasvataprakriyā and its author was Maṇḍana pupil of Narendramuni probably the same as Narendrapurī, the disciple of Anubhūtisvarūpa as said above. The reading श्रीमण्डनाचार्यकुतूहलार्थं has some corruption.

Wants the beginning and end.

Beginning :

. . . . . द्यन्तपरत्वमिति । ऐकपद्यस्य प्रयोजनान्तरमाह—समासे क्वचिदैकपद्यं णत्वहेतुः । यथा—शराणां वनं शरवणम् । आम्राणां वनं आम्रवणमित्यादौ । अत्र एकपदत्वात् रोर्नो णोऽनन्ते इति णत्वम् । त्रिनयनः । त्रिणयन इति वा । पानस्य वा णत्वम् । सुरापाणम् । सुरापानम् । क्वचिदिति शिष्टप्रयोगानुसारेणान्येऽपि प्रयोक्तव्या इति ।

* * *

Colophon :

इति श्रीमण्डनाख्यभाष्ये समासप्रक्रिया समाप्ता ।

End :

कुहोश्चुः । पूर्वसंबन्धिनोः कवर्गहकारयोश्चुत्वं चवर्गौ भवति । इति हकारस्य घोषवत्त्वादिगुणतः वर्गचतुर्थो घकारः । गबकपानां जबचपाः ।

678. 40. E. 60.

सारस्वतधातुपाठः—हर्षकीर्तिकृतः

Paper. 27 Foll. 10 × 4 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a metrical treatise on Sanskrit roots according to the Sārasvata school of grammar. The author Harṣakīrti was the pupil of Candrakīrti and also his successor in the Tapoguccha of Nāgapurī. The work is said to have been written on the request of Hemasiṁha of Ṣaṇḍelavala family. The author's preceptor Candrakīrti was as Belvalkar says, the 15th in succession from Devasūri the founder of the Tapoguccha (Saṁ 1174=1117 A.D.) and was honoured by Sāhu Sālem, the emperor of Delhi (1545 to 1553 A.D.). Therefore Harṣakīrti should have flourished in the second half of the 16th century A.D. According to Aufrecht's Catalogus Catalogorum, Harṣakīrti was also the author of the Jyotiṣasāroddhāra, Yogacintāmaṇi. S'āradīyanāmamālā and S'rutabodhavṛtti, a MS. of the last work is dated Saṁ 1680=1624 A.D. (Vide I.O. Cat. No. 1086).

Complete.

Beginning :

श्रीसर्वज्ञं जिनं नत्वा स्मृत्वा सारस्वतं महः ।
सारस्वते धातुपाठं वक्ष्ये संक्षेपतः स्फुटम् ॥ १ ॥
स्वरान्ताश्च हसन्ताश्च प्रकाश्यन्ते क्रमादिह ।
दशस्वमि गणेष्वेवं विज्ञेया धातवो बुधैः ॥ २ ॥
उदात्तेतः स्मृता यत्र परस्मैपदिनो हि ते ।
अनुदात्तेतो ङितोऽप्येवमात्मनेपदिनः पुनः ॥ ३ ॥
स्वरितेतो ञितो ये च ते स्युरुभयगामिनः ।
उदात्ताः सेट एष्टव्या अनुदात्तास्तथानिटः ॥ ४ ॥
इड्विकल्पस्तु केषांचित्केषांचित्पदबाहुलम् ।
ऊचे कैश्चिद्विपश्चिद्भिर्ज्ञेयं शास्त्रान्तराच्च तत् ॥ ५ ॥
धातवोऽकर्मकाः केचित्तथा केचित्सकर्मकाः ।
द्विकर्मकास्तथा चान्ये केचित्केचिद्विवक्षया ॥ ६ ॥
भ्वादयोऽदादयश्चैव ह्वादयश्च दिवादयः ।
स्वादयश्च ततो ज्ञेया रुधादयस्तनादयः ॥ ७ ॥
तुदादयः क्र्यादयश्च स्वार्थे ण्यन्ताश्चुरादयः ।
एवं विकरणे भिन्ना धातवो दशधा मताः ॥ ८ ॥
अनन्ता धातवः सन्ति नानार्था धातुसंग्रहे ।
तथाप्यत्र प्रवक्ष्यन्ते प्रसिद्धा एव केचन ॥ ९ ॥

तत्र प्रथमं अप्विकरणा भ्वादयः । प्रायोऽकारान्तो धातुर्न दृश्यते । अतः प्रथममाकारान्ताः । पा पाने । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः । ष्ठा गतिनिवृत्तौ । म्ना अभ्यासे । दाण् दाने । अनुदात्ता अनिटः । उदात्तेतः परस्मैपदिनः ।

End :

उपसर्गवशात्केचित् परस्मैपदिनोऽपि हि ।
आत्मनेपदितां यान्ति यथा च निविशादयः ॥ १ ॥
आत्मनेपदिनोऽप्येवमुपसर्गादियोगतः ।
परस्मैपदितां यान्ति विरमत्यादयो यथा ॥ २ ॥
कर्मोक्तौ चापि भावे चातिशाये यङि प्रत्यये ।
हिंसादीन्विना कर्मव्यतिहारेऽप्यात्मनेपदम् ॥ ३ ॥
सर्वेऽपि धातवः प्रायः प्राय्युपसर्गपूर्वकाः ।
अर्थान्तरं भजन्त्येव प्रभवत्यादयो यथा ॥ ४ ॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारप्रतीहारप्रहारवत् ॥ ९ ॥
तथा चोपसर्गाश्चतुर्धा । यथा—
धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ॥
उपसर्गस्य संयोगाद्विनाभिन्नार्थवाचिता ।

धातूनां यामवत्सां तु विज्ञेया कविरूढितः ॥ ७ ॥
वर्तमाना स्मृता पूर्वं विधिसंभावना पुनः ।
तत आशीः प्रेरणा तु तुर्यानद्यतनी भवेत् ॥ ८ ॥
परोक्षार्थे णबादिः स्यात् षष्ठी त्वाशीरिति स्मृता ।
श्वस्तनी च भविष्यन्ती तथा क्रियातिपत्त्यपि ॥ ९ ॥
भूतार्था दशमी चेत्याख्याते दश विभक्तयः ।
सर्वेषामपि धातूनां पुरा योज्या मनीषिभिः ॥ १० ॥
यङन्ता यङ्लुगन्ता ये सान्ता ण्यन्ताश्च धातवः ।
तेषामपि पुरस्तद्वत् योज्या दश विभक्तयः ॥ ११ ॥
कर्तृक्तौ स्युर्यथा तेषामेता दश विभक्तयः ।
कर्मोक्तौ चापि भावोक्तौ स्युस्तथैव पृथक्पृथक् ॥१२॥
श्रीमन्नागपुरीयाह्वतपोगच्छकजारुणाः ।
श्रीचन्द्रकीर्तिसूरीन्द्राश्चन्द्रवच्छुभ्रकीर्तयः ॥ १३ ॥
तच्छिष्या हर्षकीर्त्याह्वसूरयो व्यदधुः स्फुटम् ।
धातुपाठमिमं रम्यं सारस्वतमतानुगम् ॥ १४ ॥
षण्डेल्वालसद्वंशे हेमसिंहाभिधः सुधीः ।
तस्याभ्यर्थनया ह्येष निर्मितो नन्दताच्चिरम् ॥ १५ ॥

Colophon :

इति श्रीमन्नागपुरीयतपोगच्छीयश्रीहर्षकीर्तिसूरिकृतः सारस्वतीयो धातुपाठः संपूर्णः ।

Then a table of the roots dealt with in this work is added.

679. 11. D. 12.

सारस्वतसूत्रपाठः

Paper. 9 Foll. 9½ × 5¼ inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

The grammatical Sūtras belonging to the Sārasvata school. It is traditionally believed that Goddess Sarasvati revealed these Sūtras to Anubhutisvarūpācārya. Vide the following verse found among the introductory verses of the work and quoted by Puñjarāja in his commentary on the Sārasvataprakriyā :

"सूत्रसप्तशतीं यस्मै ददौ साक्षात् सरस्वती ।
अनुभूतिस्वरूपाय तस्मै श्रीगुरवे नमः ॥"

(Page 136 of the Descriptive Catalogue of Sanskrit MSS. in Asiatic Society of Bengal, vol. VI).

Complete.

Beginning :

संज्ञासंधिर्विभक्तिश्च युष्मदस्मच्च कारकः ।
तद्धितः स्त्री समासश्च दशधाख्यातमिष्यते ॥ १ ॥
कृतश्च प्रत्यया धातोर्विभक्त्यन्तं पदं स्मृतम् ।
वाक्यं तत्समुदायश्च सा वाक्कामधुगुच्यते ॥ २ ॥
सूत्रसप्तशतीं यस्मै ददौ साक्षात्सरस्वती ।
अनुभूतिस्वरूपाय तस्मै श्रीगुरवे नमः ॥ ३ ॥

अइउऋऌसमानाः । ह्रस्वदीर्घप्लुतभेदाः सवर्णाः । ए ऐ ओ औ संध्यक्षराणि । उभये स्वराः । अवर्जा नामिनः ।

End :

पूर्वकाले क्त्वा । समासे क्यप् । पौनःपुन्ये णं पदं द्विश्च । तदव्ययम् । दूराद्धा नेटेः प्लुतः । विचार्ये लोकाच्छेषस्य सिद्धिः । इति सूत्राणि ।

Colophon :

इति सूत्रपाठः ।

The codex then contains also the *Upasargapāṭha* as given below :

Beginning :

आदिकर्मणि दीर्घे च सामर्थ्यभूशसंभवे ।

वियोगे शुद्धिशक्तीच्छा शान्तिपूजाप्रदर्शने ॥
प्रकर्षे गमने तृप्तौ तत्परे च प्र उच्यते ।
वैपरीत्ये पराभूतौ दूरे च विमुखे परा ॥

अप इति असत्यविकारवर्जनस्तैन्यकर्षणपूजानिह्नवादिषु । समिति संभवसम्यक्प्रकारमेलनसमवायादिषु ।

End :

श्रत् इति श्रद्धादिषु । अन्तरिति मध्यान्तर्धानादिषु । आदिस्प्रादुस् इत्युभौ प्राकट्ये ।

इत्युपसर्गपाठः ।

Then reads Nipātapāṭha as given below :

Beginning :

चादिर्निपातः । च वा अह एव एव एवं नूनं पृथक् शश्वत् युगपत् भूयस् ।

End :

सुकं अनुकं संवट् दिष्ट्या चटु चाटू हुम् इव अद्य त्वे इत्यादि । इति श्रीअव्ययपाठः समाप्तिमगमत् । अथाव्ययार्थः प्रारभ्यते—चेति समुच्चयान्वाचयेतरेतरयोगसमाहारेषु । वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये । हेति प्रसिद्धौ । अहेति पूजायाम् । एवेत्यधारणे अनवक्लृप्तौ च ।

* * *

चटु चाटुप्रियवाक्यार्थे । हुमिति भर्त्सने । इवेति सादृश्ये । अद्यत्वे इति इदानीमित्यर्थे । इत्यव्ययपाठः समाप्तिमगमत् ।

१८७३ का०व १४ चन्द्रे

680. 41. B. 33.

सारस्वतसूत्रव्याख्या सिद्धान्तचन्द्रिका—रामचन्द्राश्रमकृता

Paper. 131 Foll. 11 × 4½ inches. 8 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is an independent commentary on the Sārasvatasūtras by Rāmacandrāśrama. The exact date of the author is not known. However, as the commentary called Tattvadīpikā by Lokeśakara on this work is dated 1685 A.D. and as this MS. is dated Sam. 1711 = 1655 A.D., this commentary is believed to have been composed at least about the end of the 16th Century A.D.

Complete.

Beginning :

नमस्कृत्य महेशानं मतं बुद्ध्वा पतञ्जलेः ।
वाणीप्रणीतसूत्राणां कुर्वे सिद्धान्तचन्द्रिकाम् ॥

अइउऋऌ समानाः । अनेन क्रमेणैते वर्गा ज्ञेयाः । ते च समानसंज्ञा स्युः । ह्रस्वदीर्घप्लुतभेदाः सवर्णाः । एतेषां ह्रस्वदीर्घप्लुताः सजातीयाः परस्परं सवर्गा भण्यन्ते । ऋवर्णऌवर्णौ च । एकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः । ए ऐ ओ औ संध्यक्षराणि । उभये स्वराः । ह्रस्वदीर्घप्लुतभेदा अकारादयः एकारादयश्च स्वरा उच्यन्ते । अवर्जा नामिनः । अवर्णवर्जाः स्वरा नामिन उच्यन्ते । हय वरल । अणनङम । झढधघभ । जडदगब । खफछठथ । चटतकप । शषस । आद्यन्ताभ्याम् । आद्यन्तौ वर्णौ मध्यगानामाभ्यां सहितानां संज्ञा भवति ।

End :

वर्णात्कारः । अकारः ककारः । रादिफौ वा । रेफः रकारः । लोकाच्छेषस्य सिद्धिः । यथा मातरादेः ।

Colophon :

इति श्रीरामचन्द्राश्रमविरचिता सिद्धान्तचन्द्रिका समाप्ता ।

The scribe adds :

संवत् १७११ (1655 A.D.) श्रावणशुद्ध ।

चन्द्रिकात्र पठनाय लेखिता व्यासकानजिसुतेन धीमता ।
सोमवारयुताष्टमीदिने सिद्धिरस्तु पठतां च शाब्दिकाः ॥

The former owner of the MS. :

भास्करसूनुगोविन्ददशपुत्र ।

681. 11. C. 36.

सारस्वतसूत्रव्याख्या सिद्धान्तचन्द्रिका — रामचन्द्राश्रमकृता

Paper. 86 Foll. $9\frac{3}{4} \times 5\frac{1}{2}$ inches. 13 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing. Foll. 1 to 11 and 61 are missing.

Wants the beginning in the first Chapter and goes on up to the end of 2nd Chapter.

682. 33. A. 3.

सारस्वतसूत्रव्याख्या सिद्धान्तचन्द्रिका— रामचन्द्राश्रमकृता

Palm-leaf. 82 Foll. $11\frac{1}{2} \times 1\frac{1}{8}$ inches. 3 lines in a page. Oriya Script. Old. Good. Good writing.

Contains up to the end of Dvirukti-prakriyā.

683. 40. E. 47.

कातन्त्रसूत्राणि—शर्ववर्मकृतानि

Paper. 12 Foll. 8 × 4 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Clear writing.

As said above, the Kātantrasūtras belong to one of the grammatical schools of the post-pāṇinian period. The author of these sūtras was S'arvavarman. The work is also called as Kaumāravyākaraṇa, and Kālāpavyākaraṇa. According to the Garuḍapurāṇa, Chapters 205 and 206, these sūtras were taught by Kumāra *alias* Subrahmaṇya to Kātyāyana. Hence the school is styled as Kaumāra. It is also said in the Kātantravṛttiprakāśa of Karmadhara (Vide the next number) that the work was written for the benefit of the King S'alivāhana (the first century A.D.) by S'arvavarman who got it from Kumāra, and systematized into the shape of sūtras. This is another reason for the title Kaumāra. S'arvavarman was Kālāpa by Caraṇa or S'ākhā. Hence the work is also called as Kālāpa. But Gauḍas call the work as Kalāpavyākaraṇa. The reason is said thus: S'arvavarman after finishing the work approached Kumāra with a feather of peacock (Kalāpa) in his hand and requested him for his advise as to what name should be given to the work. Kumāra said the work should be called Kalāpa because the author came to him with a feather of peacock in his hand. Kātantra means 'a short work'. It is said that the Kātantrasūtras have two different recensions one being prevalent in Eastern Bengal and the other in Kashmir. The present work represents the former. The work consists of four chapters, the first containing 5 pādas, the second 7 pādas,

the third 8 pādas and the fourth 6 pādas. As tradition goes S'arvavarman did not write rules on Kṛt portion but they were added by Kātyāyana or Vararuci. According to the Calcutta edition, the first chapter contains 79 Sūtras, the second 337 Sūtras, the third 439 Sūtras. Thus the first three chapter's contain 855 Sūtras in all. The fourth chapter which is said to have been added by Vararuci contains 546 Sūtras. Thus there are 1401 Sūtras in the work. Some of the Sūtras are readable as verses when they are joined together.

The MS. breaks off in the 4 the pāda of the 3rd chapter.

Beginning:

सिद्धो वर्णसमाम्नायः । तत्र चतुर्दशादौ स्वराः । दशसमानाः । तेषां द्वौ द्वावन्योन्यसवर्णौ । पूर्वो ह्रस्वः । परो दीर्घः । स्वरोऽवर्णवर्जो नामी । एकारादीनि सन्ध्यक्षराणि । कादीनि व्यञ्जनानि । ते वर्गा पञ्च पञ्च पञ्च । वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः । घोषवन्तोऽन्ये ।

End:

सनि मिमीमादारभलभशकपतपदामिम् स्वरस्य । आप्नोतेरीः । दम्भेरिच्च । दिगिदयतेः परोक्षायाम् ।

Colophon:

इत्याख्याते सूत्रतस्तृतीयः पादः समाप्तः ।

अथ चतुर्थः पादः ।

सपरस्वरायाः संप्रसारणमन्तःस्थायाः । ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिब्रश्चिभ्रस्जीनामगुणे ।

* * * *

अण्व्यञ्जनयोः । हन्तेर्जहौ । दास्त्योभ्यासः ।

Then a stray leaf with No. 22 begins thus:

इति कृत्सूत्रतस्तृतीयः पादः समाप्तः ।

and ends thus:

स्वदिघसां मरक् । मिदिमासि ।

684. 39. D. 5.

कातन्त्रसूत्राणि—शर्ववर्मकृतानि

Paper. 14 Foll. $7\frac{3}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgari script. New. Good. Good writing.

This is a transcript made from the MS. described in the last nnmber.

Incomplete.

685. 40. B. 23.

कातन्त्रवृत्तिप्रकाशः—कर्मधरकृतः

Paper. 360 Foll. $10\frac{3}{4} \times 4\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Foll. are numbered 1 to 406 of which Foll. 113 to 156, 263, 264 and 353 are wanting. Fol. 282 is marked as 281.

About the eighth century A.D. Durgasiṁha wrote a brief commentary on the Kātantrasūtras of S'arvavarman. The commentary is called. Kātantravṛtti. Kātantravṛttiprakāsa, as the title itself signifies is a commentary on Durgasiṁha's Vṛtti. The author is called Karmadhara son of Lakṣmīdhara and grandson of Yasodhara. Rudrasiṁha, the king of Mithilā, was the patron of Yasodhara and is known to have written a work called

Vijñānataraṅgiṇī in the year 1411 A.D. (Vide M. Krishnamachari's History of classical Sanskrit Literature, page 433). Karmadhara says that he wrote this work under the instance of Devanātha who was the minister of Husen Shah. He also traces the genealogy of Devanātha from a person called Megha. Trilocana was the son of Megha and Gadādhara was the son of Trilocana. Gadādhara's son was Bhūdhara whose son was Bhavanātha. Devanātha was the son of Bhavanātha and Sumitrā. Again Devanātha had six sons called 1. S'ivanātha, 2. Raghunātha, 3. Somanātha, 4. Vīranātha, 5. Vādinātha and 6. Ādinātha. Karmadhara mentions many authors among whom the following may be mentioned—Vardhamāna, Trilocana. Vidyānanda, Prthvīdhara, S'rīpati and Suṣeṇamis'ra all being the authors of commentaries and subcommentaries on this grammar. Though the colophons read the name of the commentary as Kātantramantraprakās'a apparently it should be Kātantravṛttiprakās'a. The work is very rare and is not mentioned in any of the Catalogues.

Breaks off in the 5th pāda of the 2nd Chapter.

शेषाशेषफणामणिव्यतिकरे कान्ताकृतिं बिम्बितां
पश्यन्ती रहसि स्थितापि परिषद्भ्रान्त्या पियासुर्मुहुः ।
या प्रौढापि नवं समागमरसं भावैः समातन्वती
श्लिष्टा गाढमुरःस्थलेन हरिणा लक्ष्मीः श्रियेसास्तु वः ॥
त्रिलोचनख्यातमभिन्नदुर्गं शर्वं नमस्कृत्य विवक्तविद्यम् ।
कातन्त्रसूत्रार्थविनिश्चयार्थमयं प्रयत्नः क्रियते शिशूनाम् ॥
दुर्गत्वमुन्नीय स पञ्जिकाया वृत्तेर्विवेके विजयः प्रवृत्तः ।
विवेचयंस्तद्वचनानि वाग्मी स्वयं पुनर्दुर्गतमो बभूव ॥
ततः स तां युक्तिभिरुक्तिमुक्ता-
विवित्तपङ्क्तिं क्वचिदप्यमुष्य ।
संयोजयिष्ये निजगीर्गुणेन
सतां हृदि श्रीमति संश्रयाय ॥ ४ ॥
त्रिलोचनाचार्यवचःप्रसादाद्
दुर्गस्य वृत्तिः सुगमा यदीयम् ।
क्वचित्क्वचिन्मे वचसोऽवकाशः
शिलोञ्छवृत्त्या घटते तथापि ॥ ५ ॥
अभूत्किलाम्भोरुहभूप्रभूते कायस्थवंशे धरणीवतंसे ।
विश्वोपकारव्रतरक्षणेन श्रीमेघनामा धृतमेघनामा ॥ ६ ॥
महोपकारोऽत्र महोदयश्च यशश्च भूवल्लभवल्लभत्वम् ।
इत्यादृतासौ निजवैद्यविद्यामनेकविद्याधिगमे कृतेऽपि ॥
जातस्तत्तनयस्त्रिलोचन इति ख्यातस्त्रिवेदीविदा-
माधारो . . . . . त्रिभुवनप्रख्यातकीर्तिव्रजः ।
त्रैवर्गीं समुपासनामभिदधच्चित्तं त्रिणेत्रे दधद्
यः शास्त्रेण दृशा द्वयादधिकया स्वं नाम सार्थं व्यधात् ॥
तस्यात्मजः समभवत्कुलशीलशाली
विद्याविवेकविविधोदयदानदीक्षः ।
भक्त्या गदाधरपदाधरवर्तिमूर्धा
नाम्ना गदाधर इति प्रथितप्रकर्षः ॥ ९ ॥
येनातुरतरदेहादधरयता सपदि विषमगदजातम् ।
निजनामान्वितमूहे वैद्यसमूहे प्रगीतसद्यशसा ॥ १० ॥
पुत्रस्तस्याजनि जनिपुषामायुषां संप्रदाता
धातेत्याख्यां पृथगपि वहन् भूधरो धीरधैर्यः ।
यो भूस्थैर्यं व्यधित जनितोल्लाघतासंविधानाद्
धर्मोद्रेकं त्वपि च जनयन्नक्षयं नाम निन्ये ॥
अमुष्मादुद्भूतो नय इव वपुष्मान्नियतिमान्
सुधाधामेवाब्धेर्जगति भवनाथः स्तुतकथः ।

पितृभ्यामाराध्य त्रिभुवनगुरुं यो ह्यधिगत-
स्ततस्तन्नामासीत्प्रथितपृथुकीर्तिर्दिशि दिशि ॥१२॥
आर्तानार्तानातन्वन्धन्वन्तरिसमक्रमः ।
यशोधनो यः सुखिनीश्चक्रे तात्कालिकीः प्रजाः ॥१३॥
विद्यां विश्वजनीनां परंपरीणां वहन्नपि प्रगुणाम् ।
शब्दागमसदलंकृतिसाहित्यैकाश्रयो योऽभूत् ॥ १४ ॥
साहिश्रीमहमूदतो वसुमतीचक्रैकशक्राद्गुण-
ग्रामैस्तोषितचेतसोऽधिगतवान् सत्कारपूर्वां श्रियम् ।
कृत्वा सद्वसतिं शुभे सुरसरित्कूले करे पत्तने
भेजे यस्त्रिगणं विभज्य समया भक्त्या सुमित्रान्वितः ॥
तत्तनयः श्रितविनयो विधृतनयः सुकृतसंचयस्थिरधीः ।
अभ्युन्नतनिजवंशप्रदीप इव देवनाथोऽभूत् ॥
पुण्यश्रियां तत्फलमाशिषां वा
सच्छोत्रियाणां परितोषितानाम् ।
श्रीभावनाथेन सुमित्रया च
योऽसावसावि द्युतिमान् सुजन्मा ॥ १७ ॥
जितेन्द्रियोऽसौ भविता पदच्युतै-
र्नृपैरपि स्वस्थितयेऽर्थनीयः ।
दैवज्ञजातैरिति निर्मितेन
यो देवनाथत्वमियाय नाम्ना ॥ १८ ॥
गुणैरनूनैः स्ववशीकृतस्य
हुसेनसाहेः सचिवत्वमेत्य ।
गवां द्विजानामपि यः शरण्यो
भग्नान्प्रतिष्ठापयति स्म राज्ञः ॥ १९ ॥
यस्तन्वन्प्रतिधन्वं
दिशि दिशि सरसीः स्रुचीरपः सृजतीः ।
पथि पथि भक्ष्यविशेषैः
परिपूर्णा च प्रपां व्यतनोत् ॥ २० ॥
आरामैरभिरामान् ग्रामान्यः पात्रसात्कृतवान् ।
सुचिरं सत्रमतानीद्वाराणस्यादितीर्थेषु ॥ २१ ॥
गवां सहस्रं यद्दत्तं श्रोत्रियैरपि भुज्यते ।
दत्वा प्रत्याददानस्तु सूर्योऽस्तं याति किं ह्रिया ॥२२॥
बलिप्रभृतिभिर्दत्ता विष्णवे मृन्मयी मही ।
सैव स्वर्णमयी येन प्रत्ता शैलवनाब्धिभिः ॥ २३ ॥
ब्रह्माण्डं यो व्यतरदखिलं श्रोत्रियेभ्यो विभज्य
स्थानाभावादिव परमतो यद्यशो गन्तुमैच्छत् ।
हैमं शैलं सुरविटपिनं कामधेनुं च दत्वा
तत्स्वामित्वादिव शतमखं योऽनुनिन्ये प्रतीष्टम् ॥
यस्य द्वारोपान्ते भूपा निजपदविरहगलितगुरुगर्वा-
स्तिष्ठन्तः स्वं राज्यं लब्ध्वा यदुचितविरचितपरिचित-
हर्षाः ।
जायन्ते किं चान्यद्येन कचन वचनमथ न वितथमुक्तं
शत्रूणामप्यन्तः कान्तं मधुरमकटुपटुचटुविनियुक्तम् ॥
देवनाथो लसत्कीर्त्या स्तृणाति जगतां त्रयम् ।
अवभृथोच्छ्वसन्मूर्त्या प्रीणाति जनतामयम् ॥
(गोमूत्रिकादिबन्धोऽयम्)
पुत्रा यदीयाः षडमी पवित्र-
चरित्रचित्रीयितविश्वभागाः ।
सौभाग्यभाग्योपचयैरनूनाः
सत्कीर्तिमूर्तिस्थितिनीतिभाजः ॥
शिवनाथो रघुनाथो रघुरिव वंशोन्नतेः कर्ता ।
सोम इवातिद्युतिमान्ख्यातः **श्रीसोमनाथश्च** ॥ २८ ॥
श्रीवीरनाथोऽपि रणे प्रवीरो
धन्यो वदान्यः सुकृती कृती च ।
श्रीवीरनाथश्च तथा**दिनाथो**
धृताद्यनाथस्मृतिचारुचित्तौ ॥ २९ ॥
स **देवनाथः** स्फुटमेव यस्य
पञ्चाप्यमी **नन्दनकल्पवृक्षाः** ।
श्रीराघवाद्या मणिमण्डिताङ्गा
शाखाभृतोऽर्थीप्सितमुत्सृजन्ति ॥ ३० ॥
भ्रातुः कनिष्ठस्य पदेऽभिषिक्तो
यद्गोपिनाथोऽपि परोपशान्त्यै ।

ततोऽपि यो व्यञ्जितवान् मघोनः
सख्यं न नाम्ना शुचिकर्मणापि ॥ ३१ ॥
पुत्रपौत्रीणभावेऽपि योऽभ्यमित्रीणतां रणे ।
दधद्विद्यासु पारीणोऽप्यभूदध्ययनप्रियः ॥ ३२ ॥
कलापके व्याकरणे गभीरे संदेहसंदोहमपोहयिष्यन् ।
निबन्धमेतं बहुयुक्त्युपेतं सोऽचीकरत्कर्मधरेण तेन ॥
याशोधरायणो योऽसौ लक्ष्मीधरसुतः स्तुतः ।
यः कृती याज्ञरूपेयः श्रोत्रपेयवचोऽमृतः ॥ ३४ ॥

यशोधरलक्ष्मीधरयोश्च निजकीर्तिपद्यान्यद्यापि श्रूयन्ते--

श्रीरुद्रसिंहस्य निदेशवर्ती
यशोधरः शाब्दिकचक्रवर्ती ।
कवित्ववक्तृत्वकलानिवासो
जागर्ति भूमौ नवकालिदासः ॥ ३५ ॥
द्राक्षा दक्षा न कक्षामनुभवितुमलं का कला काकलीनां
कौमत्ये कोकिलानां विधुरुचि न रुचिर्द्राङ्मुधा-
भूत्सुधापि ।
वीणा प्रावीण्यहीना मधुरिमधुरयाहायि हैयङ्गवीनं
यस्या याशोधरी सा जगति विजयते भारती भारति-
भ्याम् ॥ ३६ ॥
मधुरिमगुणगर्भवैदर्भसंदर्भसर्वस्वगीः
कलितसकलशब्दमर्मागमः शर्मवर्मा न किम् ।
रसमयमृदुगद्यपद्यानवद्यः स लक्ष्मीधरः
प्रभवति वरवैरिवर्गाधिसर्गान्निसर्गार्चितः ॥ ३७ ॥
वाररुचं परिशिष्टं टीकामपि वार्धमानिकोपेताम् ।
विद्यानन्दप्रभृतीन् समीक्ष्य चिरमेष यत्नो मे ॥
हे धीराः श्रृणुतावधाय विदधे नत्वाञ्जलिं मूर्धनि
त्यक्त्वालस्यमपास्य हास्यमिह संधेयं निबन्धे मनः ।
किं वा किं विनयोत्करेण यदि वः कातन्त्रमेतच्छ्रुतं
तत्सेव्यो भवितायमेव यदि वा स्वार्थोऽयमारभ्यते ॥
द्वयमेतदसंबद्धं खलता सुमनस्विता ।
किं तु संभाव्यते क्वापि खलतासु मनस्विता ॥ ४० ॥

तत्र प्रथमं तावत् शिष्टजनमनःपरितुष्टये अभीष्ट-तमकर्मनिर्वाहकादृष्टसृष्टये चेष्टदेवतां वाचनिकशास्त्र-प्रस्तावाद्वचनेन पूर्वार्धे नमसित्वापरार्धे च प्रेक्षापूर्व-कारिप्रवृत्त्यङ्गभूतं संबन्धं प्रयोजनं चाभिधित्सुर्भगवान् वृत्तिकारोऽन्यदीयमपि दृष्टानुभावतया पद्यमिदमलेखीत् —देवदेवमित्यादि ।

* * * * *

अत्र किल मिलितनिखिलविद्वज्जनायां मीमांसित-सकलशास्त्रार्थतत्त्वायां परिषदि शालवाहनाभिधानमव-नीश्वरं बोधयितुं कृतप्रतिज्ञेन शर्ववर्मणाचार्येणाराधितः प्रसादीकृतात्मदर्शनो भगवान् कुमारो निजव्याकरण-ज्ञानमाविर्भावयितुं श्लोकपादरूपमिदमुद्देशसूत्रमवोचत्--सिद्धो वर्णसमाम्नाय इति ।

Colophon on fol. 33.

इति करणकुलालंकरणश्रीदेवनाथसमादिष्टकर्मधर-विरचिते कातन्त्रमन्त्रप्रकाशे प्रथमः संधिः समाप्तः ।

End :

जातिसंज्ञकयोस्तु निवृत्तिमेव । कटीत्वं गार्ग्यत्वं देवदत्तत्वं रुक्मिणीत्वम् । तत्त्वयोरिति किम् । पट्वीमयम् । अनूङिति किम् । पङ्गूत्वं पङ्गूता । करभोरूत्वं करभोरू ।

686. 33. B. 6.

प्रक्रियासारः

Palm-leaf. 129 Foll. 15¼ × 1⅛ inches. 4 lines in a page. Oriya script. Old. Much injured. Clear writing. Some leaves are broken in the middle.

This also is a treatise on grammar belonging to the Kātantra school. The author's name is not known. It is said that the work was written in

accordance with Vardhamāna's view. The work is also called Vardhamānasāra in the Colophon.

Contains up to the end of the Taddhitaprakaraṇa, the 8th chapter.

Beginning :

प्रणम्य श्रीहयग्रीवं वाग्देवीं च गणाधिपम् ।
प्रक्रिया क्रियतेऽस्माभिर्वर्धमानानुसारिणी ॥

सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः । वर्णा अकारादयस्तेषां समाम्नायः पाठक्रमः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह । ककारादिष्वकार उच्चारणार्थः ।

Colophon on fol. 33 (*a*).

इति प्रक्रियासारे संधिपादः समाप्तः ।

End :

प्रत्ययमन्तरेणापि पूर्वोत्तरयोर्लोपः । भीमः । भीमसेनः । सत्या । सत्यभामा । हरिः । भर्तृहरिः ।

Colophon :

इति तद्धितेऽष्टमं प्रकरणम् । इति वर्धमानसारे तद्धितपादः समाप्तः ।

687. 33. B. 20.

प्रक्रियासारः

Palm-leaf. 77 Foll. 13 × 1¼ inches. 4 lines in a page. Oriya script. Old. Good. Illegible writing. Same work as the above.

Contains the Pūrvārdha ending with Tiṇanta.

Reads the following end and Colophon :

स्यति । स्यतः । स्यन्ति । स्यसि । स्यथः । स्यथ । स्यामि । स्यावः । स्यामः । स्यते । स्येते । स्यन्ते । स्यसे । स्येथे । स्यध्वे । स्ये । स्यावहे । स्यामहे । इमा विभक्तयो भविष्यन्तीसंज्ञाः । इइगुणौ । भविष्यति । भविष्यतः । भविष्यन्ति ।

Colophon :

इति श्रीवर्धमानऋषिकृतवर्धमानव्याकरणे पूर्वार्धं समाप्तम् ।

688. 33. A. 25.

वर्धमानसंग्रहः—कृष्णमिश्रविरचितः

Palm-leaf. 82 Foll. 13 × 1 inches. 4 lines in a page. Oriya script. Old. Slightly injured. Good writing.

This is an abstract of Vardhamāna's work on grammar. Vardhamāna is known to have written a work called Kātantravistara belonging to the Kātantra school of grammar. Vardhamānasaṁgraha may be probably a summary of the Kātantravistara ; by Kṛṣṇamiśra.

Beginning :

अथ विभक्त्यर्थो निरूप्यते । प्रथमाविभक्तिर्लिङ्गार्थवचने । लिङ्गार्थाभिधाने प्रथमा विभक्तिः स्यात् । यः कारकभेदेऽपि लिङ्गादभिन्नः प्रतीयते स लिङ्गार्थः । तेन कृत्तद्धितसमासलिङ्गपरिमाणसंख्यानां द्विविधायाः सत्तायाश्च लिङ्गत्वम् । तेन कृदर्थे युड् । तद्धितार्थे औपगवः । समासार्थे चित्रगुः । लिङ्गार्थे वृक्षः कृष्णः कुमारः । परिमाणार्थे . . . . खारी आढकः । संख्यार्थे एकः द्वौ बहवः ।

Colophon on fol. 19 (*b*)

इति सप्तमीप्रकरणम् । इति श्रीकृष्णमिश्रविरचिते वर्धमानसंग्रहे कारकप्रकरणं समाप्तम् ।

End :

चक्रबन्धं बध्नाति चक्रबन्धः । कुशस्थः । कूटस्थः । पर्वतस्थः । परमेष्ठी इत्यादिकः ।

Colophon :

इति समासप्रक्रिया समाप्ता ।

The Scribe adds :

श्रीप्रसन्नपुरुषोत्तमोद्धरश्रीवीरकेश्वरदेवषष्ठाङ्के वैशाखकृष्णषष्ठीबृहस्पतिवासरे समाप्तोऽयं ग्रन्थः ।

689. 38. H. 19.

शब्दानुशासनम्—शाकटायनकृतम्

Paper. 1242 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing. Bound in four volumes. The manuscript contains also the commentary called Amoghavṛtti on this work written side by side of each Sūtra. The commentary will be described separately in the next number.

The S'abdānusāsana of S'ākaṭāyana is a work on grammar written in later period. S'ākaṭāyana belonged to the S'vetāmbara sect of Jainism and is mentioned in the colophons with the title S'rutakevalidesīya. Mahāmahopādhyāya Haraprasādas'āstri explains the title S'rutakevalin to mean the direct disciples of the Tīrthaṁkaras and says that by adding the suffix desīya to the word it would mean little less than a S'rutakevalin *i.e.*, he must have been a generation or two younger than the last Tīrthaṁkara called Vardhamāna. As the commentary called Amoghavṛtti on the work was written in the reign of Amoghavarṣa, the famous Rāṣṭrakūṭa King (815—878 A. D.) this work must have been written before the 9th century A. D. But Belvalkar says that the Amoghavṛtti also was written by Sākaṭāyana and the date of the text and commentary must be the 9th Century A.D. The work is divided into four adhyāyas of four pādas each and contains 3236 sūtras in all.

Complete in four adhyayas.

One extra leaf found at the end gives the number of sūtras contained in each pāda of each adhyāya.

Beginning :

नमः श्रीवर्धमानाय प्रबुद्धाशेषवस्तवे ।
येन शब्दार्थसंबन्धाः सर्वेण मुनिरूपिताः ॥
धर्मार्थिकाममोक्षेषु तत्त्वार्थावगतिर्यतः ।
शब्दार्थज्ञानपूर्वेति वेद्यं व्याकरणं बुधैः ॥

अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । जमङणनम । जबगडदश् । झभघढधष् । खफछठथट् । चटतव् । कपय् । शषसअंअः×क×पर् । हल् ।

सात्मेतेत् । उता स्वः । तेयान् । भाव्योऽग् । अप्रयोगीत् । स्वः स्थानास्यैक्ये । आसन्नः । संबन्धिभ्यां संबन्धे । घडिति संख्या । बहुगणं भेदे ।

End :

समर्थास्त्यर्थघृषज्ञाशकंलाघटसहार्हारभलभक्रमेतुम् । क्रियायां तदर्थायां वुण् लृट् च । कर्मणोऽण् । लेङ्तुमिच्छार्थे तुल्यकर्तृके ।

Colophon :

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्च चतुर्थोऽध्यायः ।

690. 38. H. 19.

शब्दानुशासनव्याख्या अमोघवृत्तिः

Paper. 1242 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing. Bound in four volumes. The MS. contains also the text of the S'abdānus'āsana as described in the last number.

The Amoghavṛtti is a commentary on S'ākaṭāyana's S'abdānus'āsana. The name of the commentator is not found in the MS. Yet it is believed that the commentary was written during the reign of Amoghavarṣa, a Raṣṭrakūta King (815—878 A.D.). Belvalkar says that the Amoghavṛtti also must have been written by S'ākaṭāyana himself, the author of the text. Therefore, according to Belvalkar the date of the Sabdānus'āsana and its commentary Amoghavṛtti must be the 9th Century A.D.

Some foot-notes are added occasionally. Complete in four adhyāyas.

Beginning :

श्रीवीरममृतं ज्योतिर्नत्वादि सर्ववेदिनम् ।
शब्दानुशासनस्येयममोघा वृत्तिरुच्यते ॥

अविघ्नेनेष्टप्रसिद्ध्यर्थं मङ्गलमारभ्यते—

नमः श्रीवर्धमानाय प्रबुद्धाशेषवस्तवे ।
येन शब्दार्थसंबन्धाः सर्वेण सुनिरूपिताः ॥

शब्दो वाचकः । अर्थो वाच्यः । तयोः संबन्धो योग्यता । अथवा शब्द आगमः । अर्थः प्रयोजनम् अभ्युदयो निःश्रेयसं च । तयोः संबन्ध उपायोपेयभावः । तेन सर्वसत्त्वहितेन सता तत्त्वतः प्रज्ञापिताः तस्मै परमार्हन्त्यमहिम्ना विराजमानाय भगवते वर्धमानाय षडपि द्रव्याणि अशेषाणि अनन्तपर्यायरूपाणि साकल्येन साक्षात्कुर्वते नमस्कुर्वे इत्युपस्कारः । एवं कृतमङ्गलरक्षाविधानः परिपूर्णमल्पग्रन्थं लघूपायं शब्दानुशासनं शास्त्रमिदं महाश्रमणसंघाधिपतिर्भगवानाचार्यः शाकटायनः प्रारभते—अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । जमङणनम् । जबगडदश् । झभघढधष् । खफछठथट् । चटतव् । कपय् । शषसअंअः क×पर् । हल् । इति वर्णसमाम्नायः क्रमानुबन्धोपादान- प्रत्याहारयन् शास्त्रस्य लाघवार्थः । सामान्याश्रयणात् दीर्घप्लुतानुनासिकानां ग्रहणम् । तथाच भाव्यतर्कारोपलक्षितयोरतत्कालव्युदासे यतिष्यते । लृक्ऋ इत्येव लृवर्णस्य ग्रहणम् । तयोरेकत्वं गुरुर्वैकोऽलनृत् इति लृग्रहणात् प्रतिज्ञायते । तथाच ऋत्यक इत्यादि लृकारेऽपि सिद्धं भवति । अनुबन्धकार्यं पृथगनुबन्धासञ्जनात् व्यवतिष्ठते । अन्यथा अन्यतर एवानुबध्येत, तावातार्थसिद्धेः । हकारस्य द्विरुपदेशोऽर्षादौ वलादौ च ग्रहणार्थः । हकारादिष्वकारादय उच्चारणार्थः । मकाराद्यनुबन्धानां जमङणनमित्यादावुपदिष्टानां परार्थमुच्चारणमिति तत्तत्प्रत्याहारेष्वग्रहणम् ।

End :

लेङ्तुमिच्छार्थे तुल्यकर्तृके । धातोर्लेङ्तुमौ प्रत्ययौ भवतस्तदर्थायां क्रियायां वर्तमाने इच्छार्थे तुल्यकर्तृके उपपदे यस्माद्धातोर्लेङ्तुमावुत्पद्येते तदर्थस्य चेत् कर्ता

इच्छार्थस्यापि कर्ता भवति । भुञ्जीयेतीच्छति । भुञ्जीयेति वाञ्छति । भोक्तुमिच्छति भोक्तुं वाञ्छति । भोक्तुं वष्टि । भोक्तुमभिलषति । भोक्तुं कामयते । लेङ् तुमं बाधेतेति तुल्यकर्तृके नियमार्थं च तुंग्रहणम् । इच्छार्थे इति किम् । भोजको गच्छति । तुल्यकर्तृक इति किम् । इच्छामि भुङ्क्तां भवान् । क्रियायां तदर्थायामिति किम् । इच्छन् भुङ्क्ते ।

Colophon :

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्च चतुर्थाध्यायः ।

691. 39. I. 12.

प्रक्रियासंग्रहः—अभयचन्द्रसूरिकृतः

Paper. 651 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing. Bound in two volumes.

This is a recast of the S'abdānus'āsana of S'ākaṭāyana. The author has omitted such sūtras as found unnecessary in a work intended for beginners. His arrangement of Sūtras is the same as that found in the works like the Prakriyākaumudī and Siddhāntakaumudī on Paṇini. Though the MS. does not give the author's name, it is understood from the colophon found in the MS. described under D. No. 1534 of the Madras Govt. MSS. Library Catalogue, and the reference found on page 25 of the Indian Antiquary XVI—1887, that the author was Abhayacandrasiddhāntas'ūri or Abhayacandrasūri in short. The author is believed to have lived in the beginning of the 14th Century A. D. as one of his disciples, called Kes'avavarṇin wrote a commentary on Gomaṭhasāra in the S'aka year 1281=1359 A.D. (Vide Belvalkar's Systems of Sanskrit Grammar, 1915, page 72.) The following subjects are dealt with in the work : Saṁjñā, Sandhi, Subanta, Strīpratyaya, Kāraka, Samāsa, Taddhita, Tiṇanta and Kṛt.

Complete.

Beginning :

मुनीन्द्रमभिवन्द्याहं पाल्यकीर्तिं जिनेश्वरम् ।
मन्दबुद्ध्यनुरोधेन प्रक्रियासंग्रहं ब्रुवे ॥

तत्रादौ शास्त्रे संव्यवहारार्थं संज्ञासंग्रहः कथ्यते । तद्यथा—अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । ञमङणनम् । झभञ । घढधष् । जबगडदश् । खफछठथट् । चटतव् । कपय् । शषसअंअः क×प×र् । हल् । इति वर्णसमाम्नायः, अणादिप्रत्याहारार्थः । तत्राणित्येतत्प्रत्याहारविधिरुच्यते । अप्रयोगीत् । इहोपदिष्टो वर्णः समुदायो वा यो लौकिकप्रयोगे न दृश्यते स इत्संज्ञो भवति । अइउणित्यत्र णकारस्येत्संज्ञायाम् । सात्मेतेत् । इता सहोपदिष्टो वर्णः समुदायो वा आत्मनः प्रभृति आ तस्मादितो व्यवस्थितानामात्मनश्च संज्ञा भवति । इति अणित्यकारेकारोकारा उच्यन्ते ।

End :

क्रियायां तदर्थायां वुण् लुट् च । धातोर्वुण्लटौ तुम् च भवति तदर्थायां क्रियायां प्रयुज्यमानायाम् । भोजको व्रजति । भोक्ष्ये इति व्रजति । भोक्तुं व्रजति । लेङ् तुमिच्छार्थे तुल्यकर्तृके । इच्छार्थे तुल्यकर्तृके तदर्थे क्रियान्तरे उपपदे धातोर्लेङ्तुमौ भवतः । भुञ्जी-

येतीच्छति । भोक्तुमिच्छति । भोक्तुं कामयत इत्यादि । अनुक्तं सर्वं शास्त्रतो ज्ञेयम् ।

Colophon :

इति कृत्संग्रहः समाप्तः ।

वन्दारुबृन्दपरिघट्टविलोलिताक्ष-
बृन्दारकेश्वरकिरीटतटावकीर्णैः ।
मन्दारपुष्पनिकरैर्विहितोपकारं
वन्दामहे जिनपतेः पदपद्मयुग्मम् ॥
यो जानाति समं समस्तमनिशं यं सूरयः संश्रिता
येनादर्शि विमुक्तिवर्त्म सुधियो यस्मै नमस्कुर्वते ।
यस्मात्तत्त्वविनिश्चयोऽप्रतिहतं यस्यैव शास्त्रं जयो
यस्मिन् विस्मयनीयपुण्यमहिमा भूयात् स वः श्रेयसे ॥
सुविवेचितपदरूपा प्रकरणचरणा प्रवेशमुखसुभगा ।
वाङ्मयमूर्तिः सौरी कृतिरियमधिवसतु बुधहृदयम् ॥
आदिमध्यावसानेषु मङ्गलं भाषितं बुधैः ।
यज्जिनेन्द्रगुणस्तोत्रं तदविघ्नप्रसिद्धये ॥
गहनं व्याकरणं स्यात्तत्रापि प्रक्रिया महागहनम् ।
लङ् लिङ् सन्यङ् कष्टं तस्मादपि धेट् परं कष्टम् ॥
अव्याकरणं श्रवणं भिन्नद्रोण्या तरङ्गिणीतरणम् ।
औषधमपथ्यकरणं त्रयमपि करणं वृथा करणम् ॥
व्याकरणात्पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति ।
अर्थात्तत्त्वज्ञानं तत्त्वज्ञानात्परं श्रेयः ॥

The MS. was copied by J. Ayyannanayinār from a MS. of J. Ratnasaṁcayanayinār of Ālagrāmam village, Tindivanam Taluk, South Arcot Dt. on 27-7-1931.

692. 39. D. 14.

उपसर्गवृत्तिः

Paper. 12 Foll. (39 to 50). 8⅛ × 6½ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

This is a metrical work in 20 verses briefly explaining the meaning of Upasargas or prepositions followed by a gloss in prose with suitable illustrations. The author's name is not known; however it may be presumed that the author must be a Jaina probably belonging to Hemacandra's school. This Upasargavṛtti is different from that contained in the Nipātāvyayopasargavṛtti of Kṣīrasvāmin described under No. 467 of this volume.

Complete.

Beginning :

प्रपरापसमन्ववनिर्दुरभि-
व्यधिसूदतिनिप्रतिपर्यपयः ।
उप आङिति विंशतिरेष सखे
उपसर्गगणः कथितः कविभिः ॥

अयमुपसर्गगणः प्राचीनैः कविभिरुक्तो विंशतिसंख्याकः ।

प्र नियोगे वियोगे भृशार्थे च तृप्तौ
तथा शुद्धिशक्त्यग्रपूजासु शान्तौ ।
वदन्त्यादिकर्मण्युदीर्णे प्रसन्त-
स्तथा संभवैश्वर्यदृष्टाभिलाषे ॥

प्र इत्ययमुपसर्गः पञ्चदशस्वर्थेषु वर्तते । नियोगे प्रयुक्तः । वियोगे प्रोषितः । भृशार्थे प्रवदन्ति दायादाः । तृप्तौ प्रभुक्तमन्नम् । शुद्धौ प्रसन्नमुदकम् । शक्तौ प्रसक्तो विद्यायाम् । अग्रे प्रवालो वृक्षः । पूजायां प्राञ्जलिः स्थितः । शान्तौ प्रशान्तो वह्निः । अभिविधौ आकुमारं यशो रामभद्रस्य । श्लेषे आलिङ्गति । आभिमुख्ये आगच्छति देवदत्तः । निर्देशे आदिशति ।

अवधौ आ कान्यकुब्जाया वृष्टो देवः। विक्रियायाम्। शकने आक्रमते गगनं चन्द्रमाः। स्थाने आस्पदम्। आदिकर्मणि आरभते विद्यामध्येतुम्।

Colophon :

इति लघुरुपसर्गवृत्तिः समाप्ता।

The MS. contains 2 other Jaina works called (1) Prameyamaṇikalikā by Narendrasena and (2) Pañcāstikāya.

693. 40. A. 90.

शब्दानुशासनव्याख्या शब्दचन्द्रिका—मेघविजयकृता

Paper. 30 Foll. $11\frac{1}{2} \times 4\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

This belongs to the school of Hemacandra on grammar. Hemacandra was the author of about 16 works on various subjects. He is said to have born in 1088 and died in 1173 A. D. He was a Jaina by religion. At Anahillapurī he was in the Court of Kings Siddharāja Jayasimha (1094 to 1143) and his successor Kumārapāla who became a disciple of Hemacandra. At the request of Siddharāja Jayasiṁha Hemacandra wrote the work S'abdānus'asana a work on grammar. The work is generally called as Siddhahemacandra or Haimavyākaraṇa. But the colophons mention the work by the name Siddhahemacandrābhidāna-Svopajña-S'abdānus'āsana. The work is divided into eight adhyāyas of four pādas each. The adhyāyas 1 to 7 deal with Sanskrit and the 8th with Prākrit.

The S'abdacandrikā under reference is a Commentary on the S'abdānus'āsana of Hemacandra and was written by Maghavijaya who calls himself as vācaka or Upādhyāya. He was the disciple of Vijayaprabhasūri and Kṛpāvijayakavi. The commentator herein explains the rules on Sanskrit portion and divides the work into three Prakās'as namely Syādi (on nouns) Tyādi (on verbs) and Kṛt (on verbal nouns). Professor Peter Peterson in his Third Report on Search of Sanskrit MSS. in the Bombay circle, 1887, mentions a work called 'Candraprabhā Haimakaumudī' by Meghavijaya Upādhyāya (*vide* pages 10 and 290 of the Report) wherein the date of composition is given as 1725 Saṁ = 1669 A. D. One Meghavijayagaṇi who also was the pupil of Kṛpāvijaya wrote a work called Devānandābhyudaya in Saṁvat 1727=1671 A. D. (Vide p. 5. Introduction to the Digvijayamahākāvya, Siṅghī Jaina Granthamālā No. 24.) The author may be placed in the second half of the 17th century A. D.

Complete in three Prakās'as.

The MS. contains also the Sūtras of the text.

Beginning :

ओं शङ्खेश्वरपार्श्वादीन्नत्वा बालावबोधिनी।
श्रीसिद्धहैमचन्द्रस्य चन्द्रिकासौ निरूप्यते॥
अर्हं पदं सदा ध्येयं कल्याणैन्द्रश्रिये सदा।

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः।

क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह। इति वर्णक्रमसिद्धिर्लोकाज्ज्ञेया। तत्र औदन्ताः स्वराः। ते च एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः। मात्रा उच्चारणकालः। अ आ आ ३। स्वरा अनवर्णा नामीतिसंज्ञाः। ऌदन्ताः समानाः। ए ऐ ओ औ संध्यक्षरम्। अत्र ह्रस्वा न। अंअः अनुस्वारविसर्गौ। अकारोऽत्र उच्चारणार्थः कादिष्वपि। कादिर्व्यञ्जनम्। स च अपञ्चमान्तःस्थो धुट्। कादौ पञ्चको वर्गः। वर्गेष्वाद्यद्वितीयाः शषसाश्चाघोषाः। अन्यो घोषवान्।

End:

वर्णाव्ययात् स्वरूपार्थे कारो रादेफ एति वा। अकारः। रेफः। रकारः। ओंकारः। ह्रींकारः। अर्हंस्तुत्येऽतृनर्थे। अर्हंस्तनोतु श्रेयः।

श्रीविजयप्रभसूरेः प्रेष्यः शिष्यः कृपादिविजयकवेः।
श्रीमेघविजयवाचकवरः कृतां चन्द्रिकां चक्रे॥
प्रौढाया सरसा भावा वृत्तेः के के न शर्मदाः।
एकैवास्यास्तु मुग्धाया रूपश्रीरस्तु नर्मदा॥
सद्गोमङ्गलसंयोगान्मेघाभ्युदयनन्दिनी।
सौरप्रभावादालोकं चन्द्रिका जयताच्चिरम्॥
विबुधैः पीयमानासौ नयनानन्ददायिनी।
संप्रयोगरसाध्यासात्पुष्णातु विजयश्रियम्॥

Colophon:

इति श्रीशब्दचन्द्रिकायां तृतीयः प्रकाशः। तत्पूर्तौ ग्रन्थोऽपि संपूर्णश्रियमशिश्रियत्॥

694. 42. A. 67.

मुग्धबोधः—वोपदेवकृतः

Paper. 73 Foll. $12\frac{3}{4} \times 2\frac{3}{4}$ inches. 3 to 6 lines in a page. Bengali script. Old. Slightly injured. Good writing.

Mugdhabodha is one of the later manuals in Sanskrit grammar. It is in the form of aphorisms accompanied with a brief commentary. The author of both the aphorisms and commentary was Vopadeva son of Keśava who had a sur-name as Bhiṣak (physician). Vopadeva is also called as Bopadeva and he himself says that he was a brāhmaṇa by caste. He was the pupil of Dhaneśvara whom Vopadeva mentions with high respect. From the stanza found at the end of the work, Vopadeva is known to have written ten works on Grammar, nine works on Medicine, one work on Dharmaśāstra, three works on Literature and three works on the Śrībhāgavata. The colophon mentions him with the title Ācāryacūḍāmaṇi. He was the Court-Pandit under the patronage of the King Mahādeva (1260 to 1271 A. D.) and his successor Rāmacandra (1271 to 1309 A. D.) of the Yādava dynasty of Devagiri, modern Devohar. It is, therefore, clear that Vopadeva belonged to the 13th Century A. D. and was a contemporary of Hemādri, the minister of Mādādeva and celebrated author of the Caturvargacintāmaṇi. Vopadeva says that he wrote the works Harilīlā and Muktāphala under the instance of the minister Hemādri. The work Mugdhabodha has about 17 commentaries of which Vidyānivāsa's is the earliest. Vidyānivāsa (1588 A. D.) is known as the son of Vidyāvācaspati and the father of the renowned Viśvanāthatarkapañcānana, the author of the

Kārikāvali and the Siddhāntamuktāvali in Nyāya. (Vide page lxxxiii of the Preface to the Des. Catalogue of Sanskrit MSS. in the eollections of the Asiatic Society of Bengal by MM. Haraprasada Sastri Vol. VI 1931). The work deals with the following subjects in 27 chapters in the same order as found in Bhaṭṭoji's Siddhāntakaumudī: 1. संज्ञा, 2. सन्धि, 3. शब्दाधिकार, 4. स्त्रीप्रत्यय, 5. कारक, 6. समास, 7. तद्धित, 8 to 17. तिङन्त, 18. हेतुमति ञि, 19. सन्नन्त, 20. यङन्त, 21. नामधातु, 22. परस्मैपद, 23. आत्मनेपद, 24. कर्मकर्तृप्रक्रिया, 25. लकारार्थ, 26. कृत्.

The MS. is complete in the above mentioned 26 chapters.

Beginning:

अथ त्यादिरुच्यते। तिप् तस् अन्ति। सिप् तस् थ। मिप् वस् मस्। ते आते अन्ते। से आथे ध्वे। ए वहे महे। यात् याताम् युस्। यास् यातम् यात। याम् याव याम। ईत ईयाताम् ईरन्। ईथास् ईयाथाम् ईध्वम्। ईय ईवहि ईमहि। तुप् ताम् अन्तु। हि तम् त। आनिप् आवप् आमप्। ताम् आताम् अन्ताम्। स्व आथाम् ध्वम्। ऐप् आवहैप् अमहैप्।

End:

चणं वाभीक्ष्ण्ये पूर्वकाले। धोः पूर्वकाले चणं वा स्यात्। पौनःपुन्ये। स्मृत्वा स्मृत्वा नमामि। स्मारं स्मारं नमामि।

कृतो ये यत्र विहितास्तत्र नूनं भवन्ति ते।
कृद्धोः कभाव इत्युक्तेरन्यत्रापि प्रयोगतः॥

तथाच—

कृत्तद्धितसमासानामभिधानं नियामकम्।
लक्षणं त्वनभिज्ञानां तदभिज्ञानसूचकम्॥

बहुलं ब्रह्मणि॥ यदिदं लौकिकप्रयोगव्युत्पत्तौ लक्षणमुक्तं तद्वैदिकप्रयोगव्युत्पत्तौ बहुलं ज्ञेयम्। क्वचिद्विहितं स्यात् क्वचिन्निषिद्धं स्यात् क्वचिद्वा स्यात् क्वचित्ततोऽन्यत्रापि स्यादित्यर्थः। पूर्वेभिः। ब्राह्मणासः इत्यादिवेदपदसिद्धये।

इति ष्ट्लादिपादः। कृदध्यायः। इति मुग्धबोधव्याकरणं समाप्तम्।

गीर्वाणवाणीवदनं मुकुन्दसंकीर्तनं चेत्युभयं हि लोके।
सुदुर्लभं तच्च न मुग्धबोधान्न लभ्यतेऽतःपठनीयमेतत्॥
विद्वद्धनेश्वरच्छात्रो भिषक्केशवनन्दनः।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम्॥
द्यौर्वाचस्पतिनेव पन्नगपुरी शेषाहिनेवाभव-
द्येनैकेन विदुष्मती वसुमती मुख्येन संख्यावताम्।
सोऽयं व्याकरणार्णवैकतरणिश्चातुर्यचिन्तामणि-
र्जीयात्कोविदगर्वपर्वतपविः श्रीवोपदेवः कविः॥
यस्य व्याकरणे वरेण्यघटना स्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्धारार्थमेकोऽद्भुतः।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य मुख्य-
न्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः॥

Colophon:

इत्याचार्यचूडामणिश्रीवोपदेवपण्डितविरचितं मुग्धबोधव्याकरणं समाप्तम्।

695. 42. B. 23.

मुग्धबोधः—वोपदेवकृतः

Paper. 14 Foll. 17 × 3 inches. 8

lines in a page. Bengali script. Old. Injured. Legible writing.

Contains the Kṛdanta portion only incomplete.

696. 42. B. 21.

कारकोल्लासः—भरतसेनकृतः

Paper. 11 Foll. 12 × 3 inches. 6 lines in a page. Bengali script. Old. Injured. Good writing.

This is a primer dealing with the case affixes in Sanskrit by Bharatasena, *alias* Bharatamallika. He was the son of Gaurāṅgamallika, a descendant of the family of Hariharakhān of the Vaidya caste which is mentioned by the term Ambaṣṭha. Bharatasena is known to have been the author of about 16 works inculding the commentaries on the five Mahākāvyas. In his Upasargavṛtti the date of its composition is given as S'aka 1758 corresponding to 1836 A. D. (Vide No. 3177 of the Notices of Sanskrit MSS. by Rajendralala Mitra. Vol. IX. 1888). In his Nāmaliṅgānuśāsanavyākhyā Mugdhabodhinī, Bharatasena says that the commentary was written according to the Mugdhabodha school of Vopadeva. Therefore it is presumed that Bharatasena must have belonged to the Mugdhabodha school and that the Kārakollāsa also must belong to that school. M. M. Haraprasada S'āstri (1930 A.D.) says that he had seen the author's great-grand-son Lokanāthamallika.

Complete.

Beginning :

त्रैलोक्यत्राणकर्तारौ नत्वा गौरीमहेश्वरौ ।
करोति कारकोल्लासं पद्येन भरतो भिषक् ॥
कारकं स्यात् क्रियामूलं क्रिया धात्वर्थ उच्यते ।
धातवस्त्रिविधा धीरैरुक्ताः केचिदकर्मकाः ॥
सकर्मकाश्च कतिचित् कतिचिच्च द्विकर्मकाः ।
न साधयितुमीशा ये वस्त्वन्तरमकर्मकाः ॥
सत्तामात्राद्यर्थकास्ते भूरादय उदीरिताः ।
त्राता भवति गोविन्दः सदा भाति महेश्वरः ॥
चित्ते तिष्ठतु मे शम्भुरेवमन्येऽप्यकर्मकाः ।
वस्त्वन्तरं साधयितुं समर्था ये सकर्मकाः ॥

End :

कारकोक्तविधिः स्वल्पं मयात्र परिकीर्तितः ।
विस्तरेणैव विज्ञेयस्तन्त्रान्तरविलोकनात् ॥

Colophon :

इति सद्वैद्यमालब्धीयश्रीहरिहरखानवंशोद्भवगौराङ्गमल्लिकात्मजश्रीभरतसेनकृतः कारकोल्लासः समाप्तः ।

697. 38. I. 7.

सरस्वतीकण्ठाभरणम्—भोजदेवकृतम्

Paper. 170 Foll. 8½ × 6⅝ inches. 14 lines in the page. Devanāgarī script. New. Good. Good writing.

As said before this also is a work on grammar of the later period written by Bhōjadeva, king of Dhārā. It is well known that the King Bhoja was a patron of Sanskrit and about twenty works have been ascribed to him. Bhoja was one of the Paramāra rulers of Mālwa and was the son of Sindhurāja (997 A.D.). Therefore Bhoja generally believed to

have flourished in the 11th Century A.D. Inscriptions of the king Bhoja are found dated 1062 A. D. The work is quoted by Vardhamāna in his Gaṇaratnamahodadhi. Bhojadeva says in his Rājamṛgāṅka that the work was composed in S'aka. 964 corresponding to 1042 A.D. The work is divided into eight adhyāyas each containing four padas, on the model of the Aṣṭādhyāyī of Pāṇini. On the whole it contains more than 6000 sūtras. The statement made by the editor of the work in the Trivandrum Sanskrit Series No. 117 as the work contains only seven chapters is not acceptable as this MS. contains the 8th chapter also.

Bhoja incorporates the Vārtikas, Uṇādi-sūtras, Paribhāṣās into the body of the work with the intention of making the study easier than that of Pāṇini's rules.

Complete in 8 adhyāyas.

प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव ।
श्रेयःपदमुमेशानौ पदलक्ष्म प्रचक्ष्महे ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठचटतव् । कपय् । शषसर् । हल् । सिद्धिः क्रियादेर्लोकात् । भूवादिः क्रियावचनो धातुः । जुचुलिम्पादिश्च । सनाद्यन्तश्चाणिङः । अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । कृत्तद्धितष्फङ्चाप्ट्यूङः । समासानुकरणे निपाताश्च ।

End :

असूयासंमतिकोपकुत्सनक्षियाशीः । प्रैषत्याख्यानेषु स्वरितः । उदात्तादनुदात्तः । उदात्तस्वरितपरश्च वा यणः । एकादे अपादादौ पादादिके वाक्ये । स्वरितस्यैकश्रुतौ सिद्धिः ।

Colophon :

इति श्रीमहाराजाधिराजपरमेश्वरभोजदेवविरचिते सरस्वतीकण्ठाभरणनाम्नि व्याकरणे अष्टमोऽध्यायः ।

698. 39. I. 8.

सरस्वतीकण्ठाभरणव्याख्या हृदयहारिणी— दण्डनाथनारायणभट्टकृता

Paper. 1247 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 7 volumes or 8 parts on the whole, the volume 3 containing 2 parts. The pagination in parts 1 to 3 is continuous as 1 to 1043 and in parts 4 to 8, as 1 to 1449.

This is a good commentary on Bhojadeva's Sarasvatīkaṇṭhābharaṇa described under the last number. The commentary was written by Nārāyaṇabhatta who is mentioned with the title Daṇḍanātha. Generally this title would mean a Minister or a Commander-in-Chief of a King. It is not clear under whom he was a Daṇḍanātha. The text and commentary have been published in the Trivandrum Sanskrit Series No. 117 wherein the editor of the work infers that the Commentator Nārāyaṇabhaṭṭa, as the title indicates, might have been the Commander-in-Chief or other officer in the Court of King Bhojadeva 11th Century A.D. But the inference merely based on the title is

faulty as the title Daṇḍanātha is seen to have been born even by the persons of the later period. For instance Sāluva Timma the commentator on the Bālabhārata, is said to have born the title Daṇḍanatha. Sāluva Timma was the famous minister of Kṛṣṇadevarāya, king of Vijayanagara (1569—1530 A.D). Thus there is no satisfactory evidence to fix our commentator definitely to certain period. The codex reads the textual sūtras also.

Wants beginning in the first pāda of the first adhyāya and goes on up to the end of the seventh adhyāya.

Beginning :

मकारमितं करोति प्रत्याहारार्थम् । तस्योच्चारणं चतुर्भिः । चयः शश्छोऽमि इत्यकारेण । शावयम इति यकारेण । यरो ञमि ञम् वा इति ञकारेण । ङमो ह्रस्वाद्वा इति ङकारेण । झभञ् । झभ इति वर्णावुपदिश्य पूर्वौश्चान्ते ञकारमितं करोति प्रत्याहारार्थम् । तस्योच्चारणेमेकेन । अत आद् यञि इति यकारेण ।

End :

उत्तरस्य प्राक्षु यथादर्शनमुपदेशदर्शनादिष्टसिद्धिः । बहुलं छन्दसीत्यत आरभ्य यदित ऊर्ध्वमनुक्रमिष्यामस्तस्य संज्ञाप्रत्ययविधानादेः पूर्वे वा मध्ये पूर्वोपदिष्टसंज्ञाद्युद्देशानतिक्रमेणोपदेशोऽत्र द्रष्टव्यः । ते विप्रतिषेधे परं कार्यमिति समानाश्रये पूर्वत्रासिद्धं प्राग्जितादणित्यादेः प्रत्याहाराधिकारादेश्च समस्तस्याभीष्टस्य विधिः सिद्धिर्भवति ।

Colophon :

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य वृत्तौ हृदयहारिण्यां सप्तमोऽध्यायः समाप्तः ।

699. 10. C. 19.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 259 Foll. 15 × 3½ inches. 6 lines in a page. Bengali script. Old. Injured. Illegible writing.

Saṁkṣiptasara is one of the grammatical works of the later period, by Kramadīśvara. It is in the form of Sūtras and Vṛtti called Rasavatī. The author Kramadīśvara is mentiened in the colophons with the title Vādīndracakracūḍāmaṇi. It is said that the Vṛtti of Kramadīśvara was revised by Mahārājādhirāja Jumaranandin. Hence the work is also called *Jumaravyākaraṇa*. It is not possible to specify which portion of the Vṛtti was Kramadisvara's and which was Jumaranandin's as both are mingled together. As the Vṛtti quotes Kālidāsa, Māgha, Bhāravi, Murāri, Jayāditya (850 A.D.) and Kaiyaṭa (1050 A.D.), it may be assigned to the period later than the 11th Century A.D. The work is divided into the following 8 pādas—1. Saṁjñā-sandhipāda, 2. Tiṅantapāda, 3. Kṛdantapāda, 4. Taddhitapāda, 5. Kārakapāda, 6. Subantapāda, 7. Samāsapāda and 8. Prākṛtapāda.

Contains pādas 1 to 7 only. Foll. 19 to 26 give the sūtras alone contained in the 1st pāda.

Beginning :

शिवं प्रणम्य सर्वेशं सर्वभाषासुलक्षणम् ।
संक्षिप्तसारमाचष्टे पण्डितः क्रमदीश्वरः ॥

वृद्धिरादैजारालैचोऽङः । अङः स्थाने आत् ऐच् आर् आल् ऐच् इत्येते आदेशाः क्रमः क्रमवतामङ्गमिति यथाक्रमं वृद्धिः परिभाष्यत इत्यध्याहारः । संज्ञापरिभाषादेः सूत्रलक्षणम् ।

End :

सर्वैरेषा प्रयोक्तव्या भाषा वृद्धानुसारतः ।
बालव्युत्पत्तिदिङ्मात्रदर्शनार्थं तु लक्षणम् ॥

Colophon :

इति वादीन्द्रचक्रचूडामणिमहापण्डितश्रीक्रमदीश्वराचार्यकृतौ संक्षिप्तसारे महाराजाधिराजश्रीमज्जुमरनन्दिपरिशोधितायां वृत्तौ रसवत्यां सप्तमः समासपादः समाप्तः । समाप्तोऽयं व्याकरणाख्यो ग्रन्थः ।

The former owner of the MS.

श्रीगुरुप्रसाददेवशर्मणः पुस्तकमिदम् ।

Date of copying :

वैशाखस्य दशमदिवसे समाप्तोऽयं समासः ।

The name of the scribe :

श्रीगुरुप्रसाददेवशर्मणः स्वाक्षरमिदम् ॥

700. 33. C. 15.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Palm-leaf. 22 Foll. $15\frac{1}{8} \times 1\frac{3}{8}$ inches. 5 lines in a page. Oriya script. Old. Injured. Good writing.

Contain the Kārakapāda only.

701. 42. A. 100.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 42 Foll. $17\frac{1}{2} \times 3\frac{3}{4}$ inches. 6 lines in a page. Bengali script. Old. Injured. Good writing.

Contains the Kṛdantapāda only.

702. 42. A. 107.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 25 Foll. $17 \times 3\frac{1}{2}$ inches. 6 lines in a page. Bengali script. Old. Injured. Illegible writing.

Contains the Subantapāda only.

703. 42. B. 17.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 19 Foll. $17 \times 3\frac{1}{2}$ inches. 5 lines in a page. Bengali script. Old. Injured. Legible writing.

Contains the Tiṅantapāda only incomplete.

704. 42. B. 20.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 38 Foll. $16\frac{1}{2} \times 3$ inches. 5 lines in a page. Bengali script. Old. Injured. Illegible writing.

Contains the Samāsapāda only incomplete.

705. 42. B. 40.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 22 Foll. $16\frac{1}{2} \times 3$ inches. 6

lines in a page. Bengali script. Old. Injured. Legible writing.

Contains a fragment of the Subantapāda.

706. 42. B. 98.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 221 Foll. 13 × 3 inches. 10 lines in a page. Bengali script. Old. Injured. Illegible writing.

Contains the pādas Sandhi, Tiṅanta, Kṛdanta, Taddhita and Samāsa only.

707. 42. B. 111.

संक्षिप्तसारः वृत्तिसहितः—क्रमदीश्वरकृतः

Paper. 100 Foll. 16½ × 2¾ inches. 4 lines in a page. Bengali script. Old. Injured. Illegible writing.

Contains a fragment of Tiṅantapāda and Kṛdantapāda only.

708. 42. A. 2.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 76 Foll. 16 × 3 inches. 6 lines in a page. Bengali script. Old. Injured. Good writing.

A commentary on Kramadīśvara's Saṁkṣiptasāra by Goyīcandra who is mentioned with the title *Autthāsanika* which M. M. Haraprasādaśāstri explains to mean 'one to whom the king stands up and offers a seat in his court.' Goyīcandra is believed to have lived in the 12th Century A.D.

Contains the Subantapāda.

Beginning :

लुक् । नित्यानां पदानां प्रतिपत्त्यर्थं प्रकृतिप्रत्ययविभागपरिकल्पनं शास्त्रेण क्रियते ।

End :

प्रियात्राः प्रियात्रौ प्रियात्राः । प्रियात्राम , प्रियात्रौ, प्रियात्रान् । प्रियात्रा, प्रियात्राभ्यां, प्रियात्राभिः । प्रियात्रे प्रियात्राभ्यां, प्रियात्राभ्यः, प्रियात्रः; प्रियात्राभ्याम् , प्रियात्राभ्यः । प्रियात्रः, प्रियात्रो, प्रियात्राम् । प्रियात्रि, प्रियात्रोः, प्रियात्रासु ।

Colophon :

इति महापण्डितौत्थासनिकगोईचन्द्रविरचितायां वृत्तौ सुबन्तटीका समाप्ता ।

Date of copying S'aka : 1730.

709. 42. A. 4.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 16 Foll. 13½ × 3 inches. 6 lines in a page. Bengali script. Old. Injured. Legible writing.

Contains the Kārakapāda only incomplete.

Beginning :

क्रिया । नाम्न इत्यधिकारात् कर्त्रादिसंज्ञा नाम्न एव । अतः पश्य मृगो धावतीत्यादौ कर्तृसमुद्देश्येत्यादिना कर्मादिसंज्ञा नाशङ्कनीया । अविज्ञातायां क्रियायां तत्र मुख्यत्वं न ज्ञायते ; अत आह—क्रिया सर्वे धात्वर्थ इति । स धातोरर्थः कोऽपि परिस्पन्दनसाधनसाध्यः ।

End :

अयमपि योगो मान . . . विभागोऽभूत् । तथाहि लोके यस्य . . . ।

710. 42. A. 50.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 48 Foll. 16 × 3½ inches. 6 lines in a page. Bengali script. Old. Injured. Illegible writing.

Contains the Subantapāda.

Reads the following colophon :

इत्यौत्थासनिकगोयीचन्द्रविरचिता सुबन्तटीका समाप्ता ।

711. 42. A. 90.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 99 Foll. 15 × 3 inches. 7 lines in a page. Bengali script. Old. Injured. Good writing.

Contains the Samāsapāda only.

Reads the following colophon :

इत्यौत्थासनिकश्रीगोयीचन्द्रविरचितायां महाराजाधिराजजुमरनन्दिपरिशोधितायां वृत्तिटीकायां सप्तमः समासपादः समाप्तः ।

712. 42. B. 99.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 27 Foll. 12 × 3 inches. 7 lines in a page. Bengali script. Old. Much injured. Illegible writing.

From the introductory stanza given below it is understood that Jumaranandin did not revise the portion of the Taddhita chapter of Kramadīśvara's Saṁkṣiptasāra and Goyīcandra wrote a commentary on the same to fill up the omission.

Contains the Taddhita portion.

Beginning :

जुमरनन्दिशोधितभागात्परिशिष्टमस्ति यत्किञ्चित् ।
तत्संपूर्णं कुरुते गोयीचन्द्रः प्रकीर्णया वृत्त्या ॥

स्त्रीपुंसाभ्यां नण् तद्बृन्दादयौ । तद्बृन्दादयो यावन्त एवार्थाः प्रयुक्तास्तेषु वाच्येषु स्त्रीपुंस् इत्येताभ्यामुत्तरे नण् भवति । स्त्रैणं पौंस्नम् ।

End :

अधात्विति किम् । सुनयिका । सुपाकिका । खट्विका । खट्वका । अखट्विका ।

Colophon :

इत्यौत्थासनिकश्रीगोयीचन्द्रविरचितजुमरनन्दिपरिशोधितपरिशिष्टं समाप्तम् ।

713. 42. B. 110.

संक्षिप्तसारटीका—गोयीचन्द्रकृता

Paper. 49 Foll. 15½ × 3 inches. 6 lines in a page. Bengali script. Old. Injured. Good writing.

Contains the Subanta portion incomplete.

714. 42. A. 83.

संक्षिप्तसारटीकाव्याख्या कौमुदी—अभिरामविद्यालंकारकृता

Paper. 32 Foll. 13½ × 3 inches. 7 lines in a page. Bengali script. Old. Injured. Illegible writing.

This is an exposition of Goyīcandra's Saṁkṣiptasāraṭīkā, by Abhirāmavidyālaṁkāra of Vandhyagaṭīya-gayaghaṭa family. The MS. does not give the names of the work and the author. However they are made out from Nos. 831 and 832, (page 222) of the India Office Library Catalogue, part II.

No. 831 reads the following colophon :

इति वन्द्यघटीयगयघटकुलोद्भवश्रीयुताभिरामविद्यालंकारभट्टाचार्यकृतौ संक्षिप्तसारटीकाव्याख्याने कौमुद्यां गोयीचन्द्रिकायां तिङन्तपादः समाप्तः ।

Foll. Nos. 25 to 29 are missing.

Contains the Kāraka portion incomplete.

Beginning :

विहिततद्धितादपि नाम्नः कर्त्रादिसंज्ञाविधानपूर्वकं प्रथमादिविभक्तिविधानार्थं तद्धितपादानन्तरं कारकपादमारभमाणः कारकेषु मुख्यत्वात् कर्तुर्लक्षणं प्रथममभिदधाति-क्रियेति । प्रकृतिप्रत्ययविभागपरिकल्पनया शब्दसाधुत्वप्रतिपादकशास्त्रस्य व्याकरणत्वे संज्ञासूत्रस्य कथं व्याकरणत्वम् । कर्त्रादिसंज्ञाविधानेन सुप्रत्ययान्तस्य प्रकृतिप्रत्ययविभाग एवात्र क्रियत इत्यदोषः ।

End :

कर्मत्वे सिद्धे कर्मवत्त्वमनर्थकम् । सामान्यधर्मस्य विशेषकथने धात्वर्थेनोपसंग्रहेऽपि विशेषकर्मसंबन्धे सकर्मकत्वसंभवे . . . ।

715. 42. B. 81.

संक्षिप्तसारव्याख्या सारार्थदीपिका—गोपालचक्रवर्तिकृता

Paper. 49 Foll. 14 × 2½ inches. 8 lines in a page. Bengali script. Old. Injured. Good writing.

This is a commentary on Kramadīśvara's Saṁkṣiptasāra by Gopālacakravartin, disciple of Kavicandra and a descendant of Vandyaghaṭi family. Kavicandra is also called Vaṁśīvadana in his Saṁkṣiptasāraṭippaṇī Vyākaraṇādarśa (Vide Nos. 823 to 829 of the India Office Library Catalogue, part II). Gopālacakravartin was also the author of the Jyotīratna wherein it is stated that the work was composed in the year Śaka 1594=1672 A.D. (Vide No. 75 of the Notices of Sanskrit MSS. Second Series By MM. Haraprasāda Śāstri, 1904.) The author therefore, must have belonged to the middle of the 17th Century A.D. For another copy of the work see No. 232 of the Notices of Sanskrit MSS. by Haraptrasada Sastri mentioned above.

Contains the 18th pāda only.

Beginning :

यः सर्वेषां मतमनुसरन् भाति तत्तत्स्वरूपो
दूरे वाचामपि च मनसां योऽन्तिकस्थोऽपि नित्यम् ।
यस्माद्विश्वं जगदपि च सत्सच्चिदानन्दमूर्ति-
र्विष्वग्ज्योतिर्जयति नितरां सर्वदा माधवः सः ॥
शम्भोर्बद्धवपुर्विरिञ्चिजननी वक्षःस्थलस्था हरेर्-
या सर्वैरपि वन्दिताङ्घ्रियुगला सूते त्वशेषं जगत् ।
वाणी वाङ्मयदेवताखिलमयी सर्वैरगम्यापि या
तां वन्दे निजभक्तकल्पलतिकां सच्चिन्मयीमम्बिकाम् ॥
अवाङ्मनसगम्य . . . . . ।
अमोघानन्दकृष्णं तं वन्दे श्रीगुरुमीश्वरम् ॥

आकृष्य टिप्पणीसारं विज्ञाय गौरवं मतम् ।
गोपालस्तनुते सूरिमुदे सारार्थदीपिकाम् ॥

* * * *

बृन्दारकबृन्दपरिचरितपदारविन्दद्वन्द्व श्रीमत्त्रिपुरहरनमस्कार एव परममङ्गलमिति श्रीशिवप्रणाममरूपं मङ्गलं ग्रन्थकृदाचरति—शिवमित्यादि ।

Colophon :

इति विविधविद्याविशारदश्रीकविचन्द्रचरणारविन्दद्वन्द्वमिलिन्दवन्द्यघटीकुलोद्भवश्रीगोपालचक्रवर्तिविरचितायां सारार्थदीपिकायां प्रथमः संज्ञासन्धिपादः समाप्तः ।

716. 42. B. 77.

संक्षिप्तसारव्याख्या सारार्थदीपिका—गोपालचक्रवर्तिकृता

Paper. 59 Foll. $14\frac{3}{4} \times 3\frac{1}{2}$ inches. 6 lines in a page. Bengali script. Old Injured. Legible writing.

Contains the Samāsapāda only.

Reads the following Colophon :

इति विविधविद्याविशारदश्रीकविचन्द्रचरणारविन्दद्वन्द्वमिलिन्दवन्द्यघटीकुलोद्भवश्रीगोपालचक्रवर्तिविरचितायां सारार्थदीपिकायां सप्तमः समासपादः समाप्तः ।

717. 42. B. 98.

उणादिपरिशिष्टम्—क्रमदीश्वरकृतम्

Paper. 7 Foll. 13 × 3 inches. 10 lines in a page. Bengali script. Old. Injured. Illegible writing.

This is a supplement to the Kṛtpāda of the Saṁkṣiptasāra containing rules on the Uṇādi affixes together with a vṛtti by Kramadīśvara.

Complete.

Beginning :

वादेरुणादिर्वातादौ । वातादौ वाच्ये वादेरुत्तरे उणादिर्भवति । आदेशागमगुणवृद्धिह्रस्वादयो यथासंभवं परिकल्पनीयाः । वा—वायुः पवनः ।

End :

इति वादीन्द्रचक्रचूडामणिमहापण्डितश्रीक्रमदीश्वरकृतायां वृत्तौ कृच्छेषे उणादिपादः समाप्तः ।

718. 42. A. 12.

उणादिपरिशिष्टम्, वृत्तिसहितम्—क्रमदीश्वरकृतम्

Paper. 5 Foll. 13 × 3 inches. 6 lines in a page. Bengali script. Old. Injured. Illegible writing.

Wants the beginning ; otherwise complete.

719. 39. E. 24.

उणादिसूत्रवृत्तिः—शिवदासचक्रवर्तिकृता

Paper. 57 Foll. 8 × $6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on the Uṇādi portion of the Saṁkṣiptasāra described above. The commentator's name is Śivadāsacakravartin. J. Eggeling describes the work among the works belonging to the Kātantra school. (Vide No. 771 of the India Office Library Catalogue, part II).

Complete.

Beginning :

वादेरुणादिर्वातादौ । वातादौ वाच्ये वादेरुत्तर उणादिर्भवति । आदेशागमगुणवृद्धिह्रस्वादयो यथासंभवं परिकल्पनीयाः । वा-वायुः वातः । बन्ध-बन्धुर्ज्ञातिः सुहृच्च । पा-पायुरपानम् । कृञ्-कारुः शिल्पी ।

End :

लीङ् शिगादेशः शिग्रुः शोभाञ्जनः । कदि नुम्लोपः । कद्रूर्नागमाता । इति शिवम् ।

Colophon :

शिवदासचक्रवर्तिकृता उणादिसूत्रवृत्तिः समाप्ता ।

720. 33. C. 15.

जुमरकौमुदी—यदुनन्दनकृता

Paper. 113 Foll. 15⅛ × 1⅜ inches. 6 lines in a page. Oriya script. Old. Much injured. Legible writing.

A treatise on the Saṁkṣiptasāra school of grammar dealing with the formation of words according to that school by Yadunandana.

Contains the Kṛdanta and Kāraka portions.

Beginning :

योगीन्द्रमानसतडागविकासमान-
गङ्गाच्छलेन विगलन्मकरन्दधारी ।
तद्भक्तबृन्दनयनभ्रमरैर्निपीतं
वन्दे हरेः सकलकामदुघं पदाब्जम् ॥

कृत्सु शतृशानौ । अविशेषात् त्रिषु लिङ्गेषु कृत् शतृशानौ भवतः ।

End :

Colophon :

इति श्रीगोविन्दचरणैकशरणशाब्दिकयदुनन्दनविरचितायां जुमरकौमुद्यां प्रक्रियायां तृतीयः कृदन्तपादः समाप्तः ।

Colophon :

इति श्रीगोविन्दचरणैकशरणशाब्दिकयदुनन्दनप्रणीतायां जुमरकौमुद्यां प्रक्रियायां कारकपादः समाप्तः ।

721. 33. C. 15.

प्रक्रियादीपः—प्रद्युम्नाचार्यकृतः

Palm-leaf. 171 Foll. 15⅛ × 1⅜ inches. 6 lines in a page. Oriya script. Old. Much injured. Good writing.

A treatise dealing with the formation of words according to the Saṁksiptasāra school of grammar by Pradyumnācārya who is said to have born the title Vidyābhūṣaṇa.

Contains up to the end of Tiṅantaprakaraṇa.

Beginning :

लम्बोदरपदयुगलं बृन्दारकबृन्दवन्दितं वन्दे ।
भक्तजनकल्पवल्लीं जगदम्बामम्बिकां च गुरुम् ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । इति सूत्रचतुष्टी । एकादश प्रत्याहारा गृह्यन्ते । आदिवर्णोऽन्त्येन सह प्रत्याहारः । हलः अचः उक्तौ ।

End :

एवं सुमनायते । दुर्मनायते । देहायते । सखायते ॥

Colophon :

इति प्रद्युम्नविद्याभूषणाचार्यविरचिते प्रक्रियादीपे दशगणतिङन्तपादः समाप्तः । समाप्तश्चायं ग्रन्थः ।

722. 9. F. 30.

प्राकृतप्रकाशः—वररुचिकृतः

Paper. 3 Foll. $9\frac{3}{4} \times 6\frac{1}{2}$ inches. 32 lines in a page. Grantha script. Old. Much injured. Clear writing.

This is the well-known work on Prākṛta grammar written in Sūtra style. The author is named Vararuci who is, however, identified by some of the commentators with the famous author of the vārtikas on Pāṇini's grammar and also referred to by his synonymous name Kātyāyana in later works. According to this MS. the work is complete in eight chapters dealing with the first variety of the six kinds generally known in Prākṛta dialects namely---1. Māhārāṣṭrī, 2. S'aurasenī, 3. Māgadhī, 4. Paiśācī, 5. Cūlikāpaiśācī and 6. Apabhraṁśa. The metrical commentary on this work called Prākṛtamañjarī also is complete in eight chapters dealing with the first of the six varieties said above. But the printed book edited by E. B. Cowell consists of 12 chapters of which 1 to 9 correspond to 1 to 8 of this MS. and 10 to 12 deal with Paiśācī, Māgadhī and S'aurasenī.

Complete in 8 chapters.

Beginning :

आदेरतः । आ समृद्ध्यादिषु वा । इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु । लोपोऽरण्ये । ए शय्यादिषु । ओ बदरे देन । मयूरमयूखयोर्व्वा । चतुर्थीचतुर्दश्योस्तु ना । अदातो यथादिषु वा ।

End :

आ कुत्सायाम् । रे अरे हरे संभाषणरतिकलहाक्षेपेषु । विवमिवविआ इवार्थे । शेषः संस्कृतात् । निपाता विंशतिः ।

Colophon :

इति प्राकृतव्याकरणसूत्रे अष्टमः परिच्छेदः ।

723. 35. C. 18.

प्राकृतप्रकाशवृत्तिः मनोरमा—भामहकृता

Paper. 17 Foll. $10\frac{3}{4} \times 4\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

A commentary on Vararuci's Prākṛtaprakāśa by Bhāmaha. The commentary is called Manoramā. Though this MS. does not give the commentator's name, another MS. of the same work described under the next number mentions it as Bhāmaha. Cowell's edition of this work divides it into 12 chapters while this MS.

into 10 chapters. The chapters 10 to 12 found in Cowell's edition are combined into one *i.e.*, the 10th chapter in the MS. The last part of the last chapter dealing with S'aurasenī has no commentary like the printed edition.

Complete in 10 chapters.

Beginning :

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥

आदेरतः। अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यामस्तदादेरतः स्थाने भवतीत्येवं वेदितव्यम्। आदेरेतत् आपरिच्छेदसमाप्तेरत इति च आ अकारविधानात्। वा समृद्ध्यादिषु। समृद्धि इत्येवमादिषु आदेरकारस्याकारो भवति वा, समिद्धी। सामिद्धी। पअडं। पाअडं। आहिआई। माणंसिणी। पाडिवआ। सारिच्छं। पाडिसिद्धी। पासुत्तं। आसासो। पक्षे अहिआई इत्यादि। समृद्धिप्रकटाभिजातिमनस्विनीप्रतिपत्सदृशप्रतिस्पर्धिप्रसुप्ताश्च। आकृतिगणोऽयम्।

End :

अनन्त्य एच्च। मिपो लोटि च। आश्चर्यस्याच्छरिअं। दोलादण्डदशनेषु। शेषं महाराष्ट्रीवत्। "महाराष्ट्रोद्भावां भाषां विशुद्धं प्राकृतं विदुः" इत्युक्तेः।

Colophon :

इति वररुचिविरचितायां प्राकृतमनोरमायां वृत्तौ भाषाविभागो दशमः परिच्छेदः।

The reading of the above colophon is apparently wrong in respect of the authorship of the commentary as Vararuci.

The front page of the fol. 1 reads the following stanza :

"गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते तदपि खलु नो विस्मयपदम्।
तथायं जीमूतो लवणजलधेर्वारि मधुरं
फणी क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥"

The scribe adds :

"खखाङ्कचन्द्रवत्सरेऽगस्त्यनागसंयुते
पौषमासि कृष्णपक्षके विलेखितं हि पुस्तकम् ॥"

724. 11. D. 104.

प्राकृतप्रकाशवृत्तिः मनोरमा—भामहकृता

Paper. 24 Foll. 8 × 3¾ inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains 1 to 11 chapters ; and the text only of the 12th chapter.

The following additional stanza is read in the beginning.

वररुचिरचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण।
बुद्ध्या चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥

End :

प्रकृत्या दोर्दण्डदशनेषु। शेषं महाराष्ट्रीवत्।

Colophon :

दीर्घः संयुक्तपरः पादान्तो वा विसर्गबिन्दुयुतः ।
स गुरुर्वक्रो द्विकलो लघुरन्यः शुद्ध एककलः ॥

यथा—

गौरीवरं भस्मविभूषिताङ्गमिन्दुप्रभाभासितभालदेशम् ।
गङ्गातरङ्गावलिभासमानमूर्धानमानन्दितमानमामि ॥
रेफहकारव्यञ्जनसंयोगात्पूर्वसंस्थितस्य भवेत् ।
वैकल्पिकं लघुत्वं वर्णस्योदाहरन्ति विद्वांसः ॥

यथा—

जयति प्रदीपितकामो मम मानसहृदनिमज्जनान्नित्यम् ।
यस्य गलगरलदम्भान्मालिन्यं मेऽन्तरस्थितं लग्नम् ॥
यद्यपि दीर्घं वर्णं जिह्वा लघुं पठति सोऽपि लघुः ।
वर्णोस्त्वरितं पठितान् द्वित्रानेकं विजानीत ॥ ११ ॥
अरे रे कथय वार्तां दूति तस्यातिचित्रां
मम सविधमुपेष्यत्येष कृष्णः कदा नु ।
इति चटु कथयन्त्यां राधिकायां तदानी-
मतिगडगडदेहः केशवोऽप्याविरासीत् ॥
कनकतुला यद्वन्न हि सहते परमाणुवैषम्यम् ।
श्रवणतुला न हि तद्वच्छन्दोभङ्गेन वैषम्यम् ॥ १३ ॥
लक्षणविकलं काव्यं पण्डितसंसत्सु योऽबुधः पठति ।
हस्ताग्रलग्नखड्गैः कृत्तं शीर्षं न जानाति ॥ १४ ॥
रसबाणवेददहनैः पक्षाभ्यां चैव संमिता मात्राः ।
येषां ते प्रस्ताराष्टठडढणेत्येव संज्ञकाः प्रोक्ताः ॥१५॥
त्रयोदश टभेदाः स्युरष्टौ भेदाष्टकारजाः ।
डस्य भेदाः पञ्च ढस्य त्रयं णस्य द्वयं स्मृतम् ॥१६॥

End :

अथोद्गलितकम् । मुग्धपूर्वकमेव डगणयुगलेन रहितपदमुद्गलितकम् ॥ २८ ॥

उदाहरणमाकराद्बोद्धव्यम् । ऊह्यं वा ॥ २९ ॥
एवं गलितकादीनि वृत्तान्युक्तानि कानिचित् ।
लक्ष्याणि लक्ष्यमालक्ष्य शेषाणि निजबुद्धितः ॥

निजबुद्धित इत्यनेनैतदुक्तं भवति । **श्रीकालिदासादिमहाकविप्रतिबद्धसेतुबन्धादिमहाकाव्येषु** निबद्धानि गलितकोद्गलितकादीनि लक्ष्यमालक्ष्यैव यथास्मत्तात**चरणैरुदाहरणमञ्जर्यां** स्वबुद्धया लक्षितानि, तथैव शेषाण्यपि लक्षयितव्यानि सुबुद्धिभिरित्यास्तां विस्तरेणेत्युपरम्यत इति शिवम् ॥

इति गलितकप्रकरणं षष्ठम् ॥

रन्ध्रसूर्याश्वसंख्यातं मात्राच्छन्द इहोदितम् ।
सप्रभेदवसुद्वंद्वशतद्वयमुदीरितम् ॥ ३१ ॥
सोदाहरणमेतावदस्मिन्खण्डे मयोदितम् ।
प्रस्तारसंख्यया तेषां भाषणे पिङ्गलः क्षमः ॥३२॥
श्रीचन्द्रशेखरकृते रुचिरतरे **वृत्तिमौक्तिके**ऽमुष्मिन् ।
मात्रावृत्तविधायकखण्डः संपूर्णतामगमत् ॥ ३३ ॥
बाणमुनितर्कचन्द्रैर्गणितेऽब्दे वृत्तमौक्तिकं रुचिरम् ।
माघे वलक्षपक्षे पञ्चम्यां **चन्द्रशेखरश्चक्रे** ॥ ३४ ॥

Colophon :

इत्यलंकारचक्रचूडामणिच्छन्दःशास्त्रपरमाचार्यसकलोपनिषद्रहस्यार्णवकर्णधार**श्रीलक्ष्मीनाथभट्टात्मज**क**विशेखरचन्द्रशेखरभट्टविरचिते श्रीवृत्तमौक्तिके पिङ्गलवार्तिके** मात्रावृत्ताख्यः प्रथमः परिच्छेदः ।

समाप्तश्चायं वार्तिके पूर्वखण्डः ।

754. 20. I. 25.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 5 Foll. 18 × 1¾ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

This is the well-known manual of prosody in 6 adhyāyas by Kedārabhaṭṭa son of Pabbeka of Kāśyapa family. Pabbeka's name is variously spelt as Pabveka, Prabveka, Prabbheka etc. in various MSS. He is also described as well versed in Śaiva-Siddhānta and Vedic texts. The author gives the following names connected with the tradition of the science of prosody: Śiva, Subrahmaṇya, Sanatkumāra, Bṛhaspati, Indra, Ādiśeṣa, Piṅgala and his disciples. The topics dealt with in 6 adhyāyas are as follow: (1) Paribhāṣā, (2) Mātrāvṛtta, (3) Samavṛtta, (4) Ardhasamavṛtta, (5) Viṣamavṛtta and Ṣaṭpratyaya. The total number of metres dealt with in this work is said 136. As the work has been quoted by Mallināth who is believed to have lived in the early part of the 15th century, Kedārabhaṭṭā must have flourished before that date.

Complete.

Beginning:

सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥
वेदार्थशैवशास्त्रज्ञः पब्बेकोऽभूद् द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥
पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥
षडध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥
म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥

End:

संख्यैव द्विगुणैकोना सद्विरूध्वा प्रकीर्तितः ।
वृत्तस्याङ्गुलिकीं व्याप्तिमधः कुर्यात्तथाङ्गुलम् ॥
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ।
संख्यानमध्वयोगश्च षडेते प्रत्यया: स्मृताः ॥
शास्त्राक्षिशैलशैलेन्दुलोचनाब्ध्यनिलेन्दवः ।
षड्विंशतिर्वृत्तसंख्या छन्दसामभिधीयते ॥
म्रस्तभ्नज्या गणा ह्यष्टावेषां मयतभाः शुभाः ।
सस्तजैर्जस्तलैर्युक्तः सोत्तरोरुशुभप्रदः ॥

Colophon:

इति श्रीमद्वृत्तरत्नाकरे षष्ठोऽध्यायः ।

The two extra leaves are added at the end and they enumerate the metres dealt with in the 2nd adhyāya of the work.

755. 19. A. 6.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 2 Foll. 13½ × 1⅞ inches. 9 lines in a page. Teluge script. Old. Slightly injured. Good writing.

Wooden board is added to the front side of the MS.

Contains the third adhyāya only incomplete. A fly-leaf added at the begin-

ning gives the following list of authors and works on lexicography: Vyālinighaṇṭu. Viśvaprakāśa, Anuktamu. Saraṇa, Inanighaṇṭu, Dhanapālanighaṇṭu, Haima, Tārāpālinī, Viśva, Vaijayantī, Halāyudha, Dhanañjaya, Nānārtharatnamālā, Trikāṇḍaśeṣa, Amaraśeṣa, Ratnamālā, Ratnakośa, Rabhasa, Subhūtiṭīkā, Abhidhānaratnamālā, Rudranighaṇṭu, Cūḍāmaṇi, Bhallajanighaṇṭu, Nāmamālikā, Keśava, Śāśvata, Bhōjanighaṇṭu. Gopālanighaṇṭu, Yādava, Ajaya, Bhāguri, Śubhāṅga, Jaya, Dharaṇī, Utpalinī, Sajjananighaṇṭu. After the list it reads the following verses:

अमरो वैजयन्ती च विश्वश्चाथ धनंजयः ।
विश्वप्रकाशिका व्यालिरनुक्तः सरणोऽजयः ॥
इनो हैमस्तारपालो धनपालो हलायुधः ।
नानार्थरत्नमाला स्याद्रत्नकोशः सुभूतिकः ॥
त्रिकाण्डशेषोऽप्यमरशेषः स्याद्रत्नमालिका ।
भागुरिश्च शुभाङ्गश्च धरण्युत्पलिनी जयः ॥
केशवः शाश्वतो भोजो गोपालो यादवः स्मृतः ।
अभिधानरत्नमाला रुद्रश्चूडामणिस्तथा ।
नाममाला भल्लजस्तु रभसो वैजयन्तिका ॥

756. 20. I. 26.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 5 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The date of copying: Friday, the first day of the bright fortnight of Māgha month in Śaumya year.

757. 20. I. 27.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 5 Foll. $15 \times 1\frac{3}{8}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Name of the copyist—Bāvanārya.

758. 20. I. 30.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 7 Foll. $12\frac{3}{4} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Legible writing.

Complete.

The following stanza is added at the end:

"आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति विश्ववैरिवनितावैधव्यदस्ते भुजः ॥"

759. 23. B. 11.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 10 Foll. $13\frac{3}{4} \times 1\frac{1}{2}$ inches. 6 lines in a page. Telugu script. Old. Good. Good writing.

Complete.

The following stanza is added at the beginning:

"ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥"

760. 24. A. 15.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 12 Foll. 7 × 1½ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Complete.

The Name of the former owner of the MS.—Balarāmaśāstri.

761. 29. A. 8.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 11 Foll. (1-11). 16 × 1⅓ inches. 4 lines in a page. Telugu script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Complete.

The name of tbe author's father is spelt as Prabbheka.

762. 29. A. 8.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 7 Foll. (89-95), 16 × 1⅓ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

The name of the author's father is spelt as Pabbeka.

763. 30. L. 9.

वृत्तरत्नाकरः—केदारभट्टकृतः

Palm-leaf. 5 Foll. (20 to 24). 17 × 1½ inches. 9 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

764. 20. I. 30.

वृत्तरत्नाकरव्याख्या चन्द्रिका—प्रभावल्लभकृता

Palm-leaf. 38 Foll. 12¾ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

A commentary on the Vṛttaratnākara of Kedārabhaṭṭa by Prabhāvallaba son of Vināyaka who is mentioned with the title Vādīndra. The commentary is called Candrikā. The author belonged to Bhāradvājagotra and was a devotee of Sūrya. The commentary begins each adhyāya with a stanza in praise of Sūrya.

Wants the beginning; otherwise complete.

Beginning:

. . . . सामानाधिकरण्यायोगात् लक्ष्यं च तल्लक्षणमिति सामानाधिकरण्यविवक्षया स्वग्रन्थे लक्षणवाक्यस्यैव लक्ष्यरूपत्वकथने शिष्यबुद्धिसौकर्यं कृतम् । पूर्वग्रन्थवैलक्षण्यमपि सूचितम् । वृत्तरत्नाकर इति ग्रन्थनामधेयम् । वृत्तानां रत्नाकर इति स्वग्रन्थस्य रत्नाकरत्वनिरूपणेन तद्गतवृत्तानां रत्नत्वनिरूपणादेकदेशविवर्तिरूपकम् । यद्वा वृत्तरत्नानां वृत्तश्रेष्ठानामाकर इत्यर्थः । ततश्च तत्तच्छन्दोवृत्तेषु कानिचिदेव वृत्तानि श्रुतिसुखानि प्रदर्श्यन्त इति सूचितम् । नामपदं च प्रसिद्धावप्य . . . संप्रदायाभिज्ञकर्तृकत्वेऽपि संप्रदायातिरिक्तनूतनयत्किंचिदर्थकल्पनाशङ्कां स्वग्रन्थानादरणहेतुं परिहर्तुं विषयादिप्रतिपादनाय च पिङ्गलादिभिरिति चतुर्थश्लोकः ।

End:

एवमार्यावृत्ते प्रस्तारो दर्शितः। एवमन्येष्वपि मात्रावृत्तेषु तत्तल्लक्षणाविरोधेन प्रस्तारक्रम ऊहनीयः। एषु तु मात्रावृत्तेषु परान्तिकाचारुहासिनीवक्त्रविपुलाप्रभेदमात्रासमकादिषूक्तादिवर्णच्छन्दःस्विव चत्वारोऽपि पादास्तुल्यलक्षणाः। तेष्वेकैकपादमात्मप्रस्तारणेनैव प्रधानभेदान् संभवत उन्नीय पश्चात्तेषामन्योन्यमिश्रणेनान्येऽपि प्रकारभेदा उन्नेतुं शक्यन्त इति बोध्यम्। पाद इति।

भारद्वाजकुलाब्धिकौस्तुभमणेरद्वैतविद्यागुरो-
र्वादीन्द्रस्य विनायकार्यसुमतेः सूनुः प्रभावल्लभः।
नत्वा नाथमनूरुसारथिमिति श्रीवृत्तरत्नाकर-
व्याख्यां बुद्धिविशुद्धये व्यरचयत्संक्षेपतश्चन्द्रिकाम्॥

765. 24. A. 15.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Palm-leaf. 115 Foll. 7 × 1½ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

This is a good commentary on Kedārabhaṭṭa's Vṛttaratnākara by S'rīnātha son of Govindabhaṭṭa. The commentary is called Dhīs'odhinī.

Complete.

Beginning:

प्रणम्याखिललोकेशं पूर्वाचार्यानुसारिणा।
गोविन्दभट्टविदुषः श्रीनाथाख्येन सूनुना॥
मिताक्षरं प्रभूतार्थं छन्दःशास्त्रं प्रशस्तिमत्।
व्याख्यायते स्वधीशुद्धयै वृत्तरत्नाकराभिधम्॥

तत्रादौ श्लोकैस्त्रिभिराचार्यः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्तिहेतुभूतानेकसंपत्सिद्धयेऽभिमतां देवतां प्रणम्य विशिष्टजनपरिग्रहाय स्वाभिजात्यवृत्तीः संकीर्त्य श्रोतृजनसमाधानायाभिधेयं प्रयोजनपुरःसरं प्रतिजानीते—सुखेति।

End:

अर्थस्तावदयम्—एते पूर्वोक्ताः षड् विधयः प्रस्तारादयः प्रत्यया: प्रमाणानि मताः संमताः पिङ्गलादीनामाचार्याणामिति।

Colophon:

इति श्रीमता कविशार्दूलेन श्रीनाथेन विरचितायां धीशोधिन्याख्यायां वृत्तरत्नाकरव्याख्यायां षष्ठोऽध्यायः।

Then 5 extra leaves are added and they contain a few lines of the Sūryas'atakavyākhyā which will be described in the Stotra Vol. of the Catalogue.

766. 8. F. 58.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Paper. 26 Foll. 8 × 6½ inches. 25 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Breaks off in the 5th adhyāya.

767. 9. F. 82.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Paper. 6 Foll. 8¼ × 6¾ inches. 31 lines in a page. Grantha script. Old. Injured. Legible writing.

Bound in book form.

Breaks off in the 2nd adhyāya.

768. 28. A. 1.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Palm-leaf. 35 Foll. (30-64). 17¾ × 1½

inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The following additional stanza is found in the beginning:

" नखराग्रविनिर्भिन्नदनुजेन्द्रभुजान्तरम् ।
अधश्चोर्ध्वं च कण्ठस्य नरकण्ठीरवं भजे ॥ "

769. 29. A. 8.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Palm-leaf. 55 Foll. (17-71). 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

Complete.

The following additional stanza is found in the beginning:

नखराग्रविनिर्भिन्न + . नरकण्ठीरवं भजे ॥

770. 30. L. 9.

वृत्तरत्नाकरव्याख्या धीशोधिनी—श्रीनाथकृता

Palm-leaf. 19 Foll. 17 × 1½ inches. 9 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

771. 33. I. 27.

वृत्तरत्नाकरव्याख्या धीशोधिनी —श्रीनाथकृता

Palm-leaf. 50 Foll. 15½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

Complete.

The following additional stanza is found in the beginning:

नखराग्रविनिर्भिन्न + नरकण्ठीरवं भजे ॥

772. 24. N. 45.

वृत्तरत्नाकरव्याख्या मणिनिधिः—नारायण-पुरोहितकृतः

Palm-leaf. 18 Foll. 14¾ × 1¾ inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

A commentary on Kedārabhaṭṭa's Vṛttaratnākara by Nārāyaṇapurohita son of Nṛsiṁhayajvan. The commentary is called Maṇinidhi in this MS. and printed editions. But some MSS. call it Maṇi-mañjarī (Vide the next No. and the Trivandrum MS. described under No. 1323 of the Descriptive Catalogue of Sanskrit MSS. in the Palace Library Vol. VI.). This is also called Matimañjarī in the Madras Govt. Oriental Library MS. (Vide 1792. of the Descriptive Catalogue of Sanskrit MSS. in that Library, Vol. III.)

Breaks off in the 3rd adhyāya.

Beginning:

सुखसंतानसिद्ध्यर्थं नौमि ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥
मणिनिधिव्याख्यानप्रारम्भः ।
श्वेताम्बोधिस्थितं देवं शुद्धस्फटिकविग्रहम् ।
वाचि भूतिप्रदं साक्षाद्वन्दे गन्धर्वकन्धरम् ॥
नृसिंहयज्वनः पुत्रो नारायणपुरोहितः ।
वृत्तरत्नाकरव्याख्यां व्याकरोति यथामति ॥

अथ प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतानमस्कारं करोति—सुखसंतानेति। सुखस्य सौख्यस्य संतानः अविच्छेदः। यद्वा शोभनः संतानः प्रचयगमनम्; अविच्छेदेन लोकेऽस्य ग्रन्थस्य प्रचार इति यावत्। तस्य सिद्ध्यर्थं ब्रह्माच्युतार्चितं कमलजकमलाकान्तपूजितम्। गौरीविनायकोपेतं गिरिजा गजास्यसनाथं लोकशंकरं लोकस्य भुवनस्य शंकरं सुखकरं शंकरं शंभुं नौमि स्तौमि। गौरीभास्यगुहोपेतमिति पाठे अगजागजाननषडाननसमेतमित्यर्थः ॥ १ ॥

End:

स्वरशरविरतिर्ननौ रौ प्रभा ॥ १२ ॥ २० ॥
अभिनवतामरसं नजजाद्यः ॥ १२ ॥ २१ ॥
नयुगरयुगयुक् च गौरी मता ॥ १२ ॥ २२ ॥
भवति मनसि मे भवाङ्गादृता।
हिमगिरितनया शरीरप्रभा ॥ १२ ॥ २० ॥
प्रचलितहंसकुलं स्फुटमीनं
मलयभुवा मरुता परिधूतम्।
मधुसमये स तदा नरराज-
स्त्वभिनवतामरसं सर आयात् ॥ १२ ॥ २१ ॥
वलभिदुपलनीलदेहप्रभा
श्रुतिगणमुखरद्विजेन्द्रस्तुता।
गजमुखशिखिवाहनाभ्यां नता
वितरतु भवतां तु गौरी सुखम् ॥ १२ ॥ २२ ॥

An extra leaf at the beginning contains the Nārāyaṇāṣṭākṣaramantra.

773. 26. L. 32.

वृत्तरत्नाकरव्याख्या मणिमञ्जरी—नारायणपुरोहितः

Palm-leaf. 5 Foll. 17 × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Legible writing.

Same work as the Maṇinidhi described in the last number. The colophon found in this MS. calls the commentary Maṇimañjarī; but it is the same as that called Maṇinidhi in the previous No. and printed books.

Contains the 6th adhyāya only.

End:

प्रस्तारभूमयो यद्यष्टौ तर्हि तदन्तराले सप्ताध्वभूमय इत्यर्थः। तत्कल्पनं परस्परमसंमेलनम्। वृत्तस्याङ्गुलिकीं वृत्तिमथ कुर्यात्तथाङ्गुलम्। वृत्तस्य विन्यासे गुरोर्लघोश्चान्तराले आङ्गुलिकीं वृत्तिममेलनार्थं कुर्यात्। तदाङ्गुलीनामभेदः। तथा अध्ववदेकोन इत्यर्थः।

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया।
संख्यानमध्वयोगश्च षडेते प्रत्यया मताः ॥
मध्यान्ताद्यखिलस्थगा जसभमाः सूर्यानिलेन्दुक्षमा-
देवाः स्फीतरुगन्यदेशगमनप्रख्यातिकीर्तिप्रदाः।
मध्यान्ताद्यखिलस्थला रतयना वह्वयम्बुजाम्भोदिवो
वृत्तादौ मृतिशून्यतोत्तमसमृध्यायूंषि ते तन्वते ॥
मो भूमिस्त्रिगुरुः शुभं वितनुते भः पूर्वगुश्चन्द्रमाः
कीर्तिं योऽभ्युदयं पयः प्रथमलो नः स्वश्चिरायुस्त्रिलः।
वायुः सोऽन्तगुरुर्विदेशगमनं शून्यं नभस्तोऽन्तलो
रोऽग्निर्मध्यलघुर्मृतिं दिनमणिर्मध्येगुरुर्जो रुजम् ॥

Colophon:

इति वृत्तरत्नाकरव्याख्यायां मणिमञ्जर्यां षष्ठोऽध्यायः।

Then reads the following stanzas:

यदीया मन्दिरापन्नो भवं किमबलाबलम्।
वञ्चिता कर्त्रपादानकर्माधिकरणक्रियाः ॥
रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा।
मुक्ताशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा ॥

पत्रीभूतपयोदकाशिहविषोः कौ रक्षणीयश्छिरः
पद्दूरे शमभीतिरंहविषणो वाराकराद्यत्पदे ।
यत्स्मेराक्षिशिखिप्रदग्धवपुषौ पूरब्जभूसोदरौ
गोसूतायितगोपतीरथितगुर्योगोपटं तं भजे ॥
चक्रे तच्छत्रुमित्रे त्रिपुरविजयिनः स्यन्दनस्तत्पदाङ्क-
द्वैतीयीकाम्बुजाक्षी शरधिरपि स गौस्तद्विजाताधिनाथः ।
काण्डास्तज्जातजाताननकुहरचरा ज्या च तन्मस्तचक्री
यस्यासीत्सोऽवतान्नः शिशिरकरकरोल्लासिमौलिर्महेशः ॥

774. 10. B. 7.

वृत्तरत्नाकरव्याख्या मृतसंजीविनी—भास्करारायकृता

Paper. 72 Foll. $10\frac{3}{4} \times 5$ inches. 8 lines in a page. Devanāgarī script. Old. Injured. Good writing.

A critical commentary on Kedārabhaṭṭa's Vṛttaratnākara by Bhāskararāya, the well-known writer on Tāntric religion. From his Nityāṣoḍasikārṇavavyākhyā called Setubandha it is understood that he was also called Bhāsurānandanātha and the son of Konamāmbā and Gambhīrārāyadīkṣita. He was the pupil of Nṛsiṁhaguru and S'ivadatta. He gives herein the date of composition of the work as 1627 S'aka=1705 A.D. His other work Piṅgalacchandassūtravyākhyā Bhāṣyarāja is said to have been completed in Sam. 1793=1737 A.D. The India Office Library has, among its collection, a MS. of the Bhāṣyarāja which is said to have been copied in the same year as 1737 A.D. (Vide Nos. 565 and 566 of the India Office Library Catalogue, part I). He refers to his other two works on prosody named Chandaḥkaustubha and Chandobhāskara. Though this work is meant to be a commentary on the Vṛttaratnākara, it often gives interpretations to many of the sūtras of the Piṅgalachandas. The author incidentally mentions two other commentators on the Vṛttaratnākara *namely* Sulhaṇa and Haribhāskara and in disputable points he maintains Sulhaṇa's view after condemning Haribhāskara's criticism on Sulhaṇa. Thus among the three commentators on the Vrttaratnakāra, the chronological order is thus. (1) Sulhaṇa, (2) Haribhāskara, (3) Bhāskararāya. Haribhāskara gives the date of his work Vṛttaratnākaravyākhyā Setu as Sam. 1733=1676 A.D. The author is said to have borne the surname Bhāratī.

Complete.

Beginning :

योगपरोऽन्तेवासी लघुरपि दीर्घः सदा गुरुताम् ।
यदनुग्रहजमहिम्ना पिङ्गलनागो मङ्गलं ददताम् ॥
वृत्तरत्नाकरव्याख्यां संख्यावज्जनतोषणीम् ।
मृतसंजीविनीप्रख्यां प्रख्यापयति भास्करः ॥
वृत्तरत्नाकरव्याख्या भूयस्यः सन्ति यद्यपि ।
तथापि मृतजीविन्याः कलां नार्हन्ति षोडशीम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नसमाप्त्यर्थं स्वेष्टदेवतां प्रणमन् स्वग्रन्थनामोत्कीर्तयति—सुखेत्यादिपद्यत्रयेण । सुखं ब्रह्मानन्दः, संतानं पुत्रपौत्रादि, तयोः सिद्धिर्लाभः, तदर्थमिति केचित् । तदसत्, शास्त्रे तस्याः कामनाया अनुपयोगात् । अतः सुखसंतानयोरुक्तार्थयोः सिद्धिरर्थो यस्मात् तं शंकरमित्यन्ये । क्रियाविशेषण-

मिति परे। सुष्ठु खमाकाशो येभ्यस्तेषां वर्णानां संतानं समूहो ग्रन्थः, तत्समाख्या इत्यपरे। निर्विघ्नपरिसमाप्तिजं सुखं तस्य संतानः परंपरेत्येके।

End :

अत एव एकोनत्वमुक्तं, प्रथमभेदे लघ्वभावेनोद्दिष्टाभावात्। भूयागं विनैव लेखनं तु विसंध्यध्वयोग उच्यते। वंशेऽभूदिति छन्दःप्रतिपादकम्।

छन्दस्येवं परिक्लिष्टो बुधो भुवि न लभ्यते।
अन्ततो मत्कृतेरस्या मार्गज्ञोऽप्यतिदुर्लभः॥
श्रमेण यावता तीर्णो वृत्तरत्नाकरो मया।
तावतोऽपि परिज्ञाता भगवान् परमेश्वरः॥
कौस्तुभे खण्डितोऽप्येष मित्रशंकरगौरवात्।
पुनः संजीवितस्तस्मान्मृतसंजीविनी कृतिः॥
छादयन्तु खलाः कामं मृतसंजीविनीमिमाम्।
तथाप्युपायतः कोऽपि गृह्णीयान्मारुतिर्यथा॥
सिते सहस्यजदिने मुनिपक्षर्तुभूमिते।
शकेऽब्दे पार्थिवे पूर्णा काशीराट् तेन तुष्यतु॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरंधरछन्दोऽद्वैतसाम्राज्यधुरीणसकलतन्त्रार्णवबद्धसेतुश्रीमद्वम्भीरायभारतीदीक्षितात्मजभारत्युपाख्यभास्करायप्रणीतायां वृत्तरत्नाकरव्याख्यायां मृतसंजीविन्याख्यायां प्रत्ययाभिधानोऽध्यायः षष्ठः। समाप्तोऽयं ग्रन्थः।

775. 20. I. 29.

वृत्तरत्नाकरव्याख्या ललिता—कनकसभापतिकृता

Palm-leaf. 14 Foll. 18 × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

A brief commentary on Kedārabhaṭṭa's Vṛttaratnākara by Kanakasabhāpati son of Timmanāyaka.

Complete :

Beginning :

यदाज्ञावशतो विश्वं वृद्धिमेति च याति च।
तं महः परमं वन्दे विघ्नविध्वंसकारणम्॥
हेमसंसदधीशेन तिम्मनायकसूनुना।
वृत्तरत्नाकरव्याख्या क्रियते ललिताह्वया॥

सुखसंतानेत्यादिना सुखबुद्धयइत्यन्तेन श्लोकत्रयेण एतत्प्रकरणकारणेष्टदेवतानमस्कारं कृत्वा पब्बेकसूनुना केदारनाम्ना मया वृत्तरत्नाकरं नामैतत्प्रकरणं विरच्यत इति निर्दिशति।

End :

अनेन द्विगुणीकरणेन किं प्रयोजनमित्याशङ्क्याह-वृत्तस्येति। विन्यस्यमानवृत्तस्याधोऽङ्गुलिप्रमाणां व्याप्तिं कुर्यात्। अत्राङ्गुलिप्रमाणव्याप्त्याष्टौ वृत्तानि विन्यस्यान्तरेऽन्तरालेष्वङ्गुलिप्रमाणविधयः सप्त विन्यस्यन्ते। तत एवं द्विगुणीकरणेन प्रयोजनमस्त्येवेत्यर्थः।

Colophon :

इति श्रीकनकसभापतिविरचितायां वृत्तरत्नाकरव्याख्यायां ललिताह्वयायां षष्ठोऽध्यायः॥

The date of copying : Monday, the 30th day of Phālguna month in the year Saumya.

776. 29. A. 8.

वृत्तरत्नाकरव्याख्या ललिता—कनकसभापतिकृता

Palm-leaf. 17 Foll. 16 × 1¼ inches. 7

lines in a page. Telugu script. Old. Much injured. Illegible writing.

Complete.

777. 40. A. 43.

वृत्तरत्नाकरव्याख्या सुकविहृदयानन्दिनी—सुल्हणकृता

Paper. 28 Foll. $9\frac{1}{4} \times 4\frac{1}{4}$ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

A commentary on Kedārabhaṭṭa's Vṛttaratnākara by Sulhaṇa son of Bhāskara and grandson of Bālāditya of Ātreya family. As the cemmentary is said to have been criticised by Haribhāskara in his Vṛttaratnākaravyākhyā Setu, 1676 A.D. the date of this commentary must be earlier than 1650 A.D. He states that he has written certain work on prosody besides this; but does not mention its name. He also quotes a stanza for example wherein a king named Vindhyavarman is mentioned. The commentary is called Sukavihṛdayānandinī.

Complete.

Beginning :

श्रीकण्ठप्रभया युतं रुचिरया प्रोद्भासितं गङ्गया
नानावक्त्रविराजितं शशिकलापीडोच्छ्रयालंकृतम् ।
आर्योपेतमुपस्थिताखिलगणस्रक्भूजितं सर्वदा
छन्दःशास्त्रमिवेश्वरस्य जयति त्रैलोक्यवन्द्यं वपुः ॥
कृष्णात्रेयस्य गोत्रे समजनि तु पुरा दाक्षिणात्याग्रणीर्यो
बालादित्याभिधानो ननु सुकविरभूद्भास्करस्तस्य सूनुः ।
तत्पुत्रः सुल्हणाख्यः सुखललितपदं वृत्तरत्नाकराख्य-
च्छन्दोवृत्तिं स चक्रे कविवरहृदयानन्दिनीनामधेयाम् ॥

शास्त्रारम्भे शास्त्रकार इष्टदेवतानमस्कारपूर्वकं छन्दःशास्त्रसंबन्धप्रयोजनं श्लोकत्रयेणाह—सुखसंतानसिद्ध्यर्थं + सुखबुद्धये । वेदानामर्थाः वेदार्थाः । शिवो देवता येषां तानि शैवानि, तानि च तानि शास्त्राणि । वेदार्थांश्च शैवशास्त्राणि च जानातीति वेदार्थशैवशास्त्रज्ञः यः पब्बेको नाम द्विजोऽभूत्, तस्य केदारनामा शिवचरणाराधनपरः पुत्रोऽस्ति । तेन केदारेणेदं वक्ष्यमाणलक्षणं छन्दः क्रियते ।

End :

सोमं कश्यं पिबतीति कश्यपः, तस्य वंशे पब्बेकनामा विप्रोऽभूत् । यद्यपि कश्यशब्देन सुरोच्यते, तथाप्यत्र सोम उच्यते । सुरापानस्य ब्राह्मणानधिकृतत्वात् । अन्वयार्थेन क्रतुयाजित्वमुक्तं स्यात् । शिवस्यैते शैवाः, तेषां सिद्धान्तानां वेत्ता । विद विचारणे इत्येतस्य रूपम् । विद ज्ञाने इत्यस्य तु सेदृक्त्वात् । यो हि विचारयति सोऽवश्यं वेत्ति । न ह्यविदितं विचारयितुं शक्यते । विशेषेण प्रपश्यति स्वर्गापवर्गादिकमिति विप्रः । विमलमतिः अतिस्वच्छमतिः । शैवस्य शैवशास्त्रस्यावबोधे । तस्य पुत्रः केदारनामा शिवस्य चरणयुगाराधने एकाग्रं तल्लीनं चित्तं यस्य स तथा, तेन । अभिरामं प्रकारेण विस्तृतं वृत्तरत्नाकराख्यं छन्दः ।

Colophon :

इति सुल्हणविरचितायां सुकविहृदयानन्दिन्यां वृत्तरत्नाकरच्छन्दोवृत्तावध्यायः षष्ठः ।

778. 8. D. 70.

वृत्तरत्नाकरव्याख्या—नारायणभट्टकृता

Paper. 59 Foll. $9\frac{3}{4} \times 5$: inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

Bound in book form.

A commentary on Kedārabhaṭṭa's Vṛttaratnākara by Nārāyaṇabhaṭṭa, son of Rāmeśvarabhaṭṭa, son of Govindabvaṭṭa, son of Cāṅgadevabhaṭṭa, son of Nāganāthabhaṭṭa of Viśvāmitra family. There are reasons to think that the famous writers—Kamalākarabhaṭṭa and Nilakaṇṭhabhatta also belonged to the family of this author. In the last stanza read before the last colophon, the work is said to have been composed in Vikrama S'āka 1616=1559 A.D. at Kāsī. But according to the reading of the same stanza found in the India Office Library Catalogue No. 1094 and in the printed edition, the work was composed in Vikrama S'aka 1602=1545 A.D.

Complete: but wants the introductory stanzas in the beginning.

Beginning:

विशिष्टशिष्टाचारमूलभूतः 'स्वस्ति न इन्द्रो वृद्धश्रवाः' इत्यादिवैदिकलिङ्गकल्पितश्रुतिप्रमाणकविशिष्टदेवतानमस्कारजनितनिर्विघ्नादिस्वनामकीर्तनपूर्वकं स्वग्रन्थस्य ग्रन्थान्तरैरगतार्थतां सूचयन् सप्रयोजनं कर्तव्यसामान्यज्ञानपूर्वकं विशेषजिज्ञासुप्रवृत्तिसिद्ध्यर्थं सामान्यतः प्रतिजानीते---सुखेत्यादिश्लोकत्रयेण। ब्रह्माच्युताभ्यां विधातृविष्णुभ्यामर्चितं पूजितम्।

End:

केचित्तु तृजन्तेन समास इत्याहुः, तन्न। तृनो योगे न लोकाव्ययेति षष्ठीनिषेधादिति सर्वं मनोहरम्।

भट्टश्रीनागनाथात्समजनि विबुधश्चाङ्गदेवाख्यभट्टः

प्रासोष्टासौ तनूजं रघुपतिनिरतं भट्टगोविन्दसंज्ञम्।
विश्वामित्रान्ववायाम्बुधिविधुरधिकं वर्धते तत्तनूजो
विद्याब्धौ लब्धपारः प्रथितपृथुयशा भट्टरामेश्वराख्यः॥
नारायणेन सुधिया काश्यां निवसता सता।
वृत्तरत्नाकरे टीका तद्भुवा रचिताञ्चिता॥
ग्रन्थेऽस्मिन्गुणगणसत्त्वमुच्यते चेत्
स्वं कृत्यं गुणगणवन्न मन्यते कः।
तत्सन्तः शिरसि कृताञ्जलिस्तु याचे
शोध्यं तत्सदसदिहोदितं मया यत्॥
वेदभूयुतशके द्विखषड्भू (१६१६)-
संमिते सितकार्तिकरुद्रे।
ग्रन्थपूर्तिमुकृतं किल कुर्मो
जानकीरमणपूजनपुष्पम॥

Colophon:

इति वृत्तरत्नाकरटीकासमाप्तेयम्।

The Scribe adds:

संवत् १७४० श्रावणशुद्धदि १४ शुक्रे अद्येह नवानगमध्ये वास्तव्यश्रीगिरिनारायणज्ञातीयभट्टश्रीविद्याधरसुतभाणजीसंज्ञकेन लिखितेयं स्वार्थं वा परोपकारार्थायेति। पुत्रमाधवजी तथा रामचन्द्र तथा हरिराम तथा श्रीनाथ तथा श्रीकृष्णसंज्ञकानां पठनार्थम्।

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया।
यदि शुद्धमशुद्धं वा मम दोषो न जायते॥

779. 20. I. 28.

वृत्तरत्नाकरव्याख्या

Palm-leaf. 14 Foll. $14\frac{1}{2} \times \frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

This is an anonymous commentary on Kedārabhaṭṭa's Vṛttaratnākara.

Breaks off in the third adhyāya.

Beginning:

भवसञ्चितपापौघविध्वंसनविचक्षणम्।

विघ्नान्धकारभास्वन्तं विष्वक्सेनमहं भजे ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्काररूपं मङ्गलमाचरता पञ्चेकसूनुना केदारनाम्ना मया वृत्तरत्नाकरं नामैतत्प्रकरणं विरच्यत इति सुखसंतानमित्यादिना सुखबुद्धय इत्यन्तेन श्लोकत्रयेणाह । तृतीयश्लोके लक्ष्यलक्षणसंयुतमित्युक्तम् । अस्यार्थः—पूर्वशास्त्रेषु लक्षणमात्रमुक्तम् । लक्ष्यं तु ग्रन्थान्तरे द्रष्टव्यम् ।

End :

नगणौ भगणौ भगणरगणौ द्रुतविलम्बितम् । नगणद्वयमगणद्वयगणाः । स्फुटम् । सप्तमे पादावसाने यतिः । नगणद्वयरगणद्वयं प्रमुदितवदना । नगणयगणनगणयगणाः कुसुमविचित्रा । जगणसगणजगणसगणाः जलोद्धतागतिः । षष्ठे यतिः । जगणसगणत्रयैर्जगती । षष्ठे यतिः ।

780. 33. I. 27.

वृत्तरत्नार्णवः—नृसिंहभागवतकृतः

Palm-feaf. 29 Foll. (6-34) $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Much injured. Good writing.

This is a treatise on Sanskrit metres by Nṛsiṁhabhāgavata of Vepattur village. He was the son of Vīrama and Cena Veṅkaṭasūri and a disciple of Rāmānandayogin. The author states that he summarizes herein the science of prosody in 6 adhyāyas which was taught by Piṅgala and other authors in 12,000 granthas. The work is divided into six adhyāyas *namely* 1. Saṁjñādhikāra, 2. Mātrāvṛtta, 3. Samavṛtta, 4 and 5. Ardhasamavṛtta, and 6. Ṣaṭpratyaya.

Complete; but with lacunae in the middle.

Beginning :

श्रीरामानन्दयोगीन्द्रचरणाम्बुरुहद्वयम् ।
वन्दे यच्छिष्यबृन्देभ्यः पुरुषार्थप्रदायकम् ॥
यथा सुधाम्बुधिर्नित्यं भवति श्रीहरेर्मुदे ।
तथा नृसिंहरचितवृत्तरत्नार्णवोऽप्ययम् ॥
मात्रावर्णविभागेन यदुक्तं लौकिकं द्विधा ।
पिङ्गलादिभिराचार्यैश्छन्दस्तदिह कथ्यते ॥
द्वादशसहस्रपरिमितग्रन्थोक्तं पिङ्गलादिमुनिभिर्यत् ।
छन्दःशास्त्रं वक्ष्ये सुखबोधायेह तत् षडध्यायैः ॥
एतैर्मयरससंज्ञैस्तभजनसंज्ञैर्गणैश्च लघुना च ।
गुरुणा च वाङ्मयमिदं व्याप्तं श्रीविष्णुनेव जगदखिलम् ॥

तदुक्तं वृत्तरत्नाकरे—

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥
त्रिगुरुर्मगणः प्रोक्तो यगणस्त्वेकलः स्मृतः ।
मध्यलो रगणश्चान्त्यगुरुः सगण उच्यते ॥

End :

तत्तच्छन्दोजातवृत्तसंख्या द्विगुणिता यदि ।
एकोना भूमय इति प्रोक्ताः प्रस्तारकर्मणि ॥
संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तिताः ।
वृत्तस्याङ्गुलिकीं व्याप्तिमथ कुर्यात्ततो गुरुः ॥
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ।
संख्या चैवाध्वयोगश्च प्रत्ययाः षडुदीरिताः ॥

इति ।

श्रीहरिप्रीतिकामेन वृत्तरत्नार्णवो मया ।
कृतः सोऽयं हरेर्भूयान्मुदे क्षीराम्बुधिर्यथा ॥

इति श्रीरामानन्दपूज्यपादशिष्यचेन्नवेंकटसूरिवीरमसतीगर्भाब्धिराकोडुराड्वेप्पत्तूरश्रीनृसिंहभागवतविरचिते वृत्तरत्नार्णवे षट्प्रत्ययो नाम षष्ठोऽध्यायः ।

षण्णेत्राचलशैलाब्जनेत्रवेदाग्निभाधियैः ।
षड्विंशच्छन्दसो जातवृत्तसंख्या मया कृताः ॥

781. 9. D. 51.

वृत्तरत्नावलिः—कालिदासकृता

Paper. 10 Foll. 8 × 4¾ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a work on prosody containing 71 stanzas written in praise of Sarasvatī each stanza being composed in different metre so as to illustrate various metres in Sanskrit and containing the name of that metre illustrated. Besides this, the work does not give any rules or characteristics of the metres. Therefore, the work appropriately deserves to be mentioned among the stotra works. However, as the intention of the author was mainly to deal with the metres by the way of giving illustrations it is mentioned among the prosodic works. As regards the authorship of the work all the MSS. assign the work to one Kalidāsa. But some of the Tanjore MSS. ascribe the work to Veṅkaṭeśa son of Avadhānasarasvatī of Ātreya family while others to Kālidāsa. The Vṛttaratnāvalivyākhyā by an anonymous author (vide No. 787) also states that the author of the text was Veṅkaṭeśa. In order to harmonize these two conflicting statements, we may presume that the natural and real name of the author was Veṅkaṭeśa and his title name was Kālidāsa. There are two editions of the work, one published at Madras and the other at Mysore. In both the editions the author's name is mentioned as Kālidāsa.

Beginning :

पङ्क्तिच्छन्दसि मत्तावृत्तम्—

मा भूत्सङ्गो जननि जनैस्तैर्मत्ता येषां मतिरिह वित्तैः ।
भाग्योदारैर्भवतु विहारो भक्तैः सार्धं तव कृपया मे ॥१॥

चम्पकमाला—

भूमसगर्वानातनुषे त्वं देवि कनिष्ठानप्यतिभक्त्या ।
भावयतस्ते मूर्तिमुदारां चम्पकमालानिन्दकबाहाम् ॥

त्रिष्टुप् श्रीवृत्तम्—

भाति नगाग्रप्रतिनिधिशोभे हारझरी ते जननि कुचाभ्ने ।
श्रीर्वदनेन्दौ हसति सरोजे कान्तिमुपेतां सततविकासा ॥

यतिः—

वञ्चितमक्षैः कपटरसैर्मो वामदृशां च क्षुभितविवेकम् ।
निर्मलभावं कलयतु नित्यं देवि कटाक्षस्तव कमलश्रीः ॥

End :

आर्या—

आर्याकृतिस्त्रिजगतां गुरुणैकेन सदाधिकेन सहितायाः ।
वाग्देवि जयसि सा त्वं या साम्ना भवति सत्तमार्यागीतिः ॥

दण्डकवृत्तम्—

ननिनररुरुप्ररोषो भवेत्तस्य
सर्वजनो वश्यतां संततं गाहते ।
समधिकृतरूपशोभोज्वलाः सन्ति
वामालकाः संपदश्चातियक्षेश्वराः ॥ ७२ ॥

Colophon :

इति श्रीकालिदासविरचिता वृत्तरत्नावलिः संपूर्णा ॥

782. 19. N. 13.

वृत्तरत्नावलिः—कालिदासकृता

Palm-leaf. 12 Foll. $7\frac{3}{4} \times 1\frac{3}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete; without colophon.

783. 22. K. 17.

वृत्तरत्नावलिः—कालिदासकृता

Palm-leaf. 3 Foll. 15 × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 17th stanza.

784. 39. B. 4.

वृत्तरत्नावलिः—कालिदासकृता

Paper. 31 Foll. $13\frac{1}{8} \times 8\frac{1}{4}$ inches. 14 lines in a page. English script. Old. Good. Good writing.

Complete with colophon attributing the authorship to Kālidāsa.

This seems to be a transcript made from the MS. described above under No. 781.

785. 40. A. 36.

वृत्तरत्नावलिः—कालिदासकृता

Paper. 11 Foll. $8\frac{3}{4} \times 4\frac{1}{4}$ inches. 8 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Complete with colophon attributing the authorship to Kālidāsa.

786. 40. B. 71.

वृत्तरत्नावलिः—कालिदासकृता

Paper 10 Foll. 8 × 4 inches. 7 lines in a page. Devanāgarī script. Old. Good. Good writing.

Complete with colophon attributing the authorship to Kālidāsa.

787. 54. A. 33.

वृत्तरत्नावलिव्याख्या

Paper. 40 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made in 1942 from a MS. available in the Tanjore Palace Library.

A commentary on the Vṛttaratnāvali of Kālidāsa, described under the previous Nos. The commentator's name is not known.

Beginning:

श्रेयःप्राप्तिनिमित्तानि सेवितानि मनीषिभिः ।
श्रीरामगुरुपादाब्जरजांसि कलयामहे ॥
गुरोरपि च देवस्य नान्तरं प्राहुरागमाः ।
तस्मात्तयोश्च चरणं शरणं सततं वृणे ॥
देवता विष्णुरुद्राद्या नास्माकं दृष्टिगोचराः ।
सर्वदेवमयः साक्षाच्छ्रीगुरुः श्रेयसेऽस्तु मे ॥
श्रीमान् दन्तिमुखो देवः श्रेयांसि विदधातु वः ।
यत्प्रसादेन निर्विघ्नं सिध्यन्ति कृतिनां क्रियाः ॥

इह खलु कविकुलतिलकः पण्डितवर्यो वेंकटेशः प्रारिप्सितानन्तसंप्रदायाविच्छेदलक्षणफलहेतुभूतस्य मङ्गलस्य शिष्टाचारपरिप्राप्तत्वात् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्युक्तस्य ग्रन्थारम्भलक्षणत्वात्

समस्तमङ्गलात्मकं श्रीशब्दमादौ प्रयुञ्जानः प्राथमिकमाशीर्वादरूपं मङ्गलं निबध्नाति—श्रीमानिति । दन्तिमुखो गजाननः । देवः क्रीडाद्यनेकपुष्कलः । श्रीमान् अणिमाद्यैश्वर्यसंपन्नः । वो युष्माकं श्रेयांसि विदधातु । यत्प्रसादेन कृतिनां क्रियाः निर्विघ्नं निष्प्रत्यूहं सिध्यन्ति फलन्ति स देवः श्रेयांसि विदधात्विति ।

अवधानसरस्वत्याः सूनुनात्रिकुलेन्दुना ।
क्रियते वेंकटेशेन वृत्तरत्नावलिर्नवा ॥

* * * *

मा भूत्सङ्गो जननि जनैस्तैर्मत्ता येषां मतिरिह वित्तैः । भाग्योदारैर्भवतु विहारो भक्तैः सार्धं तव कृपया मे ॥

हे जननि जनयित्रि येषां मतिः शेमुषी वित्तैर्धनैः मत्ता भ्रान्तेति यावत्, तैः संगमो मा भूत् ।

End :

युगान्तजाम्भसि जगतीं निमज्जतीं
यथोत्तरेत्सकुतुकमादिसूकरः ।
त्वमुद्धराधिकरुचिराकृतिस्तथा
भवाम्बुधौ निमग्नमम्ब माम् ॥

हे अम्ब आदिसूकरः आदिवराहमूर्तिर्भगवान् युगान्ते प्रलये निमज्जतीं जगतीं भुवं यथा सकुतुकमुद्धरेत् उद्धृत्य यथास्थानं निवेशयेत् तथा अधिकरुचिराकृतिः सुन्दरमूर्तिरित्यर्थः, तस्मिन् भवाम्बुधौ मग्नं मामुद्धर । संसाराब्धेरुद्धृत्य तद्वासनाविद्यामुच्छिद्य नित्यशुद्धबुद्धमुक्तस्वरूपं प्रापयेत्यर्थः । रुचिरा वृत्तम् । जभौ सजौ ..... लक्षणम् । अमीषां त्रयाणां समवृत्तत्वेऽपि मत्तादिवृत्तवदाद्यपादादौ गणानामनुक्तत्वात् पृथगत्र कथनमिति ज्ञेयम् ।

..... मुक्ता जनतामुक्तबुद्धयः ।
वाचि भूतिसमृद्ध्यर्थं स्तोत्रं पठत सादराः ।
संक्षेपतः कृता व्याख्या वृत्तरत्नावलेर्मया ।
इथं शुभा हि मनोहरा
मरकतराजिभासुरा ।
कराम्बुजा कदम्बकोरका
कलावती कलयतु काङ्क्षितानि नः ॥

Colophon :

इति वृत्तरत्नावलीव्याख्या समाप्ता ।

मो भूमिस्त्रिगुरुः श्रियं वितनुते भः पूर्वगुश्चन्द्रमाः
कीर्तिं योऽभ्युदयं पयः प्रथमलो नः स्वस्तिरत्युच्चलः ।
वायुः सोऽन्त्यगुरुर्विदेशगमनं शून्यं नभस्तोऽन्त्यलो
रोऽग्निर्मध्यलघुर्मृतिं दिनमणिर्मध्येगुरुर्जो रुजम् ॥
मो भूमिः श्रियमादधाति यं जलं वृद्धिं र वह्निर्मृतिं
सो वायुश्चिरदूरदेशगमनं तं व्योम शून्यं फलम् ॥
जः सूर्यो रुजमादधाति विपुलां भेन्दुर्यशो निर्मलं
नो नाकः सुखमादधाति तदिदं प्राहुर्गणानां पृथक् ॥

788. 42. A. 127.

वृत्तलक्षणम्—श्रीनाथकृतम्

Palm-leaf. 3 Foll. 12 × 3¾ inches. 8 lines in a page. Bengali script. Old. Slightly injured. Illegible writing.

An independent work on Sanskrit metres by S'rīnātha. The exact title of the work is not mentioned in the MS. The work is different from S'rīnātha's commentary on the Vṛttaratnākara.

Incomplete.

Beginning :

श्रीनाथनामा धरणीसुरोऽहं
श्रीनाथपादाब्जयुगं स्मरामि ।
श्रीमन्मुरुच्छैवलिनी यतोऽभूत्
श्रीदं मुनीन्द्रैः परिवन्दनीयम् ॥

यद्यपि धीरबृन्दानां छन्दोग्रन्था अनेकधा ।
सन्ति तथापि हर्षाय सतामेकं करोम्यहम् ॥
अयुक्तं चेद्दर्शयामि प्रमादेनेह वा भ्रमात् ।
वचने तद्दयावन्तः संशोधयन्तु तद् बुधाः ॥
दीर्घं विसर्गसंमिश्रं संयुक्ताद्यं तथाक्षरम् ।
बिन्दुयुक्तं गुरु ज्ञेयं विकल्पेन पदान्तगम् ॥

End :

सूर्याश्वैः कविभिस्तु तन्निगदितं शार्दूलविक्रीडितम् ।

789. 30. E. 40.

श्रुतबोधः—कालिदासकृतः

Palm-leaf. 4 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains also another copy of the work which will be described separately in No. 792.

This is an elementary work on prosody. The work is attributed to one Kālidāsa who is mentioned in the colophon with the title Kavicakravartin.

Complete.

Beginning :

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥
संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥
यस्याः पादे प्रथमे द्वादश मात्रास्तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ ३ ॥
आर्यापूर्वार्धसमं द्वितीयमपि भवति यत्र हंसगते ।
छन्दोविदस्तदानीं गीतिं तामृतवाणि भाषन्ते ॥ ४ ॥

End :

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोडशाद्यौ मृगमदतिलके षोडशान्त्यौ तथान्त्यौ।
रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले वन्द्यैः कवीन्द्रैः सुतनुनिगदिता स्रग्धरा सा प्रसिद्धा॥
मो भूमिस्त्रिगुरुः श्रियं य उदकं पुत्रं ददात्यादिलो
रो मध्ये लघुरग्निरन्तमनिलो देशाटनं सोऽन्त्यगुः ।
तो व्योमान्तलघुर्धनापहरणं जोऽर्को रुजं मध्यगु-
र्भश्चन्द्रो यश उज्ज्वलं मुखगुरुर्नो नाकमायुस्त्रिलः ॥

Colophon :

इति कविचक्रवर्तिकालिदासविरचितः श्रुतबोधः संपूर्णः ।

790. 19. C. 61.

श्रुतबोधः—कालिदासकृतः

Palm-leaf. 3 Foll. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. 8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

The following stanza is read at the end instead of मो भूमिः etc. as given in the last No.

मध्यान्ताद्यखिलस्थगा जसभमाः सूर्यानिलेन्दुक्षमा-
देवास्ते तु रुगन्यदेशगमनप्रख्यातकीर्तिश्रियः ।
तद्वत्स्युर्लघवो गणा रतयना वाय्वम्बरापोदिवो
वृत्तादौ मृतिशून्यकोत्तमसमृद्धयायूंषि ते तन्वते ॥

Colophon :

श्रुतबोधः संपूर्णः ।

791. 19. N. 13.

श्रुतबोधः—कालिदासकृतः

Palm-leaf. 3 Foll. $7\frac{3}{4} \times 1\frac{3}{8}$ inches.

6 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the beginning and end.

792. 30. E. 40.

श्रुतबोधः—कालिदासकृतः

Palm-leaf. 4 Foll. 16½ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 24th stanza.

793. 33. I. 27.

श्रुतबोधः—कालिदासकृतः

Palm-leaf. 3 Foll. 15½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wants the beginning; otherwise complete.

794. 35. B. 152.

श्रुतबोधव्याख्या ज्योत्स्ना—माधवकृता

Paper. 9 Foll. 7¾ × 3½ inches. 14 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a short commentary on Kālidāsa's S'rutabodha. The commentary is called Jyotsnā in the introductory verse while Jñānataraṅgiṇī in the colophon. The author Mādhava was the son of Govinda. The author is said to have been an expert in mathematics.

Complete.

Beginning:

लम्बोदरपदद्वन्द्वं गीर्वाणगणपूजितम् ।
श्रीसिद्धिबुद्धिदं वन्दे प्रत्यूहध्वान्तभास्करम् ॥
गोविन्दतातपदपद्मयुगं प्रणम्य
श्रीमाधवो गणितशास्त्रविचारदक्षः ।
ज्योत्स्नाभिधां लघुपदां श्रुतबोधटीकां
छन्दोऽनभिज्ञशिशुसंघहितां तनोति ॥

तत्र तावत्कविः कालिदासाख्योऽभीष्टदेवतास्मरणरूपं मङ्गलं मनस्येव कृत्वा छन्दोग्रन्थान्तरापेक्षयास्मिन्ग्रन्थे विशेषं सूचयन् कर्तव्यं छन्दोग्रन्थमनुष्टुभा प्रतिजानीते—छन्दसामिति । स्पष्टार्थमपि पद्यं व्याख्यायते । अहं श्रुतबोधं श्रुतबोधाख्यं छन्दोग्रन्थं संप्रवक्ष्यामि ग्रन्थयिष्यामि । अविस्तरं विस्तररहितमतिसंक्षिप्तमित्यर्थः ।

End:

अथ विंशत्यक्षराकृतिजातेर्लोकप्रसिद्धयभावात् तामुपेक्ष्यैव एकविंशत्यक्षरायाः प्रकृतेः समवृत्तीयं लक्षणमाह—चत्वार इति । हे मृगमदमुदिते यत्र छन्दोजातौ प्रथमपादादौ चत्वारो वर्णा अलघवो गुरव एव स्युः । तथा षट्सु सप्तस्वपि द्वौ षष्ठे षष्ठो वर्णः, सप्तमे सप्तमो वर्ण इत्यर्थः । तद्वत् तथा षोडशस्याद्यौ प्रथमौ द्वौ वर्णौ चतुर्दशपञ्चदशौ, तथा षोडशान्त्यौ सप्तदशाष्टादशौ वर्णौ, तथान्त्यौ पादान्तभवौ द्वौ विंशैकविंशौ एते द्वादशवर्णा अलघवो गुरवश्चेत् प्रयुज्यन्ते, अर्थादन्ये वर्णा लघव एव प्रयोक्तव्याः, तदा हे रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिस्त्रिवारं सप्तभिश्चाक्षरैर्विरामो यतिश्च दृश्यते तदा हे बाले सुदति सेयं छन्दोजातिः वन्द्यैः कवीन्द्रैर्नाम्ना स्रग्धरेति प्रसिद्धा निगदिता कथितेत्यर्थः । मृगमदमुदिते मृगमदः कस्तूरिका तदङ्गरागेण मुदिते

संतुष्टे। रम्भा कदली तस्याः स्तम्भौ तद्वदूरू यस्याः सा चासौ कान्ता सुन्दरीति संबोधनम्।

Colophon :

इति श्रीकालिदासकविरचिते श्रुतबोधे ज्ञानतरङ्गिणी टीका समाप्ता।

The scribe adds :

संवत् अष्टादशवर्षे पूर्ण वर्षे मधुमाससितपूर्णिमायां वरपत्तनवास्तिपुरोहितोपनामकरामनाथात्मजविश्वनाथेनेयं लिखिता ज्ञानतरङ्गिणी स्वार्थं परोपकारार्थं च। लेखकपाठकयोरविघ्नमस्तु। श्रीभवानीशंकरप्रसादादस्मद्-गृहे चिरं तिष्ठतु।

Fol. 1 contains some miscellaneous verses on prosody taken from various works such as Vṛttaratnākara, Vṛttaratnāvali.

Then the following lines are written on Gomūtrikābandha.

गोमूत्रिकाबन्धोऽयम्,

वर्णानामेकरूपत्वं यत्रैकान्तरमर्धयोः।
गोमूत्रिकेति तं प्राहुर्दुष्करं तद्विदो विदुः॥

इति लक्षणात्।



नासुरोऽयं न वा नागो धरासंस्थो हि राक्षसः।
नासुरोऽयं न वा नागो धरासंस्थो हि राक्षसः॥

795. 8. D. 34.

अभिधानचिन्तामणिः—हेमचन्द्राचार्यकृतः.

Paper. 6 Foll. $9\frac{7}{8} \times 4\frac{3}{8}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

Bound in book-form.

This is a vocabulary of synonyms written by the famous Jaina author Hemacandrācārya, pupil of Devacandra. He flourished in the court of Kāmapāla Caulukya of Anhilvara between 1143 and 1172 A.D. (Vide page 202 of An Advanced History of India by R. C. Majumdar, 1946). He is said to have born in 1088 and lived till 1175 A.D. The work is also called Nāmamālā. Hemacandra was the author of several works on lexicography including the Anekārthasaṁgraha, Nighaṇṭuśeṣa and Deśīnāmamālā. His life has been fully described in the Prabhāvakacarita. The work is divided into the following six Kāṇḍas: 1. Devādhidevakāṇḍa, 2. Devakāṇḍa, 3. Martyakāṇḍa, 4. Bhūmikāṇḍa, 5. Nārakikāṇḍa and 6 Sāmānyakāṇḍa. The work has been published with the author's own commentary in the Yaśovijaya Jaina granthamālā, Bhavnagar and another critical edition of the text alone was published at St. Petersburg, in 1847.

The MS. contains the first kāṇḍa complete and the second kāṇḍa incomplete.

Beginning :

प्रणिपत्यार्हतः सिद्धसाङ्गशब्दानुशासनः ।
रूढियौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥
व्युत्पत्तिरहिताः शब्दा रूढा आखण्डलादयः ।
योगोऽन्वयः स तु गुणक्रियासंबन्धसंभवः ॥ २ ॥
गुणतो नीलकण्ठाद्याः क्रियातः स्रष्टृसंनिभाः ।
स्वस्वामित्वादिसंबन्धस्तत्राहुर्नामतद्वताम् ॥ ३ ॥
स्वात्पालधनभुङ्नेतृपतिमत्वर्थकादयः ।
भूपालो भूधनो भूभुग्भूनेता भूपतिस्तथा ॥ ४ ॥
भूमांश्चेति कविरूढ्या ज्ञेयोदाहरणावली ।
जन्यात् कृत्कर्तृसृट्स्रष्टृविधातृकरसूसमाः ॥ ५ ॥

End :

समाधिस्तु तदेवार्थमात्राभासनरूपकम् ।
एवं योगो यमाद्यङ्गैरष्टभिः संमतोऽष्टधा ॥ ८५ ॥
श्वःश्रेयसं शुभशिवें कल्याणं श्वोवसीयसं श्रेयः ।
क्षेमं भावुकभविककुशलमङ्गलभद्रमद्रशस्तानि ॥ ८६ ॥

Colophon :

इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां देवाधिदेवकाण्डः प्रथमः ।
स्वर्गस्त्रिविष्टपं द्यौदिवौ भुविस्तविषताविषौ नाकः ।

* * * *

तेषां यानं विमानोऽन्धः पीयूषममृतं सुधा ॥ ३ ॥

असुरा नागास्तडितः सुपर्णका वह्न्योऽनिलाः स्तनिताः।
उदधिद्वीपदिशो दश भवनाधी . . . . . ॥

796. 24. L. 29.

अभिधानरत्नमाला—हलायुधभट्टकृतः

Palm-leaf, 37 Foll. 17 × 1⅛ inches. 6 lines in a page. Grantha script. Old. Much injured. Illegible writing.

This is a vocabulary of synonyms and homonyms written by Halāyudhabhaṭṭa. The work is divided into 5 chapters, *viz*: 1. Svargakāṇḍa, 2. Bhūmikāṇḍa, 3. Pātālakāṇḍa, 4. Sāmānyakāṇḍa and 5. Anekārthakāṇḍa. The author is believed to be identical with those of the Piṅgalavyākhyā and the Kavirahasya. He is said to have lived in the 10th century A.D. There are two printed editions of the work: one was printed in 1861 at Leipzig, under the editorship of TH. Aufrecht and the other in 1940 at Madras in the Madras University Kannaḍa Series No. 6 under the editorship of H. Sesha Ayyangar, together with a Kannaḍa commentary.

Wants two lines in the beginning; otherwise complete.

Beginning:

. . . . भागुरिगोपालितादिशास्त्रेभ्यः।
अभिधानरत्नमाला कविकुलभूषणार्थमुद्ध्रियते ॥
स्वः स्वर्गः सुरसदनं त्रिदशावासस्त्रिविष्टपं त्रिदिवम्।
द्यौर्गौरमर्त्यभवनं नाकः स्यादूर्ध्वलोकश्च ॥

End:

अथानन्तरकल्याणसंप्रश्नादिषु कथ्यते।
अथो इति तथा प्रोक्तो नामाभ्युपगमादिषु ॥
सदा सना च नित्यत्वे स्वस्ति स्यान्मङ्गलादिषु।
इति हेतुप्रकारादिसमाप्तिषु निगद्यते ॥

Colophon:

इति हलायुधविरचिताभिधानरत्नमालायामनेकार्थकाण्डः समाप्तः ॥

797. 22. C. 37.

अमरखण्डनम्—श्रीहर्षकृतम्

Palm-leaf. 5 folios. 17¼ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The Foll. are numbered 85 to 89. The folio No. 88 is broken into two pieces.

The author attempts to find fault with the Nāmaliṅgānuśāsana of Amarasiṁha stating that it fails to mention many words and even errs in certain respects. The author is mentioned in the colophon as one Śrīharṣa apparently different from the famous author of the Naiṣadhīyacarita. The author quotes in support of his criticism the following works and authors: Paryāyaratnamālā by Maheśvaramiśra, Paryāyārṇava by Nīlakaṇṭhamiśra, Śabdaśabdārthamañjūṣā by Hamvīramiśra, Mañjarī by Sudarśanabhaṭṭācārya, Mucukundabhāṣyavivaraṇa by Mahendrācārya, Śāradātilakabhāṣyavivaraṇa by Saṅghabhaṭṭācārya who is mentioned as the teacher of the author, Śābarabhāṣyavyākhyā by Gadādhara, Bālabhāgavata by Maheśvaradīkṣita, Śabdacintāmaṇi by Pārthasārathimiśra who is mentioned as the father of

the author, S'abdaratna by Vajrakhadgabhaṭṭācārya, S'abdarūpamīmāṁsā, Nānārthacandrikā and Nānārthasiṁkhāmaṇi. It is also interesting to note that almost all of the above mentioned works and authors are referred to in the S'abdaliṅgārthacandrikāvyākhyā Dṛṣṭāntasiddhāñjana and its commentary S'arad, which will be noticed further in this volume. In the Dṛṣṭāntasiddhāñjana, its author Kallolabhaṭṭācārya mentions one S'rīharṣa as the author of a poem called Naiṣadha and a pupil of his grandfather Sujanabhaṭṭācārya. Perhaps our author may be identical with the same S'rīharṣa. The work may be assigned to the 18th century A.D.

Complete.

Beginning :

अतिचित्रमिदं हि चिन्त्यतां विबुधैरप्यबुधादिजल्पितम् ।
रसवन्ति भवन्ति तद्यथामरसिंहस्य कृतिप्रदर्शनम् ॥
तदिहैव विविच्यतेऽखिलं शतशस्त्वेवमिति प्रबोधयेत् ।
रसिकाः सरघास्तमालसद्वृदयं ते सदयं पिबन्तु भोः ॥

यथा—समाहृत्येत्यादावयमाशयः । विपुलसंकुलप्राचीनग्रन्थशब्दवर्गे रूपभेदादिपूर्वकं बहुलनामयावल्लिङ्गविशिष्टत्वेन ग्रन्थरचना क्रियत इति । एतद्रीत्यात्र न प्रतिपादितमितीदं न सम्यक् । यथा वा—हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनमित्यत्र 'हय उच्चैः श्रवा नीला शुभ्राङ्गी चक्रवाहनः । सूतोऽस्य मातलिश्चित्रो देवसारथिरित्यपि । वनं च चन्दनं देवकाननं नन्दनात्मकम् । देवोद्यानमित्यादिपर्यायरत्नमालारचितमस्ति नामबाहुल्यं हयादीनाम् । किंच मातलिर्माकलिस्तीव्रः सारथिस्तु हयंकषः इति रभसः । एवमेव तत्र तत्र कोशेषु वर्तते । तत्त्वेकमेव नाम रचितमिति बहुलयावन्नामता नास्तीत्यस्य निर्बन्धस्य भङ्गः । न च संक्षिप्तपदेन तद्दोषपरिहार इति वाच्यम्, तदपेक्षया विशेषपरिष्कारामावादश्रद्धेयत्वप्रसक्तेः ।

End :

अत एव शब्दशब्दार्थमञ्जूषायां च हेम जाम्बूनदपदे पुंसि चाहुर्विशेषका इति । एवमश्मसारमधुचषकादीनां यथायोगं योजनीयं सूक्ष्मधीभिरित्युपरम्यते । एवममरनिबन्धनस्याशास्त्रीयत्वमिति सिद्धान्तितम् ।

Colophon :

इत्थं विपक्षविबुधमस्तकन्यस्तसत्पदा ।
श्रीहर्षेण कृतं सन्तः पठन्त्वमरखण्डनम् ॥

798. 24. E. 42.

अमरशेषः

Palm-leaf. 2 Foll. (1-2) $13\frac{1}{8} \times 1\frac{1}{8}$ inches. 12 lines in a page. Telugu script. Old. Good condition. Good writing.

As the name itself indicates, the Amara-s'eṣa is a supplement to the Nāmaliṅgānus'āsana of Amarasiṁha. The author's name is not known. This work may not be confounded with the Trikāṇḍas'eṣa of Puruṣottama. The second stanza as given below has been quoted by Govindarāja in his commentary on the Rāmāyaṇa.

Apparently wants the beginning ; otherwise complete.

Beginning :

व्याघ्रादयो वनमृगाः श्वापदाः परिकीर्तिताः ।
गन्धर्वनगरं प्रोक्तमिन्द्रजालं महर्षिभिः ॥ १ ॥

राकामध्यगतश्चन्द्रः सूर्य इत्यभिधीयते ।
परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी ॥ २ ॥
भोजनं परिवेष्टिः स्यात्कल्माषः कृष्णपाण्डरः ।
यायावरास्तपःसिद्धा वानप्रस्थाः प्रकीर्तिताः ॥ ३ ॥
कृत्तिका बहुला प्रोक्ता पक्षस्तु बहुलोऽसितः ।
शुक्लो मधुरभाषी स्याद्रोहिणस्तु कटुः स्मृतः ॥४॥
वदन्ति श्वेतकाकीयमनुकूलार्थवादिनम् ।
अपुमान् षण्डकः षण्ड आशीर्दंष्ट्राभिधीयते ॥५॥
अमत्ता मत्तवद्भाति या स्त्री सा मत्तकाशिनी ।
सभेति पूज्यते सद्भिरास्थानं मण्डपं तथा ॥ ६ ॥
भीष्मः साहसिकः प्रोक्तो भीष्मो दुष्करकर्मकृत् ॥
प्रस्कन्नः पातितो ज्ञेयो जितकाशी जयावहः ॥७॥

End :

बह्वन्नपानो यो देशः स ज्ञेयोऽगस्तिदक्षिणः ।
गह्वरं गिरिकुञ्जेषु दम्भेऽपि च निगद्यते ॥ ४६ ॥
अरण्यानां संचरणं ते वनं पादचारणम् ॥ ४६½ ॥

Colophon :

इत्यमरशेषः समाप्तः ।

799. 28. J. 4.

आख्यातचन्द्रिका—भट्टमल्लकृता

Palm-leaf. 7 Foll. 12½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is a lexicon enumerating verbs in different groups of synonyms. The author was one Bhaṭṭamalla about whom nothing is known definitely. As Mallināṭha of the 14th century A.D. quotes him, he must be placed before the 14th century A.D. The work has been printed and published in the chowkhamba Sanskrit Series No. 82. It consists of three Kāṇḍas each kāṇḍa being divided into several vargas or chapters. The first kāṇḍa contains 5 vargas, *viz.* 1. Bhāvavikāravarga, 2. Buddhivarga, 3. Antaḥkaraṇavarga, 4. Vacanakriyāvarga and 5. Dhvanikriyāvarga. The second kāṇḍa also contains 5 vargas, *viz*—1. Manuṣyavarga, 2. Brāhmaṇavarga, 3. Kṣatriyavarga, 4. Vaiśyavarga and 5. Śūdravarga. The third kāṇḍa contains 4 vargas, *viz.* 1. Prakīrṇakavarga, 2. Sanādivarga, 3. Nānārthavarga and 4. Ātmanepadaparasmaipadavarga. The work is the same as that described under Nos, 4587 and 4588 of the Des. Cat. of Sanskrit MSS. in the collections of the Asiatic Society of Bengal Vol. VI. It is said that the work consists of 700 verses.

The MS. contains the first kāṇḍa only.

Beginning :

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥
आलम्बे निखिलालम्बं लम्बोदरपदाम्बुजम् ।
पदालम्बावलम्बेन लभतेऽलं बुधः श्रियम् ॥
वाणि कल्याणि कल्याणश्रेणिनिश्रेणिसंस्तवे ।
मदीयरसनावेद्यां विहरेष्टार्थदायिनी ॥
भूवार्यादिप्रकृतये पुरुषत्रयमूर्तये ।
सदाख्यातपदावाप्त्यै परस्मा आत्मने नमः ॥
संपूज्य गुरुपादाब्जे भट्टमल्लेन तन्यते ।
व्युत्पित्सूनां प्रचारार्थमेकार्थाख्यातपद्धतिः ॥
सत्तायामस्ति भवति विद्यते चाथ जन्मनि ।
उत्पद्यते जायते च प्ररोहत्युद्भवत्यपि ॥
विवर्तते संभवति सिद्धौ सिध्यति राध्यति ।
निष्पद्यते च राध्नोति साध्नोति फलतीति षट् ॥

End :

द्वे आत्मनोऽपि भूषादेः शिङ्क्ते गीते तु गायति ।
उपवीणयतीत्येतदुपगाने हि वीणया ॥

इति ध्वनिक्रियावर्गः ।

अत्र भावविकाराणां धियामिच्छादिकर्मणाम् ।
वाचां तत्संगतानां च पर्याया: प्राय ईरिता: ॥

Colophon :

इत्याख्यातचन्द्रिकायां प्रथमः काण्डः ।

After the colophon the following verse is written :

"सहस्याधिपतिः सूर्यः कर्कटस्य निशाकरः ।
मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः ॥"

The former owner of the MS.—Veṅkatarāyaśāstri. Two extra leaves added at the end contain a few lines from the Trikāṇḍaśeṣa.

800. 39. E. 6.

उणादिकोशः—महादेवकृतः

Paper. 55 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from a MS. available in the Bhandarkar Orientat Institute, Poona.

The work recites the words formed by adding the Uṇādi affixes as per Uṇādi rules of Pāṇini-school and gives the meaning of those words. The author was Mahādeva who had the surname Vedāntin and is generally mentioned as Vedānti-Mahādeva. Though the present work does not give any more information about the author, his other work *namely* Sāṁkhyasūtravṛttisāra describes the author as the pupil of Svayamprakāśatīrtha (Vide the colophon of the work : इति स्वयंप्रकाशतीर्थाङ्घ्रिलब्धवेदान्तिसत्पदेन महादेवेनोन्नीते सांख्यवृत्तिसारे प्रथमोऽध्यायः—See Sāṁkhyasūtravṛtti, edited by Dr. R. Garbe and published for the Bibliotheca Indica, Calcutta, 1888). The author in his another work *namely* Viṣṇusahasranāmaṭīkā states that it was composed in Sam. 1750= 1664 A.D. (Vide the catalogue of the Sanskrit MSS. in the Ragnunath Temple Library, Jammu, by M.A. Stein, page 197.) But R. Garbe in his introduction to the edition of the Sāṁkhyasūtravṛtti mentioned above fixes the author in 1600 A.D. approximately.

Complete in 5 pādas.

Beginning :

विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः ।
वायुर्वाते गुदे पायू रक्षके जायुरौषधे ॥
स्यात्पित्तशब्दयोर्मायुः स्वादू रुच्येऽथ सज्जने ।
साधुर्द्वौ त्रिषु शैघ्र्ये स्यादाशु तद्वति च त्रिषु ॥
ना व्रीहौ पाटले हालुर्दन्ते राहुर्विधुंतुदे ।
वस्त्रसायां स्त्रियां स्नायुः काकुः स्त्री विकृतौ ध्वनेः ॥
वासुर्हरावथायुर्नायुषि काष्ठे तु दारु वा ।
सानुः शृङ्गे बुधे मार्गे वात्यायां वल्लभे धने ॥
पार्वते समभूभागे स्त्रियां जानूरुपर्वणि ।
शोभने त्रिषु चारु स्यात्प्रियोक्तौ चाटुरस्त्रियाम् ॥

End :

सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरः स्थितः ।
सिंही क्षुद्रबृहत्योः स्याद्वासके राहुमातरि ।

व्याघ्रः स्यात्पुंसि शार्दूले रक्तौ रण्डकरञ्जयोः ॥
श्रेष्ठे नराद्युत्तरस्थः कण्टकार्यां च योषिति ।
घोरे हरेऽन्यवद्भीमे क्ष्मा पृथिव्यामथ त्रयः ॥
आद्ये बहुत्वे ग्रहणिग्रहण्यौ तु रुगन्तरे ।
आद्ये प्रधाने प्रथमश्चरमः पश्चिमेऽन्तिमे ॥
मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे ।
नपुंसकं तु कल्याणे सेवार्थे रक्षणेऽपि च ॥

Colophon :

इत्युणादिकोशे निजविनोदाभिधे वेदान्तिमहादेवविरचिते पञ्चमः पदः संपूर्णः ।

801. 23. I. 14.

एकाक्षररत्नमाला—माधवकृता

Palm-leaf. 6 Foll. 16 × 1⅜ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing,

Gives various meanings of each of letters of the alphabet in Sanskrit. The work is attributed to Mādhava, son of Māyaṇa of Bhāradvājagotra and the famous minister of king Harihara II of the Vijayanagar Empire in the 14th century A.D. The work is the same as described under R. No. 2280 (*a*) of the Triennial Catalogue of Sanskrit MSS. in the Government Oriental MSS. Library, Madras.

Contains the Svarakāṇḍa and Vyañjanakāṇḍa.

Beginning :

वेदविष्णुमहेशानकमठेष्वम्बिकेज्ययोः ।
अन्तःपुरे भूषणे च चरणे कारणे रणे ॥
अकारः कथितो धीरैरजिरे गौरवेऽपि च ।
आकारः सर्वगे भावे परितापे विधौ घटे ॥
ईषदर्थे विस्मये च संतोषामर्षयोरपि ।
सुखे नद्यां तथा सीम्नि चिरविस्मृतसंस्मृतौ ॥
लघुवस्तुनि च प्रोक्तः सलिलाक्षेपयोरपि ।
इकारः कुसुमास्त्रे च हारे चन्द्रमसः करे ॥
तथा करेणुकक्ष्यान्ते महीभृत्कुहरेऽपि च ।
भुजङ्गफणरत्नार्चिष्यग्रतोऽर्थे निरूप्यते ॥
ईकारः सायके सर्पे सरसीरुहकेसरे ।
शक्रचापे हरौ वाणीकमलारचनास्वपि ॥
क्षोणीभृत्कुहरे पद्मदले निगदितो बुधैः ।
उकारः क्षत्रिये शंभौ परमौलौ हरौ शुचौ ॥

Colophon :

इति हरिहररायामात्यस्य कृतौ नानार्थरत्नमालायामेकाक्षरकाण्डे स्वरकाण्डं संपूर्णम् ।

End :

. . . . . आ हा संबोधने व्ययम् ।
अहहेत्यद्भुते खेदे कथ्यते नामशासने ।
क्षमे दुर्विषहे रोधे विशेषे च निगद्यते ॥
क्षा स्त्रियां च . . . यां क्षं स्याद्दक्षे नपुंसके ।
क्षेत्रे निर्भर्त्सने चैव क्षोऽव्ययं मङ्क्षुवाचकम् ॥

Colophon :

इति हरिहररायामात्यस्य माधवस्य कृतौ एकाक्षररत्नमालायां व्यञ्जनकाण्डं संपूर्णम् ।

802. 33. I. 9.

एकाक्षररत्नमाला —हरिहररायकृता

Palm-leaf. 5 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Legible writing. The leaves are half-broken.

Same work as the above with different colophon and slightly different readings. The authorship herein is attributed to King Harihara II (14th century A.D.) under whom Mādhava was the minister.

Contains the Svarakāṇḍa and Vyañjanakāṇḍa.

Beginning :

अकारो ब्रह्मणि शिवे वासुदेवे च कञ्चुके ।
अम्बिकायां च योगे च कारणे भरणे रणे ॥
अन्तःपुरे भूषणे च चरणे चाङ्कणेज्ययोः ।
अकारः कथितो धीरैः कमठे गौरवेऽपि च ॥
आकारः सर्वगे भागे शरे तुङ्गे मदे घटे ।
ईषदर्थेऽपि संतोषे विस्मयामर्षयोर्विधौ ॥

Colophon of the Svarakāṇḍa :

इति हरिहररायमहारायचक्रेश्वरकृतनिघण्टौ स्वरकाण्डः प्रथमः ।

End :

अहहेत्यद्भुते खेदे कथ्यते नामशासने ।
क्षमे दुर्विषहे रोधे विशेषे च निगद्यते ॥
* * * *
क्षेत्रे च निर्भरे चैव दिवि क्षं वाचकं भवेत् ॥

No colophon is found for this chapter (व्यञ्जनकाण्ड).

The last page reads the following verses :

. . . . . स्कृत्वानामान्नरपतिरभूज्जेतुमहितान्
प्रतस्थे स्वात् सैन्यैर्द्विरदरथमुख्यैर्भुवि चिरात् ।
निहत्यारीन् सर्वा . . . . . .
. . . . रो जनविनुतकीर्तिर्निववृते ॥
अमोघैरैः कुर्वन्नहितनिवहानां कणहता-
नसंप्राप्तश्चित्रं सपदि नृपतिः प्रस . . . ।
. . . . . धरणितलादेत्यमुदितः
शशास क्ष्मामेकः सकलभुवनख्यातमहिमा ॥
अयमासृष्टयासृष्टस्वयमेवासृष्टशोभनास्थाङ्गः ।
शय . . . . . वने ॥
आमामधिगम्यासावां कृत्वा त्वं गतो महाराजः ।
आभिर्युद्धेंऽरातीन्हत्वादात् पक्षिणां यथेष्टं त्वाम् ॥
इनिभतनु . . . . .
. . स्थितो विभाति ।
इसदृशवसनो विलासहासै-
रिपतिफणामणिभूषणैरिहोर्व्याम् ॥
अयमीभिर्निहतारिः स्वयमी . . . . . ।
. . . . जनानामीभिर्विनुतयशा भाति हीसमो नृपतिः ॥
. . ऋङ्मन्त्रतन्त्रैर्विहितैकहोमामेमे चमेभावितामक्षि . . ।
. . . . स्वान्ते सदानन्दपदं लभन्ते ॥

803. 36. A. 2.

कल्पद्रुः—केशवदैवज्ञकृतः

Paper. 433 Foll. 8 × 6½ inches. 14 lines in a page. Grantha script. New. Good. Clear writing.

Bound in 2 Volumes.

This is a lexicon of synonymous nouns in three main kāṇḍas *namely* Bhūmi, Bhuvaḥ and Svaḥ each kāṇḍa containing different sub-kāṇḍas. The 1st contains 18 sub-kaṇḍas 2nd five and 3rd four. From the internal evidence the work is known to have been written in Kali year 4762 corresponding to 1660 A.D. (Vide stanza 83, page 414 of the printed edition.) The work has been printed and published in the Gaekwad's Oriental Series No. 42. The author mentions the following authors

whose works were consulted in writing this work. They are Kātya, Vācaspati, Vyāḍi, Bhāguri, Amara, Maṅgala Sāhasāṅka, Maheśa, and Hemacandra. In the Tanjore Library MSS. the author is called Keśavadaivajña and the work is named Nāmakalpadru. (Vide No. 4739 to 4741, Vol. IX).

Complete.

Beginning :

गुरुं श्रीदक्षिणामूर्तिं विभुं विश्वेश्वरं परम् ।
सर्वज्ञं तमनाद्यन्तं रात्रिदिवमुपास्महे ॥
काव्यवाचस्पतिव्याडिभागुर्यमरमङ्गलाः ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः ॥
समालोक्य मतान्येषां कल्पद्रुरखिलार्थदः ।
क्रियते केशवेनायं नामप्रकृतिबोधनः ॥

* * * *

विनायकः पृश्निशृङ्गो गस्त्रिधातुश्च तुन्दिलः ।
द्वैमातुरः स्याद्वेरम्बो विघ्नो लम्बोदरार्थकः ॥

End :

वचनं खलतिकादि बह्वर्थोत्पत्तिपूर्वकम् ।
स्त्रीपुंनपुंसकानां तु सहोक्तौ परलिङ्गता ॥
कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषे तु ज्ञेयं शिष्टप्रयोगतः ।
कल्पद्रौ केशवकृते फलिते नामसत्फलैः ।
स्त्र्यादीनां सर्वलिङ्गानां प्रकाण्डः सिद्धिमागतः ॥
इतीह शब्दकल्पद्रुण्य(?)सिकेशवनिर्मितः ।
भूर्भुवःस्वस्त्रिभिः काण्डैः संप्राप्तः सिद्धिमुत्तमाम् ॥

Colophon :

इति स्त्र्यादिसर्वलिङ्गकाण्डः ।

इति केशवकृतौ भूर्भुवःस्वराख्यपर्यायस्कन्धाः संपूर्णाः ।

The scribe of the original MS. adds: शार्वर्यब्दे तुलामासे प्रथमायां रवेर्दिने ।

The name of the scribe of the present MS: Tiru Tātadeśikatātāchariar of Villiyambakam, Chingleput Dt., Madras.

804. 21. A. 1.

क्रियानिघण्टुः—वीरपाण्ड्यकृतः

Palm-leaf. 4 Foll. $13\frac{1}{2} \times 1\frac{3}{4}$ inches. 9 lines in a page. Telugu script. Old. Good. Good writing.

Enumerates in 101 stanzas Sanskrit verbs of synonymous nature. The authorship is attributed to the King Vīrapāṇḍya, one of the Pāṇḍya Kings of South India in the 14th century A.D. The work has been printed in Telugu character and published by Dharmādhikāri Chakravarti Ayyangar of Mysore.

Complete.

Beginning :

धातुप्रयोगपर्यायाः शब्दशास्त्रनिरूपिताः ।
केचित्पाण्ड्यक्षितीशेन वक्ष्यन्ते शिक्षितुं शिशून् ॥
विद्यतेऽस्ति भवत्यत्र स्यादस्तु स्ताद्भवेदपि ।
भूयाद्भवतु भवताद्विद्यतां श्रीर्जगत्त्रये ॥ २ ॥

End :

द्यूत्वा जरित्वा वृश्चित्वा क्षुत्वा वृत्वा विनृत्य च ।
तर्णित्वाथ क्षणित्वा च प्रक्षित्येत्यादि चोह्यताम् ॥

Colophon :

इति श्रीवीरपाण्ड्यविरचिते क्रियापदपर्यायः क्रियानिघण्टुरयं समाप्तः ।

Much injured. Good writing. Many leaves are broken.

The work is called S'eṣāmara in the colophons.

Breaks off in the last chapter.

The former owner of the MS.—Vatsam Vāsudevaparabrahmas'āstri.

812. 20. K. 41.

दृष्टान्तसिद्धाञ्जनव्याख्या शरत्—चकोरभट्टाचार्यकृता

Palm-leaf. 12 Foll. 17 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The Foll. are numbered 145 to 156.

This is a commentary on Kallolabhaṭṭa's Dṛṣṭāntasiddhāñjana which itself is a commentary on Sujanabhaṭṭa's S'abdalingārthacandrikā. The commentary was written by Cakorabhaṭṭācārya, son of Mukundanārāyaṇabhaṭṭācarya and grandson of Kallolabhaṭṭācārya, son of Kesaribhaṭṭacārya. Numerous names of authors and works which are mentioned in Amarakhaṇḍana are cited in this work. A work called Vis'eṣapadavāridhi is said to have been written by his father Mukundanārāyaṇa. Hamvīramis'ra, the author of the Sabdas'abdārthamañjūṣā is mentioned as the pupil of S'itikaṇṭha. Sujanabhaṭṭa, the author of the S'abdalingārthacandrikā is mentioned as the pupil of Divākarabhaṭṭa who wrote Sarvārthas'ikhāmaṇi.

Complete in three Kāṇḍas.

श्रीजगज्जननीं गौरीमम्बामम्बुजलोचनाम् ।
चन्द्रार्धशेखरां बालां नमामि गुरुपूजिताम् ॥
सर्वसहायां गीःसर्वसहकूटस्थमार्यकम् ।
सुजनं सुजनाधारं वन्दे वन्दारुनन्दकम् ॥
श्रीमत्पण्डितकेसरीश्वरमतिप्राबल्यपाण्डित्यकं
तत्पुत्रं सकलागमान्तगमिताम्बामन्त्रमाहात्म्यकम् ।
श्रीसाम्बापरमूर्तिमन्तमधुना विद्वत्कल्लोलाख्यकं
वन्दे मत्प्रपितामहं कुलधनं मद्विद्यया तोषितम् ॥
पुनः पुनस्तं पितरं सुपूजितं
समस्तविद्याखिलसारसंग्रहम् ।
कविप्रकाशं करुणारसाकरं
मुकुन्दनारायणभट्टमीडे ॥
विद्वच्चकोरवरनाम विधाय मोदा-
द्विद्यानिधिं सकलसुन्दरवाक्यजालम् ।
दृष्ट्वैव मां मुदमवाप पितामहो यो
वन्दे तमेव पुनरेव महानुभावम् ॥
तैनैव चोदित इह प्रकटं करिष्ये
सिद्धाञ्जनार्चितपदावलिमूलकन्दे ।
मूले समस्तवरनाममतानुसारं
कुर्वे शरत्सकलकोशपदाभिरामम् ॥
उभयानन्दसंधानशरदानन्दभाग्भवेत् ।
कश्चकोरकवीन्द्रेण विना भूखण्डमण्डले ॥
पितामहेन ये शब्दा लीलया परिशीलिताः ।
तत्तदन्यपदाकाशं कुर्वेऽहं तदनुज्ञया ॥

ननु शंकर इत्यत्र प्रथमतोऽर्थप्रकटनं किमिति न कृतवानिति शङ्क्यमिति चेन्न । उत्तरकोशविवरणात्तदर्थस्फूर्तेर्द्वितीयार्थप्रतिपादनाभावाच्चेति भावः । मेघे पुष्कलाख्यपुत्रे । तदुक्तम्—

पुष्कलावर्तकौ नाम विद्येते मेघनायकौ ।
तत्र पुष्कलमेघस्य सारस्वतविरोचनौ ॥
पुष्कलाक्षश्च धर्मश्च बलाहकविमर्दनौ ।

आवर्तकस्य च तथा चत्वारो लोकविश्रुताः ॥
जीमूतश्चण्डवेगश्च वारुणश्च जगद्धनः ॥

इत्यादि ।

End :

तदुक्तं भागवतपुराणे नदीगणनाप्रस्तावे—चर्मण्वती च वैदेही कोकिला जम्बुकन्यका । इत्यादिना । पिप्पलो नाम नद्यां स्याद्वैदेही शम्बरा पुरा । इति पर्यायार्णवे । लिङ्गादीत्यादिशब्देन शब्दविकारादय इति यथायोगं मन्तव्यम् । इत्येवं प्रकारेणेति संबन्धः ।

Colophon :

इति श्रीमदनन्तसान्तसरस्वतीसारविलासपरशिवावतारसरसाग्रेसरसर्वाखर्वदुर्गर्वपूरितसूरिवरप्रणतिभासमानचरणयुगलविराजितसमस्तविद्याप्रविलसच्चतुरवचनमनोहरश्रीमद्विद्वत्कल्लोलभट्टाचार्यपौत्रेण श्रीमन्मुकुन्दनारायणभट्टाचार्यपुत्रेण विद्वच्चकोरभट्टाचार्येण विरचितायां शब्दलिङ्गार्थचन्द्रिकाव्याख्यानदृष्टान्तसिद्धाञ्जनव्याख्यायां शरदाख्यायां तृतीयः काण्डः संपूर्णः ।

813. 54. A. 38.

दृष्टान्तसिद्धाञ्जनव्याख्या शरत्—चकोरभट्टाचार्यकृता

Paper. 28 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript of the palm-leaf MS. mentioned in the last number.

Complete in three Kāṇḍas.

814. 21. M. 25.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 19 Foll. $13\frac{1}{8} \times 1\frac{1}{8}$ inches. 5 lines in a page. Grantha script. Old. Good. Good writing.

The fly-leaf at the beginning gives the name of the work as Dvirūpakōs'a.

A lexicon of selected synonymous words with two or more forms, by S'rīharṣa son of Srīhīra. The author is believed to be identical with that of the Naiṣadhīyacarita. Though the title is mentioned as Dvirūpakos'a the work actually deals with the words having three or more alternative forms. The work has been printed in Telugu character at Mysore with slightly different readings. This is different from the Dvirūpakos'a of Puruṣottamadevā printed in Bombay and Benares. The work consists of 222 verses.

Complete.

Beginning :

प्रबोधमाधातुमशाब्दिकानां
कृपामवाप्तुं च कवीश्वराणाम् ।
द्विरूपकोशो रचितो विचार्य
बहुप्रबन्धस्थितशब्दभेदान् ॥ १ ॥
ज्ञात्वा च पूर्वप्रचुरप्रयोगान्
प्रामाणिकोदाहरणानि मत्वा ।
रूपादिभेदेषु विलक्षणेषु
विचक्षणो निश्चिनुयात्सुशब्दान् ॥ २ ॥
द्विलिङ्गता प्रत्ययहल्जभेदान्
सपञ्चकद्वित्रिचतुःप्रकारान् ।
भूम्न्येकवाचित्वमपीह वाचां
श्रीहर्षसूरिर्वितनोति कोशे ॥ ३ ॥
क्वचिन्मात्राकृतो भेदः क्वचिद्वर्णकृतोऽपि च ।
क्वचिद्विभक्तिभेदैश्च शब्दानां रूढितः क्वचित् ॥ ४ ॥

विद्यादगारमागारमपगामापगामपि ।
अरातिमारातिमथ श्रमः श्रामः प्रकीर्तितः ॥ ५ ॥
भवेदमर्ष आमर्षः अङ्कुरोऽङ्कूर एव च ।
अन्तरिक्षं चान्तरीक्षमगस्त्योऽगस्तिरित्यपि ॥ ६ ॥

End :

शैवालं शैवलं चापि शैवालः शैवलस्तथा ।
शिवालं चेति रूपाणि पञ्चधा परिकथ्यते ॥२२२॥
इत्थं सत्कविराजराजिमकुटालंकारहीरायित-
श्रीहर्षा(हीरा)त्मभवेन नैषधमहाकाव्योज्ज्वलन्मूर्तिना ।
उद्दृप्तप्रतिवादिमस्तकतटीविन्यस्तवामाङ्घ्रिणा
श्रीहर्षेण कृतो द्विरूपविलसत्कोशः सतां श्रेयसे ॥

Colophon :

इति द्विरूपकोशः समाप्तः ।

815. 20. O. 22.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 10 Foll. $13\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following colophon.

इति श्रीहर्षद्विरूपकोशः समाप्तः ।

816. 21. M. 26.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 14 Foll. 14 × 1 inches. 5 lines in a page. Telugu script. Old. Much injured.

Complete.

श्रीहीरात्मभवेन is the reading found in the last stanza here. The four introductory verses are written in the last page of the MS.

817. 21. M. 31.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 7 Foll. $12 \times 1\frac{1}{10}$ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

Breaks off in the 80th verse.

The fly-leaf at the beginning repeats the first 3 verses in Telugu script.

818. 24. K. 31.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 12 Foll. $15\frac{1}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

Complete.

The fly-leaf at the end gives some selected nouns with their declension.

819. 29. J. 34.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 3 Foll. (48-50) $17\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Breaks off in the 41st verse.

820. 29. M. 9.

द्विरूपकोशः—श्रीहर्षकृतः

Palm-leaf. 6 Foll. $18 \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Complete.

821. 28. B. 8.

नानार्थनिघण्टुसंग्रहः

Palm-leaf. 17 Foll. 17¼ × 1¼ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a collection of verses found in various lexicons of homonyms. At the end of each verse some letters are given to indicate the works from which the verses were taken, *viz.* वि for विश्वप्रकाश, के for केशवनिघण्टु, ह for हलायुधकोश and so on. The author's name is not given.

Wants the beginning and end.

Beginning :

कटकं वलये सानौ राजधानीनितम्बयोः ।
सामुद्रलवणे दन्तमण्डने दन्तिनामपि ॥ वि ॥
तिमिरे कृष्णवर्णे तु मेचकं वाच्यवद्भवेत् ।
लम्पाको लम्पटे देशे किंपाकः फलमूर्खयोः ॥ वि ॥
विपाकः कीर्त्यते स्वादौ परिणामे च दुर्गतौ ॥ वि ॥
विपाकः पचने स्वेदेऽप्यसत्कर्मफलेऽपि च ॥ के ॥

End :

स्वप्नः सुप्तस्य विज्ञाने अशनिः पविविद्युतोः ॥ ह ॥
ननु प्रश्नानुनययोस्तर्के संबोधनेऽपि च ॥ शा ॥
निबन्धनं तु संसर्गे हेतौ संयमनेऽपि च ।
कौतुके चानुरागे च लक्षेऽभिज्ञानमुच्यते ॥ ह ॥
मानमूको . . . . ।

822. 24. E. 42.

नानार्थनिघण्टुसंग्रहः

Palm-leaf. 1 Fol. 13⅛ × 1⅛ inches. 12 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Similar to the above (anonymous).

Incomplete.

Beginning :

राजा धनपतौ चन्द्रे यक्षे क्षत्रियशक्रयोः ॥ वि ॥
अजः पितामहे विष्णौ कंदर्पे शंकरे दरे ॥ ज ॥
अजो विधिरजो विष्णुरजः शंभुरजस्तु भः ।
अजस्त्रिवार्षिको व्रीहिरजो रामपितामहः ॥ ध ॥

End :

अङ्कः स्थानेऽन्तिके मन्तौ रूपकोत्सवलक्ष्मसु ।
सूत्रं तु सूचने ग्रन्थभेदे तन्तुव्यवस्थयोः ।
यात्रा तु याचनोपायगतौ देवार्चनोत्सवे ।
उदरं जठरे युद्धे . . . ।

823. 28. A. 77.

नानार्थमञ्जरी—राघवकृता

Palm-leaf. 54 Foll. 15 × 1⅛ inches. 7 lines in a page. Grantha script. New. Good. Good writing.

A lexicon of homonyms by Rāghava about whom nothing is known. The author refers to various authors and works on lexicography which were consulted in writing the work. It is curious to note that the two names *viz.* Vaijayantī and Yādava are dstinctly mentioned as if they were two distinct works while the Vaijayantī is generally held to have been written by Yādava *alias* Yādavaprakāśa.

Complete.

Beginning :

समस्तविद्यावेत्तारं सुमुखं श्रीविनायकम् ।
अज्ञानतिमिरादित्यं विघ्नघ्नं नौमि संततम् ॥

विश्वादीनि समाहृत्य बालानां ज्ञानसिद्धये ।
कविना राघवेणाद्य कृता नानार्थमञ्जरी ॥
विश्वप्रकाशो गोपालः शेषकारो धनंजयः ।
शब्दार्णवो वैजयन्ती सूर्यो रुद्रश्च यादवः ॥
प्रतापो भागुरिर्दण्डी रासभश्च हलायुधः ।
सुभूतिर्हरिविष्णू च वररुच्यमरोत्पलाः ॥
अजयः शाश्वतश्चैत उच्यन्ते पण्डितैः पुरा ।
ओं प्रश्नेऽङ्गीकृते रोषे प्रौढे ब्रह्मणि चाव्ययम् ॥
अः स्याद्ब्रह्मणि विष्वग्वीशकूर्माङ्गणरणेषु च ।
गौरवेऽन्तः पुरे हेतौ भूषणेऽङ्घ्रावुमेज्ययोः ॥
आः प्रगृह्यः स्मृतौ वाक्ये परितापे पितामहे ।
घटे भावे च आस्तु स्यादव्ययं कोपपीडयोः ॥
आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ।
इर्वितर्के स्मरे हारे फणरत्नद्युतौ पुमान् ॥
अग्रे करेणुकक्ष्यान्ते गुहायां शशितेजसि ।

End:

प्रत्यक्षेऽधिकृतेऽध्यक्षो गवाक्षे जालके कपौ ।
रक्ताक्षी स्याद्वर्षभेदे ताम्रनेत्रस्त्रियामपि ॥
इति त्र्यक्षरक्षान्ताः ।
छायावृक्षो नमेरौ स्यान्महिषाक्षस्तु गुग्गुलौ ।
दिव्यचक्षुर्ज्यौतिषिके पार्थात्मज्ञानिनोरपि ॥
कमलाक्षः पद्मबीजे विष्णावपि पुमान् भवेत् ।
मल्लिकाक्षः पक्षिभेदे नीलाक्षेन्द्रायुधे पुमान् ॥
इति चतुरक्षरक्षान्ताः ॥ ९८७ ॥

Colophon:

इति राघवीये नानार्थमञ्जर्यामेवं वर्गाः परिसमाप्ताः ॥
या राघवकृता श्रेष्ठमातृकामार्गसंयुता ।
सैकाक्षरादिसंयुक्ता पूर्णा नानार्थमञ्जरी ॥

There are 2 fly-leaves added at the beginning. The first leaf gives some astronomical accounts on the lunar eclipse occurred in the year S'ukla. The second leaf contains a stanza from the Saundarya-laharī.

824. 33. I. 24.

नानार्थमञ्जरी—राघवकृता

Palm-leaf. 38 Foll. $16\frac{1}{10} \times 1\frac{2}{10}$ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wants two Stanzas at the end; otherwise complete.

The fly-leaf in the beginning contains the following stray stanzas:

श्रीमत्प्रस्तरसद्मसौधकलशाकूपारगर्भोद्भवो
भूक्षिन्मान्यबलाधिराण्निजसभापूर्वाद्रिमस्तस्थितः ।
कुर्वन्कूटकलोकराण्मृधनिशारम्भे स्वयं भूषितां
कारुण्याकरचन्द्रमाः सुमनसः प्रह्लादयन्नेधते ॥
श्रीमन्न्यायविधायिसद्गणवृतः प्राक्कूटकारीश्वर-
स्वर्भानुप्रथनात्तमञ्जुलयशःश्लाघ्यप्रसादोत्करैः ।
सत्ताभाबुकवाग्मिचित्तकुसुदान्यामोदयन्भ्राजते
कारुण्याकरपूर्णिमेन्दुरपरः क्षोणीतलाभ्राङ्गणे ॥

825. 28. A. 76.

नानार्थरत्नमाला—इरुगप्पदण्डनाथकृता

Palm-leaf, 70 Foll. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

This is a lexicon on homonyms in six kāṇḍas namely: 1. Ekākṣarakāṇḍa, 2. Dvyakṣarakāṇḍa, 3. Tryakṣarakāṇḍa, 4. Caturakṣarakāṇḍa, 5. Saṁkīrṇakāṇḍa and 6. Avyayakāṇḍa. The author Irugappa was the Daṇḍanātha or minister of Harihara II

of Vijayanagar (1377 to 1404 A.D.) The author is believed to have been a Jaina and a pupil of Puṣpasena. From inscriptional evidences it is known that Irugappa erected a pillar in a Jaina temple at Vijayanagar in 1385 A.D. It is also said that Irugappa built a maṇṭapa in the Vardhamāna-temple at Tirupparuttikunram and in one of the pillars of the maṇṭapa the figure of Irugappa is carved. Therefore it is clear that our author lived in the latter half of the 14th Century A.D. Some of the MSS. of this work ascribe the authorship to Bhāskara. Perhaps it may be held that Bhāskara actually wrote the work and dedicated it to the minister Irugappa. Irugappa's name is variously mentioned in the MSS. as Nirupamadaṇḍanātha or Nigamadaṇḍanātha. The work is also called Jagadupakāriṇī in the colophons.

Complete.

Beginning :

यत्पादाम्बुरुहच्छाया देवचूडामणीयते ।
यस्य ज्ञानादयोऽनन्ताः स देवः श्रेयसेऽस्तु नः ॥
विविधग्रन्थसंदर्भविमर्दविमलीकृतम् ।
यस्य चेतः सरस्वत्या विलासमुकुरायते ॥
सोऽयं ग्रथ्नाति नानार्थरत्नमालां गुणोज्ज्वलाम् ।
श्रीमन्निगमदण्डेशो नात्यल्पां नातिविस्ताराम् ॥
काण्डैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः ।
संकीर्णाव्ययकाण्डाभ्यामिति षड्भिरनुक्रमात् ॥
कथ्यन्ते केऽपि नानार्थाः शब्दा . . .
अमी सलिङ्गनिर्लिङ्गभेदाद् द्वेधा भवन्ति हि ।
सलिङ्गास्तु तथा वृत्त्या स्त्रियां पुंसि नपुंसके ॥
स्त्रीपुंसयोः क्लीबपुंसोः स्त्रीनपुंसकयोस्त्रिषु ।
शब्दान्पुंसः स्त्रियः क्लीबान्नामलिङ्गांस्त्रिलिङ्गकान् ॥
प्रायः क्रमात्प्रवक्ष्यामि कान्तादीन् द्व्यक्षरादिषु ।
रूपभेदात्साहचर्यात्कण्ठोक्त्या वापि भावयेत् ॥
लिङ्गान्यथा . . . . पटं पूर्वेण नान्वयि ।
त्रिष्विति त्रिषु लिङ्गेषु ज्ञेयं द्वन्द्वे द्वयोरिति ॥
लिङ्गान्तरनिषेधोऽत्र शेषलिङ्गविधायकः ।

Colophon :

इति जगदुपकारिण्यामिरुगप्पदण्डाधिनाथरचितायाम् ।
द्व्यक्षरपदकाण्डोऽयं पूर्णो नानार्थरत्नमालायाम् ॥
द्व्यक्षरकाण्डः समाप्तः ।

End :

अन्तरेणाथ संबुद्धिः कृपाभेदेष्वहो बत ।
समन्ततः सर्वतोऽर्थे शोधनान्तसुखान्तयोः ॥
स्याद्वा विकल्पोपमयोरेवार्थे च समुच्चये: ।

Colophon :

इत्यव्ययनानार्थोऽयं संपूर्णः ।
इति श्रीमन्निगमदण्डेशकृता नानार्थरत्नमाला संपूर्णा ॥

826. 22. H. 14.

नानार्थरत्नमाला—इरुगप्पदण्डनाथकृता

Palm-leaf. 5 Foll. $12\frac{1}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Very old. Much injured. Clear writing.

Contains the 1st Kāṇḍa only without the preliminary stanzas.

827. 22. H. 15.

नानार्थरत्नमाला—इरुगप्पदण्डनाथकृता

Palm-leaf. 6 Foll. $13\frac{1}{4} \times 1$ inches.

4 lines in a page. Telugu script. Old. Injured. Illegible writing.

Contains the 1st Kāṇḍa only without the preliminary stanzas. The author's name is mentioned as Nirupapadadaṇḍādhināṭha in the colophon.

828. 24. L. 19.

नानार्थरत्नमाला—इरुगप्पदण्डनाथकृता

Palm-leaf. 58 Foll. $15\frac{1}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 5th Kāṇḍa.

829. 28. B. 14.

नानार्थरत्नमाला—इरुगप्पदण्डनाथकृता

Palm-leaf. 44 Foll, $14\frac{1}{2} \times 1\frac{1}{8}$ inches. 6 lines in a page, Telugu script. Old. Injured. Good writing.

Incomplete.

830. 24. D. 28.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 12 Foll. $14\frac{1}{8} \times 1$ inches. 5 lines in a page. Grantha script. Old. Injured. Clear writing.

Same work as that of Irugappadaṇḍanātha described in previous numbers. But the author's name is mentioned here as Bhāskara. (Vide the remarks on No.825.)

Breaks off in the 2nd Kāṇḍa.

831. 26. C. 4.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 4 Foll. $13\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Good writing.

Contains the first Kāṇḍa only.

832. 26. E. 27.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 61 Foll. $14\frac{1}{4} \times 1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Good writing. Wooden boards are added to both sides.

Complete.

833. 28. B. 15.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 21 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the third Kāṇḍa only.

The former owner of the MS.—Śrīdhara-Veṅkaṭa-Nṛsiṁha.

834. 28. B. 16.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 37 Foll. $17 \times 1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Slightly injured. Clear writing.

Contains the first two Kāṇḍas.

835. 28. B. 25.

नानार्थरत्नमाला—भास्करकृता

Palm-leaf. 4 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a portion of the द्व्यक्षरकाण्ड.

836. 39. B. 5.

ननार्थशब्दरत्नम् —कालिदासकृतम्

Paper. 62 Foll. $12\frac{1}{4} \times 8\frac{1}{4}$ inches. 20 lines in a page. English script. Old. Good. Good writing.

This is a lexicon of hononyms by an author named Kālidāsa. The work consists of three chapters, the first containing 254 verses, the second 183 verses and the third 166 verses. On the whole the work contains 603 verses.

Complete in 3 chapters.

Beginning :

तमेव शिरसा वन्दे पुण्येतरफलादिके ।
कीर्त्यं स्वमोक्षबन्धादौ सव्यवामसितासितम् ॥
अधुना पाणिनेः शक्तिचन्द्रसूर्येन्द्रनिर्मिते ।
शास्त्रे निर्णीतशब्दानां प्रकृत्यर्थो विवर्ण्यते ॥
तत्राप्येकादिधात्वर्थवाचकत्वे नियन्त्रिते ।
महाभाष्यादिवल्लोके ग्रहीतुं न हि शक्यते ॥
अतो येनैतदखिलमायासातिशयं विना ।
ज्ञायते सुष्ठु सर्वार्थशब्दरत्नं प्रदर्श्यते ॥
वर्गान्तस्यादिवर्णान्तपदगुम्भनसुन्दरम् ।
निबन्धनत्रयाङ्कं तत् कण्ठे कुर्वन्तु पण्डिताः ॥
प्रकृतेरेव सर्वत्र सर्वलिङ्गत्वमुन्नयेत् ।
नोद्वेगस्तत्र कर्तव्यस्तुधौ भूमिकदर्शनात् ॥
ओं ब्रह्मशम्भुविष्णिवन्द्रसूर्यचन्द्रादिके तथा ।
अनन्तगजवाग्वह्निमहोदध्यादिके मतम् ॥

End :

पक्षः पार्श्वप्रियश्वाब्धिशुकाङ्गाराक्षिमूर्तिषु ।
पक्षः सुपर्ण . . . साह्यपक्षकाठिन्यकान्तिषु ॥
आचक्षा विस्तरेऽनूरौ परमात्मनि वाचके ।
विरागिणि गणे नेयपरिचारप्रभाकरे ॥

Colophon :

इति श्रीकालिदासमहाकविविरचिते नानार्थशब्दरत्ने कादिक्षान्तवर्णाद्यन्तवच्छब्दप्रकरणे एकैकधात्वर्थरमणीये तृतीयनिबन्धनं संपूर्णम् ॥

837. 39. B. 6.

नानार्थशब्दरत्नव्याख्या तरला— निचुलकविकृता

Paper. 37 Foll. $12\frac{1}{4} \times 8\frac{1}{4}$ inches. 20 lines in a page. English script. Old. Good. Good writing.

This is a commentary on the Nānārthasabdaratna of Kālidāsakavi mentioned in last number. The commentary is called Taralā. The commentator Nicula is said to have been as a friend of the author of the text. It is also said that the commentary was written under the instance of the King Bhōja. It is curious to note that the three names *viz.* King Bhoja, Kalidāsa and Niculakavi are mentioned in respect of this work. However, it is not certain how far the reference of these three names will help in attributing the authorship to the famous Kālidāsa for the text, and Niculakavi for the commentary. Perhaps these names may be taken as to have been mentioned on mere fancy.

Complete.

Beginning :

कलये कटितटपटलं निटिलार्क्षं निगमपटलपटुभान्तम् ।

कटकं कटकीकृतविषतटकं विकटाभिरामजटिलं तम् ॥
स्वमित्रकालिदासोक्तशब्दरत्नार्थजृम्भिताम् ।
तरलाख्यां लसद्व्याख्यामाख्यास्ये तन्मतानुगाम् ॥

अथ कविरादौ जगदीश्वराभिवन्दनलक्षणमङ्गलमाचरति—तमिति । तं प्रसिद्धम् । एवकारेणानन्यशरण्यत्वं व्यज्यते । अत एव प्रकृतघटनमिति सर्वत्र प्रमाणम् । शिरःशब्देन लौल्यता द्योत्यते । सव्यवामभागसितासितमित्यर्थः । एवं चैकाङ्गीभूतपार्वतीपरमेश्वरात्मकपरमशिवमूर्तिं वन्दत इति योजना । अधुना प्रकृते । अयमर्थः—पाणिन्यादिमहात्मपञ्चकनिर्मितवैयाकरणशास्त्रनिर्णीतशब्दस्वतन्त्रादिप्रकृत्यर्थमात्रविवरणं क्रियत इति । तदुक्तं रहस्ये—

स्वतन्त्रधातुतद्द्वन्द्वसंगतासंगतात्मिका ।
प्रकृतिस्तत्र विज्ञेया स कौमारे त्वयं विधिः ॥ इति॥

End :

वस निवासे । ह्वञ् हरणे । एभ्यः अदो इचि रोहिः प्रहिः अहिः रहः वहः । गै शब्दे निपूर्वादूहप्रत्ययः । निगूहः । सिङ् शातने सिंहः । पा पाने उकारलोपः । क्षः पक्षः । वृङ् वरणे वक्षः । चङ् याचने । आङ्पूर्वात् आचक्षां ।

Colophon :

इति श्रीमन्महाराजशिरोमणिश्रीभोजमहाराजप्रबोधितनिचुलकवियोगिचन्द्रनिर्मितायां महाकविकालिदासकृतनानार्थशब्दरत्नकोशरत्नदीपिकायां तरलाख्यायां सर्वं तृतीयं निबन्धनम् ।

838. 39. I. 16.

नानार्थसंग्रहः—अजयपालकृतः

Paper. 50 Foll. 8 × 6½ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is an old lexicon of homonyms by Ajayapāla. As the work is quoted by Vardhamāna in his Gaṇaratnamahodadhi (about 1140 A.D.) the author Ajayapāla must be earlier than 1140 A.D. The work has been published in the Madras University Sanskrit Series No. 10, in 1937. In that edition, the editor has fixed the work between 1075 and 1140 A.D. The work consists of about 750 verses.

Complete.

Beginning :

जयन्ति शास्तुः पदपङ्कजाङ्कुरा
नखाः शरच्चन्द्रमरीचिकोमलाः ।
विनम्रदेवासुरमौलिषु श्रियं
वहन्ति ये प्रस्फुटमालतीस्रजः ॥
वीक्ष्य पूर्वकविग्रन्थानकाराद्यादिभिः पदैः ।
क्रमादजयपालेन कृतो नानार्थसंग्रहः ॥
सर्वत्रादावनेकार्थः प्रथमान्तोऽत्र दर्शितः ।
वर्तमानः सप्तम्यन्ते सप्तम्यन्तैरभेदिते ॥
त्रिष्वेव बहुवचनं कृतं न चतुरादिषु ।
विना लिङ्गैः विशेषेण नैवात्र पुनरुक्तता ॥

End :

क्षत्ता शूद्रात् क्षत्रियाजे प्रतीहारे च सारथौ ।
क्षणस्तु व्यापृते ज्ञेये मुहूर्तोत्सवपर्वसु ॥
क्षेत्रं देहे कलत्रे च केदारे सिद्धधामनि ।
क्षयोऽपचये रोगार्तगेहेषु राजयक्ष्मणि ॥
क्षेमस्तु कुशले दृष्टं तथा लब्धार्थरक्षणे ।
क्षुल्लकः क्षत्रजे काले कण्टकण्डूयने क्षुति ॥

इति क्षकारः ।

Colophon :

इत्यजयपालकृतो नानार्थसंग्रहः समाप्तः ।

839. 21. C. 69.

नानार्थार्णवसंक्षेपः—केशवस्वामिकृतः

Palm-leaf. 141 Foll. $14\frac{1}{2} \times 1\frac{3}{4}$ inches. 9 lines in a page. Malayālam script. Old. Good. Clear writing.

The work gives homonymous words with their different meanings and genders in six kāṇḍas, the first kāṇḍa dealing with the words of one syllable, the second with those of two syllables and so on. Each kāṇḍa is again divided into five adhyāyas *namely*, (1) Strīliṅgādhyāya, (2) Puṁliṅgādhyāya, (3) Napuṁsakaliṅgādhyāya, (4) Vācyaliṅgādhyāya and (5) Nānāliṅgādhyāya. For the sake of convenience of reference, the words are arranged in each adhyāya in alphabetical order. The MS. contains only a fragment of the work. But it has been completely printed and published in the Trivandrum Sanskrit Series No. 23. From the introductory verses it is known that the author Kesavasvāmin belonged to S'rīvatsagotra and was a Sāmavedin. He was an inhabitant of a village Rājendracola. His patron was Rajarājacola son of Kulottuṅga Cola who is said to have been a staunch S'aivite and patron of Pāsupata religion. It is well known that S'rī-Rāmānuja (1017 to 1137 A.D.) was summoned by Kulottuṅga to appear before his court to accept S'iva's supremacy over Viṣṇu which was denied by him. This Kulottuṅga was no other than Kulottuṅga I (1070 to 1120 A.D.) His son Rajarāja was the Viceroy in Veṅgi from 1084 to 1089. (Vide *The Cholas* by K. A. Nilakantasastri, page 31. Vol. II, part 1). It is said that Kulottuṅga's son invited Sri-Rāmānuja to Sriraṅgam when the Ācārya was living at Melkote in his old age. Therefore, there are ample evidences to place our author in the beginning of the 12th Century A.D. Kesavasvāmin's father was Kṛṣṇapuradeva who is mentioned as Drāviḍa and Vātsyāyana. Bhavaskanda was his preceptor. The work is also called Rājarājīya after the patron's name.

Contains the Kāṇḍas 4 complete and 5 and 6 incomplete copied in disorder.

Beginning :

अथ प्रस्तूयते काण्डं नाम्नां चतुरचामिदम् ।
तत्रापि तावत्स्त्रीलिङ्गशब्दाध्यायः प्रदर्श्यते ॥
अक्षमालां स्त्रियां विद्यादरुन्धत्यां तथापि च ।
जपसंख्यापरिच्छित्यै रुद्राक्षस्फटिकादिभिः ॥
सूत्रस्यूतैः कृते चापि वलयेऽथ निबोधत ।
अजमोदा यवानीति प्रसिद्धे भेषजान्तरे ॥
शल्मलेरपि निर्यासेऽथान्तशय्या श्मशानके ।
तथैव भूमिशय्यायामथो अपचितिः क्षये ॥

End :

हिरण्यकशिपुः पुंसि प्रह्लादपितरि स्मृतः ।
हिरण्यचित्रितकुथे पुनः स्यात्पुंनपुंसकम् ॥
हिरण्मयं तु यत्किंचित्कशिप्वर्थतया स्मृतम् ।
तत्राप्यपूरि चाध्यायः काण्डं चापि ह्यपूर्यत ॥

Colophon :

इति षडक्षरकाण्डे नानालिङ्गाध्यायः ।
समाप्तं चैतत् षडक्षरकाण्डम् ।
समाप्तश्चायं नानार्थार्णवसंक्षेप ।

इति द्रमिडवात्स्यायनभट्टकृष्णपुरदेवसूनोर्भवस्कन्द-शिष्यस्य केशवस्वामिनः कृतौ नानार्थार्णवसंक्षेपे राजराजीयसंज्ञे षडक्षरकाण्डः समाप्तः ।

The scribe adds :

"रक्षन्तु वः शिक्षितपाशुपाल्या
बाल्यादृता बर्हिशिखावतंसाः ।
प्राणाः श्रियः प्रस्तुतवेणुगीता
गीतादृताः शीलितगोपकन्याः ॥"

840. 10. K. 14.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Paper. 320 Foll. 14 × 6 inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

The folios are arranged into three groups each group containing one Kāṇḍa. The first group contains 79 Foll. the second 160 Foll. and the third 81 Foll. The MS. contains also Bhānuji's Sudhā copied up and down the text in each page.

This is the well known lexicon containing synonyms and homonyms in three kāṇḍas by Amarasiṁha. Each kāṇḍa is divided into different vargas. The first kāṇḍa contains 12 vargas, the second 10 vargas and the third 5 vargas. The whole work consists of about 1550 verses. The author states in the preamble that he has summarized several lexicons in this work. Amarasiṁha is generally believed to have been a Buddhist. (Vide page 413 of the *History of Sanskrit Literature* by A. B. Keith, 1928.) Kṣīrasvāmin and Sarvānanda definitely mention Amarasiṁha as a Buddhist. It is said that the work Nāmaliṅgānuśāsana was translated into Chinese language before the 6th century A.D. The exact date of Amarasiṁha still remains uncertain. But most of scholars fix him in the 5th century A.D. as a contemporary of Kālidāsa.

The MS. contains the work complete.

Beginning :

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रियै चामृताय च ॥
समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥
प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥
भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्यौदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥

End :

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥

Colophon :

इति लिङ्गादिसंग्रहः ।

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
काण्डस्तृतीयः सामान्यः साङ्ग एव समर्थितः ॥

Date of copying :

शके. १७३६ भवनामसवत्सरे पौषकृष्णप्रतिपत् .

841. 10. K. 15.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Paper. 177 Foll. $11\frac{1}{2} \times 4\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

The folios are arranged in three sets and in each set they have been given separate numbers.

Complete.

842. 20. D. 30.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 8 Foll. (2-9) $17\frac{1}{2} \times 1$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Svargavarga only in the first kāṇḍa without beginning.

The fly-leaf gives the name of Kumāratātāchārya son of Kṛṣṇatātācārya probably the former owner of the MS.

843. 20. D. 31.

नामलिङ्गानुशासनम्—अमरसिंहकृतम् (आन्ध्रटीकासहितम्)

Palm-leaf. 8 Foll. $16 \times 1\frac{1}{8}$ inches. 8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Accompanied by Telugu meaning (anonymous).

Contains portions of the 1st and 2nd Vargas of the 3rd Kāṇḍa.

Two extra leaves are added at the end and they contain a few lines of the Puruṣasūktabhāṣya (anonymous.)

844. 20. D. 41.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 8 Foll. $17 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the 3rd Kāṇḍa only breaking off in the 2nd Varga.

The fly-leaf at the beginning reads the following verse in praise of Sri-Vedāntadeśika :

"नौमि श्रीमन्तमन्तर्मुखमुखरहयग्रीवहेषोर्मिघोष-
प्रक्षुभ्यद्वैरिविद्वत्प्रणमितमकुटीराजिनीराजिताङ्घ्रिम् ।
प्रातस्त्याम्भोजपालीगलितमधुझरीमाधुरीधुर्यवाणी-
श्रेणीभव्यप्रचारं फणिधरणिधराधीशषण्टावतारम् ॥"

845. 21. R. 10.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 84 Foll. $13\frac{1}{2} \times 1\frac{3}{10}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the Śūdravarga in the second Kāṇḍa.

846. 22. L. 26.

नामलिङ्गानुशासनम्—अमरसिंहकृतम् (द्राविडटीकासहितम्)

Palm-leaf. 36 Foll. $18\frac{1}{2} \times 1\frac{3}{8}$ inches.

8 lines in a page. Grantha and Tamil. Old. Injured. Good writing.

Accompanied by Tamil meaning (anonymous).

Contains the 1st Kāṇḍa only.

The fly-leaf gives the name of the former owner of the MS.—Vijayarāghavāchāriar son of Rāmaswāmi Ayyangar of Pārāsūr.

847. 22. L. 47.

नामलिङ्गानुशासनम् —अमरसिंहकृतम्

Palm-leaf. 20 Foll. $16\frac{1}{4} \times 1\frac{3}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 1st Kāṇḍa almost complete.

The fly-leaf at the beginning contains the name Rāmānuja probably of the former owner of the MS. and reads the following verse:

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

848. 22. M. 12.

नामलिङ्गानुशासनम् —अमरसिंहकृतम्

Palm-leaf. 16 Foll. $17\frac{1}{4} \times 1\frac{1}{8}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are numbered 1 to 20; but leaves Nos. 4, 7, 12 and 13 are missing.

Contains the 1st Kāṇḍa only with gaps in the middle.

849. 23. A. 7.

नामलिङ्गानुशासनम् —अमरसिंहकृतम् (आन्ध्रटीकासहितम्)

Palm-leaf. 24 Foll. $16 \times 1\frac{3}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Accompanied by a Telugu gloss. From the following stanza found at the end, the Telugu gloss seems to have been added by Nārāyaṇa, son of Buccana of Timmaya family in Gautamagotra. The gloss is called Nārāyaṇiyamu.

Contains the Avyayavarga only in the third Kāṇḍa.

The following stanza is found at the end:

"श्रीमत्तिम्मय्यवंशोदधिरजनिपतिर्नन्दपुर्यन्ववायः
श्रीमद्बुच्चन्नधीमद्विबुधवरगुणावासभूम्यात्मजोऽयम् ।
श्रीमान्नारायणाख्यो गुणमणिवसतिर्गौतमादात्तगोत्रः
सम्यग्बुद्ध्वा विशिष्यामरहरिवचनं स्वीयनामाङ्कमैच्छत् ॥

850. 24. E. 19.

नामलिङ्गानुशासनम् —अमरसिंहकृतम् (आन्ध्रटीकासहितम्)

Palm-leaf. 127 Foll. $14\frac{1}{2} \times 1\frac{7}{8}$ inches. 5 lines in a page. Telugu script. Old. Good. Good writing.

Wooden boards are added to both sides. Some blank leaves are added at the beginning and end.

Accompanied by Telugu meaning (anonymous).

Contains the third Kāṇḍa only.

The date of copying and the name of the scribe: The third day of the dark fortnight of the Kārtika month in the year Nandana. Copied by Nāraṇappa son of Guṇṭūru S'vanambhāga Subbaṇṇa.

The scribe adds the following stanzas at the end:

सरभसकरवेगभ्रष्टवर्णादिदोषो
यदि भवति न वाच्यः पुस्तके हस्तदोषः ।
सकलमनुमतं स्यात् सद्गुणग्राहकाणां
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
बिन्दुर्दुर्लिपिविसर्गवीथिका-
शृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥
उदकानलपूरेभ्यो मूषकेभ्यस्तथैव च ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

851. 24. E. 22.

नामलिङ्गानुशासनम् —अमरसिंहकृतम् (आन्ध्रटीकासहितम्)

Palm-leaf. 63 Foll. 15½ × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Accompanied by Telugu meaning (anonymous).

Contains the first Kāṇḍa only.

Two blank leaves are added at the end.

852. 24. E. 31.

नामलिङ्गानुशासनम् —अमरसिंहकृतम् (आन्ध्रटीकासहितम्)

Palm-leaf. 154 Foll. 15¼ × 1½ inches. 5 lines in a page. Telugu script. Old. Good. Good writing.

Wooden boards are added to both sides.

Accompanied by Telugu meaning (anonymous).

Contains the second Kāṇḍa only.

The date of copying: Sunday, the 10th of black fortnight of Āṣāḍha month of the year Nandana.

The name of the scribe: Nāraṇappa son of Guṇṭūru S'vanambhāga Subbaṇṇa.

The scribe adds at the end the same stanzas as given in No. 850 above.

Eight blank leaves are added at the end.

853. 24. E. 32.

नामलिङ्गानुशासनम् —अमरसिंहकृतम्

Palm-leaf. 55 Foll. 15 × 1¼ inches. 6 lines in a page. Telugu script. Old. Good. Good writing.

Wooden boards are added to both sides.

Contains the second Kāṇḍa complete and the third Kāṇḍa incomplete breaking off in the Nānārthavarga.

854. 24. E. 40.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 21 Foll. 15 × 1½ inches. 6 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the 1st Kāṇḍa only complete.

The following verses are added at the end :

"कवेरमरसिंहस्य कृतिरेषा सुनिर्मला ।
आचन्द्रतारकं नाम नामलिङ्गानुशासनम् ॥
अमरे प्रथमे काण्डे वर्गा द्वादशसंख्यकाः ।
अर्धोनाशीतिसहितद्विशतश्लोकसंख्यकाः ॥"

Four blank leaves are added at the end.

855. 24. N. 22.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 8 Foll. 11$\frac{1}{10}$ × 1½ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

Breaks off in the Digvarga of the first Kāṇḍa.

856. 25. B. 23.

नामलिङ्गानुशासनम्—अमरसिंहकृतम् (द्राविडटीकासहितम्)

Palm-leaf. 13 Foll. 17$\frac{1}{8}$ × 1$\frac{1}{8}$ inches. 9 lines in a page. Grantha and Tamil scripts. Old. Injured. Good writing.

Accompanied by Tamil meaning (anonymous).

Contains the Avyayavarga only in the third Kāṇḍa.

Two extra leaves are added at the beginning and they contain the following stanzas :

वदन्ति विश्वं कवयः स्म नश्वरं
पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज मायया
सुविस्मितं कृत्यमिदं नतोऽस्मि तम् ॥
यः स्वानुभावमखिलश्रुतिसारमेक-
मध्यात्मदीपमतितीर्षयतां तमोऽन्धम् ।
संसारिणां करुणयाह पुरातिगुह्यं
तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥
जैनौ यादवभास्करौ प्रविदितौ बौद्धाग्रणीः शंकरो
वेदान्तार्थकदर्थनेन जगतो जाग्रत्यमी वञ्चने ।
त्रीनेतान् शिरसि प्रहर्तुमनिशं दण्डास्त्रयो वैणवा
हस्ते यस्य समिन्धते स जयति श्रीमान् यतीनां पतिः ॥
ताराविष्णू रथत्विट्खगहृदयरमास्कन्दसंबुद्धयः क्व
क्व स्याद्धातुत्रयं लुग्विकरणपठितं कुत्र तत्त्वावबोधः ।
चत्वारस्तद्धितान्ताः क्व नु खलु विगतैकैकवर्णस्वभावाः
सूत्रं किं पाणिनीयं विलसति न सहस्रोक्तिभिर्भास्करेऽपि ॥
ज्ञाते तत्पुरुषेऽपि तत्पुरुषति त्वं नाम शैवाग्रणी-
रन्यः कोपि समाश्रयेदिह बहुव्रीहौ बहुव्रीहिभाक् ।
श्रीरामेश्वर कर्मधारयमुरीकुर्वन्कविर्भास्कर-
स्तस्मादेष्वपि कर्मे धारयति न द्वन्द्वेऽपि न द्वन्द्वति ॥

The fly-leaf at the end reads the following :

कर्मज्ञानभक्तीनां भक्तिप्रपत्योर्वा साधनत्वं शास्त्रसिद्धं तात्पर्याविरुद्धं च । साधनानुष्ठानयोग्यं त्रैवर्णिकजन्म । अत्रैवर्णिकजन्म . . . . . द्वारा जन्मान्तरे साधनानुष्ठानयोज्यजन्मप्राप्तिद्वारा साधनानुष्ठानेन परंगतिप्राप्तिरिति शास्त्रीयसरणिः । तात्पर्यनिष्ठानां पदत्रयार्थनिष्ठारूपाकारज्ञानमुखेन कैंकर्य-

लक्षणस्वरूपाविर्भावात्मकपरगतिप्राप्तिः सिद्धोपायनिष्ठया । शास्त्रोक्तवर्णधर्मानुष्ठानपराणां त्रैवर्णिकजन्मनां स्वरूपादिगोचर . . . . त्यं गृहस्थानां ब्राह्मं संन्यासिनां स्मृतमित्यादिप्रमाणानुसारेण स्वार्थप्रवृत्तिफलीभूतपुण्यलोकादिप्राप्तिरूपापरगतिप्राप्तिरेव संभाविता । तेषामेव वर्णोत्कर्षा . . . क्षणमोक्षेच्छूनां सदाचार्यकटाक्षपात्रभूतानां स्वरूपयाथात्म्यभूतपारतन्त्र्यानुगुणं स्थावरादिपर्यन्तमत्रैवर्णिकं जन्मैवापेक्षितम् । न त्वहंकारहेतुभूतं साधनानुष्ठान . . . . त्र्यन्तनिष्णातानां तात्पर्यनिष्ठानां निष्कर्षः ।

त्वं यादृशोऽसि कमलामपि तादृशीं ते
दारान्वदन्ति युवयोर्न तु भेदगन्धः ।
मायाविभक्तयुवतीतनुमेकमेव
त्वां मातरं च पितरं च युवानमाहुः ॥
अनन्याधीनकल्याणमन्यमङ्गलकारणम् ।
जगन्निदानमद्वन्द्वं द्वन्द्वं वन्दामहे महः ॥

857. 25: C. 27.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 20 Foll. 12 × 1 inches. 6 lines in a page. Grantha script. Old. Slightly injured. Illegible writing.

Breaks off in the Simhādivarga in the 2nd Kāṇḍa.

858. 25. C. 43.

नामलिङ्गानुशासनम्—अमरसिंहकृतम् (द्राविडटीकासहितम्)

Palm-leaf. 22 Foll. 17 × 1¼ inches. 9 lines in a page. Grantha and Tamil scripts. Old. Injured. Clear writing.

Accompanied by Tamil meaning (anonymous).

Contains the first Kāṇḍa only.

The fly-leaf at the beginning states that the MS. was made gift by Aṇṇāsāstri to Chinna Subbu on Wednesday the 23rd of the month of Āḍi in the year Khara.

The Date of the MS. is given as the 16th day of the month of Āvaṇi in the year Pramāthi.

The fly-leaf at the end reads the following verses:

कुशासने दरिद्रः स्यात्पाषाणे व्याधिरेव च ।
धरण्यां दुःखसंभूतिः पल्लवे चित्तविभ्रमः ॥
तृणासने यशोहानिः सौभाग्यं दारुकासने ।
वस्त्रासने व्याधिनाशः कम्बले दुःखमोचनम् ॥
कृष्णासने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।
प्राच्यां दिशि मुखे वश्यमाग्नेय्यां व्याधिरेव च ॥
दक्षिणे . . . नैर्ऋते मरणं ध्रुवम् ।
पश्चिमे त्वर्थलाभः स्याद्वायव्यां कर्षणं तथा ।
उत्तरे शान्तिदं चैव ऐशान्ये मोक्षसंभवः ॥

859. 25. D. 5.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 30 Foll. 19¼ × 1¼ inches. 6 lines in a page. Grantha script. Old. Very much injured. Clear writing.

Breaks off in the Vanauṣadhivarga in the second Kāṇḍa.

860. 25. D. 25.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 54 Foll. 14⅜ × 1⅛ inches. 8 lines in a page. Old. Injured. Good writing.

Contains the second Kāṇḍa complete and third Kāṇḍa incomplete.

The former owner of the MS. and the date of copying: Rangaswami, son of Seṣadri Ayyangar of Malayaṁkulam Village. 25th day of the Vaikāsi month in the year Pramoda.

One extra leaf added at the end reads a few stanzas from Śrīharṣa's Naiṣadhīya-carita.

861. 25. E. 10.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 12 Foll. 15½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a fragment of the 1st Kāṇḍa.

862. 25. I. 11.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्
(द्राविडटीकासहितम्)

Palm-leaf. 21 Foll. 14 × 1⅛ inches. 6 lines in a page. Grantha and Tamil. Old. Injured. Good writing.

Accompanied by Tamil meaning (anonymous).

Contains the first Kāṇḍa incomplete.

863. 25. L. 12.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 69 Foll. 13¼ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the second Kāṇḍa.

The former owners of the MS.: Raṅganātha and Rāmasvami.

864. 26. C. 10.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 51 Foll. 15½ × 1½ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the second Kāṇḍa only.

865. 26. G. 1.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 31 Foll. 15¼ × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Kāṇḍa complete.

The fly-leaf at the beginning mentions the names of Kṛṣṇayyar and Vijaya-rāghavāchāriar probably as the former owners of the MS.

866. 26. I. 18.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 11 Foll. 16¾ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Kāṇḍa incomplete.

Six extra leaves added at the end read the following verses from various lexicons.

. . दूरान्यमुख्येऽपि परोऽरिपरमात्मनोः ।
धान्यादेर्वीवधप्राप्तिरा . . . . . ॥
तन्त्रं स्वराष्ट्रचिन्तायामावापः परचिन्तनम् ।

शास्त्रौषधान्तमुख्येषु . . . . . ॥
मन्त्रजिह्वः सप्तजिह्वः स्रुतजिह्वो हव्यवाहनः ।
चपलः पारदे शैघ्र्ये दुर्विनीतेऽनवस्थिते ॥
पक्षः पार्श्वतरौ साध्यसहायबलिभित्तिषु ।
विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती ॥
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी ।
स्थापत्येऽधिपतौ तक्षिण धनपतिः सचिवेऽपि च ॥
कलाशिल्पे वित्तवृद्धौ चन्द्रांशे कलशे कलौ ।
गणस्त्वावृत्तिशब्दादिज्यास . . . तन्तुषु ॥
क्लीबे तु मध्योऽवकाशे तादर्थ्येऽवसरेऽवधौ ।
छाया त्वनातपे कान्तौ प्रतिबिम्बार्कजाययोः ॥
वणिङ्मूलधने पा . . . भाण्डं भूषावभूषयोः ।
इलावृतं सौमेरवं सुमेरोः परतो हि तत् ॥
प्रियको रोमभिर्युक्तो मृदुश्च मसृणैर्घनैः ।
रल्लकः कम्बलमृगे कम्बलेऽपि प्रकीर्तितः ॥
द्वन्द्वं युग्मं हिमोष्णादि मिथुनं कलहेऽपि च ।
कण्ठजो रोचमानस्तु स्वामिसौभाग्यवर्धने ॥
पङ्क्तीकृतानामाधानं नमिनोर्नमनाकृतिः ।
अतिवेगसमायुक्ता गतिरूर्मिरुदाहृता ॥
अपरः पश्चिमः पादः (इति गजप्रकरणे ।)
श्रीवृक्षको वक्षसि चेद्रोमावर्ते मुखेऽपि च ॥
वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टकः ।
दरोऽस्त्री शङ्खभीगर्तेष्वल्पार्थे त्वव्ययेऽपि च ॥
विवधो वीवधो हारः पर्याहारश्च कथ्यते ।
तीर्थं जलावतारे च मन्त्राद्यष्टादशस्वपि ॥
समयानिकषाशब्दौ सामीप्येऽप्यव्यये मतौ ।
ऊर्मिरुत्कलिकोल्लोलकल्लोलौ लहरी तथा ॥
तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः ।
पादकर्मयुतं प्रोक्तं यानमङ्कुशवारणम् ॥
पर्याप्तमुपसंपन्नपूर्तिः सौहित्यमुच्यते ।
पश्यतो यो हरत्यर्थं स चोरः पश्यतोहरः ॥
आवेशिकः प्राघुणिक आगन्तुरतिथिस्तु सः ।
गणस्त्वावृत्तिशब्दादिज्यासन्ध्याक्षततन्तुषु ॥
प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे ।
. . . दिष्टं वर्तुलाकारं करिका नखरेखिका ॥
सारसो मैथुनी कामी गोवर्धः पुष्कराह्वये ।
अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरे ॥
केवलः कृत्स्नसाकल्ये केवलं चावधारणे ।
भूमिका रचनायां स्यान्मूर्त्यन्तरपरिग्रहे ॥
स्वेच्छायदृच्छास्वच्छन्दस्वैरिताश्चैरिताः समाः ।
अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयोः ॥

867. 27. F. 46.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 27 Foll. $14\frac{1}{4} \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains a fragment of the first and second Kāṇḍas.

Reads the following stanzas in the beginning:

"शुक्लाम्बरधरं विष्णुं + सर्वविघ्नोपशान्तये ।
वागर्थाविव संपृक्तौ + पार्वतीपरमेश्वरौ ॥
ज्ञातस्तेन समस्तशास्त्रविषयस्तस्याप्यनल्पा मतिः
शब्दज्ञानमहोदधेरुपतटं तेनैव दृष्टं पुनः ।
काव्यं कर्तुमलं मनोहरमसौ शब्दैर्जनानां प्रियै-
र्येनैवामरकोश एष पठितः शास्त्रादिसारो वरः ॥"

The fly-leaf at the end reads the following stanza:

"हारो भाति कुचद्वयं तव शिवे मध्यं वपुस्ते वचः
केशा नासिकमौक्तिकं च वदनं रोमावली लोचने ।
गङ्गावद्गजकुम्भवद्गगनवद्वाङ्क्ष्यवद्वेयव-
ज्जाम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥"

868. 28. B. 9.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 85 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. Nos. 1, 27 and 65 are missing.

Wants the beginning in the first Kāṇḍa and goes on up to the end of the third Kāṇḍa with some gaps in the middle.

869. 28. B. 10.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

प्रथितां बिभ्रदशेषत्रिदशोपास्यं परं महः सेवे ॥१॥
नवजलजविराजमानवक्त्रां
गगननयभव . . भासुराम् ।
मृगमदतिलकोज्ज्वललल्लाटां
कलये वागधिदेवतां भवानीम् ॥ २ ॥
भ्रमद्भ्रमरविभ्रमभ्रमरिकावतु भ्रामरी
भयंकरभवापगापतिनिमग्नसंतारिका ।
कनत्कनककुण्डला सकलकामसंदायिनी
सुधाकरकलाधरा धवलरूपिणी धेनुवाक् ॥३॥
चिकुरभरविराजत्कान्तिकासाररत्ने
विगतबहुलरेखातुङ्गभङ्गेऽम्बिकायाः ।
दरदलदरुणाम्भोजातमाकर्षयन् वः
कलयतु करिराजो युग्मनेत्रं करेण ॥ ४ ॥
कनत्कनककङ्कणारुणमणीविडूरावली-
विलोकनसमुत्थितातुलकुतूहलत्रासकम् ।
शुकं करसरोरुहोपरि गतं हसन्ती मुहु-
र्विलोक्य पदवैखरीं दिशतु धेनुवागीश्वरी ॥ ५ ॥
त्रैविद्यविद्योपाध्यायो नृसिंहो यत्पितामहः ।
यत्पिता त्रिपुरारिस्तु षड्दर्शन्येकवल्लभः ॥ ६ ॥
तमेवेश्वरवास्तव्यं विद्वद्भिर्बहुमानितम् ।
श्रीनागनाथसुधियं नमामि जनकं मम ॥ ७ ॥
वन्दे श्रीनृहरी विश्वविख्यातौ कुत्सकौशिकौ ।
अवतीर्णौ दयापूर्णौ नरनारायणाविव ॥ ८ ॥
फणिमतविततपयोधावाविर्भूतसुधासदायादः ।
अमरपदपारिजातो वितरति सुमनोमनोविनोदार्थान् ॥
नानाविद्यामृताम्भोनिधिगणगिलनादृष्टिपूर्वोपमन्युः
प्रत्यर्थिप्रौढविद्वत्करिवरनिकरक्रीडदुद्यन्मृगेन्द्रः ॥
. . . . . .
(उक्तानुक्तदुरुक्तचिन्तनफलां टीकां) सुभूतेः परा-
मालोक्यामरभाष्यवार्तिकमुखान् ग्रन्थान् बहूनादरात् ।
व्याचक्षेऽमरसिंहनामकमहं श्रीवत्सगोत्रोद्भवो
बोल्लाबुन्निनृसिंहसूरितनयः श्रीमल्लिनाथो मुदा ॥

इह खलु निखिलफणिपतिविततमतकमलनिलयकबलनकलशतनयः कविवरकरटिनिकरसिंहः सुरसिंहः प्रक्रम्यमाननिबन्धनरत्नपरिपन्थिनिरन्तरान्तरायतिमिरपटलनियतमिहिरसमानामभिनवाधिकृतदेवतोपासनामनेन निबध्नाति—यस्येति ।

यस्य ज्ञानदयासिन्धोः + स श्रियै चामृताय च ॥

तत्र देवतायाः परममहत्त्वख्यापनार्थं समुद्रत्वमारोपितम् । तत्कथम् ? यस्यागाधस्य मन्दरगिरिमूल-

कषणेनाप्यकलुषितस्य ज्ञानदयासिन्धोः क्षीरसिन्धोरिति यावत्। ज्ञानदययोः सिन्धुः ज्ञानदयासिन्धुरित्याधाराधेयभावसंबन्धेन समस्तवस्तुविषयकानुभवस्य दुःखनिमग्नसकलजगदुद्धारकदयायाश्चाधारभूतसिन्धोः। गुणाः अलङ्घ्यत्वादिगुणाः अनघाः तरुचरनिकरलङ्घितत्वादिदोषेणादूषिताः। अक्षयः कलशीसुतकरतलामलकितः सः। शैवानां शिवः। वैष्णवानां विष्णुः। जैनानां जिनः। बौद्धानां बुद्ध इति तत्तदधिदेवतापूर्वसिन्धुः। हे धीराः हे विद्वांसः श्रियै चामृतताय च। नारायणनाकपालैकविषयसर्वजनविषयभूतश्रयमृतयोः भवद्भिः सेव्यताम्। त्रिवर्गसंपत्तेः मोक्षस्य चाराध्यतामित्यर्थः।

End:

विप्रतिषेधे परलिङ्गं ग्राह्यम्। द्व्यहः। त्र्यहः। अदन्तैर्द्विगुरेकार्थ इति स्त्रीलिङ्गं न भवति। पुण्याहम्। सुदिनाहम्। अह्नोह इति पुंलिङ्गं न भवति। शेषं तु ज्ञेयं शिष्टप्रयोगतः। उक्तशेषलिङ्गानि शिष्टप्रयोगात् बोद्धव्यानि। तथोक्तम्—

वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ।
शब्दपारायणस्यान्तं न गतौ तत्र के वयम्॥

Colophon:

इति श्रीवत्सनरसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते लिङ्गादिसंग्रहवर्गः।

श्रीवत्सान्वयमान्येन मल्लिनाथेन निर्मिते।
व्याख्यानेऽमरसिंहस्य तृतीयः काण्ड उद्गतः॥
वामं वामाङ्कभूषामधरमधुसुधां पुष्टिराजे . . .
रत्नैरापूर्णकुम्भं मम दिशसि यदि त्वं गृहाणेत्यवादीत्।
नेत्येवं तां ब्रुवाणे जठरफणिपतेर्दर्शमात्रेण तस्मिन्
केशीभारं मयूरं गतवति स ददौ सान्त्वयन् वः पुनातु॥
पद्मानि बोधयत्यर्कः काव्यानि कुरुते कविः।
ससौरभो नभस्वांस्तु सन्तः स्वदत तद्गुणान्॥
कवेरमरसिंहस्य कृतिरेषा सुनिर्मला।
आचन्द्रतारकं स्थेयान्नामलिङ्गानुशासनम्॥
प्रागल्भ्यं प्रकटीकृतं पदकलाकूपारपारीणधीदर्पान्धैर्बुधसिन्धुरैरपरकृद्भावार्थजात्यन्धकैः।
तैः किं नो जगतीतले विधिवचोलीलः सुधीर्विद्धि को
जानीते नितरां स एव तदनु श्रीमल्लिनाथः स्वयम्॥

Then 13 leaves are added and they give Telugu meaning of some Sanskrit words selected from the Nāmaliṅgānusāsana. At the end 13 blank leaves are added.

964. 30. H. 1.

नामलिङ्गानुशासनव्याख्या—बोम्मगण्टि आप्पयाचार्यकृता

Palm-leaf. 162 Foll. $16\frac{1}{2} \times 1\frac{1}{8}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

A commentary on the Nāmaliṅgānuśāsana of Amarasiṁha by Appayācārya of Bommaganṭi family. He was a protege of the King Kumāra Śiṅgabhūpāla of Recarla family. Dr. M. Krishnamachariar identifies this King with Śiṅgabhūpāla II (1400 A.D.) the son of Ananta *alias* Anapota and grandson of Śiṅgabhūpāla I. (Vide page 770 of the History of Classical Sanskrit Literature, Madras, 1937.) The author says that the work was revised by his patron Kumāra Śiṅgabhūpāla. Two MSS. of the work in good condition are available in the Madras Government Oriental MSS. Library and they have been described in R,

Nos. 1170 and 4557 of the Catalogue of the MSS. in that Library.

Contains the third Kāṇḍa up to the end of the Nānārthavarga.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
सर्वज्ञं सर्वगतं भजत सदा शैलजार्धसंकीर्णम् ।
नानार्थप्रदमव्ययमनेकलिङ्गैः प्रकाशितस्फूर्तिम् ॥

एवं काण्डद्वयेन तत्तच्छ्लोकप्रतिनियतार्थान् नामान्यनुशिष्य संप्रति काण्डान्तरमारभमाणः प्रेक्षावत्प्रवृत्तिसिद्धये वक्ष्यमाणं संगृह्य दर्शयति—

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गैः सामान्ये वर्गसंश्रयाः ॥

सकललोकसाधारणार्थनिरूपणादस्य काण्डस्य सामान्यत्वम् । तथाहि—वक्ष्यमाणाः सुकृतिप्रभृतयः शब्दाः प्रागुक्तमनुष्यादिविशेषणतया साधारणाः, संकीर्णवर्गीयाः कर्मादयो नरसुरादिसाधारणा एव । नाकलोकादिशब्दाश्च तत्तदर्थवाचकत्वेन । आङादीन्यप्यव्ययानि प्रागुक्तार्थानामेवावध्यवधिमद्भावादिप्रतिपादकत्वेन । स्त्रियामीदूदित्यादयस्तु पूर्वोक्तशब्दानां लिङ्गप्रतिपादकत्वेनेति द्रष्टव्यम् । तत्र गुणकर्मादिभिरवच्छेद्यं यद्वस्तु तद्विशेष्यम् । तल्लिङ्गवचनायत्ते लिङ्गवचने येषां पदानां तानि विशेष्यनिघ्नानि । इह संकीर्णशब्देन यानि नामानि पूर्वस्मिन् काण्डेऽपि ये साक्षादसंगतानि नाप्यस्मिन् काण्डे विशेष्यनिघ्नत्वादितत्तदुपाधिवैधुर्येण प्रथमतृतीयादिवर्गेष्वसंगतानि विप्रकीर्णरूपाणि तान्युच्यन्ते । यानि पदान्यनेकार्थवाचकानि तानि नानार्थानि ।

End:

किंच नानार्थवर्गादावाचार्येण प्रतिज्ञातम् । केचिदनेकार्थाः कान्तादिवर्गेष्वेव कथ्यन्ते । भूरिप्रयोगास्तु पर्यायकाण्डे कान्तादिवर्गेषु चेति । न चाङादयः पर्यायेषु प्रतिपादिताः । नापि कान्तादिवर्गेषु क्रोडीकृत्य पठिताः । तथाचाव्ययवर्गान्तविषया एव नानार्थवर्गसमाप्तिस्तत्रैवेति सर्वं कल्याणम् ।

Colophon:

इति नानार्थवर्गः ।

व्याचष्टामरसिंहोक्ते नामलिङ्गानुशासने ।
बोम्मगण्ट्यप्पयाचार्यो वर्गं नानार्थगुम्भितम् ॥
इह यत्यक्तमज्ञानादालस्याद्यदुपेक्षितम् ।
प्रमादादन्यथोक्तं यत्तद्विद्वद्भिर्विशोध्यताम् ॥
व्याख्यातं गौतमीयं कणभुगभिमतं चापि शास्त्रं समस्तं
ये न व्याकारिभाष्यं फणिपतिगदितं कैयटीं वीक्ष्य टीकाम् ।
ज्ञात्वा यज्ञप्रयोगं शबरमुनिमतं व्याकृतं द्विप्रभेदं
व्याकर्ता व्यासवाचां स जयति भुवने बोम्मगण्ट्यप्पयार्यः ॥

उद्देशक्रमानुरोधेन पूर्ववर्गान्त एवोपक्षिप्तान्यव्ययान्याह ।

965. 34. F. 34.

नामलिङ्गानुशासनव्याख्या—बोम्मगण्टि अप्पयाचार्यकृता

Palm-leaf. 156 Foll. 19½ × 1¾ inches. 7 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

Wants the first leaf; otherwise the third Kāṇḍa is complete.

Reads the following end:

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
तृतीयकाण्डः सामान्यः साङ्ग एव समर्थितः ॥

निगदव्याख्यातमेतत् ।

. . . . . कपिलव्यासादिरूपं बुधो
जैमिन्यादिसमष्टिमूर्तिरवधिः स्मार्तक्रियावेदिनाम् ।
व्याचष्टामरसिंहनाथरचितं ग्रन्थं निघण्टूत्तमं
कृत्स्नं बालविबोधनार्थमप्पयसुधी . . . . ॥
. . . . . ।
. . . विद्वद्भिस्तद्विशोध्यताम् ॥
लिङ्गादिसंग्रहे श्लोकाश्चत्वारिंशदिहाष्टकाः ।
जाग्रत्यमरसिंहीये नामलिङ्गानुशासने ॥
निघण्टुभिः किमपरैः परं नः क्लेशकारिभिः ।
रेचर्लवंशसंभूतः . . . . . ॥
. . . व्याख्येयमाज्ञया शिङ्गभूपतेः ।
आदृता त्यक्तमात्सर्यैराकल्पमनुवर्तताम् ॥
कुमारशिङ्गभूपेन शब्दनिष्णातबुद्धिना ।
संशोधितायां व्याख्यायां किमन्यैः शोधकान्तरैः ॥
कुमारशिङ्गभू . . . . . ।
. . . . . ॥
काव्यालंकारसंगीतनाट्यशब्दविशारदः ।
कुमारशिङ्गभूपाल एक एवास्ति नापरः ॥
अभिधानकोशैजातं सव्याख्यानं सुशीलितं यैर्नो ।
एते दुर्मानग्रस्ता नास्य ग्रन्थस्य शोधनेऽधिकृताः ॥
ये शुष्कतर्क . . . . . ।
ये शब्दलक्षणज्ञानमात्रगर्वितबुद्धयः ॥
लक्ष्यान्धाः कलहायन्ते तेभ्यो विरचितोऽञ्जलिः ।
मानवाक्यपदाम्नायस्मृतिप्रख्यातसंविदा ॥
बोम्मगण्ड्यप्पयार्येण सदृशः कोऽस्ति भूतले ।
. . . . . मादतशुद्धपदाम् ॥
श्रीबोम्मगण्ट्युपपदश्रुतमार्यमिष्टैः
संभावितं बुधवरं द्विजराजमीडे ॥
कणभुक्कपिलाहीशजैमिनिव्यासगौतमाः ।
बोम्मगण्ड्यप्पया . . . . . ॥
. . . . . ।
. . . बालबोधार्थं व्याकुर्मः स्वप्रतीतितः ॥

Vide for the end without gaps R. Nos. 1170 and 4557 of the Triennial Catalogue of the Sanskrti MSS. in the Madras Govt. Oriental MSS. Library.

966. 38. I. 4.

नामलिङ्गानुशासनव्याख्या पदचन्द्रिका—बृहस्पतिकृता

Paper. 960 Foll. $8\frac{1}{8} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in four volumes.

Transcribed in 1935 from a MS. belonging to the Madras Government Oriental MSS. Library.

This is one of the valuable commentaries on the Nāmaliṅgānusasāna of Amarasiṁha by Bṛhaspati who is popularly known by the name Rāyamukuṭa which is only his title awarded by his patron. The commentary is called Padacandrikā. Another MS. of this work is available in the India Office Library and it reads some noteworthy verses in the introduction as given below:

"श्रीवत्सलाञ्छनपदद्वयपद्मभृङ्ग-
द्रङ्गापयोऽन्वहविगाहनहीनपङ्कात् ।
मायाप्रतिग्रहनिवर्तनसत्प्रतिज्ञा-
द्रोविन्दनामजनकाज्जनकानुकारात् ॥
भर्तृव्रतागणशिरोमणितां गतायाः
सीमन्तिनीगणशतैरपि वन्दितायाः ।
दानव्रतौघविधिसाधितकीर्तिसीम्नो
मातुश्च शीलघृतनीलमुखायिदेव्याः ॥

थोऽभूद्यस्य च योषिदद्भुतगुणा भूयो रमा निर्वृता
धत्ते यः कविचक्रवर्तिपदमप्याचार्यवर्यश्च यः ।
राढायामपि गाढनिर्मलकुलच्छत्रं कुलीनाग्रणी-
र्यः प्रापत्प्रणतः परं हरिपदद्वन्द्वारविन्दे च यः ॥
ज्योतिष्मन्मणिपुञ्जरञ्जनरुचिं हारं ज्वलत्कुण्डले
रत्नौघच्छुरिता दशाङ्गुलिजुषः शोचिष्मतीरूर्मिकाः ।
यः प्राप्य द्विरदोपविष्टसकलस्त्रानैरविन्दन्नृपा-
च्छत्रे तैस्तुरगैश्च रायमुकुटाभिख्यामभिख्यावतीम् ॥
यत्पुत्रा नृपमन्त्रिमूलमणयो विश्रामरामादयः
ख्याता दिग्जयिनामपीह जयिनो लोके कवीन्द्राश्च ये ।
ब्रह्माण्डामरपादपादिसहितं येऽदुस्तुलापूरुषं
तेत्तद्ग्रन्थविशेषनिर्मितिकृतः कृत्स्नेषु शास्त्रेषु ते ॥
पुण्यां पण्डितसार्वभौमपदवीं गौडावनीवासवा-
द्यः प्राप्तः प्रथितो बृहस्पतिरिति क्ष्मालोकवाचस्पतिः ।
कोशस्यामरनिर्मितस्य विविधव्याख्यानदीक्षागुरुः
सानन्दं पदचन्द्रिकां स कुरुते टीकामिमां कीर्तये ॥
इयं षोडशटीकार्थसारमादाय निर्मिता ।
अतोऽभिलिखितोऽर्थोऽस्या न हेयः सहसा बुधैः ॥"

(Vide Nos. 954 and 955 in the Catalogue of the India office Library. Vol. II, London, 1889).

MM. Haraprasādas'āstri on the evidence of the above mentioned verses and tradition writes some remarks on the author which are briefly given below:

Bṛhaspati was a Brāhmaṇa belonging to S'rīvatsagotra and a native of a village of Mahinta in Bengal and therefore he is also called Mahintāpanīya. He was one of the prominent figures in Bengal in the beginning of the 15th century. He was patronized by one of the Sultāns of Bengal and wrote also a Smṛti work called Smṛtiratnahāra. He was given the titles of Kavicakravartin, Rājapaṇḍita, Ācāryavarya, Paṇḍita-Sārvabhauma, Kavipaṇḍita-cūḍāmaṇi and Rāyamukuṭamaṇi. His father was Govinda and his mother was Nīlamukhāyi; his wife was Ramā who was dead at the time of writing the commentary. He had many sons two of whom were named Visrāma and Rāma. In this commentary he has embodied the substance of 16 previous commentaries. (Vide page 77 of the Preface to the Des. Cat. of Sans. MSS. in the collections of the Asiatic Society of Bengal, Vol. VI, Calcutta, 1931). It is said that the work was composed in S'aka 1353 corresponding to 1431 A.D. as stated by the author himself (Vide No. 956 in the Catalogue of the India Office Library. Part II. London, 1889). The author quotes the following authors and works: Trikāṇḍī, Utpalanī, Sabdārṇava, Ratnamālā, Kaumudī, Trikāṇḍas'eṣa, Bhāgavṛtti, Saṁkṣiptabhārata, Ūṣmaviveka, Amaramālā, Uṇādivṛtti by Govardhana, Rūparatnākara, Hariprabodha, Jāmbavatīvijaya, Kṣīrasvāmin, Subhūti, Rājadeva. Maitreya, Vidyās'īla, Dāmodara, Vopālita, Sarvānanda, Saṁsārāvarta, Sarvadhara, Rantideva, Māṭhara, Rudra, Sarvajna Nārārāyaṇa, Bhīma, Somānanda, Tārapāla, Kaliṅga and Yoges'vara.

Beginning:

अध्यास्ते यः सर्वं ध्रुव ईश्वर इत्यगोचरो वचसः ।
अहमिति संविद्विषयः पुरुषः स परः पुरातनो जयति॥

अभीष्टदेवतानमस्काराद्युपनतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परि-

समापयतीति प्रामाणिकं मतम्। अतो निष्प्रत्यूह-प्रारिप्सितपरिसमाप्तिहेतुविशिष्टदेवतासंकीर्तनात् वि-शिष्टादृष्टमुत्पिपादयिषुर्ग्रन्थकारः प्रथमं नमस्कारश्लोकं निबबन्ध—यस्य ज्ञानदयासिन्धोरिति।

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥

हे धीराः स भगवान् सेव्यतामाराध्यताम्। धैर्य-शालिन एव सेवितुं शक्नुवन्तीति तानेव संबोधयति। प्रकृतत्वात् सूक्ष्ममतिभिः हितेच्छुभिः। स कः; यस्य गुणा मैत्रीमर्यादादयः, अणिमादयो वा अनघा निष्पापाः रागाद्यसंवलिता इति यावत्। यद्वा—अनघा ह्रद्याः। तथाच धरणिः—"अनघोऽपाप-ह्रदयोः" इति। गुण्यन्ते भाव्यन्त इति गुणाः। गुण आमन्त्रणे। कर्मणि घञ्। यस्यैवंभूतस्य। ज्ञानदयासिन्धोरिति ज्ञानं समस्तविषयावबोधः। दृष्टं स्वार्थमनपेक्ष्य परदुःखहानेच्छा दया। तयोरम्बु-तुल्ययोः सिन्धोरिव सिन्धोरिति रूपकम्। ज्ञानं च दया च ते ज्ञानदये। ताभ्यां सिन्धुरिव सिन्धुः। प्रकृत्यादित्वात्तृतीया। तृतीयेति योगविभागात्समास इति सर्वधरादयः। सिन्धुशब्दोऽत्र विपुलाधारत्वा-दुपचरितः। सिन्धुसाम्यमाह—अगाधस्यानवच्छिन्न-महिम्नः अन्यैरनधिगतपारत्वादपरिच्छेदगाम्भीर्यस्य वा। स किंभूतः। परहितापादनेषु नास्ति क्षयो विरामो यस्येत्यक्षयः। मरणादिराहित्याद्वा। फलादेर्विना नैव प्रेक्षावत्प्रवृत्तिरित्याह—श्रिये चेत्यादि। श्रीरत्र त्रिवर्ग-संपत्तिः। तत्प्राप्तये। क्रियार्थोपपदस्य चेत्यादिना चतुर्थी।

Colophon of the first Kāṇḍa found on page 480.

इति महन्तापनीयचक्रवर्तिराजपण्डितश्रीरायमकुट-मणिकृतायां टीकायाममरसिंहस्य प्रथमः काण्डः।

Colophon of the second Kāṇḍa found on page 1041.

इति महन्तापनीयकविचक्रवर्तिराजपण्डितसार्वभौ-मकविपण्डितचूडामणिमहाचार्यरायमकुटमणिश्रीमद्बृह-स्पतिकृतायाममरकोशपञ्जिकायां पदचन्द्रिकायां शूद्र-प्रधानवर्गे भूम्यादिकाण्डो नाम द्वितीयः काण्डः समाप्तः।

End:

एवं प्राप्तजीविक इत्यादि आपन्नजीविकेत्यादि लिङ्गत्रयमुदाहार्यम्। अलं समर्थे जीविकायै। अर्थो जीविका। स्त्रीक्लीबयोरप्युदाहार्यम्। तद्धितार्थे द्विगुः। तद्धितार्थयोः द्विगुः सोऽपि परोपगो वाच्यलिङ्ग इत्यर्थः। पञ्चसु कपालेषु संस्कृता पञ्चकपाला शङ्कुली। पञ्चकपालः सूपः। पञ्चकपालं व्यञ्जनम्। तद्धितार्थ इत्यादिना समासे संस्कृतं भक्षा इत्यण्। तस्य द्विगोर्लुगनपत्ये इति लुकि रूपभेदाभावात्। एकः। एका। एकम्। द्वे। द्वौ। त्रयः। तिस्रः। त्रीणि। चत्वारः। चतस्रः। चत्वारि। बहवः। बहूनि . . . .। संख्यासर्वनामतदन्तकाः। अर्थो न्यासः। बहुव्रीहिरिह दिङ्मात्रमुन्नेयः।

गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः।
कृताः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ॥
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः।
कतिष्णान्तास्त्रिषु समा युष्मदस्मत्तिङव्ययम्।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥

Colophon:

इत्यमरसिंहकृतौ नामलिङ्गानुशासने लिङ्गादिसं-ग्रहवर्गः समाप्तः।

967. 10. K. 14.

नामलिङ्गानुशासनव्याख्या व्याख्यासुधा—भानुजिदीक्षितकृता

Paper. 320 Foll. 14 × 6 inches. 14 lines in a page. Devanāgarī script. Old. Good. Good writing.

The MS. contains also the text copied in the centre of the pages. The folios in each Kāṇḍa are given separate numbers.

This commentary on Amarasiṁha's Nāmaliṅgānuśāsana is by Bhānujidīkṣita, son of the famous grammarian Bhaṭṭojidīkṣita. The commentary refers to a large number of authorities and criticizes Bṛhaspati's commentary in many places. The author Bhānujidīkṣita is also called Rāmāśrama evidently in his later life as an ascetic and was patronized by the King Kīrtisiṁha of Vaghela family. The author is believed to have lived at the end of the 16th and the beginning of the 17th centuries A.D. The commentary has been printed and published by the Nirnayasagara Press, Bombay in 1905.

Beginning :

वल्लवीवल्लभं नत्वा गिरं भट्टोजिदीक्षितम् ।
आमरे विदधे व्याख्यां मुनित्रयमतानुगाम् ॥

प्रारिप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबबन्ध—यस्येति । हे अनघाः भवद्भिः स धीरः सेव्यताम् । न अघं पापं येषां ते अनघा निष्पापाः, सुकृतिन इति यावत् । सुकृतिन एव तं सेवितुं प्रभवन्तीति त एव संबोध्यन्ते । 'धर्मेण पापमपनुदति, इति श्रुतेः । धियं राति ददाति । रा दाने अस्मात् क्विप् चेति क्विप् । धीरा ज्ञानप्रदो गुरुः । अनेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्, इति श्रुत्यर्थ उपदिष्टः । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति गुरुसेवायाः फलमाह—श्रिये चामृताय चेति । चद्वयमुभयोः प्राधान्यद्योतनाय । भुक्तिमुक्तिप्राप्तिर्गुरुसेवातो भवति ।

Colophon of the first Kāṇḍa :

इति श्रीवघेलवंशोद्भवश्रीमहीधरविषयाधिपश्रीकीर्तिसिंहदेवाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजिदीक्षितविरचितायामामरटीकायां व्याख्यासुधायां प्रथमकाण्डः संपूर्णतामगात् ।

Colophon of the second Kāṇḍa :

इति श्रीवघेलवंशोद्भवश्रीमहीधरविषयाधिपश्रीमहाराजकुमारश्रीकीर्तिसिंहदेवाज्ञया श्रीभट्टोजिदीक्षितात्मजश्रीभानुजिदीक्षितविरचितायाममरटीकायां व्याख्यासुधायां द्वितीयकाण्डः संपूर्णतामगात् ।

End :

शेषमिहानुक्तं शिष्टानां प्रयोगाज्ज्ञातव्यम् । यथा चालनी तितउः पुमान् इत्युक्तम् । इह तितउ परिपवनं भवति इति भाष्यप्रयोगात् नपुंसकमपि बोध्यम् । तथा ताटङ्कस्ते इत्याचार्यप्रयोगात् ताटङ्कशब्दस्य पुस्त्वम् । यथा वा कलिका कोरकः पुमान् इतीहोक्तम् । कोरकाणीति माघप्रयोगान्नपुंसकत्वमपि । यत्तु गोधा पोटा इत्युदाहृतवान् मुकुटः; तन्न, ङ्याबूङन्तमित्युक्तत्वेन शेषत्वाभावात्

Colophon :

इति तृतीयकाण्डः संपूर्णतामगात् ।

The scribe adds :

शके १७३६ भवनामसंवत्सरे पौषकृष्णप्रतिपद्यामिदं पुस्तकं समाप्तम् ।

968. 29. M. 2.

नामलिङ्गानुशासनव्याख्या व्याख्यासुधा—भानुजिदीक्षितकृता

Palm-leaf. 148 Foll. 16 × 1½ inches. 11 lines in a page. Telugu script. Old. Good writing.

Contains the second and third Kāṇḍas complete.

Reads the following colophon :

इति पदवाक्यप्रमाणज्ञभट्टोजिदीक्षितात्मजभानुजिदीक्षितविरचितायाममरकोशव्याख्यायां सुधाख्यायां तृतीयकाण्डविवरणं संपूर्णम् ॥

969. 21. O. 14.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 261 Foll. 16½ × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is a commentary on the Nāmaliṅgānuśāsana of Amarasiṁha by Sarvānanda of Vandighaṭī family. The commentary is called Ṭīkāsarvasva. MM. Haraprasāda S'āstri says that Sarvānanda belonging to the family of Vandighaṭī was connected with the family of Banerji of Bengal (Vide M. Seshagiriśāstri's Report on the search of MSS. for the Govt. of Madras in 1893-94, No. 2, pages 24 and 335). The author has clearly said in commentary on the verse 21 of the Kālavarga that the commentary was composed in the S'aka year, 1082 corresponding to 1160 A.D. (Vide also footnote 3, p. 272, of the New Indian Antiquary No. 5, Vol. II, 1939.)

The author quotes a good number of authors and works and a list of them has been given in M. Seshagiri Sastri's Report mentioned above.

Complete in three Kāṇḍas.

Beginning :

बर्हिणबर्हापीडः सुषिरपरो बालवल्लवो गोष्ठे ।
मेदुरमुदिरश्यामलरुचिरव्यादेष गोविन्दः ॥
मुदेऽसौ धीराणां न गुणलवगर्वान्मम परि-
श्रमः किंच स्वार्थस्तदिह विबुधाः क्षन्तुमुचितम् ।
इतो ये सासूया अनृजुमतयो नूतनतया
खलास्तेऽमी हेया गुणिषु पुनरप्यञ्जलिरयम् ॥
अथ टीकासर्वस्वं दशटीकावित्करोत्यमरकोशे ।
श्रीमत्सर्वानन्दो वन्दिवटीयामार्तिहर पुत्रः ॥
यद्यपि सन्त्यतिगुणिनः श्रमस्तथाप्यत्र मम हि मौर्ख्यात् ।
ललितं रौति पिकश्चेद्वाग्यामं यातु किं काकः ॥

तत्रादौ भगवतः सेवायां परोपदेशेन प्रारिप्सितप्रत्यूहशमनाय धर्ममर्जयन्नाह—यस्येत्यादि । हे धीराः सेव्यतामित्यनेन धैर्यशालिन एव सेवितुं शक्नुवन्तीति तान् संबोधयति । यस्यानघा गुणाः रागादिपापरहिताः । तथाचाजयकोशः—अघशब्दो भवेत्पापे दुःखव्यसनयोरपीति ।

End :

शेषं तु ज्ञेयं शिष्टप्रयोगतः । यदत्र ग्रन्थे लिङ्गं नोक्तं नाम च नोक्तं तत्पूर्वाचार्याणां महाकवीनां च प्रयोगादवसेयम् । यथा-'अनणन्तात्कृत्यन्तं गायत्राद्यं तथादन्तम्' इति स्त्रीत्वानुशासनमरुणस्येत्यन्यद्वोद्ध-

व्यम्। नामानुशासनं यथा निलिम्पा द्युसदो देवा इत्यादि गङ्गाधरादीनाम्।

त्रीणि व्याकरणान्यधीत्य सकलं साहित्यमालोक्य च
प्रज्ञाव्यापकभाषितानि हृदये न्यस्याकृतेदं सह।
प्राज्ञेनानु सनातनेन बहुशः प्रत्यक्षरं शोधितं
जिज्ञासा यदि शब्दवर्त्मनि तदा चैतत्समालोच्यताम्॥

Colophon:

इति वन्दिघटीयसर्वानन्दकृतौ टीकासर्वस्वे लिङ्गादिसंग्रहवर्गः। संपूर्णं च टीकासर्वस्वम्।

Then reads the following verses:

"सन्ति कूपाः स्फुरद्रूपाः परितः सरितः शुभाः।
तथापि चातकस्यैकः फलदो जलदोदयः॥
गतिश्चन्द्रश्चकोराणां चातकानां वलाहकः।
वासुदेवो भवार्तानामस्माकं तु भवान् गतिः॥
केशा हि यस्य काशाभा हुंकारादिविनाशिनः।
ललिता गतयो दद्युः शं वोऽब्जाम्बुनगौकसः॥"

Three extra leaves added at the end contain in Nandināgarī script a fragment of the same commentary on the Avyayavarga. The fly-leaf at the beginning gives the name of the former owner of the MS. as Nañjayya.

970. 8. H. 18.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Paper. 120 Foll. $12\frac{1}{8} \times 8$ inches. 30 lines in a page. Telugu script. Old. Injured. Good writing.

Foll. 54 and 88 are left blank. Some folios are written on one side only.

Bound in book form.

Breaks off in the Manuṣyavarga of the second Kāṇḍa.

Reads the following additional stanza in the beginning:

प्रत्यूहपर्वततटीवप्रक्रीडाधुरंधरम्।
वन्देऽन्तरायकदलीभञ्जनं कुञ्जराननम्॥

971. 21. G. 1.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 19 Foll. $14\frac{1}{8} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Vaiśya and Śūdra vargas in disorder.

972. 21. G. 2.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 82 Foll. $15\frac{1}{8} \times 2\frac{1}{2}$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Kāṇḍa incomplete.

Reads the following additional stanza in the beginning:

प्रत्यूहपर्वततटी + कुञ्जराननम्॥

973. 21. G. 3.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 171 Foll. $16\frac{1}{4} \times 1\frac{1}{8}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Breaks off in the Manuṣyavarga of the second Kāṇḍa.

974. 24. K. 8.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 28 Foll. 15 × 1¼ inches. 5 lines in a page. Grantha script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

Contains the first Kāṇḍa incomplete.

975. 27. I. 12.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Palm-leaf. 15 Foll. 16½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a fragment of the 1st Kāṇḍa.

976. 39. F. 5.

नामलिङ्गानुशासनव्याख्या टीकासर्वस्वम्—सर्वानन्दकृतम्

Paper. 247 Foll. 8⅜ × 6½ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made in 1927 from the MS. described above under No. 972.

Contains the first Kāṇḍa incomplete.

977. 40. D. 34.

नामलिङ्गानुशासनव्याख्या शिशुबोधिनी—महेश्वरकृता

Paper. 55 Foll. 9½ × 4¼ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a commentary on the Nāmaliṅgānuśāsana of Amarasiṁha by Maheśvara, son of Rāmacandrabhaṭṭa with surname Sukaṭhānekara of Viśvāmitragotra. The commentary is called Śiśubodhinī. The author seems to have been a Śākta. Probably this Maheśvara may be identical with Maheśvara, the author of the Paryāyaratnamālā described under No. 1735 in the Descriptive Catalogue of Sanskrit MSS. in the Government Oriental MSS. Library, Madras, Vol. III, 1906. This commentary is said to have been revised and enlarged by Raghunāthaśāstrin and printed with the title Amaraviveka in Śaka 1770 = 1848 A.D. at Poona and subsequently at Nirṇayasāgar Press, Bombay in 1886 A.D.

Contains the third Kāṇḍa only.

Beginning :

ब्रह्मश्रीशेशमौलिरत्नच्छविवृन्देन करम्बितांशुवृन्दम् ।
हृदि येनालंकृतं तमीडे शान्तादुर्गापद्मखेन्दुबिम्बम् ॥

इत्यौपच्छन्दसिकेन वृत्तेन मङ्गलं विधाय तृतीयकाण्डं व्याख्यास्यामः । तत्रादावमरसिंहः सामान्यनामहेतुद्योतनाय वर्गसंकेतान् प्रतिजानीते-विशेष्यनिघ्नैरिति । सामान्ये साधारणत्वात् सामान्यनाम्नि वक्ष्यमाणेऽत्र काण्डे पञ्च वर्गाः कथ्यन्त इति शेषः ।

कैः कृत्वा । विशेष्यनिघ्नैः विशेष्याधीनैः विशेषणशब्दैः सुकृत्यादिभिः । यथा देवदत्तो विशेष्यं, सुकृती विशेषणम् । संकीर्णैः परस्परविजातीयार्थैः कर्मपारायणादिभिः । नानार्थैः नाकलोकादिभिः । नानार्थो यथा नाकशब्दोऽस्त्येकोऽपि त्रिदिवाकाशयोः प्रतीयते । अव्ययैराङादिभिः । लिङ्गादिसंग्रहैः स्त्रियामीदूद्विरामैकाजित्यादिभिः । आदिना नामसंग्रहैश्च लङ्का शेफालिकेत्यादिभिः । ते च वर्गाः स्वतन्त्रा नेत्याह—वर्गाः संश्रय आश्रयो येषां तादृशाः ।

End :

परमिति । विरोधे विप्रतिषेधे सति परं लिङ्गलक्षणं प्रवर्तते । यथा मानुषशब्दस्य कषणभमरोपान्ता इत्यनेन प्रागुक्तेन पुंस्त्व एव प्राप्ते सति द्विचतुःषट्पदेत्यनेनोत्तरत्रोक्तेन स्त्रीत्वं पुंस्त्वं च प्राप्तम् । तेन मानुषी मानुष इति भवति । शेषमिति । शेषमत्रानुक्तम् अभिधानादिकं शिष्टानां शब्दशास्त्रनिपुणानां व्यासादीनां प्रयोगतो ज्ञेयं बोद्धव्यमिति । इति वाच्यलिङ्गसंग्रहः । उक्तमुपसंहरति—इतीति । इत्येवंप्रकारेणामरसिंहस्य कृतौ नामलिङ्गप्रतिपादके शास्त्रे सामान्यनामा तृतीयोऽयं काण्डः प्रस्तावो वर्गसमूहो वा समर्थितः कृतः समाप्त इत्यर्थः ॥

आलस्यादत्र मौढ्याद्वा यदशुद्धं बभूव तत् ।
परोपकारशालित्वाच्छुद्धं कुर्वन्तु पण्डिताः ॥
यद्वक्त्रचन्द्रं प्रपिबंश्चकोरव-
द्वोभोति नेत्रत्रिक ईश्वरस्य हि ।
यस्याः पदब्जे विलसन्ति निर्जराः
स्वान्तालयां तां ललितां भजेमहि ॥
विश्वामित्रजवंशदुग्धजलधौ श्रीरामचन्द्राह्वय-
श्चन्द्रः प्रादुरभूत्ततः समुदभून्नाम्ना महादीश्वरः ।
तस्मादाविरभूदियं च शिशुबोधिन्याख्यटीकेयतो
मा भूद् दुर्घटमर्थसाधनमभूदेषा हि देवी मुदा ॥

टीका । महेत्यक्षरद्वयमादिर्यस्य ; स चासावीश्वरश्चेति महेश्वर इत्यर्थः ।

Colophon :

इति श्रीशान्तादुर्गाख्यकुलदैवतपदपूजकसुकठाने करोपनामकरामचन्द्रभट्टसुतमहेश्वरकृतायां शिशुबोधिन्याममरकोशटीकायां सामान्याख्यस्तृतीयः काण्डः समाप्तः ॥

The scribe adds :

शके १७३९ श्रीमुखनामसंवत्सरे चैत्रशुद्ध ८ तद्दिने गरुडोपनाम्ना त्र्यम्बकभटात्मजेन महिपतिना लिखितम् ।

978. 38. E. 2.

नामलिङ्गानुशासनव्याख्या कौमुदी—नयनानन्दशर्मकृता

Paper. 417 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed in 1936 from a Bengali MS. of the India Office Library, London.

The MS. has been carelessly copied.

The Kaumudī is a commentary on the Nāmaliṅgānuśāsana of Amarasiṁha by Nayanānandaśarman. T. Aufrecht says in his Catalogus Catalogorum, (p. 26. Part I) that the commentary was commenced by Nayanānandasarman and completed by his pupil Rāmacandraśarman. The author quotes the following authors and works : Subhūti, Sarvānanda, Śrīpatidatta, Vidyādhara, Ramānātha, Kṛṣṇadāsa, Gadasiṁha, Vasantarāja, Sarvadhara, Saṁkṣiptabhārata, Hariprabodha,

Kapphaṇābhyudaya, Jānakīharaṇa, Vaijayantī, Āscaryamañjarī, etc.

Breaks off in the 1st varga of the 3rd Kāṇḍa.

Beginning :

विचार्य सर्वशास्त्राणि नयनानन्दशर्मणा ।
यत्नादमरकोशस्य कौमुदी परितन्यते ॥

यस्येति । हे धीराः स्वे विष्णुः सेव्यताम् । स्वेकारो वासुदेवे स्यात् इति कोशः । यस्य सिन्धोर्गुणाः सत्त्वादयः अनघोः हृद्याः । स्वेऽनघोऽपापहृद्ययोः इति विश्वः । गुण्यन्ते स्वेऽभ्यस्यन्ते इति गुणाः । गुण आमन्त्रणे चुरादिस्वरान्तत्वात् कर्मणि । स्वेन यस्य किं भूतस्य सिन्धोः ज्ञानदयोपलक्षितस्य विशेषणे तृतीया । ज्ञानं ददातीति ज्ञानदा । कुर्लक्ष्मीः ज्ञानदया सहिता इति समासे ज्ञानदे तत्तृतीयान्तं पदम् । स्वेऽगाधस्य स्वेऽपरिमितमहिम्नः स्वेऽत एवामरत्वात् स्वेऽक्षयः विनाशशून्यः । ननु प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । सेवनं किमर्थं तदुच्यतामित्याह । श्रिये अमृताय च । श्रीः त्रिवर्गसंपत्तिः । स्वेस्य तं मोक्षः । तथा च

लक्ष्मीसरस्वतीधीत्रिवर्गसंपद्विभूतिशोभासु ।
उपकरणवेषरचनाविधासु च श्रीरिति प्रथिता ॥

इति व्याडिः ।

End :

नृगेति । एते जरायुजशब्दवाच्याः । आदिना खराश्वादयः । स्वेदेति । एते स्वेदजशब्दवाच्याः । आदिना मशकादयः । पक्षीति । एते अण्डजशब्दवाच्याः । आदिना मत्स्यादयः । प्राणीति । एतैः प्रायः प्राणिनः कथ्यन्ते इति सु० । अन्यत्र तु न दृश्यते । उद्भिद इति । एते उद्भिच्छब्दवाच्याः । आदिना ओषध्यादयः । उद्भित्पर्यायमाह—उद्भिदिति । त्रयं एतदादिषु कामचारात् क्लीबनिर्देशः । सुन्देति । पद्यं मनोरमे । स्त्रियां सुन्दरी सुन्द . . . . . .

. . . . . .

Colophon :

इति श्रीनयनानन्दशर्मकृतायाममरकोशकौमुद्यां प्राणिवर्गविवेकः समाप्तः ।

979. 30. N. 33.

नामलिङ्गानुशासनम्—अमरसिंहकृतम्

Palm-leaf. 23 Foll. 17 × 1 inches. 5 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Contains the first Kāṇḍa only complete.

980. 9. E. 68.

नामसंग्रहमाला—अप्पयदीक्षितकृता

Paper. 34 Foll. 11¾ × 4¾ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

The Nāmasaṁgrahamāla is a lexical work dealing with synonyms by the famous Appayadīkṣita of the 17th century A.D. In the introductory verse the author says that the work is intended to strengthen the statements made in his other work Nāmasaṁgraha. In this connection he quotes many works and authors including the following: Keśava (1120 A.D.); Yādavaprakāśa (1050 A.D.); Nāmamālā (1125 A.D.); Śabdaratnākara by Vāmanabhaṭṭabāṇa (1450 A.D.); Viśvaprakāśa (1111 A.D); Cakravartin, a commentator on

the Raghuvaṁsa; Rabhasa; Paryāyamañjarī by Haṁvīramiśra and Amaraśesa. Rāmāvatārasarman referring to the work Śabdaratnākara of Vāmanabhaṭṭabāṇa in the introduction to the edition of the Kalpadru in the Gaekwad's Oriental Series No. 42 observes thus: "It is probably the same as quoted by Appayadīkṣita in his Nāmasaṁgrahamālā. But Vāmanabhaṭṭabāṇa is perhaps a later author of the last century (*i.e.* 19th century A.D.)" Evidently he has failed to fix Vāmanabhaṭṭabāṇa in the 15th century A.D. The Nāmasaṁgrahamālā gives us many notable facts. It proves that the word Pallava is the name of the Kāñcī or Toṇḍīramaṇḍala also and not only of the Kings known by that name. Kuṭilā is one of the names of the river Gaṅgā. In these connections he quotes passages from various Purāṇas. The MS. contains also the text of Nāmasaṁgraha in about 250 verses mixed with the commentary. Total No. of granthas contained in the work is said to be 1200.

Complete.

Beginning:

व्यवहाराय बालानां रचिते नामसंग्रहे ।
नाम्नां नातिप्रसिद्धानां लिख्यते वृद्धसंमतिः ॥
यस्मिन्नर्थान्तरोक्त्या च तन्नामोक्त्या च संग्रहः ।
तं हित्वा संमतिश्लोकः सोऽन्यथापूर्यं लिख्यते ॥

अयमाद्यो नामसंग्रहश्लोकः—

अथ केषांचिदर्थानां व्यवहारोपयोगिनाम् ।
अभिधानानि कतिचित्संगृह्यन्ते यथाश्रुतम् ॥

कतिचित्—एकं द्वे त्रीणि चत्वारि वा क्वचित्क्वचिदधिकान्यपि ।

वसुन्धरा रत्नगर्भा मध्ये तस्याः सुवर्भुवः ।
जम्बूद्वीपः कुमारोऽसौ वेष्टितो लवणाब्धिना ॥

काश्यपी भूतधात्री च रत्नगर्भा वसुंधरेत्यभिधानरत्नमाला । जम्बूद्वीपः कुमारश्च यत्रैते भारतादयः । इति वैजयन्ती । द्वयोरपि कुमारः स्याद्बाले स्त्रीपुंसयोः पुमान् । जम्बूद्वीपे कुमारी तु कन्यायां सा स्त्रियामसौ । इति केशवकोशश्च । जम्बूद्वीपं समावृत्य लक्षयोजनविस्तृतः । मैत्रेय वलयाकारं श्रितः क्षारोदधिर्बहिः । इति श्रीविष्णुपुराणम् ।

यत्र प्रजानां स्थानानि वासस्य रमणस्य च ।
वर्षाणि भारतादीनि नवोक्तानि मनीषिभिः ॥

वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियः । इति वैजयन्ती । वसन्त्यृषन्त्यो वर्षेषु प्रजायेषु चतुर्विधाः । वृषिरित्येष रमणे वर्षत्वं तेषु तेषु तत् । इति मत्स्यपुराणम् । भारतम्, किंपुरुषम्, हरिवर्षम्, इलावृतम्, भद्राश्वम्, केतुमालम्, रम्यकम्, हिरण्मयम्, उत्तरकुरुवर्षं चेति नव वर्षाणि ।

End:

अम्बुजस्याह्वयाः सर्वे निधिभेदे नृलिङ्गकाः ।
माक्षिके षण्डलिङ्गाः स्युस्त्रीलिङ्गास्ते मताः स्त्रियाम् ॥
अर्थास्तावदिहानन्ताः स्थावरा जङ्गमाश्च ये ।
एकैकस्याप्यभिख्यानामियत्ता नावधार्यते ॥
स एव देवस्ता वेत्ति यस्य निःश्वसितान्यमूः ।
केषांचित्त्वभिधाः काश्चिद्बालबोधाय दर्शिताः ॥
पद्ममन्दारपुष्पौघग्रथिता सगुणा सिता ।
नामसंग्रहमालेयं धार्या सौरभदायिनी ॥

Colophon:

इति श्रीमदप्पयदीक्षितविरचिता नामसंग्रहमाला समाप्ता । ग्रन्थसंख्या १२०० ॥

The last two additional folios contain some miscellaneous passages selected from various lexicons. The passages begin thus:

"घ्राणं घोणा विघूर्णिका । नर्क नकुटिकशिङ्घिनी ।
सृक्काधोभागः असिकः । तदधश्चिबुकम् ।
कण्ठमणिः कालकः । दोर्मूलं भुजकोटरः ।
खण्डिकः कक्षा । प्रकोष्ठः कलाविका ।
नखः कामाङ्कुशो महाराजकरभूः भुजाकण्टकः ।
प्रसारिताङ्गुलौ पाणौ चपेटः प्रतलस्तरः ॥"

and end thus:

"अलकः स्यात्कर्कशरः खं खरश्चूर्णकुन्तलः ।
स तु फाले भ्रमरकः कुरलो भ्रमसालकः ।

श्रोत्रं शब्दाधिष्ठानपैञ्जूषमहानादध्वनिग्रहाः । पालिस्तु कर्णलतिका । शङ्खो फालभ्र . . . . रे ।"

The front page of the first folio contains the following lines:

"वापेय . . तिमञ्जरी नहि भुवो भागे तडिद्वल्लरी
न व्योम्नि स्फुरदिन्दुबिम्बकलिका न . . . ।
अद्योदित्वररश्मि . . दरुणप्रख्यानिखातेव मे
मूर्तेव प्रतिबिम्बितेव हृदि सा . . संलक्ष्यते ॥
दातव्यं यदि भव्यं सव्यं वा सव्यमस्तु मे चरणम् ।
तव देव्यहं दवीयान् यदि तदिह स्यादपास्य किं शरणम् ॥
रघुनाथ कथं ते भुवि प्रथन्ते त्वदर्चनाविधुराः ।
गीरपि रमयति तेषां कथमिव सहसा जगन्ति धीराणाम् ॥
दातव्यं यदि किं न देयमिह ते भूदेव विद्यावते
स्तोतव्यं यदि किं न वा स्तुतिपदं वस्तु स्वतो धीमताम् ।
प्राप्तव्यं यदि सर्वलोकविदितं ह्युच्चैः पदं यद्धितं
कर्तव्यं सुजना . . कृते किं वा न भूमौ सताम् ॥"

981. C.5.1.1.S;S;11.

नामसंग्रहमाला—अप्पयदीक्षितकृता

Paper. Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the MS. described in the last number.

Complete.

982. 24. M. 8.

निघण्टुसमयः—धनंजयकृतः

Palm-leaf. 8 Foll. $16 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Nighaṇṭusamaya is a lexicon of synonyms and homonyms by Dhanaṁjaya. The MS. contains two Paricchedas, the first containing 200 verses and the second 50 verses. The first Pariccheda alone has been printed at Benares in 1865 A.D. with the title Dhanaṁjayakoṣa. The work is also called Nāmamālā. The second half of the stanza प्रमाणमकलङ्कस्य etc. found at the end of the first chapter is read in the printed edition as द्विसंधानं कवेः काव्यं रत्नत्रयमपश्चिमम्. Thus it is evident that our author has also written the Dvisandhānakāvya, published in the Kāvyamālā Series No. 49, Bombay 1895. The author Dhanaṁjaya in that poem describes himself as the son of S'rideví and Vāsudeva and the pupil of Dasaratha as per commentary thereon. The author is belived to have lived between

750 and 800 A.D. (Vide, page 181, Vol. II of the Journal of Andhra Historical Society, 1927.) The author mentions three works *namely* Akalaṅka's Pramāṇa-śāstra, Pūjyapāda's S'āsanaśāstra (Vyākaraṇa) and his Kāvya (Dvisandhāna-kāvya) as three gems among the leterary works. According to the MS. in the Tanjore Palace Library the work consists of three chapters *namely* S'abdasaṁkīrṇa (1 and 2) and Sabdavistīrṇa (3rd).

Contains 2 chapters.

Beginning of the first Pariccheda.

तन्नमामि परं ज्योतिरवाङ्मनसगोचरम् ।
उन्मूलयत्यविद्यां यत् सिद्धानुन्मीलयत्यपि ॥
द्वयं द्वितयमुभयं यमलं युगलं युगम् ।
युग्मं द्वन्द्वं यमं द्वैतं पादयोः पातु जैनयोः ॥
ऋषिर्यतिर्मुनिर्भिक्षुस्तापसः संशितो व्रती ।
तपस्वी संयमी योगी वर्णी साधुश्च पातु वः ॥
दीक्षितं मोघशिष्यं च तमन्तेवासिनं विदुः ।
कृतान्तागमसिद्धान्ता ग्रन्थाः शास्त्रमतः परम् ॥
भूमिर्भूः पृथिवी पृथ्वी चोर्वरी मेदिनी मही ।
धरा वसुंधरा धात्री क्षमा विश्वंभरावनिः ॥

End of the first Pariccheda:

वर्यं कल्याणमधुरं वरं श्रेष्ठं च पेशलम् ।
भावुकं भविकं भव्यं सौभगेयं शुभं तथा ॥
वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ ।
शब्दपारायणस्यान्तं न गतौ तत्र के वयम् ॥
तथापि किंचित्कस्मैचित् प्रतिबुद्धाय सूचितम् ।
बोधयेत्किं यदुक्तज्ञैर्मार्गज्ञः सह याति किम् ॥
प्रमाणमकलङ्कस्य पूज्यपादस्य लक्षणम् ।
धनंजयकवेः काव्यं रत्नत्रयमपश्चिमम् ॥

Colophon:

इति धनंजये समशब्दसंकीर्णप्ररूपणं प्रथमः परिच्छेदः समाप्तः ।

Beginning of the second Pariccheda:

गम्भीरं रुचिरं चित्रं विस्तीर्णार्थप्रदायकम् ।
शब्दं मनाक् प्रवक्ष्यामि कवीनां च हिताय वै ॥
अर्हत्पिनाकिनौ शंभू जिनावर्हत्तथागतौ ।
देवसूर्यौ विवस्वन्तौ विष्णुरुद्रौ वृषाकपी ॥
वैकुण्ठाविन्द्रगोविन्दावनन्तौ शेषशार्ङ्गिणौ ।
जीमूतौ मेघकुत्कीलौ पर्जन्यौ दकवारिदौ ॥

End of the second Pariccheda:

परमात्मा जिने सिद्धे परमेष्ठ्यर्हदादिषु ।
सिद्धिसिद्धे निषद्यायामर्हत्सिद्धिश्रियामपि ॥
जाते जगति वाल्मीकौ शब्दः कविरिति स्थितः ।
कवी इति ततो व्यासे कवयश्चेति दण्डिनि ॥
कवयः कवयश्चेति बहुत्वं दूरमागतम् ।
विनिवृत्तं चिरादेतत्कवौ जाते धनंजये ॥
प्रज्ञासिधारया(क्रम्य चिरं नामार्थधारिणि ।
शब्दाः सुखं वसन्त्वद्य यशःशेषे धनंजये ॥)

Colophon:

इति धनंजये द्वितीयः परिच्छेदः ।
इति धनंजयनिघण्टुः समाप्तः ।

The scribe adds:

सरस्वतीपूजादिने समाप्तम् ॥

983. 25. E. 4.

निघण्टुसमयः—धनंजयकृतः

Palm-leaf. 28 Foll. $15\frac{3}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha and Tamil scripts. Old. Much injured. Good writing.

Tamil meaning is added to some selected words.

Contains the first Pariccheda (without beginning) and a few lines in the second Pariccheda.

984. 28. C. 43.

निघण्टुसारः

Palm-leaf. 9 Foll. 13½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

The folios bear the numbers 20 to 28. From this it is presumed that these leaves have been separated from a MS. containing more leaves. Foll. 25 and 27 are much injured.

This is a fragment of the summary of the Pañcāsannighaṇṭusāra which is a compilation of about 50 lexicons by different authors (Vide the next number). Telugu meaning is given for selected words.

Wants the beginning and end.

Beginning:

मारौ मन्मथशात्रवौ । विबुधौ सुरपण्डितौ । छाया सूर्यप्रिया कान्तिः । रतिः क्रीडाकामपत्न्यौ । गुणेऽ प्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे । क्षमा भूमितितिक्षयोः । सरलो रसिकः समौ । महिषी राज्ञी । वृषो धर्मे मूषके च शुक्ले च वृषभे वृषः ।

End:

माषपिष्टैः ससंभारैः कल्पिता पर्पटी स्मृता ।
खचर्यः सर्षपाम्लादिमरीचिलवणैः कृतः ॥
पूर्णो गुडादिसंभारैः सुधाफल इति स्मृतः ।
गङ्गासागरमैरेयं वारुणी कापिशायिनी ॥
चञ्चा तु तृणपूलिका ।

985. 24. E. 42.

पञ्चाशन्निघण्टुसारः—विदग्धचूडामणिकृतः

Palm-leaf. 17 Foll. 13⅛ × 1¾ inches. 10 lines in a page. Telugu script. Old. Good. Good writing.

This is a metrical compilation of about 50 works on lexicography written by different authors. The colophon mentions the author by the name of Vidagdhacūḍāmaṇi which, however, seems to be only a title and not the real name of the author. The chapters of the work mostly correspond to those of the Nāmaliṅgānuśāsana of Amarasiṁha. The MS. contains only the first two Kāṇḍas; but the work is believed to consist of 3 Kāṇḍas. The subdivisions of the two chapters contained in the MS. are as follow: 1. Svargādhyāya, 2. Digadhyāya, 3. Kālādhyāya, 4. Manīṣādhyāya, 5. Śabdādhyāya, 6. Nāṭyādhyāya, 7. Sarpādhyāya, 8. Vāryadhyāya, (The 1st Kāṇḍa ends with these 8 adhyāyas.) 9. Vasudhādhyāya, 10. Purādhyāya, 11. Acalādhyāya, 12. Vipinādhyāya, 13. Mṛgādhyāya, 14. Viprādhyāya, 15. Śūdrādhyāya (The second Kāṇḍa breaks off in this adhyāya). To some words Telugu meaning also is added.

Incomplete.

Beginning:

वन्दामहे महेन्द्रादिबृन्दारजनवन्दितम् ।
अनिदंपूर्वगीर्वेद्यमाद्यं दत्तगुरुं वयम् ॥
मन्दिरः सैरिकः स्वर्गश्चावरोहः फलोदयः ।
निलिम्पाः स्वर्गिणः सेन्द्रा दिविजा द्युसदो बुधाः ।

विश्वात्मा विश्वरेताश्च प्राणदः सर्वतोमुखः ।
प्रजासृडग्रजो नाभिजः शंभुः कः सनातनः ।
मरीचिरङ्गिरा दक्षः पुलस्त्यः पुलहो भृगुः ।
क्रतुरत्रिर्वसिष्ठश्च नव ब्रह्माण इत्यमी ।
स्युः संभूतिः स्मृतिः प्रीतिः क्षमा च ख्यातिसन्मती ।
अनसूयारुन्धती च तेषां शक्तय ईरिताः ।
अनिदंपूर्वगीर्वेद आगमोऽनुश्रवा अपि ।
ऋक् च साम च ऋक्सामं तथर्ग्यजुषमित्यपि ।
अरिष्टनेमिस्त्रिककुत् कालकण्ठः पुनर्वसुः ।
वासुश्चानन्तशयनो हरिः कमलोदरः ॥

Colophon :

इति विदग्धचूडामणिकृतपञ्चाशन्निघण्टुसारे प्रथमकाण्डः ।

End :

सादोऽवसन्नता खेदः क्रीडनं तु विनोदनम् ।
सहितं संहितं युक्तं संवृत्तं संयुतं युतम् ॥
संस्कारं समवेतं च प्राहुरन्वितमन्वयम् ।
प्रार्थनाभङ्गवैमुख्यं दाक्षिण्यमिति कथ्यते ॥

An extra-leaf added at the end contains the following verses in praise of S'iva :

"उद्यम्योद्यम्य गम्यस्वमहिमनिभृतोद्भूतशीतांशुपोतो-
द्विद्यत्सद्यःसमुद्यद्रसपृषतधुताशेषभूषाहिशोषम् ।
नित्यप्रत्यग्रमत्यद्भुतमुरगवरव्याघ्रपादादियोगि
स्तुत्यं व्यत्यस्तनृत्यं जगति पशुपतेः सुन्दरेशस्य जीयात् ॥
दद्यादद्यानवद्यां मुदमुरगफणारत्ननिर्यन्ननिर्य-
त्प्रद्योतद्योतितद्योवलयविलयिताशेषदोषान्धकारम् ।
निस्तन्द्रस्तब्धविस्तारिततरपुटदृक्सर्वगीर्वाणमैशं
हस्तन्यस्तस्वहस्तप्रमथकृतहरावर्तनं नर्तनं नः ॥
भूभृद्भूभृत्प्रभूभृत्प्रमथकुलहतातोद्यभिद्यद्रुहान्तं
निर्यद्विर्यक्षवर्यध्वनिचकितसुराग्रण्यनागौपवाह्यम् ।
अव्यात्क्रव्यादहव्याशनमुनिजनहृत्पङ्कजोल्लासभास्व-
द्वृत्तं नृत्तं प्रवृत्तं दिवसपरिणतौ घूर्जटेरूर्जितं नः ॥"

986. 28. C. 43.

पञ्चाशन्निघण्टुसारः—विदग्धचूडामणिकृतः

Palm-leaf. 9 Foll. 13½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Good writing.

Breaks off in the 2nd Kāṇḍa.

Copied in disorder; beginning is found on Fol. 3*b*.

987. 28. F. 25.

पञ्चाशन्निघण्टुसारः—विदग्धचूडामणिकृतः

Palm-leaf. 5 Foll. 13 × 1¾ inches. 13 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Incomplete.

Begins with the following different verses :

वन्दारुजनमन्दारमिन्दिरानन्दकन्दलम् ।
इन्दीवरदलश्यामामिन्दुबिम्बमुखं नुमः ॥
लक्ष्मीसरस्वतीधीत्रिवर्गसंपद्विभूतिशोभासु ।
उपकरणवेषरचनाविधिषु च श्रीरिति प्रथिता ॥
अमृतं दितिजे मोक्षे यज्ञशेषेऽमराशने ।
मन्दिरः सैरिकः स्वर्गश्चावरोहः फलोदयः ॥

988. 9. F. 49.

पदसंग्रहः

Paper. 2 Foll. (36 and 37). 9 × 7¾ inches. 19 lines in a page. Telugu script. Old. Good. Good writing.

Gives in verse some selected words arranged into several groups according to their final letters.

Beginning :

मधुलिड्गोदुहौ पृष्ठवादतुराषाट्सुरद्रुहः ।
अनड्वांश्च हकारान्ताः स्युर्द्वार्वारस्तदीरतः(?) ॥
कमल्लान्तश्चतू रेफान्तः प्रशान् किमिदं तथा ।
मान्ताः सुगण् सुगाण् चेति णान्ता राजन् सुवृत्रहा ॥

End :

अधिकरणे ल्युट्प्रत्ययो यथा—राजानोऽस्यां धीयन्ते इति राजधानी । दश । पङ्क्ति । विंशति । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टि । सप्तति । अशीति । नवति । शतम् । एतानि संख्यावाचकानि नित्यबहुवचनान्तानि । शतशब्दः शतमात्रवाचित्वे नित्यैकवचनान्तः ।

Then the scribe adds :

"यादृशं पुस्तकं चैव तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥"

989. 27. F. 32.

पदसंग्रहः

Palm-leaf. 3 Foll. 16½ × 1¼ inches. 7 lines in a page. Grantha and Tamil scripts. Old. Injured. Clear writing.

Gives the Tamil meaning of some of the words selected from the Nāmaliṅgānuśāsana and other lexicons. The author's name is not known.

Beginning :

शर्वरी - *ராத்திரி* ; पौर्णमासी - *பௌர்ணமாஸ்யை* ; कुहूः *அமாவாஸ்யை* ; उपरागः-*கிரஹண*த்துக்குப்பெயர் ; मार्गशीर्षः-*மார்கழி மாதம்* ; पौषः-*தை மாதம்* ; माघः-*மாசி* ; फाल्गुनः-*பங்குனி* ; चैत्रम् -*சித்திரை* ; वैशाखम्-*வைகாசி* ; ज्येष्ठः-*ஆனி* ; आषाढः-*ஆடி* ; श्रावणः-*ஆவணி* ; भाद्रपदः-*புரட்டாசி* ; इषः-*ஐப்பசி* ; ऊर्क् *கார்த்திகை*.

End :

दस्रौ-*அச்வினீ தேவர்கள்* ; धनंजयः-*அக்னி* ; बाडबः-*படபாக்னி* ; ज्वालः-*அக்னிசிகை* ; भसितम्-*பஸ்மம்* ; दवः-*காட்டுத்தீ* ; समवर्ती-*யமன்*.

An extra leaf at the end contains a few verses found in the Naiṣadhīyacarita.

990. 28. G. 6.

पर्यायशब्दरत्नम्—धनंजयभट्टाचार्यकृतम्

Palm-leaf. 32 Foll. 16½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

The folios are numbered from 157 to 188. The folio No. 166 is broken.

This is a lexicon of synonyms by Dhanaṁjayabhaṭṭācārya. The work consists of three sargas, viz. Ūrdhvaloka, Madhyamaloka and Pātālaloka. The author describes himself as well-versed in the Śabdendusēkhara probably the same work as written by Nāgeśabhaṭṭa. Therefore the author must be later than Nāgeśa and different from the famous Dhanaṁjaya, the author of the Nighaṇṭusamaya.

Complete.

Beginning :

कैलासे शैलाभं करुणारसपूर्णचित्तकमनीयम् ।
प्रणमामि मूलकन्दं गौरीयुतवामभागमरुणाङ्गम् ॥
श्रीमद्धनंजयकविर्विबुधाग्रगण्यः
संस्तुत्यमानबुधपुंगवमङ्गलार्थैः ।
शब्देन्दुशेखरकृतिप्रविलासमान-
कीर्तिर्विपक्षपरमस्तकदत्तपादः ॥
सोऽयं समस्तजगदन्तरचिन्त्यमान-
शब्दानुशासनविचित्रपदाभिरामम् ।
सर्गत्रयानुरचितं सरसानुमोदं
निर्माति दुर्मतिविमोहकशब्दरत्नम् ॥
यच्छब्दश्रवणादेव विद्वानपि विमुह्यति ।
तैरेव कुर्वे पर्यायशब्दरत्नं मनोहरम् ॥
आः सन्तः सर्वशब्दानुशासनैर्निर्विशेषकैः ।
सुखेनैतच्छब्दरत्नं कण्ठे कुर्वन्तु कामतः ॥
ऊर्ध्वमध्यमपातालवस्तुपर्यायभासुराः ।
प्राचुर्येणात्र भण्यन्ते त्रयः सर्गा मितामिताः ॥
ऊर्ध्वं लेखगमानन्दमनन्तं सर्वगं पृथु ।
पुष्करं दुष्करं निष्कं नभः खं नभसं नभम् ॥
भगं नित्यं च नीरूपं मूलस्थानं च शाश्वतम् ।
ब्राह्मी रन्ध्रं च संपूर्णं वियद्विः खगमङ्गणम् ॥
नाकोऽम्बरं विष्णुतीर्थं निर्मोकः काञ्चुकोऽपि च ।
कर्बुरं नभसः सोमं व्योमनं पिञ्छमस्त्रियाम् ॥

End :

रक्ते तु हल्लकं रक्तसंध्यकं कमलं तथा ।
एषां कन्दे तु शालूरं शालुरं च प्रकीर्तितम् ॥
कुम्भिकौ वारिपर्णी च कुम्भिका चापि तुम्बिका ।
नलिन्यां बिसिनी प्रोक्ता कुमुदिन्यां कुमुद्वती ॥
पङ्के महोत्पलं जालं कमलं नलिनं तथा ।
सहस्रपत्रं राजीवं शतपत्रं कुशेशयम् ॥
बिसप्रसूनतोयोत्थं पुष्करं सरसीरुहम् ।
पद्ममूलदलादीनां समूहः षण्डमस्त्रियाम् ॥
पद्मपत्रे तु निःशङ्कं ब्राह्मयां वैधं च वर्तुलम् ।
इत्यादिजलनाथत्वादप्पतित्वं समुन्नयेत् ।
वक्ष्यमाणे विशेषाणामन्तः कुत्र प्रदुष्यते ॥

Colophon :

इति श्रीमज्जगदेकपण्डितसार्वभौमद्विषत्कविराजिशिरोमणिसंराजितपादपीठाग्रसमस्तविद्याधनंजयेन धनंजयभट्टाचार्येण विरचिते पर्यायशब्दरत्ने पातालल्लोकसर्गस्तृतीयः समाप्तः ।

991. 54. A. 37.

पर्यायशब्दरत्नम्—धनंजयभट्टाचार्यकृतम्

Paper. 72 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the MS. noticed in the last number.

Complete.

992. 9. F. 63.

प्राकृतपदकोशः

Paper. 115 Foll. 8 × 6 inches. 26 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a vocabulary giving Prākṛta equivalent words to some of the selected Sanskrit words found in general use.

Incomplete.

Beginning :

व्यासऋषिः-वासेसि । विषम आतपः-विसमआअवो । कविरीश्वरः-कइ ईसरो, कईसरो । वच्छाइ ।

मुद्धाइ । रामं अमलं-राममळं, रामजमळं । कही । काहिइ । द्वितीयः-वीओ, विइओ ।

End:

क्रिये-किसु । वस्सइ वस्सदि । गण्हइ गण्हदि । णिहाइ णिहआइ । घेइ । चोळ्ळइ चोळ्ळदि ॥

993. 27. E. 6.

मणिप्रवालकोशः

Palm-leaf. 5 Foll. 12 × 1⅛ inches. 7 lines in a page. Grantha and Tamil scripts. Old. Injured. Good writing.

The folios are numbered 63 to 67. Two folios are added at the end and they repeat a few verses of the work found in the former leaves.

This is a fragment of a metrical work of interesting nature giving Tamil meanings of Sanskrit words.

Wants the beginning and end.

Beginning:

दीर्घं கீட்டுமனுस्वारं
மூடும் விட்டால் विसर्ग மாம் ।
द्वित्वं ரெண்டக்ஷரம் சொல்லும்
இது லக்ஷணமிப்படி ॥
सोऽप्यवण் यस्तु யாதொர்த்தன்
இவனேष अयं तथा ।
क एवण् त्वं तु கீயாகும்.
अहं ஞானப்யஸாவிவன் ॥
உடம்பு देहं தலை उत्तमाङ्गं
तथा शिखा स्यात् குடுமீ च நெத்தி ।
ललाटமாகும் புருவம் त्वथ भ्रूः
கண் நேத்ரமாம் காதபி श्रोत्र மாகும் ॥
கன்னம் कपोलस्त्वथ நாக்கு जिह्वा
வாக் சொல்லு மூக்காவது नासिका च ।
பல்லாகுமே दन्तमथो,தடாகும்
ओष्ठं च வாய் आस्यमथाश्रु கண்ணீர் ॥

End:

மலையது गिरि யாகும் மக்ஷிக் ஈயுமாகும்
கலையது मृगமாகும் கப்புமும் நடுக்கமாகும் ।
எலியும் मूषिकமுமாகும் இரவும் रात्रियாகும்
வலையது जालமாகும் मरणமும் சாவதாமே ॥
அலையது ऊर्मியாகும் அப்பியும் கடலாகும்
நுரையது फेन மாகும் सैकतं மணலுமாகும் ।
चल மது அசைவதாகும் समूहமும் கூட்டமாகும்
முனியுமே தபசுசெய்வான் மௌனி வாய்பேசமாட்டான் ॥

994. 23. N. 15.

मेदिनी—मेदिनीकरकृता

Palm-leaf. 90 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a lexicon of homonyms written by Medinīkara son of Prāṇakara. The words are herein arranged into different groups according to their final letters and in each group they are again arranged according to the number of syllables contained. They are also arranged in the order of their initial letters. The author gives a vast list of works and authors consulted by him in writing the work. The author also describes himself as to have written another work called Saṭsata-

gāthākosa (a collection of 600 Gāthās). MM. Haraprasādas'āstri places the author in the period between 1159 to 1350 A.D. He also opines that the author's father Prāṇakara was the ruler of the Northern provinces of the Udiṣya kings of the Ganga dynasty and that the author Medinīkara founded a city after his name which city is still an important town in Bengal well known by the name Medinīpura. (Vide his preface to the Des. Cat. of Sans. MSS. in the collections of the Asiatic Society of Bengal, page 138, Vol. VI. Calcutta 1931). The work is mentioned in the colophon by the name Anekārthakosa and in the body of the work as Nānārthasamgraha. The author remarks in the following passage the Visvaprakās'a of Maheśvara (1111 A.D.) as a work full of defects *viz.* "अपि बहुदोषं विश्वप्रकाशकोशं च सुविचार्य". The work has been printed at Benares.

Complete.

Beginning :

अभिवदनकर्म कुर्मो हयवदनं सर्वदेवोत्तंसम् ।
यत्पदपरागसङ्गादपरागाजनि जनावलिश्चित्रम् ॥
पूर्वाचार्यकृतीर्वीक्ष्य शब्दशास्त्रं निरूप्य च ।
नानार्थशब्दकोशोऽयं लिङ्गभेदेन कथ्यते ॥
प्रायशो रूपभेदेन विशेषणवशात्क्वचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं विशेषोक्तेश्च कुत्रचित् ॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताद्यादि न पूर्वभाक् ॥
रूपाद्व्यक्तं लिङ्गमुक्तं लिपिभ्रान्तिच्छिदे क्वचित् ।
विशेष्यनिघ्नेऽनुक्तेऽपि विज्ञेया वाच्यलिङ्गता ॥
गुणे शुक्लादिकट्वाद्याः पुंसि स्युस्तद्वति त्रिषु ।
तीक्ष्णाद्याश्च गुणे क्लीबं गुणिलिङ्गास्तु तद्वति ॥
क्लीबपुंसोरपि स्त्रीत्वं क्वाप्यल्पत्वविवक्षया ।
जातिवाचकशब्दानामपि तत्स्त्रीविवक्षया ॥
उद्भिदः प्रसवे क्लीबे हरीतक्यादयः स्त्रियाम् ।
पुष्पे जातिप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥
प्राङ् नानार्थान्न तल्लिङ्गं द्वयोद्वन्द्वं न चैकता ।
शब्दावृत्तिर्न लिङ्गैक्ये सप्तमी न विशेषणे ॥
क्लीबे न पुंसके पुंसि स्त्रियां योषिति च द्वयोः ।
त्रिषु चेत्यादि यद्रूपं तल्लिङ्गस्यैव कारणम् ॥
